तेष्वेव परवर्तिषु महत्स्वाचार्येषु व्यावहारिकसमीक्षा-परमाचार्यः कुन्तकः प्रादुरभूत्। स तु ध्वनितत्त्वमूरीकुर्वन्नपि काव्यस्य सर्वाङ्गपूर्णं विवेचनं चिकीर्षया पूर्वाचार्यस्य भामहस्य काव्यालङ्कारतः शब्दार्थसाहित्यप्राणभूतां वक्रोक्तिं गृहीत्वा तस्या एव प्रसारं प्रबन्धेषु निरूपितवान्। भामहः खलु काव्यशास्त्रे प्रथमः शब्दार्थसाहित्यवादी आचार्यो जातः -'शब्दार्थौ सहितौ काव्यम्' (काव्यालङ्कारः १.१६) इति तस्योक्तिः। किन्तु नेदं तस्य काव्यलक्षणम्, काव्यस्य शरीरं बहिरङ्गं वा केवलं तन्निरूपयति। काव्यस्यान्तरङ्गं तु तेनाग्रे चमत्कारनिरूपकतत्त्वरूपेण प्रतिपादितम् -

**वक्राभिधेय-शब्दोक्तिरिष्टा वाचामलंकृतिः। इति।**[१]

अत्रैव शब्दार्थयोर्वक्रतायाः ध्वनिं कुन्तकः प्राप्नोत्। एतेन वक्रतासमन्वितौ शब्दार्थौ काव्यमिति भामहस्य सम्पूर्णं परिष्कृतं च काव्यलक्षणमिति फलितम्[२]। भामहमतमेव स्वयुगानुरूपेण ध्वनिकारप्रदर्शितसरण्या च सविशेषं वक्रोक्तिव्याख्यानेन कुन्तको वक्रोक्तिकाराभिधानेन साहित्यशास्त्रे यशो लेभे इति विदितचरोऽयं विषयः।

कुन्तकात्पूर्वमानन्दवर्धनाचार्य एकत्र ध्वनितत्त्वं व्याचष्टे, अपरत्र ध्वनिविरोधिनां मतानां प्रस्तुतिपुरस्सरं

निरसनमपि निरूपयतीति विषयोऽपि ज्ञातपूर्वः। किन्तु तदनु ध्वनिविरोधो नात्यन्तं शान्तः, प्रत्युत प्रमाणशास्त्रे वाक्यशास्त्रे चास्य ध्वनेर्विरोधोऽदृश्यतेति तस्य समर्थनेऽपि खण्डन-मण्डनप्रक्रिया प्रावर्तत प्रायेण त्रिषु शतकेषु। स च 'ध्वनिवादकोलाहलः' इति पण्डितेष्वद्यापि प्रचलति। ध्वनेरुग्रविरोधी महिमभट्टस्तु स्वग्रन्थस्य व्यक्तिविवेकस्योपक्रमश्लोके एवोक्तवानासीत् -

**अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।**
**व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्[३]॥**

प्रतीयमानस्यार्थस्यानुमेयत्वमेव तेन साधितम्। विशेषेण रसध्वनेरनुमेयता तेन महतोद्यमेन साधिता। वस्तुध्वनिरलङ्कारध्वनिश्च वाच्यावेव भवतोऽनुमेयौ चेति[४]। किञ्च कुन्तकसम्मतस्य काव्यलक्षणस्य निरसनं विदधता तेन वक्रोक्तेरप्यनुमानेऽन्तर्भावो दर्शितः। कालान्तरेऽनुमानवादी महिमभट्टो बहुभिर्विद्वद्भिः खण्डितोऽभूदिति नाविदितं काव्यशास्त्रविदां विदुषाम्। स्वयं व्यक्तिविवेकटीकाकृदपि तन्मतं दूषयति। महिमभट्टस्याहङ्कारमेव मन्यतेऽसौ प्रस्तुते वाक्ये -'तदेतस्य विश्वमगणनीयं मन्यमानस्य स्वात्मनः सर्वोत्कर्षशालिताख्यापनमिति।'

ध्वनिप्रतिष्ठापक-परमाचार्यत्वेन प्रतिष्ठामासवता काव्यप्रकाशकृता वाग्देवतावतारेण मम्मटाचार्येण ध्वनिविरोधिनः सर्वेऽप्याचार्या नैयायिका वा मीमांसका वा निपुणं खण्डिताः, न च ध्वनिविरोधः क्वचिदपि तदनन्तरं प्रतिष्ठितेन केनापि काव्यशास्त्रिणा प्रयतितः। एवमानन्दवर्धनाद् (८५०ई.) आरभ्य मम्मटाचार्यं(११००) यावद् ध्वनिप्रस्थानं कश्मीरप्रदेशे एव खण्डनमण्डनविधिना निरन्तरं चर्चां विवेचनं च लेभे। अभिनवगुप्तः (रचनाकालः ९९०-१०१५ई.) काश्मीरको विख्यातस्तन्त्राचार्यः साहित्यशास्त्रमनीषी चास्य ध्वनेः प्रबलो व्याख्याकारः समर्थकश्च बभूवेति ध्वनिवादस्योत्कर्षसौभाग्यम्।

वस्तुतः ध्वनिसिद्धान्तस्य भागधेयमेतद् यदानन्दवर्धनसदृशेन दार्शनिकेन प्रवर्तितः, अभिनवगुप्तपादाचार्येण सपरिकरं व्याख्यातः, नैकेषु शताब्देषु खण्डन-मण्डनमुखेन सुरक्षितः, परवर्तिभिश्चाचार्यैर्विश्वनाथप्रभृतिभिः सत्कृतः, पठनपाठनक्रमे च स्वीकृतः इति साम्प्रतमपि ध्वन्यालोकसंस्करणानि विविधाभिर्भाषाभिर्व्याख्यातानि सुलभानि विद्यन्ते। अपरत्र वक्रोक्तिसिद्धान्तः कुन्तकाभिमतः काव्यगतकविव्यापारस्य समीक्षायां पारङ्गतोऽपि सर्वैरपि परवर्तिभिराचार्यैरुपेक्षितः। ग्रन्थसुरक्षाविषयेऽपि तदीयं वक्रोक्तिजीवितं भागधेयविहीनं द्वित्रेषु हस्तलेखेष्वेव यथाकथञ्चिद्रक्षितमिति विंशतितमे शतके द्वित्राण्येव संस्करणानि तस्य ग्रन्थस्य प्रकाशनमलभन्त। सौभाग्याद् धारवाडनगरे स्थितात्कर्णाटकविश्वविद्यालयात् डॉ. कृष्णमूर्तिमहाभागेन महतोद्यमेन सुसम्पादितम् आङ्ग्लभाषानुवादसहितं च वक्रोक्तिजीवितस्य सुपरिष्कृतं संस्करणं विदुषां काव्यशास्त्रानुरागिणा-मुपकारार्थं प्राकाश्यं नीतम् (१९७७ ई.)।

किञ्च ध्वनिसिद्धान्तविषये, काव्ये ध्वनेः स्थानविषये, ध्वनिप्रकारविषये चाद्यत्वे न काचिद् भ्रान्तिर्वर्तते। अपरत्र कुन्तकाभिमताया वक्रोक्तेर्विषये परिष्कृतसंस्करणाभावे नाना मतानि काव्यशास्त्रिभिः

समीक्षकै : काव्यशास्त्रेतिहासकारैः प्रकटितानि वर्तन्ते। वस्तुतस्तस्य कारणमपि विद्यते। चतुर्षून्मेषेषु विभक्तस्य वक्रोक्तिजीवितस्याद्ययोः द्वयोरुन्मेषयोः खण्डितमपरिष्कृतं च संस्करणं डॉ. सुशीलकुमारदेव-महाभागेन त्रयोविंशत्युत्तरैकोनविंशतितमे ईसवीये वर्षे (१९२३ई.) मद्रासतो लब्धहस्तलेखप्रतिलिपिमाश्रित्य प्रकाशितम्। तदनु जैसलमेरस्थस्य जैनभण्डारस्य संरक्षणे प्राप्तस्य हस्तलेखस्यापि साहाय्येन डॉ. देवमहाभागो वक्रोक्तिजीवितस्य द्वितीयं संशोधितं परिबृंहितं च संस्करणम् अष्टाविंशत्युत्तरैकोनविंशतितमे (१९२८ई.) ई. वर्षे प्रकाशितवान्। संस्करणमिदं पूर्वतो भिन्नमेवाभूत्। अत्रांशिकः तृतीयोन्मेषः चतुर्थोन्मेषस्यापि खण्डश्चाभूताम्। तदिदं संस्करणं समालोचकै : संस्कृतकाव्यशास्त्रालोके बहु आलोचितम्। तथापि अगतिकगत्या विकल्पाभावे चेदमेव प्रमाणत्वेन गृहीतं कुन्तकविषये च भ्रान्तानां मतानां विकासे कारणीभूतम्। डॉ. कृष्णमूर्तिना नानाहस्तलेखानाश्रित्य पाठसंशोधनसिद्धान्ताँश्चालम्ब्य काव्यशास्त्रीयानि ग्रन्थान्तराणि च भूयो भूयः समीक्ष्य तोलयित्वा च यथासाध्यं शुद्धतमं सम्पूर्णस्य वक्रोक्तिजीवितस्योपर्युक्तं संस्करणं (१९७७ ई. वर्षीयं) प्रकाशितम्। तन्मध्ये एव कुन्तकविषये विविधानि मतानि विशेषतो ध्वनिसिद्धान्तसन्दर्भे प्रकाशितान्यभूवन्।

तथाहि – १. केचिदाधुनिकाः समीक्षकाः कथयन्ति – कुन्तको ध्वनिविरोधी आचार्यः। तस्य सम्पूर्णो वक्रोक्तिप्रपञ्चः (षड्विधवक्रतारूपः) सम्पूर्णं ध्वनिविस्तारं व्याप्नोति। आनन्दवर्धनेन यत्र यत्र ध्वनेरवकाशो दर्शितः तत्र तत्र वक्रोक्तिरेव समाविशति। नास्ति ध्वनेः किमपि प्रयोजनं काव्यसौन्दर्यसमीक्षायामिति।

२. अपरे आधुनिकाः समीक्षकाः कुन्तकप्रतिपादितायाः पदपूर्वार्धवक्रतायाः तृतीयं भेदमुपचारवक्रताख्यं[५] मनसि निधाय कुन्तकं भक्तिवादिनमाहुः। एतस्यैव मतस्य निर्देशः ध्वन्यालोके 'भाक्तमाहुस्तमन्ये' (१.१) इति कृत आसीत्।

३. केचित्पुनः कुन्तकस्य 'वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा'[६] इत्युक्तिं प्रमाणत्वेन मन्यमानास्तमाचार्यम् अभिधावादिनमाहुः।

एतानि सर्वाणि मतानि कुन्तकस्य स्वारस्यमप्रतियतां विदुषां वर्तन्त इति तद्विवेचनमनिवार्यं प्रतीयते यथा वक्रोक्तिसिद्धान्तस्य रहस्यं समुद्घाटितं भवेत्।

प्रथमः पक्षस्तावत् कुन्तकस्य ध्वनिविरोधित्वरूपः। डॉ. कृष्णमूर्तिः स्पष्टतया मतमिदं दूषयन्नकथयत् – इदमाधुनिकानां भ्रान्तिप्रसारणमात्रम् (canard of modern scholars)[७]। आचार्यः कुन्तकः आनन्दवर्धनस्योल्लेखं समादरणीयाभिधानेन करोति यथा –'यस्माद् ध्वनिकारेण व्यङ्ग्यव्यञ्जकभावोऽत्र सुतरां समर्थितस्तत् किं पौनरुक्त्येन' (पृ.८३, व.जी. २.९ वृत्तिभागः),'यथाभियुक्ततरैस्तैरेवाभ्यधायि – प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः। काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः (ध्वन्या.२.५)८।' इत्यादयः। अपि च कुन्तकः आनन्दवर्धनकृतानां ध्वनेरुपविभागानामनुसरणं कृतज्ञशिष्यवत् वक्रताप्रकारेषु करोति। बहून्युदाहरणान्यपि उभयोः समानान्येव वर्तन्ते। उदाहरणान्ते कृताः टिप्पण्योऽपि आनन्दवर्धन-कुन्तकग्रन्थयोः स्वारस्ये समानतां वहन्तीत्यपि स्पष्टम्। यद्यपि पूर्वाचार्यस्तान्युदाहरणानि ध्वनिसन्दर्भे व्याचष्टे, अपराचार्यस्तु वक्रोक्तिसन्दर्भे इति विशेषः। न क्वचिदपि कुन्तको ध्वनिकारं पूर्वपक्षीकृत्य निरसितुं प्रयतते। प्रत्युत

यत्राल्पोऽप्यवकाशो वक्रोक्तिकारेण लब्धस्तत्र ध्वनिकारमतमुद्धृत्य वक्रोक्तिसिद्धान्तेन स्वकीये तस्य समन्वयः कृतः। कानिचित्स्थलानि तदुपोद्बलकानि प्रदर्श्यन्ते –

(क) सुकुमारमार्गस्य माधुर्य-प्रसाद-लावण्याभिजात्यरूपाणां चतुर्णां गुणानां वर्णनक्रमेण लावण्यगुणविषयकं पूर्वपक्षं (ननु च कैश्चित् प्रतीयमानं वस्तु ललनालावण्य-साम्याल्लावण्यम् इत्युत्पादित प्रतीति)[९]समुपस्थाप्यन् ध्वन्यालोकस्य 'प्रतीयमानं पुनरन्यदेव.[१०]' इत्यादिसम्पूर्णं श्लोकमुद्धरति, परिहारं च प्रस्तौति –'नैष दोषः, यस्मादनेन दृष्टान्तेन वाच्य-वाचक-लक्षण-प्रसिद्धावयव-व्यतिरिक्तत्वेन अस्तित्वमात्रं साध्यते प्रतीयमानस्य, न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य। सहृदयहृदयानामेव संवेद्यं सत् प्रतीयमानं समीकर्तुं पार्यते। प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते।' इत्यादिना सविस्तरविवेचनेन ध्वनिकारमतं समर्थयन् स्वमतं रक्षति।

(ख) विचित्रमार्गं वर्णयता कुन्तकेन कारिकाविशेषे प्रतीयमानस्यार्थस्य महत्त्वमभ्यधायि। तद् यथा–

**प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते।**
**वाच्य-वाचक-वृत्तिभ्यां व्यतिरिक्तस्य कस्यचित्॥**

(वक्रोक्तिजीवितम् १.४०)

अस्या वृत्तिभागे कथितं तेन –यत्र यस्मिन् प्रतीयमानता गम्यमानता वाक्यार्थस्य मुख्यतया विवक्षितस्य वस्तुनः कस्यचिदनाख्येयस्य निबध्यते। कया युक्त्या? वाच्यवाचकवृत्तिभ्यां शब्दार्थशक्तिभ्यां व्यतिरिक्तस्य = तदतिरिक्तवृत्तेरन्यस्य व्यङ्ग्यभूतस्याभिव्यक्तिः क्रियते। 'वृत्ति'-शब्दोऽत्र शब्दार्थयोस्तत्प्रकाशनसामर्थ्यमभिधत्ते इति[११]। सन्दर्भोऽयं स्पष्टीकरोति यत् कुन्तकः व्यङ्ग्यार्थसत्तां स्वीकरोति, न निरस्यति।

(ग) वक्रोक्तिजीवितस्य द्वितीयोन्मेषे पदपूर्वार्धवक्रताया विवेचने कुन्तकः सामान्यतो ध्वनिकारसम्मतानां ध्वनिप्रकाराणामेव केषाञ्चन विवेचनं प्रकारान्तरेण प्रतिपादयति[१२]। तस्या वक्रतायाः प्रथमो भेदो रूढिवैचित्र्यवक्रता। शब्दस्य नियतवृत्तिता नाम धर्मो रूढिरुच्यते इति कुन्तको ब्रूते। यथा कोषे लोके वा प्रसिद्धोऽर्थः शब्दस्य। यत्र रूढेरसंभाव्यधर्माध्यारोपगर्भता प्रतीयते, सद्धर्मातिशयारोपगर्भत्वं वा प्रतीयते तत्रालौकिको गुणविशेषोत्कर्षः ख्याप्यते चेत् रूढिवैचित्र्यवक्रता भवति[१३]। लक्षणकारिकावृत्तिभागे ध्वनिकारेण विवेचितं प्रति श्रद्धोत्कर्षं दर्शयति कुन्तकः निम्नाङ्कित वाक्ये –

यस्माद् ध्वनिकारेण व्यङ्ग्य-व्यञ्जकभावोऽत्र सुतरां समर्थितस्तत् किं पौनरुक्त्येन। (वक्रोक्तिजीवितम्, पृ.८३)। किञ्चाचार्यकुन्तकेनेह श्लोकद्वयमुद्धृत्य विवेचितम् –'तदा जायन्ते गुणाः' इत्यादिः प्रथमः, 'स्निग्धश्यामलकान्तिलिप्तवियतः' इत्यादिर्द्वितीयः। उभयमपि ध्वन्यालोके अर्थान्तरसंक्रमितवाच्यध्वनेरुदाहरणरूपेण निर्दिष्टम्, कुन्तकेन तु विस्तरेण समीक्षितमुभयमिति विशेषः।

(घ) पदपूर्वार्धवक्रताया एव भेदविशेषः पर्यायवक्रता वर्तते। तस्या एव षट्सु प्रकारेषु अन्यतमोऽस्ति - रम्यच्छायान्तरस्पर्शात्तदलङ्कर्तुमीश्वरः (वक्रोक्तिजीवितम् २.१० उत्तरार्धः) अस्योदाहरणे 'इत्थं जडे जगति को नु बृहत्प्रमाणकर्णः करी'इत्यादि सुभाषितावलीपद्यं (संख्या ६२८) समुद्धृतमस्ति। तस्यान्तिमे चरणे 'मातङ्ग' शब्दो वर्तते। स च प्रस्तुते वारणमात्रे प्रवर्तते। किन्तु श्लिष्टया वृत्त्या चण्डाल-लक्षणमप्रस्तुतं वस्तु प्रत्याययति, तच्च प्रत्यायनं रूपकालङ्कारद्वारेण इह वर्तते। अत्र कुन्तकः कथयति यदयं विषयः शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्य पदध्वनेः, बहुषु चैवंविधेषु सत्सु वाक्यध्वनेर्वा। अत्र तेन ध्वन्यालोके समुदाहृतस्य बाणकृतहर्षचरितस्थग्रीष्मवर्णनवाक्यस्योदाहरणमपि दत्तम्। यथा -

'कुसुम-समयमुपसंहरन्नुत्फुल्लमल्लिका-धवलाट्टहासो व्यजृम्भत ग्रीष्माभिधानो महाकालः'(व.जी., पृ.८९, ध्वन्यालोकः (विश्वेश्वर सं.), पृ.१२५, हर्षचरितम् पृ. ७८)१४।

एवं कुन्तकविषये कथयितुं शक्यते यदसौ मुख्याया अभिधावृत्तेर्व्यतिरिक्तामपि शब्दशक्तिं स्वीकरोति यत्र सहृदयहृदयाह्लादकरो व्यङ्ग्यार्थः स्फुरति, किञ्च ध्वनिकारस्य आनन्दवर्धनस्य ग्रन्थात् श्रद्धासमन्वितं समानमुद्धरणमपि कर्तुं न सङ्कोचमनुभवति। नासौ अभिधावादीति यावत्। तं ध्वनिविरोधिनं मन्तुं नास्ति किञ्चित्प्रमाणम्।

अपरमपि किमपि निवेदनीयं विद्यते येन कुन्तकस्य ध्वनिविरोधित्वं परिहृतं स्यात्। ध्वनिसिद्धान्ते वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्चेति संकलनया त्रिविधा ध्वनयो मताः। तेष्वलङ्कारध्वनेर्निर्देशः कुन्तकेन वक्रोक्तिजीवितस्य तृतीयोन्मेषे अलंकारविवेचनप्रसङ्गे कृतः। तेन रूपकादयः प्रमुखा अलंकाराः वाच्यरूपेण प्रतीयमान- (व्यङ्ग्य) रूपेण चोल्लिखिताः। अलंकारस्य प्रतीयमानतैव ध्वनिसिद्धान्तस्यालंकारध्वनिरिति स्थितिः। एकत्र कुन्तको वक्ति -

**वाच्यं सामर्थ्यलभ्यं च प्रतीत्या च समर्पितम्।**
**अलंकृतीनामात्मानं त्रिविधं तद्विदो विदुः॥**[१५]

तत्र विवेचनक्रमे स कथयति यद् रूपकालंकारसन्दर्भे वाच्यं रूपकं समस्तवस्तुविषयं यथा भामहेनोदाहृतं पद्यं कुन्तकोऽपि प्रस्तुत्य विवेचयति विस्तरेण -

**तडिद्-वलय-कक्ष्याणां बलाका-माल-भारिणाम्।**
**पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम्॥**[१६]

पुनः सामर्थ्यलभ्यं रूपकं तु एकदेशविवर्ति इति मत्वा पूर्वं विवेचितं पद्यं निर्दिशति यथा -

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**
**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥**[१७]

ध्वन्यालोकेऽयं श्लोकः प्रथमोद्योते व्यङ्ग्यानुगतस्य वाच्यस्य प्राधान्यं प्रतिपादयितुं समासोक्तौ च ध्वनेरन्तर्भावं वारयितुमुद्धृतः।

रूपकालंकारस्य तृतीया स्थितिरस्ति - प्रतीत्या च समर्पितम् इति। अत्रैवालंकारस्य प्रतीयमानता अर्थात् अलंकारध्वनिर्ध्वनिवादिनाम्। अस्योदाहरणतया कुन्तकः पुनर्ध्वन्यालोकोदाहृतमेव१८पद्यं प्रस्तौति-

**लावण्यकान्तिपरिपूरित-दिङ्मुखेऽस्मिन्,**
**स्मेरेऽधुना तव मुखे तरलायताक्षि।**
**क्षोभं यदेति न मनागपि तेन मन्ये,**
**सुव्यक्तमेव जलराशिरयं पयोधिः॥**[१९]

अत्रानन्दवर्धनः टिप्पणीं ददाति -'एवंविधं विषयेऽनुरणनरूप-रूपकाश्रयेण काव्यचारुत्वव्यवस्थानाद् रूपकध्वनिरिति व्यपदेशो न्याय्यः।' एवमत्रालंकारध्वनिरिति यावत्। वक्रोक्तिकारोऽपि तद्वत् कथयति - 'अत्र त्वन्मुखमिन्दुरिति रूपकं प्रतीयमानतया कविनोपनिबद्धम्।' अत्र स्मरणीयः आनन्दवर्धनस्य श्लोकार्धः-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**[२०]

अतः प्रतीयमानो वा व्यङ्ग्यार्थो वा ध्वनिर्वा इति पर्यायवचने न कश्चन विरोधः। कुन्तकेन ध्वनिसिद्धान्तग्रहणे नास्ति काचिद् विप्रतिपत्तिः। विरोधस्य तु कथैव नास्ति।

साम्प्रतं 'कुन्तको भक्तिवादी अर्थात् ध्वनेरन्तर्भावं लक्षणायां करोति' इति मतं समीक्ष्यते। वस्तुतः धारणेयं वक्रोक्तिजीवितस्य प्रथमसम्पादकत्वेन ख्यातस्य विदुषो डॉ. सुशीलकुमारदेवमहाभागेन प्रवर्तिताभूत्। स्वसंस्करणभूमिकायां तेन निर्दिष्टं यत् काव्यस्य प्रधानं तत्त्वं तु कुन्तकेन वक्रोक्तिरिति गृहीतम्, ध्वनितत्त्वं गौणम् अस्तीति तन्मतम्। तस्यापि स्थितिः सैव वर्त्तते या भामहोद्भट-दण्डिवामनादीनां प्राचीनाचार्याणामिति, ये च ध्वनिविषयकं सर्वमेव विचारं पर्यायोक्त्यादिष्वलंकारेषु समाविष्टवन्तः आसन्। ध्वनेः सत्तां काव्ये स्वाधीनतया न मन्यमानः कुन्तकः वक्रोक्तेर्विविधेषु प्रकारेषु, विशेषतः उपचारवक्रतायां समावेशं ध्वनेः कर्त्तुमियेष। इत्येव कुन्तकस्य भक्तिवादित्वं सिसाधयिषितं देवमहाभागेन[२१]।

डॉ. कृष्णमूर्तिमहोदयेन मतमेतन्महता प्रमाणसन्दोहेन निरस्तमस्ति। न कुन्तको ध्वनिविषये भामहादितुल्यत्वमासादयति, न च वक्रोक्तिसिद्धान्तः कथमपि भक्तिवादस्य समर्थनं कुरुते। उपचारवक्रतायां तु वस्तुतः प्रस्तुताप्रस्तुतयोर्वस्तुनोर्मध्ये लेशेनापि साम्यसम्बन्धादभेदः तथा स्थाप्यते यद् भेदज्ञानं नश्यति। तत्त्वाध्यारोपः उपचार इति यावत्। रूपकादिष्वलंकारेषु इयं वक्रता भवति (यन्मूला सरसोल्लेखा रूपकादिरलंकृतिः)। अत्र प्रस्तुताप्रस्तुतयोर्मध्ये स्थिता भिन्नता न देशकालगता वर्तते, प्रत्युत स्वभावगतैव। विषयेऽस्मिन् कुन्तकः कथयति -सोऽयं स्वभावविप्रकर्षो विरुद्धधर्माध्यासलक्षणः पदार्थानाम्। यथा मूर्तिमत्त्वममूर्तत्वापेक्षया, द्रवत्वं च घनत्वापेक्षया, चेतनत्वमचेतनत्वापेक्षयेति[२२]।

वस्तुतो वक्रताप्रपञ्चस्य एकांशरूपैवास्ति उपचारवक्रता, न तु सर्वांशरूपा। यदि कुन्तकेन सर्वो ध्वनिप्रपञ्चः उपचारवक्रतायां समावेशितः स्यात्तदैवायं भक्तिवादीति अभिधीयेत, नान्यथा। आनन्दवर्धनोऽपि स्वयं ध्वनेर्भेदं लक्षणामूलमिति स्वीकृतवानासीत्। अपरत्र पश्यामो वयं यत्कुन्तको ध्वनेः सर्वानपि भेदान्

वक्रताया भेदेषु यथाकथमपि दर्शयत्येव। अतएव कमपि एकं वक्रताभेदं लक्षणाभिमुखमवलोक्य सर्वान् वक्रताप्रकारान् ध्वनिप्रकारान् वा लक्षणायां समावेशितुम् अविचारितधारणैव वर्तते।

ये तु कुन्तकम् अभिधावादिनं साधयन्ति ते वक्रोक्तिजीवितस्य किञ्चिद् वाक्यमबुध्यमाना एवैवं कथयन्ति। तथाहि – कुन्तकः वक्रोक्तिलक्षणकारिकायां 'वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते' इति कथयित्वा तद्वृत्तिप्रसंगे निरूपयति –'वक्रोक्तिः प्रसिद्धाभिधान–व्यतिरेकिणी विचित्रैवाभिधा' इति। तत्र 'अभिधा' शब्दं विलोक्यैते अभिधावृत्तिं बुध्यन्ते, कथयन्ति च यत् कुन्तकः अभिधायामेव सर्वं काव्यसंसारं पश्यति। साभिधा विचित्राऽपि कामं स्यात्, किन्तु वर्तते अभिधावृत्तिरेव। अत्रोच्यते –अभिधाशब्दः अभिधानं प्रतिपादनं वा ब्रूते, न तु अभिधाशक्तिम्। काव्ये सौन्दर्यं विचित्राभिधानेन अर्थात् प्रतिपादनस्य वैचित्र्यपूर्णया भङ्ग्या समायाति। अभिधा अत्र कविव्यापारस्य पर्यायरूपेण प्रयुक्ता तिष्ठति। अन्येऽपि केचिदाचार्याः 'विशिष्टा अभिधा' इति प्रयुक्तवन्तः। सा च न प्रसिद्धा वाच्यवाचकभावरूपा। प्रत्युत लक्षणा–व्यञ्जनयोरपि समाहारं कर्तुं क्षमा।

अत्र विशेषणावधेयं यत् कुन्तकः वाच्यवाचकयोः परमार्थं प्रस्तुवन् कथयति –

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥**[२३]

अस्याः कारिकाया वृत्तिभागेऽसौ वाच्यवाचकाभ्यां व्यङ्ग्य–व्यञ्जकयोरपि संग्रहं करोति। तथाहि –ननु च द्योतक–व्यञ्जकावपि शब्दौ संभवतः, तदसंग्रहान्नाव्याप्तिः, यस्माद् अर्थप्रतीतिकारित्व–सामान्यादुपचारात् तावपि वाचकावेव। एवं द्योत्य–व्यङ्ग्ययोरप्यर्थयोः प्रत्येयत्वसामान्याद् उपचाराद् वाच्यत्वमेव।........अस्मिन् अलौकिके काव्यमार्गे कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणः परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः।

एवं स्पष्टतः कुन्तकः व्यङ्ग्य–व्यञ्जकभावरूपं शब्दव्यापारं व्यञ्जनाख्यं स्वीकरोति। न कुन्तकः अभिधावादी, प्रत्युत वक्रोक्तिवादे काव्यशरीरं कविव्यापारं सर्वाङ्गपूर्णं साकल्येन व्याचष्टे इति तस्य वैशिष्ट्यम्।

ध्वनिसिद्धान्तो यथा अभिधामूलध्वनिभेदरूपस्यालक्ष्यक्रमव्यङ्ग्यस्य प्रकाशनं मन्यते वर्णादिषु प्रबन्धान्तेषु, तथा कुन्तकोऽपि वक्रोक्तिसिद्धान्तस्य विस्तारं वर्णवक्रताया आरभ्य प्रबन्धवक्रतां यावत् षट्सु वक्रतासु करोति ध्वनिसिद्धान्तप्रतिरूपकत्वेन। कुन्तकसम्मतास्तिस्रो वक्रताः (अर्थात् वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, पदपरार्धवक्रता च सभेदाः) यदि साकल्येन विचार्यन्ते तदा सर्वाः खलु पदवक्रतान्तर्गताः स्थूलरूपेण। तास्वेव ध्वन्यालोकोदाहृतपद्यैः क्वचित् क्वचित् कुन्तकः संवृतिवक्रतामुपसर्गनिपातवक्रतां वृत्तिवैचित्र्यवक्रतां कालवैचित्र्यवक्रतां कारकवक्रतां संख्यावक्रतां च व्याचष्टे। पद्यानि तु विशेषेण पदकृत्यप्रकारेण तेषां सौन्दर्यविश्लेषणेन विवेचयतीति विशेषं प्राप्नुमः।

किञ्च कुन्तकदर्शितयोः प्रकरण–प्रबन्धवक्रतयोः पूर्णतो रसध्वनिर्विवेचित एव प्रकारान्तरेण। तत्र कविव्यापारं कविकर्म वा, व्यङ्ग्यार्थं (ध्वन्यर्थं) मनसिकृत्य, निपुणं निरूपयति वक्रोक्तिकारः। तस्य दृष्टिः

काव्यतत्त्वापेक्षया कविकौशलस्य वैचित्र्यमेव दर्शयितुं विद्यते येनेतिवृत्तसंविधानं रसपेशलं सहृदयहृदयाह्लादकरं प्रस्तूयते। यथा प्रकरणवक्रतायाः प्रकारविशेष्यं (षष्ठं) समुन्मीलयन् कुन्तको वक्ति-

**यत्राङ्गिरस-निष्यन्द-निकषः कोऽपि लक्ष्यते।**
**पूर्वोत्तरैरसम्पाद्यः साङ्कादेः कापि वक्रता॥**[२४]

अर्थात् यत्र कविः एतादृशस्य प्रकरणस्य सन्निवेशं करोति यत् सम्पूर्णस्य प्रबन्धस्य (नाटकस्य महाकाव्यस्य वा) अङ्गिनी रसस्य प्रवाहे उत्कृष्टोऽनन्यो वा सहायकः सन् प्रधानरसस्य निकषरूपस्तिष्ठति। तत्र विक्रमोर्वशीयस्य चतुर्थाङ्कादुन्मत्तसंज्ञकादुदाहरणं विवेचितं विस्तरेण तेन। कथितं च - प्रधानरस-सर्वस्वक्रीडानिकेतनं तत्किमपि प्रकरणं यत्र प्रकटतरं च वक्रताविच्छित्तिर्विद्योतते।[२५]

अपि च, प्रबन्धवक्रतायां कुन्तकः प्रबन्धविन्यासे कवेः कौशलं व्यापारविशेषं वर्णयति। तत्रापि रसचर्चां कुर्वन् रसोद्भावने कविः मूलकथानकगतं रसं सर्वथोपेक्ष्य स्वप्रतिभया कल्पनातिशयेन वा सहृदयहृदयाह्लादकरं कमपि कमनीयं रसमुपस्थापयति -

**इतिवृत्तान्यथावृत्त-रससम्पदुपेक्षया।**
**रसान्तरेण रम्येण यत्र निर्वहणं भवेत्॥**[२६]

ध्वन्यालोकेऽपि प्रायशस्तद्रूपेणैवानन्दवर्धनः कवीनां कृते उपदिशति -इदमपरं प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनम्। इतिवृत्तवशायातां कथञ्चिद् रसाननुगुणां स्थितिं त्यक्त्वा पुनरुत्प्रेक्ष्यापि अन्तरा अभीष्टरसोचितकथोन्नयो विधेयः। यथा कालिदास-प्रबन्धेषु[२७]। प्रबन्धविरचने आनन्दवर्धनः पूर्वमहाकवीनामादर्शेन भाविनः कवीनुपदिशति, कुन्तकस्तु पूर्वकवीनामेव प्रबन्धरचनाकौशलं समालोचयति इति तयोर्भिन्नताऽत्र स्फुटीभवति।

कुन्तकस्य सूक्ष्मानुशीलनेनानुमीयते यद् वक्रतां प्रति सत्यपि विशिष्टाभिनिवेशे कुन्तको ध्वनिसिद्धान्तं साकल्येन स्वीकरोति। तस्य वक्रोक्तिजीवितं ध्वनिसिद्धान्तस्यैव वक्रोक्तिमूलं विवरणमिव प्रतीयते। सहृदयश्लाघ्यतामर्थस्य यथानन्दवर्धनः स्वीकरोति (ध्वन्यालोकः १.२ योऽर्थ सहृदयश्लाघ्यः), तथा कुन्तकोऽपि मन्यते कथयति च - अर्थः सहृदयाह्लादकारि-स्वस्पन्दसुन्दरः (व.जी. १.९ उत्तरार्धः)। आनन्दवर्धनेनात्र सूत्रभावमभ्यधायि, किन्तु कुन्तकेन कारिकायां विवृतं तत्, वृत्तिभागे सुतरां स्पष्टीकृतमपि। काव्यार्थः तद्विदामानन्दं करोति,स्वस्पन्देन आत्मीयस्वभावेन च सुन्दरः सुकुमारोऽपि भवति। इत्येतद् विवरणरूपमेव काव्यार्थस्येति मन्यामहे।

कविव्यापारं मुख्यतया समालोचयितुं कुन्तकः काव्यगतशब्दस्य काव्यार्थस्य च नवनवां विवृतिं प्रस्तुवन् संस्कृतसाहित्यशास्त्रेऽनुपमं स्थानमासादयति। अन्येषु शब्देषु सत्स्वपि कविः स्वकौशलेन प्रतिभया वा यं शब्दं विवक्षितं पदार्थं बोधयितुं चिनोति स एव काव्ये शब्दः इति। एवमेव यस्यार्थस्य सहृदयाह्लादसामर्थ्यं संभाव्यते येन च स्वभावमहत्ता रसपरिपोषाङ्गत्वं प्रकाशनं सति आसाद्येत स एव काव्यस्यार्थः।

नैतदुभयमभिधामात्रपरितुष्टानां जनानां व्यापारेषु सम्भवति। अनयोः शब्दार्थयोः साहित्यम् अलोकसामान्या अवस्थितिः परस्परस्पर्धित्वरमणीया अर्थात् न कश्चित् (शब्दो वा अर्थो वा) न्यूनः निकृष्टः न च अतिरिक्तसौन्दर्यवान् उत्कृष्टः वा वर्तेत। इयमेवावस्थितिः सहृदयानन्दकारिणी। अत्र साहित्यं लिलक्षयिषुः कुन्तकः एकस्मिन् विवरणश्लोकेऽपि उपर्युक्तं भावं प्रकाशयति –

**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।**
**स्पर्धया विद्यते यत्र यथास्वमुभयोरपि॥**[२८]

शब्दार्थसाहित्यस्योद्देश्यं रसपरिपोषणमिति स्पष्टम्। सहृदयहृदयाह्लादेन तदेव लिलक्षयिषितम्। आह्लादः आनन्दः रसः इति पर्यायरूपेण कुन्तकोऽपि प्रेक्षते इति तद्ग्रन्थानुशीलनेन ज्ञायते। अयमाह्लादो नाभिधया न च लक्षणया शक्त्या तथा लभ्येत यथा व्यञ्जनया प्रतीयमानार्थबोधिन्या। सामान्य-वाच्यवाचकवृत्तिभ्यां पृथगेव प्रतीयमानोऽर्थः ज्ञायते रसादिरूपः इति वक्रोक्तिकारस्य सम्मतिर्वर्तते। विचित्राभिधानं काव्यमार्गं वर्णयन्नसौ कथयति कारिकाविशेषे –

**प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते।**
**वाच्य-वाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित्॥**[२९]

अत्र व्यतिरिक्तशब्दं कुन्तकः इत्थं व्याचष्टे –'व्यतिरिक्तस्य तदतिरिक्तवृत्तेरन्यस्य व्यङ्ग्यभूतस्य अभिव्यक्तिः क्रियते।'वृत्ति'-शब्दोऽत्र शब्दार्थयोस्तत्प्रकाशनसामर्थ्यमभिधाने[३०]।' रसाभिव्यञ्जको वाक्यार्थस्तु प्रतीयमानताविषय एवेति, न सामान्यः।

काव्यप्रयोजननिरूपणावसरे कुन्तकः काव्यामृतरसमेव काव्यस्य परमं लक्ष्यं मन्यते यथा –

**चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।**
**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥**[३१]

किञ्च वक्रोक्तिजीवितप्रणयनस्य लक्ष्यमपि लोकोत्तरचमत्कारस्य सिद्धिमेव मन्यते वक्रोक्तिकारः।

**लोकोत्तर-चमत्कार-कारि-वैचित्र्य-सिद्धये।**
**काव्यस्यायमलंकारः कोऽप्यपूर्वो विधीयते॥**[३२]

वैचित्र्यमेवेह वक्रोक्तिर्विद्यते यां च भामहात् काव्यालंकारस्य सर्वस्वत्वेन कुन्तको लभते। किन्तु तन्मात्रेणैवासन्तुष्टः असौ वक्रोक्तिं लोकोत्तरचमत्कारपर्यन्तामुपस्थाप्य सहृदयानाम् आह्लादं यावत् गत्वा रसतत्त्वेन तत्सम्बन्धमस्थापयत्[३३]।

अपि च, कुन्तको वर्णविन्यासवक्रताया विवरणप्रसङ्गे 'प्रस्तुतौचित्यं' निरूपयन् वस्तुतो रसौचित्यमेव निर्दिशतीति पण्डिताः कथयन्ति। तदानन्दवर्धनेनापि प्रसङ्गान्तरे चर्चितं यथा –

**'प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा।**[३४]**'**

यादृशो रसस्तादृशा एव वर्णाः प्रयोक्तव्या इति कवेर्वर्णविन्यासकौशलं श्लाघनीयं भवति। एवमेव पदपूर्वार्धवक्रताया भेदविशेषरूपाया विशेषणवक्रताया निरूपणावसरेऽपि कुन्तको मन्यते यत् प्रस्तुतौचित्यानुसारि विशेषणवक्रत्वं सकलसत्काव्यजीवितत्वेन लक्ष्यते, अनेनैव च रसः परां परिपोषपदवीमवतार्यते[३५]।

कुन्तकः काव्यस्य द्विविधं विषयवस्तु मन्यते – स्वभावप्रधानं रसप्रधानं चेति। तत्र स्वभावप्रधानं काव्यवस्तु रसाभिव्यञ्जकतामेवान्ततः आश्रयते। अतः काव्यार्थमात्रमाह्लादरूपं भवति रसरूपमित्यर्थः। तस्य वक्रोक्तिकारवचनेन समर्थनं भवति। तथा हि –

**निरन्तर-रसोद्गार-गर्भ-सन्दर्भ-निर्भराः।**
**गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः॥**

(व. जी. ४.४ वृत्तौ अन्तरश्लोकः)

रसविषयकं कुन्तकमतं तथैव वर्तते यथा ध्वनिवादिनामस्ति यत् विभावादिभिर्व्यक्तो रत्यादिः रसत्वमाप्नोति। तृतीयोन्मेषे (३.७वृत्तौ) स कथयति –प्रत्यग्रता–मनोहरो यो रत्यादिः स्थायिभावस्तस्य परिपोषः शृङ्गारप्रभृतिरसत्वापादनम्, 'स्थाय्येव रसो भवेत्' इति न्यायात्। अपि चात्रैव तापसवत्सराजनामकस्य नाटकस्य द्वितीयाङ्कात् वत्सराजस्य परिदेवनारूपं पद्यं 'धारावेश्म विलोक्य दीनवदनो–भ्रान्त्वा च लीलागृहात्' इत्यादि सम्पूर्णमुद्धृत्य कुन्तको वक्ति यत् (करुणरसानुकूलः) रसपरिपोष–निबन्धन–विभावादि–संपत्समुदयः कविना सुतरां समुज्जृम्भितः[३६]।

वस्तुतो वक्रतामुखेन कविव्यापारस्य महत्त्वमाकलयता कुन्तकेन काव्ये चमत्कारस्य प्राधान्यं दर्शितम्। सोऽयं चमत्कारो नास्ति वाग्वैचित्र्यरूपमात्रः प्रत्युत रसपरिपोषजन्यश्चमत्कारः। ध्वनिसिद्धान्तेऽपि रसध्वनिः काव्योत्कर्षं सूचयति यत्र कुन्तकस्य सहमतिर्वर्तते। ध्वनिकारः कथयति –

**कथाशरीरमुत्पाद्य वस्तु कार्यं तथा तथा।**
**यथा रसमयं सर्वमेव तत्प्रतिभासते॥**[३७]

कुन्तकस्योपर्युक्तं वचनं 'गिरः कवीनां जीवन्ति' इति तत्समर्थयति।

ध्वनिकारवक्रोक्तिकारयोः सूक्ष्मया तुलनामूलकसमीक्षया तथ्यमेतत् स्पष्टीभवति यद् ध्वनिकारः काव्यात्मदृष्ट्या काव्यस्य सर्वाण्यङ्गानि विवेचयति यतो ध्वनिमेव काव्यात्मानं मन्यते। अपरत्र वक्रोक्तिकारः काव्यनिर्माणाय कविः कीदृशं व्यापारं निर्माणकौशलं प्रदर्शयति – इत्येव विचारितवान्। प्रतीयमानमर्थं कुन्तकः सर्वथा स्वीकरोति। तत्र च रसस्य स्थानमुत्कृष्टप्रतीयमानार्थरूपेण सहृदयहृदयाह्लादत्वेन यत्र तत्र स्वग्रन्थे निरूपयति। किन्तर्हि? तथाभूतस्य प्रतीयमानार्थप्रधानस्य काव्यस्य (= ध्वनिकाव्यस्य) रचनायां वर्णविन्यासादारभ्य प्रबन्धसंघटनान्तं कविः शब्दार्थगुणादितत्त्वानां सम्यक् संनिवेशं विदध्याद् येन सहृदयहृदयेष्वानन्दं जनयेत्। यदि 'कवेः कर्म काव्यम्' इति कथ्यते तदा तस्य कर्मणः सम्यक् समीक्षा भवेत्, तदर्थं च कश्चन प्रशिक्षणग्रन्थः अपेक्षितः। यत् तु राजशेखर–क्षेमेन्द्रादिभिः कविशिक्षाग्रन्था रचिताः

सन्ति तेऽपि कविव्यापारं न समीक्षन्ते। बाह्यानुपदेशानेव धारयन्ति। वर्णविन्यासे पदविन्यासे वाक्यविन्यासे, प्रकरण-संघटने, सम्पूर्णप्रबन्धस्य च निर्माणे कवेः कौशलं च व्यवहाररूपेण समीक्षमाणः काव्यशास्त्रीयो ग्रन्थोऽनन्यरूपेण कुन्तकस्य वक्रोक्तिजीवितमेव।

यद्यपि ध्वनेः स्थाने वक्रोक्तिर्न तिष्ठति तथाप्यनयोर्न पारस्परिको विरोधः। येन कविव्यापारेण काव्यस्य सफला संरचना भवति स एव वक्रोक्तिपदवाच्यः। यश्च रसादिरूपः तेनाभिव्यक्तः सन् सहृदयहृदयान्यपूर्वानन्देन आप्लावयति स एव ध्वनिपदवाच्यः[३८]। वक्रोक्तिः काव्यस्य जीवितं जीवनाधायकं प्राणतत्त्वम्। ध्वनिस्तु नूनमात्मेति। यथा प्राणात्मनोर्मिथः सहावस्थितिस्तथैव ध्वनिवक्रोक्त्योरपि इति ध्यातव्यं तत्त्वविद्भिः।

निबन्धस्यास्य प्राक्कथने कुन्तकस्य चर्चा व्यावहारिकसमीक्षायाः (Practical Criticism)परमाचार्यत्वेन कृतास्ति। पाश्चात्त्यसमीक्षाशास्त्रे इदम्प्रथमतया टी.एस.ईलियट् महोदयः त्रिंशदुत्तरैकोनविंशतितमे खृष्टाब्दे (१९३० ए.डी.) व्यावहारिक-समीक्षाविषयकं ग्रन्थं प्रकाशितवानासीत्। किन्तु भारतीयसाहित्यशास्त्रे सेयं समीक्षारीतिः दशमशतके एवागता कुन्तकग्रन्थेनेति गौरवास्पदम्। कुन्तकः एवानन्यरूपेणैतादृशः काव्यशास्त्री वर्तते यः संस्कृतसाहित्यस्य प्रायेण सर्वेषां मुख्यानां कवीनां नाट्यकाराणां च साहित्यिकं कौशलं समालोचनात्मकेन समीक्षणेन न्यरूपयत्। कालिदास-भारवि-माघ-विशाखदत्त-भवभूति-भट्टनारायणसदृशाणां ग्रन्थकाराणां सामान्यानां च कतिपयानां सोदाहरणं समीक्षा तेन प्रस्तुता वर्तते। कुत्र श्लाघ्यं कुत्र च दोषावहं स्थलमिति मार्गविवेचने गुणविवेचने षड्विधवक्रताविवेचने च सर्वं साहित्यसौन्दर्यगर्भितैर्वाक्यैः सुष्ठु समीक्षितं वक्रोक्तिकारेणेति तस्य विशेषो न विस्मरणीयः।

कुन्तको ध्वनिकारस्य समर्थः उत्तराधिकारीति घोषयितुं शक्यते। संस्कृतसमीक्षायाः नव्यनव्यां दिशं दिदर्शयिषुरसौ ध्वनिसिद्धान्तेऽपि परिवृत्तिं प्रत्यपादयत्। यथा - ध्वनिकारेण काव्यगुणाः रसधर्मतया निर्दिष्टाः, कुन्तकस्तु गुणस्थाने मार्गशब्दं निर्दिश्य तान् कविस्वभावभेदनिबन्धनत्वेन[३९]सर्वान् (सुकुमार-विचित्र-मध्यमाख्यान्) समानानेव, न तारतम्यवतोऽमन्यत। तस्य स्थानं संस्कृतसाहित्यशास्त्रे प्रथमकोटिकसमीक्षकत्वेन सुरक्षितो वर्तते।

**सन्दर्भाः -**


१. भामहः - काव्यालंकारः १.३६
२. देवेन्द्रनाथशर्मा - काव्यालंकारभूमिका, पृ.६
३. महिमभट्टः - व्यक्तिविवेकः १.१
४. व्यक्तिविवेकः, पृ. ११८
५. वक्रोक्तिजीवितम् २.१२-१३ यत्र दूरान्तरे.....उपचारप्रधानासौ वक्रताकाचिदुच्यते॥
६. वक्रोक्तिजीवितम् १.१० इत्यत्र वृत्तिभागः
७. डॉ. के. कृष्णमूर्तिः - वक्रोक्तिजीवितसंस्करणस्य आंग्लभाषाभूमिका, पृ. १६
८. वक्रोक्तिजीवितम् ३.११ वृत्तिभागे (धारवाडसंस्करणे, पृ.१४९)
९. वक्रोक्तिजीवितम् १.३३ वृत्तिभागे (पृ.५१)

१०.	ध्वन्यालोकः १.४
११.	वक्रोक्तिजीवितम्, पृ.५९
१२.	डॉ. हेमा आत्मनाथन् – अलंकारशास्त्र में आचार्य कुन्तक की देन (सं.सं.विश्व,वाराणसी,१९९१) पृ.८४
१३.	वक्रोक्तिजीवितम् २.८-९
१४.	उद्धरणांशे त्रिषु ग्रन्थेषु पाठभेदः। उपरि वक्रोक्तिजीवितोद्धरणपाठः।
१५.	वक्रोक्तिजीवितम् ३.२३
१६.	भामहः, काव्यालंकारः २.२४
१७.	वक्रोक्तिजीवितम् ३.१६ वृत्तिभागे।
१८.	ध्वन्यालोकः २.२७वृत्तौ
१९.	वक्रोक्तिजीवितम् ३.२३ कारिकाया वृत्तिभागे
२०.	ध्वन्यालोकः १.४ (पूर्वार्धः)
२१.	डॉ.एस.के.डे – वक्रोक्तिजीवितम्(द्वितीयं संस्करणम्, १९६१ई.), आंग्लभाषाभूमिका, पृ. ४२-४
२२.	वक्रोक्तिजीवितम् २.१४ वृत्तिभागे (पृ.९३)
२३.	वक्रोक्तिजीवितम् १.८
२४.	वक्रोक्तिजीवितम् ४.१०
२५.	तत्रैव, वृत्तिभागे
२६.	वक्रोक्तिजीवितम् ४.१६
२७.	ध्वन्यालोकः ३.११ वृत्तिभागः। मूलकारिका तु – इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम्। उत्प्रेक्ष्याप्यन्तराभीष्ट-रसोचित-कथोन्नयः॥
२८.	वक्रोक्तिजीवितम् १.१७ इत्यस्या वृत्तिभागे दत्तं पद्यम्(सं.३५), पृ.२५ (धारवाडसंस्करणम्)
२९.	वक्रोक्तिजीवितम् १.४०
३०.	तत्रैव वृत्तिभागे, पृ. ५९
३१.	वक्रोक्तिजीवितम् १.५
३२.	तत्रैव१.२
३३.	हेमा आत्मनाथन् – अलंकारशास्त्र में आचार्य कुन्तक की देन, पृ. १८८-९
३४.	ध्वन्यालोकः३.१४ वृत्तिभागे
३५.	वक्रोक्तिजीवितम् २.१५ वृत्तिभागे, पृ.९८
३६.	वक्रोक्तिजीवितम् ३.७ वृत्तिभागे श्लो.२७, पृ.१३९
३७.	ध्वन्यालोकः ३.१४ वृत्तिभागे परिकरश्लोकः
३८.	तुलनीयम् – डॉ. विश्वनाथभट्टाचार्यस्य प्राक्कथनम्, पृ. ५ (हेमा आत्मनाथन् महाभागायाः उपर्युक्ते ग्रन्थे)
३९.	वक्रोक्तिजीवितम् १.२४ वृत्तिभागे, पृ.४१

*अध्यक्षचरः, संस्कृतविभागः*
*पटनाविश्वविद्यालयः, पटना*

# चान्द्रमासव्यवस्था

डॉ. रामचन्द्रझाः

सूर्यचन्द्रयोरन्तरांशस्य द्वादशभागतुल्या तिथिर्भवति। तिथिभोगकालश्चान्द्रदिनं स्यात्। तादृक् त्रिंशत्तिथिभोगकालश्चान्द्रमासो भवति। यथोक्तं सूर्यसिद्धान्ते -

**खाश्विशैलास्तथा तिथेः, ऐन्दवस्तिथिभिस्तद्वत्।**[1]

अयं चान्द्रमासो द्विविधो भवति - कृष्णादि-शुक्लादिभेदेन। तत्र चित्रा पूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य[2], फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत। मुखं वा एतत्संवत्सरस्य[3] तथा च फाल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य यत्फाल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्त इति। एषाह संवत्सरस्य प्रथमा एभिर्या फाल्गुनी पूर्णमासी[4] इत्यादि श्रुतिवाक्यैरपि च -

**अथ भाद्रपदेमासि कृष्णाष्टम्यां कलौ युगे।**
**अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः॥**[5]

एवञ्च -

**आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः।**
**श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा॥**[6]

इत्यादिस्मृतिवाक्यैश्च कृष्णादिचान्द्रमासोल्लेखो दृश्यते। अस्मात्कारणात् तस्मान्मासपदस्य चैत्रादिशब्दस्य चास्ति कृष्णादौ मासे रूढिः[7] इति वचनं मासमीमांसायाः साधु सङ्गच्छते। पुनस्तथैव पूर्णो मासोऽस्मिन्, नक्षत्रेण युक्तः कालः, सास्मिन् पौर्णमासीति च शब्दशास्त्रव्यवस्थाबलेन कृत्तिकादि-नक्षत्रशब्दोऽपि कृत्तिकादियुक्तपूर्णचन्द्रोपलक्षित-तिथिघटितमासं सूचयति। अतएव लघुहारीतेन -

**चक्रवत्परिवर्त्तेत कालः सूर्यवशमद्यतः।**
**अतः संवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम्॥**
**मासचिह्नन्तु कर्त्तव्यं पौषमाघाद्यमेवहि।**
**यतस्तत्र विधानेन मासः स परिकीर्त्तितः॥**

इत्युक्त्वा सांवत्सरिकादौ मृततिथिव्यभिचारिणं सौरमासमपहाय नक्षत्र-पूर्णचन्द्रघटित-कृष्णादिपूर्णिमान्तचान्द्रमासव्यवस्था निरूपिता अस्मात्कारणात् -

**मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि।**
**प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया बुधैः॥**
**क्वचित् त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम्।**[८]

इत्यादि व्यास-लघुहारीतवचनं सम्यक् संगच्छते।

अथ चाश्विन्यादिनक्षत्राधिष्ठितस्य पश्चिमाभिमुखप्रवहनशीलस्य प्रवहवायुगोलस्य मुख्यतया द्वादशभागाः सन्ति। तेषु प्रत्येकं कस्यचिन्नक्षत्रस्याधिष्ठानतया मुख्यरूपेण प्रसिद्धाः सन्ति। तद्यथा - रेवत्यश्विनीभरणीनक्षत्राधिष्ठानं प्रधानतया अश्विन्यधिष्ठानतया, कृत्तिकारोहिणीनक्षत्रयोरधिष्ठानं कृत्तिकाधिष्ठानतया, मृगशिरार्द्रयोरधिष्ठानं मृगशिरोधिष्ठानतया, पुनर्वसुपुष्ययोरधिष्ठानं पुष्याधिष्ठानतया विज्ञायते। तत्राश्विनी-कृत्तिका-मृगशिरा-पुष्याधिष्ठानगतचन्द्रसंयोगेन सम्पद्यमाना मासाः क्रमेणाश्विन-कार्त्तिक-मार्ग-पौषसंज्ञका भवन्ति। एवमेवाग्रेऽपि मघाद्यधिष्ठानादिवशेन माघादिमासाः स्युः। अतएव -

**कार्तिक्यादिषु संयोगे कृत्तिकादिद्वयन्द्वयम्।**
**अनयोपानयौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्॥**[९]

अर्थात् कार्तिकादिमासानां पूर्णिमासु कृत्तिकादि द्वयं द्वयं नक्षत्रं स्मृतम् किन्तु अन्त्य आश्विनः, उपान्त्यो भाद्रपदः, पञ्चमः फाल्गुनश्चेति मासत्रयं नक्षत्रत्रयेण संबद्धं विद्यते। तेन पूर्वोत्तरफल्गुनीहस्तैः फाल्गुनः, शतभिषापूर्वोत्तरभाद्रैः भाद्रपदः, रेवत्यश्विनीभरणीनक्षत्रैः आश्विन इति। आभिर्व्यवस्थाभिः कृष्णादिमाससिद्धिः सम्यक् संजायते। तस्माद् व्रतसंकल्पक्षयाहादयः कृष्णादिचान्द्रमासानुरोधेन सम्पद्यते।

अथेदानीं शुक्लादिमासपक्षे विचारो विधीयते। तत्र -

**इन्द्राग्नी यत्र हूयेते मासादिस्स प्रकीर्त्तितः।**
**अग्निषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ॥**[१०]

इति लघुहारीतवचनेन इन्द्राग्नी दर्शदेवते यत्र हूयेते स शुक्लप्रतिपद्रूपो मासादिः, अग्निषोमौ पूर्णमासदेवौ मध्ये पूर्णिमान्ते, समाप्तौ अमान्ते पितृसोमौ देवावुद्दिश्य यत्र हूयेते तत्राभावास्यायां मासस्समाप्यते। तेनात्र स्पष्टमेव दृश्यते शुक्लादिचान्द्रमासोल्लेखः। पुनस्तदग्रे -

**तमतिक्रम्य तु रविर्यदा गच्छेत्कदाचन।**
**अद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः॥**[११]

इत्यनेन मलमासप्रतिपादकवचनेनाप्याद्यस्य सङ्क्रमणरहितस्य शुक्लादिमासस्य मलिम्लुचत्वं द्वितीयस्य तु सूर्यसंक्रमणसहितस्य प्राकृतत्वं शुद्धत्वं कर्मार्हत्वं वेति शुक्लाद्यनुरोधेन मलमासादय इति।

सौरवर्षे सर्वदा सौरमासा द्वादश भवन्ति, परञ्च चान्द्रमासा द्वादश त्रयोदश वा भवन्ति। यथोक्तं ऋग्वेदे –

**वेदमासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते।**[१२]
**द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परिधामृतस्य।**
**आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः।**[१३]

द्वादशमासाः संवत्सरस्त्रयोदशमासाः संवत्सर इति श्रुतेः। त्रयोदशस्तु श्रुतिराहमासाश्चतुर्दशः क्वापि न चास्ति दृष्टः इति भीम पराक्रमधृतस्मृतेश्च। (कृत्यसारसमुच्चये, मलमासप्रकरणे पृ.६३)। एतेन वर्षस्य द्वादशमासघटितत्वं त्रयोदशमासघटितत्वं वा सिद्ध्यति।

अथ दर्शमग्रतः सङ्क्रमणकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम् इति भास्कराचार्यवचन (सि.शि. गोलाध्याये, म. गतिवासनायो श्लो.१६) बलेन अमान्तसंक्रान्तिमध्यवर्त्तिकालोऽधिशेष उच्यते। तत्रैक सौरमासे ३०२६१६३१५२३० सावनदिनानि, चान्द्रमासे २७३१५० सावनदिनानि च भवन्ति। अनयोरन्तर ०५४२७३१५२३० दिनादिकमधिशेषं प्रतिमासं वर्द्धितं सत् सार्द्धद्वात्रिंशन्मासासन्ने मध्यममानेन मासतुल्यं भवति। तेन तदासन्ने अधिमासः प्रजायते। अतएव यद्यनेन सौरचान्द्रान्तरेण कुहिनात्मकेन ०५४२७३१५२३० एकः सौरो मासो भवति तदा चान्द्रमासान्तः पातिभिः कुदिनैः २७३१५० कियन्त इति फलं सूर्यमासाः ३२१५३१२८४७। इत्युक्तं युक्तियुक्तं भास्करेण। (तत्रैव श्लो. १०-११ वासनाभाष्ये) स्पष्टमानेन तु २७ मासतः ३६ मासाभ्यन्तरे अधिमासपातः स्यात्। सामान्यतया यद्वर्षे वैशाखकृष्णनवम्यादौ मेषार्कसंक्रमणं भवति तद्वर्षेऽस्य संभवो भवति। एतत्साधनं करणग्रन्थेषु विहितम्। तथाहि मकरन्दप्रकाशे –

**हीनः शकाब्दो गगनाग्निनागैर्नवेन्दुभक्तो यदि शेषकं स्यात्।**
**गुणेशशून्याष्टनृपेषु विश्वे चैत्रादयः सप्त सदाधिमासः॥**[१४]

यथोदाहरणम् – शकः १९४०-८३०=१११०, १११०/१७=५८ लब्धिः, शेषः८। अतो गणनया आषाढोऽधिमासः समायातः किन्तु स्पष्टमानेन ज्येष्ठेऽधिमासो जातः।

वर्त्तमानसमये रविमन्दोच्चं मिथुनस्याष्टादशांशे विद्यते। तेव तदग्रे पृष्ठे च राशित्रयगते सूर्ये अधिमासः पतति। तेन चैत्रादयः सप्त सदाधिमासाः इत्युक्तं युक्तियुक्तम्, रविमन्दोच्चगतेरत्यल्पत्वात्। रविमन्दोच्चचलनवशादस्य वैशाखादि सर्वेषु मासेषु संभवः कालान्तरे इति विज्ञेयं सुधीभिः।

अथ कल्पे रविमासाः- ५१८४००००००

कल्पे चान्द्रमासाः- ५३४३३३३६०००

अनयोरन्तरम् – १५७३३३६००० = कल्पाधिमासः

(सूर्यसिद्धान्ते मध्यमाधिकारे, श्लो.३०तः४०यावत्)

**अथ मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः।**
**चैमाद्यः स ज्ञेयः पूर्त्तिद्वित्वेऽधिमासोऽन्त्यः॥**[१५]

इति ब्रह्मसिद्धान्तवचनेन चैत्रशुक्लादिमासेषु मेषादिसूर्यसंक्रमणेन क्रमेण द्वादशमासाः सम्पद्यन्ते।

तत्र यस्मिन् मासे सूर्यसंक्रान्तिर्नभवति सोऽधिमासः स्यात्। यथोक्तं भास्करेण -

असंक्रान्तिमासोऽधिमासः स्फुटं स्यात्।......यस्मिन् शशिमासेऽर्कसंक्रान्तिर्नास्ति सोऽधिमास इति प्रसिद्धम्। (तत्रैव मूलश्लोके, वासनाभाष्ये च) अत्र पूर्वयुक्त्या यदा अधिशेषो मासतुल्यः स्पष्टमानेन जायते तदा अधिमासः पतति। स च पूर्वाधिमासादग्रे २७-३६ मासाभ्यान्तरे समायाति। इतो न्यूनकालेऽस्य पातो न संभवतीति सामान्यतया चान्द्रमासव्यवस्था ज्यौतिषशास्त्रे निरूपिता।

यद्वर्षे क्षयमासपातः स्यात्तद्वर्षे क्षयमासात्पूर्वं पश्चाच्च मासत्रयाभ्यन्तरे अधिमासद्वयं पतति। यथोक्तं भास्करेण-

**द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्।**
**क्षयः कार्तिकादित्रये नान्यतः स्यात्।**
**तदावर्षमध्येऽधिमासद्वयञ्च॥**

........तदाक्षयमासात्पूर्वं मासत्रयान्तर एकोऽधिमासोऽग्रतश्च मासत्रयान्तरितोऽन्यश्चा-संक्रान्तिमासः स्यात्। इति। एवमेव कमलाकरेणाप्युक्तम् -

**असंक्रान्तिमासो हि चान्द्रोऽधिमासो,**
**द्विसंक्रान्तिमासः क्षयाख्यस्तदानीम्।**
**क्षयाख्यः कदाचित्ततः प्राक् च पश्चा-**
**दवश्यं हि तथाधिमासद्वये स्यात्॥**[१६]

पूर्वोक्तरीत्या २७ तः ३६ मासाभ्यन्तरे अधिमासो जायत इति स्पष्टमेव, परञ्चेदानीं सप्तमासाभ्यान्तरे एवाधिमासपातो निरूप्यते। अस्यां स्थितौ सन्देहः सुतरामेव प्रजायते। अतस्तन्निवारणायात्र युक्तिः प्रदर्श्यते - अत्राधिमासद्वयमित्यसंक्रान्तिमासद्वयमसंक्रान्तिमासोऽधिमास इति भास्करकमलाकरयोः परिभाषाबलेन केवलमसंक्रान्तमासद्वयमेव भवतीति आचार्याणामभिप्रायः। न तूभयत्रमासवृद्धिः, मासवृद्धेरधिशेषोद्भवमासासन्नकालसापेक्षत्वात्। तेन तद्वर्षे -

**एकस्मिन्नपि वर्षे चेद् द्वौ मासावधिमासकौ।**
**पूर्वो मासः प्रशस्तः स्यादपरस्त्वधिमासकः॥**
**एकस्मिन्नपि वर्षे यत्रेदं लक्ष्य दृश्यते उभयोः।**
**तत्रोत्तरोऽधिमासः स्फुटगत्या चायमर्केन्द्वोः॥**[१७]

इति व.म. वायूदेवशास्त्रिय प्रोकार्षवचनाभ्याम्,

तत्रक्षयमासात्पूर्वोधिमासः संसर्पसंज्ञः सर्वकर्मार्हः शुभकर्मणि न त्याज्यः। अंहस्पतिसंज्ञः क्षयमासादुत्तरभाव्यधिमासश्च सर्वकर्मसु वर्ज्यः(धर्मसिन्धुः, परिच्छेदः१, क्षयमासप्रकरणे) इति काशीनाथोपाध्यायवचनेन, क्षयाख्यपूर्वस्य न मलमासता, किन्तुक्षयाख्योत्तरस्यैवेति भावः(कृत्यसारसमुच्चयः, मलमासप्रकरणम्)

**इति म.म. अमृतनाथोपाध्यायवचनेन,**
**मासद्वयेब्दमध्ये तु संक्रान्तिर्न यदा भवेत्।**
**प्राकृतस्तत्रपूर्वः स्यादधिमासस्तथोत्तरः॥**
**उत्तरे एव कालाधिक्यं, न पूर्वस्मिन्नित्यर्थः।**[१८]

इति जाबालिवचनेन प्राकृत इति। प्रकृति स्वभावः त्रिंशद्दिनरूपस्तद्युक्तः, अनधिकः, शुद्धः, कर्मार्ह इति यावत्। (तत्रैव कृष्णंभट्टव्याख्यायाम्) इति कृष्णभट्टव्याख्यानेन संसर्पश्च न मलमासः किन्तु शुद्धः।[१९] इति वीरमित्रोदयवचनेन

द्विसंक्रान्तमासो यदा भवति तदा वर्षमध्ये मासद्वयमधिकम्। तत्र परो दुष्टः, आद्यः शुद्धः.....संसर्पोऽसंक्रान्तोऽपि न मलमासः किन्तु शुद्धतुल्यः, उत्तर एवासंक्रान्तो मलमासः। इतितिथिनिर्णयपरिशिष्टधृत जयसिंहकल्पद्रुमोक्तवचनेन च पूर्वाधिमासस्य प्रशस्तत्वं त्रिंशद्दिवात्मकत्वं संसर्पत्वं कर्मार्हत्वं मलमासाभावत्वं, प्राकृतत्वं च सिद्ध्यति। तेन संसर्पस्य असंक्रान्तस्य कर्मार्हत्वेन तत्र व्रतादिकं विहितमेव। अस्मात् कारणात् २०३९ वैक्रमाब्दे, १९०४ शकाब्दे, १७८३ ई. वर्षे तिथिनिर्णयपरिशिष्टे अधिमासनिर्णये ७३ पृष्ठे, क्षयमासनिर्णये ९१ पृष्ठे च मलमासत्वेन फाल्गुनस्योल्लेखः प्राप्यते। ९१ पृष्ठे च आश्विनस्यासंक्रान्तमासत्वेनोल्लेखः। अतस्तदनुसारमेव मासोल्लेखो विश्वविद्यालयपञ्चाङ्गे (कामेश्वरसिंहदरभंगा संस्कृतविश्वविद्यालय-दरभंगातः प्रकाशिते), संपूर्णानन्द संस्कृतविश्वविद्यालय-वाराणसीतः प्रकाशिते पञ्चाङ्गे, चण्डीगढतः प्रकाशिते मार्त्तण्डपञ्चाङ्गेषु चासीत्। एवमेव बहुष्वन्यपञ्चाङ्गेष्वपि मासोल्लेख आसीत्।

एतेन तावदिदं सिद्ध्यति यदधिमासस्तावद् द्विविधो भवति - ज्यौतिषगणनाप्रसिद्धो व्यवहारवहिर्भूतो मध्यमाधिमासः प्रथमः। अपरश्च व्यवहारविहितः स्पष्टमानसिद्धः स्पष्टाधिमासः। पुनश्च स्पष्टाधिमासोऽपि द्विविधो भवति - तत्र प्रथमः असंक्रान्त अवृद्धिमदधिमासः। द्वितीयस्तु असंक्रान्तो वृद्धिमदधिमासः। अत्र प्रथमः असंक्रान्तस्त्रिंशद्दिनात्मक अवृद्धिमदधिमासः क्षयमासवति वर्षे क्षयमासात्पूर्वं पतति। द्वितीयस्त्वसंक्रान्तो वृद्धिमदधिमासः अधिशेषोद्भवमासासन्नकालाधिक्यवशात्पूर्वोक्तरीत्या २७-३६ मासाभ्यन्तरे पतति। एतेन अधिशेषरूपमाससमकालाधिक्ये सति यदधिमासपातः स वृद्धिमन्मासः असंक्रान्तिमासो मलमासो वा कथ्यते। यथोक्त कालाधिक्याभावे योऽधिमासः स असंक्रान्तमास अवृद्धिमदधिमासः संसर्पसंज्ञकः स्यात्तस्मिन् संसर्पे व्रतादिकं विहितमेव। एतत्सर्वं म.म. गोकुलनाथकृतायां मासमीमांसायां, स्मृतिकौमुद्यां म.म. देवनाथठक्कुरकृतायां, मुरारीकृते शुभकर्मनिर्णये, केशवकृते सुश्लिष्टपरिशिष्टे, वाचस्पतिकृते द्वैतनिर्णये च विस्तरेण द्रष्टुं शक्यते।

**सन्दर्भाः–**


१. सूर्यसिद्धान्ते, १/१३, २/६४

२. तैत्तिरीयसंहितायाम्, ७.४.८

३. गोपथब्राह्मणे, ६.१७

४. शतपथब्राह्मणे, ६.२.२.१८

५. राजनाथीयतिथिनिर्णयेऽष्टमीप्रकरणे

६. निर्णयसिन्धौ द्वितीयपरिच्छेदे महालयप्रकरणे

७. मासमीमांसा, पृ.२

८. म.म. अमृतनाथीये कृत्सारसमुच्चये मलमासकृत्ये पृ.६५

९. सूर्यसिद्धान्ते, मानाध्याये, श्लोक–१६

१०. म.म.वाचस्पतिमिश्रकृते द्वैतनिर्णये, पृ.१०२

११. तत्रैव पृ.१०४

१२. ऋग्वेदे, १.२५.८

१३. तत्रैव १.१६४.११

१४. मकरन्दप्रकाशे, मिश्रकाध्याये श्लोकसङ्ख्या–४

१५. सिद्धान्तशिरोमणौ, अधिमासादिनिर्णये, श्लोक–६ टिप्पण्याम्

१६. कमलाकरस्य सि.त.वि., मध्यमाधिकारेऽधिमासादिनिर्णीये, श्लोकः ५२

१७. सिद्धान्तशिरोमणौ, गणिताध्याये, मध्यमाधिकारेऽधिमासादिनिर्णये, श्लोकः ६

१८. निर्णयसिन्धौ, प्रथमपरिच्छेदे, मलमासनिरूपणे, पृ.५४–५५

१९. वीरमित्रोदये, समयप्रकाशे, मलमासनिर्णये पृ.१४३

२०. तिथिनिर्णयपरिशिष्टे, क्षयमासनिर्णये पृ.७८



*ज्योतिष-प्राचार्यचरः,*

*कामेश्वरसिंहदरभङ्गासंस्कृत विश्वविद्यालयः,*

*कामेश्वरदरभंगा, बिहार*

# सार्थवेदाध्ययनविचारः

**प्रो. लम्बोदरमिश्रः**

कृतोपनयनसंस्कारेण द्विजातिपुरुषमात्रेण वेदोऽध्येतव्यः। ऋग्यजुस्सामथर्वाणश्चत्वारो वेदाः सन्ति। तेषां चतुर्णां वेदानां अध्ययनम् उपवीतेन स्वशाखानुसारेण स्वप्रज्ञानुसारेण वा कर्तव्यम्। यद्यपि शास्त्रानुसारेण स्वशाखाऽध्ययनानन्तरम् अन्यशाखायाः अध्ययनं महर्षिणा उल्लिखितं शाखारण्डः स उच्यते। महर्षिणा याज्ञवल्क्येन प्रतिपादितम् –

**वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्**

द्विजातिपुरुषमात्रेण वेदाध्ययनं विहितमस्ति इति मनुना प्रतिपादितम् –

**अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः।**
**प्रब्रूयात् ब्राह्मणस्त्वेषां नेतराविति निश्चयः॥**

स्वाध्यायोऽध्येतव्यः,अहरहः स्वाध्यायमधीयीत, स्वाध्यायान् मा प्रमदः इत्यादि विधिवाक्यैः स्वशाखीयवेदाऽध्ययनस्यातीवावश्यकता प्रतिभाति। अस्मिन्नध्ययनविधौ स्वशब्दस्योल्लेखं कृतम् तदध्ययनञ्च न सोद्देश्यं किन्तु नित्यम् इति पुरुषार्थानुशासने उक्तम् –वेदस्याध्ययनं नित्यमनध्ययने पाततीति।

अत एव वेदस्याध्ययनं नित्यम्। वेदस्यानध्ययनेन मानवः पतितो भवति। तैत्तिरीयारण्यके प्रतिपादितम् –अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं योऽनूत्सृजस्थभागो वाचि भवत्यभागो वाके तदेवाभ्युक्ताप्यस्तित्याज्य सखिविदंसखायं न तस्य वाच्यपि भागो अस्ति। यदि शृणोत्यात्मकं शृणोति न हि प्रवेद सुकृतस्य पन्थामिति। तस्मात् 'स्वाध्यायोऽध्येतव्यः'[१] इति। बहुधनप्रयत्नसाध्ययज्ञफलस्याध्ययनमात्रेण फलं प्राप्नोति। ऐतरेयारण्यके उक्तम् –

**'यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति'**[२] इति।

अधीयतऽसावित्यध्यायो वेदः। बाहुलकाच्छान्दसत्वाद्वा कर्मणि घञ्। स्वस्याध्यायः स्वाध्यायः इत्यर्थात्। उक्तञ्च भगवता मनुना –

**वेदमेव सदाभ्यस्येत् तपस्तप्स्यन् द्विजोत्तमः।**
**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥इति।**

वेदाभ्यासफलञ्च मनुनैवोक्तम् –

**आहैव स नखाग्रेभ्यः परमं तप्यते तपः।**

**यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्।। इति**

**बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।**

**तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम्॥**

**वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।**

**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥**

**ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः।**

**साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते॥ इति**

स च वेदाभ्यासः पञ्चधा स्मर्यते महर्षिणा –

**वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः।**

**तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा। इति।**

ब्राह्मणेन निष्कारणो षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति चागमे।

उपर्युक्तप्रमाणवचनैः सिद्ध्यति यत् वेदाध्ययनमवश्यङ्कर्तव्यम्। परन्तु मीमांसकैर्विचारितं धर्मजिज्ञासाप्रकरणे स्वाध्यायशब्दस्यार्थः। स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिरक्षरग्रहणमात्रपर्यवसायीति केचिन्मन्यन्ते। अस्यार्थः स्वस्य अध्यायः स्वाध्यायः। अत्र स्वशब्दः आत्मकुलपरम्परावाचकः। अध्यायशब्दश्शाखाऽवच्छिन्नवेदपरः। अध्येतव्य इत्यत्र अधिपूर्वक इङ्धातोरध्ययनमर्थः। अध्ययनं नाम गुरुमुखोच्चारणानुच्चारणपूर्वकशिष्यानूच्चारणम्। तव्य प्रत्ययस्य लक्षणया आर्थीभावना अर्थः। तस्याञ्चाऽऽर्थीभावनायां स्वाध्यायस्य कर्मत्वेन अध्ययनस्य करणत्वेन चान्वयः। तथा चाऽध्ययनेन गुरुमुखोच्चारणानूच्चारणेन स्वाध्यायं स्वकुलपरम्परागतैकशाखावच्छिन्नं वेदं भावयेत् इति शाब्दबोधः

अपरे त्वेवमाहुः – अर्थज्ञानस्वरूपदृष्टप्रयोजनायेदमध्ययनं विधीयते। यद्यपि ब्रह्मयज्ञः स्वाध्यायस्य फलमस्ति। तथाप्यक्षरग्रहणप्रयोजनेन योऽधीते, अध्ययनेनान्तरेण ब्रह्मयज्ञासम्भवात् तदीयफलमप्यध्ययनेनसम्पद्यते।

आचार्यो मनुः प्रतिपादयति यत् ते ब्राह्मणाः वेदान्नाधीत्य शास्त्रेष्वन्येषु अध्ययनं कुर्वन्ति ते सर्वथा शूद्रत्वं याति –

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**

**स जीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः॥**

अपि च – ओङ्कारः सर्ववेदेषु,प्रणवं प्राक् प्रयुञ्जीत इत्यादिनाऽध्ययनं सप्रकारं प्रतिपादितम्। तस्य शब्दतोऽर्थतश्च विचारो विधेयः। कैश्चिदुक्तम् –

**स्थाणुरयं भारहारः किलाभूद् अधीत्य वेदं न विजानति योऽर्थम्। स इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥ ( निरुक्त )**

**यद्ग्रहीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्नाविव शुष्केन्धो न तज्ज्वलति कर्हिचित्॥**

प्रकारेणानेन भगवता यास्काचार्येण अर्थज्ञानस्य प्रशंसा अर्थज्ञानरहितस्य च निन्दा कृता। पद्यद्वयेऽस्मिन् योऽर्थज्ञः स लोकेऽस्मिन् सकलानि श्रेयांस्यवाप्नोति। ऐहिकाऽमुष्मिकञ्च ज्ञानफलं तैत्तिरीयशाखाऽध्यायिनः मन्त्रोदाहरणेन स्पष्टीकृतवन्तः –

**तदेषाभ्युक्ता** – ये अर्वाङ्गुत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति, सर्वेऽग्निं द्वितीयं तृतीयं च हंसमिति। यावतीर्वै देवतास्ताः सर्वाः वेदविदि ब्राह्मणे वसन्ति। तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति[3] इति।

सामवेदस्य आर्षेयब्राह्मणे उल्लिखितम् यत् यः ब्राह्मणः मन्त्रच्छन्दोदैवतार्षब्राह्मणमन्त्रार्थान् विदित्वा वेदविहितं कर्म करोति तस्यैव समृद्धं कर्म भवति –

यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेनमन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति। यातयामान्यस्य छन्दांसि भवन्ति अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवति। अयातयामान्यस्य च्छन्दांसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे विद्यते।[4]

अनेन प्रकारेण ये जनाः वेदमधीत्यापि अर्थन्नविदन्ति ते पुरुषाः भारमेवं धारयन्ति। छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुश्शब्देनोच्यते। ते च यथेन्धनार्थमेवोपयुज्यन्ते न तु पुष्पफलार्थम्। तथा केवलवेदपाठकस्य व्रात्यत्वं न भवतीत्येतावदेव नह्यनुष्ठानं स्वर्गादिफलसिद्धिर्वास्ति। गुरुमुखोच्चारणानूच्चारणात् गृहीतमर्थज्ञानरहितं पौनः पुन्येन पाठकरणेन कदाचिदपि मन्त्रार्थं न द्योतयति। यथा अग्निरहितप्रदेशेप्रक्षिप्तं शुष्ककाष्ठं न दहति तद्वत्। ऋग्वेदसंहितायामपि मुख्यतः वेदत्त्वसिद्धये वेदार्थः ज्ञातव्य इति वर्णितम् –

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसस्त्रे जायेव पत्य उशती सुवासाः॥**[5]

कश्चिज्जनः पश्यन्नपि अर्थज्ञानाभावान्न पश्यति, कश्चित् शृण्वन्नपि अर्थज्ञानाभावान्नशृणोति। अतएव यो जनः व्याकरणन्यायमीमांसानिरुक्तादिग्रन्थान् सम्यगधीते स एव जानात्यर्थं नेतरे जनाः। कस्मैचिदर्थज्ञाय शरीरं विवृणोति। कस्मैचिदर्थज्ञाय आत्मानं दर्शयति। यथा जाया विवृतसर्वाङ्गावयवाभूत्वा इष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम्। कस्मिन् काले? यदा निर्णिक्तवासा भवति। निर्णिक्तवासा नीरजस्का ऋतुकालेषु तदा

ह्यतितरांस्त्रीपुरुषं प्रार्थयते। अत एतयावस्थयोपमीयते। यथा सः पुरुषस्तामेनां यथावत् पश्यति स्त्रियं नेतरां या घनपटप्रावृतसर्वगात्रा। एवं सः एनां वाचं यथावत् शृणोति। यः पदशोऽविच्छिद्यैतां विगृह्य वार्थमस्याः पश्यति समस्तव्यस्तम्।

कथनस्याभिप्रायः इदमस्ति यत् यः जनः व्याकरणनिरुक्तमीमांसाप्रभृतयः शास्त्राणां सम्यगध्ययनं करोति, तेषां कृते भगवान् वेदः स्वशरीरं विवृणोति झटित्येवार्थानं भवतीत्याशयः।

**संदर्भाः–**


१. तै. आ. .२:१५

२. ऐ. आ. २:१५

३. तै. आ. २:१५

४. आर्षेय ब्राह्मण १:१:६११

५. ऋ. सं. १०.७७१.४



*वेदविभागाध्यक्षचरः*

*जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयः,*

*जयपुरम्*


**लौकिकानां हि साधूनामर्थं वागनुवर्तते।**
**ऋषीणां पुराद्यानां वाचमर्थोऽनुधावति।।**
**–उत्तररामचरिते १/१०**

# शब्दब्रह्ममीमांसा

**स्व. पं. श्रीकृष्णकान्तझाः**

नन्वर्थबोधनाय शब्दप्रयोगः। स च प्रयुज्यमानः शब्दः अर्थावबोधं जनयति। स चार्थावबोधः शब्दस्यार्थेन सम्बन्धं विना न सम्भवति। तस्माच्छब्दार्थयोः सम्बन्धो वाच्यः। स च सम्बन्धः कीदृशः भेदलक्षण- स्तादात्म्यं वेति जायते जिज्ञासा। अत्र लोके घटोऽयम् पटोऽयमित्यादि व्यवहारोऽभेदेन दर्शनात्तादात्म्यमेवेति अत एव यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म, इत्यादि श्रुतिषु यदुक्तं जगतो निमित्ताभिन्नोपादानकारणं ब्रह्म तत् शब्दस्वरूपमेवेति वैयाकरणाः आमनन्ति।

अन्ये तु यदि शब्दार्थयोस्तादात्म्यं स्यात्तदा मधुशब्दोच्चारणे शब्दस्यावच्छेदकतया मुखे वर्त्तमानत्वात् तेनार्थस्याभेदान्मुखे माधुर्य्यापत्तिः स्यात्। एवमग्निशब्दोच्चारणे दाहापत्तिः, घटशब्दोच्चारणे वर्णावलीप्रतीतिश्च। तस्माच्छब्दार्थयो भेद एव। अत्र नागोजीभट्टा बौद्धपारमार्थिकव्यावहारिकसत्तात्रयमङ्गीकृत्य प्रातिभासिकोऽभेदः व्यावहारिको भेद इति भेदाभेदस्वीकारेणादोषादित्याहुः।

अत्र ब्रूमः शुद्धाभेदेऽपि न दोषः, दाहम्प्रति वह्नेः संयोगेनैव कारणत्वेन अवच्छेदकता सम्बन्धेन मुखे सद्भावेऽपि संयोगेन तस्याभावात्। न हि येन केनापि सम्बन्धेन वर्त्तमानं वस्तु क्वचिदपि कारणं भवति किन्तु कारणतावच्छेदकसम्बन्धेन सदेव। कथमन्यथा शब्दार्थयोर्भेदम्मन्यमानां तार्किकाणाम्मतेऽपि कालिकसम्बन्धेन मुखे सताऽग्निना प्रसक्तो दाहो निराक्रियेत्। अत एव शब्दस्य प्रश्नेऽपिगौरित्युत्तरम् अर्थस्य प्रश्नेऽपि चेति संगच्छते, इति गुरुचरणाः। न च घटस्य चाक्षुषत्वात् घटशब्दस्यापि चाक्षुषत्वापत्तिरिति वाच्यम्, इष्टापत्तेः। परन्तु यथा घटादौ सत्यपि गन्धवत्त्वे घटत्वादिनैव चाक्षुषत्वम् नतु गन्धवत्त्वादिनापि तथा घटत्वेनैव न तु घटशब्दत्वेन, तयोर्भेदाङ्गीकारात्। यो गुणो येनेन्द्रियेण गृह्यते तन्निष्ठा जातिः तदभावश्च तेनैवेन्द्रियेण गृह्यते इति नियमानङ्गीकाराच्च।

न च घटशब्दम्पश्यामि, घटं शृणोमीति चानुव्यवसायापत्तिरिति वाच्यम्, घटशब्दत्वे चाक्षुषस्य घटत्वे श्रावणस्य च प्रत्यक्षस्याभावेन तेन तेन रूपेण तादृश-तादृश-प्रत्यक्षस्याभावादेव तथाविधानुव्यवसायासम्भवात्। न च शब्दानां नित्यत्वेऽनित्यत्वे वा तादात्म्यासम्भवः आद्ये नित्यानित्ययोः शब्दार्थयोरैक्यासम्भवात्, अन्त्येऽपि शब्दानां क्षणिकत्वेनार्थानां चिरन्तनत्वे न तदसम्भवाच्चेति वाच्यम्, यथा वा नष्टे घटे मृदस्तद् व्यक्तित्वेन

घटत्वेन वा ध्वंसप्रतियोगित्वम् न तु मृत्त्वेनापि। एवमिहापि शब्दनित्यत्वपक्षे घटादीनां तद्व्यक्तित्वेनैव ध्वंसप्रतियोगित्वं नतु घटशब्दत्वेनापीत्यस्य, शब्दानामनित्यत्वे शब्दत्वेनैव क्षणिकत्वं नतु घटत्वादिनापीत्यस्य च कल्पनेनादोषात्। नच वह्निशब्दाद्दाहो जात इति प्रतीत्यापत्तिः शङ्क्या, तादृश-प्रतीतिवारणाय वह्निशब्दत्वे दाहजनकतावच्छेदकत्वाकल्पनात्।

ननु प्रमाणाधीना प्रमेयसिद्धिः, प्रमेयश्चात्र शब्दार्थयोरभेदः, नात्र किञ्चित् प्रमाणम्। तथाहि– प्रत्यक्षस्य नीलपीतादिभेदविषयत्वात् सति भेदे प्रत्यक्षं प्रवर्तते। तस्मान्न प्रत्यक्षप्रमाणसिद्धः शब्दार्थाभेदः। नाप्यनुमानेन तत्सिद्धिः। तस्य व्याप्तिज्ञानाधीनत्वात्। व्याप्तिज्ञानञ्च पुनः प्रत्यक्षमेवापेक्षते। तस्मान्नानुमानसिद्धः सः। एव-मुपमानस्यापि सादृश्यघटितत्वात्, सादृश्यं पुनर्भेदमेवावगाहते। तस्मान्नोपमानेन तत्सिद्धिः। नापि वेदे तादृशं वाक्यमुपलभ्यते येन शब्दार्थयोरभेदसिद्धिः स्यात्। अर्थापत्तिश्च उपपाद्यज्ञानेनोपपादकज्ञानकल्पनारूपा। सा हि न भेदमन्तरेण प्रवर्तितुं शक्या। यतः सति भेदे उपपाद्योपपादकभावः। तस्मान्नार्थापत्त्या तत्सिद्धिः। अभावोऽपि न भावरूपयोः शब्दार्थयोरभेदं साधयितुं शक्नोति। तस्मात् प्रमाणविरहात् यदुक्तं ब्रह्मणः शब्दरूपत्वं तत् निष्प्रमाणकमेवेति वदन्ति।

अत्र ब्रूमः– परञ्चापरञ्च ब्रह्म यदोङ्कारः, इत्यादि श्रुतिषु प्रसिद्धः शब्दब्रह्मणोरभेदः, न चात्र परञ्चापरञ्च यद् ब्रह्म तदोङ्कारवाच्यमित्यर्थो युक्तः। ओङ्कारस्य कारप्रत्ययान्तत्वेन शब्दपरत्वात्। न च 'वर्णात्कारः' इति एकवचनान्तनिर्देशात् एकत्वविशिष्ट-वर्णवाचकात् अ, इ, इत्यादिशब्दात् कारप्रत्ययो भवति, कथमकारोकारमकारसमुदायात्कारप्रत्यय इति वाच्यम्। अर्शआद्यजन्तो वर्णशब्दस्तेन वर्णसमुदायादपि कार-प्रत्ययो भवत्येवेति सुधीभिराकलनीयम्। कथमन्यथा एवकारश्चकारो मकारो वेत्यादि-प्रयोगाणां सिद्धिरिति प्रमाणिकानाम्प्रमोदविलयापत्तेः। न चैवम् वर्णसमुदायादेव कारप्रत्ययः स्यात्, न केवलादकारादिवर्णादिति शङ्क्यम्, तन्त्रेण द्विविधोऽपि वर्णशब्दो निर्दिष्टस्तेन केवलादपि भवत्येव।

ननु नेदं व्याख्यानं युक्तम्, सर्वविशेषरहितस्य ब्रह्मण उपासितुमशक्यत्वात् प्रतीकोपदेशोऽयम्, ओङ्कारालम्बने ब्रह्मोपासितव्यम्। यथा– देवतायाः अव्यक्तत्वेन पूजा सम्भवात् मृत्तिकादिभिः शङ्खचक्राद्यङ्कितमूर्तिं विधाय तद्बुद्ध्यापूजाविधानम्, तथाराधिता देवता प्रसीदति, एवम् प्रणवेनाभिधानेन ब्रह्मोपासितव्यम्, प्रणवस्य तदभिधानत्वात्, एतदर्थकम् 'परञ्चापरञ्च ब्रह्म यदोङ्कारः, इति श्रुतिवचनम्, ननु ब्रह्मणः शब्दात्मत्वप्रतिपादनपरमिति चेत् न ओमित्यात्मानं ध्यायथ, ओमिति युञ्जीत इत्यादि श्रुतिवाक्यानां यत्र योगाङ्गतासूचकध्यायथ, युञ्जीत, इत्यादि पदश्रवणात्, प्रतीकोपासनोपदेशयोगाङ्गता कथनं युक्तम्, यत्र तु ध्यायथ, युञ्जीतेत्यादि पदाश्रवणात् तत्र तादात्म्ये एव वाक्यं पर्यवस्यति कथं प्रतीकोपासनोपदेशः स्यात्, श्रुतार्थत्यागे अश्रुतार्थकल्पनायां मानाभावाच्च।

यथा– ओमिति ब्रह्म 'ओमितीदं सर्वम्, 'ओङ्कार एवेदं सर्वम्', तद्यथा– शङ्कुनैकेन सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वा वाक् संतृण्णा, यथा शङ्कुना पत्रमध्यवर्त्तिना दण्डाकारेण वंशकेन सर्वतः प्रसृताभिः शिराभिः प्रत्येकं सर्वपर्णानि व्याप्तानि तथा– सर्वा वाक् ओङ्कारे व्याप्तेति तदर्थः। अत्र हि

सर्ववागनुगमनेन ओङ्कारस्य वाचस्तत्त्वमिति दर्शयित्वा वागनुविद्धत्वाद्रूपप्रपञ्चस्य 'ओङ्कार एवेदं सर्वमि'त्युपसंहरति। एवञ्च यत्रापि– 'तस्माद्विद्वानेतेनैव परं पुरुषं ध्यायीत इति श्रवणम् तत्रापि ओङ्कारस्यैव सर्वात्मकत्वमिति प्रतिपादनीयम्, नतु तद्वाच्यस्येति सुधीभिर्विभावनीयम्।

नन्वर्थवादत्वात् स्तुत्यर्थोयमुपचार इति चेत्, न, गुणाभिधानलक्षणा हि अर्थवादाः गुणवर्णनरूपा च स्तुतिः, एवञ्चार्थवादा अपि गुणाभिधानलक्षणत्वात् स्तुत्यस्य कमप्यर्थमभिवदन्त एव स्तुवन्ति, स्तुत्यस्य यमर्थमर्थवादास्तुवन्ति सोऽर्थो यदि स्तुत्येनास्ति स्तुतिरेव न स्यात् अतस्तत्सत्त्वे एव स्तुतिर्युक्ता। एवञ्चार्थवादश्रुतेः यदि प्रमाणान्तरविरोधो नास्ति तदा मुख्यार्थत्यागेन गौणार्थकल्पना न युक्ता। तस्मादर्थवादोक्तमपि सर्वात्मकत्वमोङ्कारस्य विवक्षितमेव।

ननु सर्वस्य चेदोंकारात्मत्वं तर्हि प्रत्यक्षादिनोपलभ्येत, न चोपलभ्यते, अतः प्रत्यक्षाद्यनुप लब्धिविरोधोऽस्त्येव, कथमविरोध इति चेच्छृणु, न हि श्रोत्रेण वर्णात्मना सर्वस्योंकारात्मकत्वं ब्रूमः, किन्तु ओंकार एवेदं सर्वम्, तद् यथा– शङ्कुनैकेन सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वा वाक् संतृण्णा, इत्याद्यागमप्रमाणेन, अतो न प्रत्यक्षाद्यनुपलब्धिविरोधः। नच 'सर्वा वाक् संतृण्णा, इत्येवोक्तम्, न सर्वे अर्था इति, अर्थप्रपञ्चस्य वागनुविद्धत्वात्, कथमोङ्कारस्यसर्वात्मकत्वमितिवाच्यम्, नामरहितं ज्ञानार्थाभावादोङ्कारस्य सर्वात्मत्वं सुस्थिरम्। यथा– मृदाद्यन्वितो घटादिः मृदाद्युपादानकः।

ननु– भवत्वागमप्रमाणेन ओंकारस्य सर्वात्मत्वम्, किन्तु प्रत्यक्षेण तु नोपलभ्यते प्रत्यक्षविरोधोऽस्त्येव, विरोधे हि बलीयसा दुर्बलो बाध्यते, इति न्यायात्, प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वात्तदधीनत्वाच्चानुमानादीनाम्, प्रत्यक्षस्य बलवत्वात् तेनागमस्य बाधात् पुनरपि ओङ्कारस्य सर्वात्मकत्वमसिद्धमेवेति चेन्न, आगमस्यैव प्रमाणेषु सर्वतो बलवत्त्वात् आगमेन प्रत्यक्षमेव बाध्यते, नागमः। कथमन्यथा प्रत्यक्षागम्यो धर्मादिः लोके आचरणीयो भवति। कथं वा नरशिरः कपालं, शुचि, प्राण्यङ्गत्वात्, शङ्खवत्, इत्यनुमानगम्यं नरशिरसि शुचित्वं लोके नाद्रियते। तस्मात् आगमस्य सर्वतो बलवत्त्वात्। एवञ्च यदुक्तं 'तस्माद्विद्वानेतेनैव परं पुरुषं ध्यायीत, अत्र विद्वत्पदश्रवणात् ज्ञानिन एवाधिकारः, ज्ञानी च ओङ्कार सर्वात्मज्ञानी, ओङ्कारसर्वात्मज्ञानञ्च नान्यतः प्रमाणात्, अनुपलब्धेः, अतः प्रत्यासत्त्या अर्थवादाज्जातं ग्राह्यम्। तस्मादनन्तरमेवार्थवाक्यम्, ओंकारसर्वात्मकत्वपर्यवसितम्, न तदतिक्रमेण गोणार्थपर्यवसानम्। तत् पुनर्ध्यानविध्येकवाक्यतां नयति। ततोऽर्थवादाज्जातोङ्कार सर्वात्मज्ञानस्य पुंसोध्यानोपदेशोयम्, न प्रतीकोपदेशः। सिद्धमोङ्कारस्य सर्वात्मकत्वम्। सर्वञ्च ब्रह्म, अतः ओंकारो ब्रह्मेति सुस्थिरम्।

अथवा– 'वागेव विश्वाभुवनानि यज्ञे वागेवेदं बुभुजे वागुवाच। नामैवेदं रूपत्वेन ववृते, रूपञ्चेदं नाम भावे व्रतस्थे। इत्यादिश्रुतिषु स्पष्टतः वागुपादेयत्वमुक्तम्। तथैव वाक्सूक्तेऽपि 'अहं रूद्रेभिर्वसुभिश्चरामि, इति वाचः सर्वात्मकत्वं सर्वेशित्वञ्च प्रदर्शितम्। यथाऽत्मनि प्रबुद्धेन वामदेवेन 'अहं मनुरभवम् सूर्यश्चेति।

ननु– ये वैशेषिकाः बौद्धाश्च आगमस्य प्रामाण्यं नेच्छन्ति किन्तु अनुमाने एवान्तर्भावयन्ति तद्रीत्या तु न ब्रह्मणःशब्दात्मता सिद्धिरितिचेत्, अत्रोच्यते– प्रकृतिरूपान्विता हि विकाराः वाग्रूपान्वितञ्च जगत् अतो

जगत् वाचो विवर्तः तदजातिभूतेन वाग्रूपेणान्वितत्वात्। यद् यदजातिगुणभूता यद्रूपान्वितं तत् तद्विवर्तः। यथा बिम्बरूपान्वितं प्रतिबिम्बं बिम्बविवर्तः। व्यक्तयस्तु तज्जातिभूतेन गोत्वादिनाऽन्विताः, इति न ताभिर्व्यभिचारः। एवं गुणेष्वपि बोद्धव्यम्।

ननु– उपायोपेयभावात् सम्बद्धौ शब्दार्थौ, अतोऽर्थेशब्दरूपताप्रतीतिः, न तु शब्दस्यार्थेन तादात्म्यम् एवञ्च अर्थे शब्दानुगतत्वमसिद्धो हेतुरिति चेन्न, अर्थानाम् शब्दरूपानुविद्धविज्ञानवेद्यत्वात्। यथा– मृदनुरक्त-घटादिज्ञानात् मृद्रूपत्वं घटादेः, तथाऽर्थानां शब्दानुक्तार्थज्ञानात् शब्दरूपत्वम्। अतोर्थे नासिद्धो हेतुः। यदि चक्षुर्वदुपायमात्रं शब्दः स्यात्तदा चक्षुषा रूपम्पश्यामीति यथा वैयधिकरण्येन प्रतिपत्तिर्भवति, तथा शब्दादपि स्यात्, न च शब्दात्तथाप्रतिपत्तिः, किन्तुरूपमिदमिति सामानाधिकारण्येनैव, तस्मान्न चक्षुर्वदुपायमात्रं शब्दः। न च ज्ञायमान एवोपायः उपेयसामानाधिकरण्यन्नयतीति वक्तुं शक्यः, सत्यपि धूमस्य ज्ञायमानोपायत्वे, धूमादत्राग्निरित्येव प्रतीतिः, न तु धूमोऽग्निरिति, शब्दात्तु धूमोऽयम् इति सामानाधिकरण्येनेति, तस्माद् यदुक्त-मुपायोपेयभावात् शब्दार्थयोः अर्थेशब्दरूपता प्रतीतिरिरिति, तदविचारितमेवेति।

किञ्च नीलोत्पलमित्यादौ नहि नीलोत्पलयोः शब्दयोः सामानाधिकरण्येन विशेष्यविशेषणभावः, किन्तु अर्थगतोऽसौ शब्दयोर्विशेष्यविशेषणभावः, स च शब्दार्थयोरभेदे एव घटते नोपायत्वे। अन्यथा यथा– 'ऊर्ध्वत्वे सति काकवत्त्वात् स्थाणुः, अत्र काकवत्त्वोर्ध्ववत्त्वयोरिवस्वतो भिन्नं स्थाणुं गमयतोः सामानाधिकरण्यन्न भवति। तथाः व्यधिकरणयोर्नीलोत्पलयोः सामानाधिकरण्यन्न स्यात्। तस्माच्छब्दार्थयोरभेद एव।

नत्वस्तु सविकल्पज्ञाने शब्दानुरक्तार्थज्ञानात् अर्थस्य शब्दात्मकत्वम्, निर्विकल्पे बालादिज्ञाने कथमर्थस्य शब्दात्मकत्वमिति चेन्न, बालादीनामपि येयमन्यपरिहारेण स्तनपानादौ प्रवृत्तिः सापि नानिश्चयपूर्विका भवितुमर्हति, नानिश्चिते स्थाणौ पुरुषे वा अन्यतरनिबन्धना प्रवृत्तिः, न च शब्दानुवेधशून्यो निश्चयः, तस्मात्, बालप्रवृत्तिः, शब्दानुविद्धा, निश्चयपूर्वकत्वात् अस्मदादिप्रवृत्तिवत्। एवं बालादीनां निश्चयः, शब्दानुविद्धः, निश्चयत्वात्, अस्मदादिसविकल्पकनिश्चयवत्। उक्तानुमानद्वयबलात् बालादीनामिहजन्मनि शब्दव्युत्पत्तिविरहेऽपि पूर्वजन्मव्युत्पन्नसंस्कारवशात् सम्भवति तथा प्रवृत्तिः। अनुच्चारणन्तु करणपाटवाभावान्न दोषः। तथाच शब्दरूपोपग्राह्यं जगत् शब्दविवर्त्तः।

अपि च सन्त्यर्था व्यवहारसिद्धाः। येषां शब्दविवर्त्तादन्यन्न तत्त्वम्। यथा वन्ध्यासुतशशविषाणालातचक्रादयः। गच्छन्तं कमपि पुरुषं दृष्ट्वा कश्चिद्वदति कोऽयं गच्छति, कश्चिदन्यः एष वन्ध्यासुतो याति, इत्युत्तरति। एवं नानारूपापन्नं जगदिदं दृष्ट्वा पृच्छति किमिदं जगत् नित्यमनित्यं वा। कश्चिद्विचारवानाह अलातचक्रमिदम्। न चात्र जगति वन्ध्यासुतादीनां प्रसिद्धिः यो वाक्यार्थः स्यात्। तस्मात् प्रतिभामात्रं जगत्। न च निरालम्बना प्रतिभा सम्भवति, न च शब्दोपरागरहितः प्रत्ययोऽस्ति। तस्माद्वाक्तत्त्वमेव तथा तथा विवर्त्तते।

अपि च– षड्जर्षभ-गान्धार-मध्यम-पञ्चमधैवत-निषादस्वरभेदेषु, गोमनुष्याद्यर्थभेदेषु च सति शब्द-संस्पर्शे अर्थबोधस्य व्यवहारोपयुक्तविवेकवत्तयोत्कर्षदर्शनात्, शब्दसंस्पर्शाभावे व्यवहारानुपयुक्तबोधापकर्षात्,

यथा– पथि गच्छतः पुंसः पद्भ्यां स्पृश्यमानानामपि गुल्मतृणादीनां शब्दाभावे बोधापकर्षात्, इत्यन्वयव्यतिरेकाभ्यामवगम्यते वाग्रूपाधीनमेव चितेश्चितित्वम्। चितित्वञ्चात्र अर्थप्रकाशात्मकं बोध्यम्, न वस्तुमात्रम्। सर्वथा वाग्रूपाधीनो ज्ञेयबोधः। सर्वं ज्ञेयं वाग्रूपान्वितं गम्यते। अतो वाचो विवर्त्तो विश्वश्चन्द्रमस इव जलतरङ्गचन्द्रमस इति।

एतत् सर्वम्मनसि निधाय हरिरप्याह– अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्त्ततेऽर्थभावेन, प्रक्रिया जगतो यतः।। आदिश्च निधनञ्चेति आदिनिधने न आदिनिधने यस्य तत्, उत्पादविनाशरहितम्, तत् शब्दतत्त्वम्, शब्दरूपं तत्त्वम् ॐकारस्वरूपमिति भावः। यत् शब्दब्रह्म, अर्थभावेन, नाना नामरूपेण विवर्तते भासते। पुनः शब्दस्वरूपं ब्रह्म किम्भूतम् तत्राह– अक्षरम्, अत्र व्युत्पत्तिद्वयम्, अश्नुते व्याप्नोति सर्वार्थान् इति, अक्षरम्, अशूव्याप्तौ, इत्यस्माद्धातोः 'अशेःसरः, इत्युणादिसूत्रेण सरप्रत्ययेण सिद्धोऽक्षरशब्दः सर्वशब्दार्थव्यापकार्थः इत्येकोऽर्थः। द्वितीयार्थस्तु क्षरणं क्षरः, क्षर् धातोः भावे 'घजर्थेकविधानमिति वार्त्तिकविहितकप्रत्ययेण सिद्धःक्षरशब्दः, ततः नक्षरः क्षरणं च्यवनं पूर्वधर्मात् यस्य तदक्षरम्। परिणामे पूर्वधर्मनिवृत्तिरूपस्य क्षरणस्य सत्वात् क्षरणनिषेधेन अपरिणामीत्यर्थः। कूटस्थनित्यमिति भावः। अत्र तन्त्रेणार्थद्वयं विवक्षितमेव। पुनः किम्भूतम्, तत्राह– प्रक्रिया जगतो यतः। यत इति सार्वविभक्तिकस्तसिः, तेन यस्मात् शब्दब्रह्मणः जगत उत्पत्तिः, येन पालनम् यस्मिन् जगतो लय इति प्रक्रियाः सृष्टिस्थितिलयरूपाः क्रियाभेदा भवन्ति। अथवा घटमानय पटमानयेत्यादि व्यवहारा भवन्तीत्यर्थः।।

ननु सर्वे हि श्रुत्यनुसारिणो नैयायिकमीमांसकादयः ब्रह्मात्मानमनादिनिधनम्मन्यन्ते, नात्र कस्यापि विरोधः, एवञ्च अनादिनिधनपदस्य व्यावर्त्याभावात् अनादिनिधनमिति ब्रह्मणि व्यर्थविशेषणमिति चेत्, न, क्षणिकविज्ञानात्मवादिमतनिराकरणाय अनादिनिधनपदस्य सार्थक्यात्।।

तथाहि– अत्र क्षणिकविज्ञानात्मवादिनो बौद्धाः यद्यनादिनिधनं ब्रह्म स्यात्तदा तदर्थानि शास्त्राणि प्रवृत्तयश्च व्यर्था भवेयुः। कथं व्यर्था इति चेत्, शृणु अद्वैतमते ब्रह्मणोऽन्यस्याभावात् ब्रह्माश्रयैवाऽविद्या वाच्या, परिस्थितावस्याम् किं विद्यास्वभावं ब्रह्म, उताऽविद्यास्वभावम्, विद्याऽविद्योभयस्वभावेति? यदि विद्यास्वभावं ब्रह्मेत्युच्येत, तदा न तावत् विद्यया अविद्यानिवर्त्या, विद्यास्वभावे ब्रह्मणि अविद्यायाः स्वतः अभावात्। न च विद्योपनेया, विद्यायाः स्वभावसिद्धत्वात्। नाप्यविद्यास्वभावं ब्रह्म तत्र आगन्तुक्याश्रवणादिलक्षणया विद्यया अविद्योच्छेद्येति वक्तुं शक्यम्। नित्यस्य ब्रह्मणः स्वभावनाशे अनित्यत्वप्रसङ्गात् अविद्यास्वभावस्यानिवर्त्यत्वात्। एवमुभयस्वभावं ब्रह्मेति वक्तुं नार्हति। विद्यायाः प्राप्तत्वेनाऽनुपनेयात्, अविद्यायाश्च स्वभावत्वेनाऽनुपनेयात्। न किञ्चिन्निवर्त्त्यम् नावाप्तव्यं वा, तदर्थानि शास्त्राणि प्रवृत्तयश्च व्यर्था एवं। तस्मान्नादिनिधनं ब्रह्म, किन्तु शून्यलक्षणमेव ब्रह्मेति वक्तुं युक्तम्। तत् प्राप्तिरेव ब्रह्मप्राप्तिः। प्राप्त्युपायश्च विषयवासनया सहितस्य अविद्यादिक्लेशस्य सम्यगुच्छेदः। तदुच्छेदात् ग्राह्याभावः, तदभावाच्च ग्राहकाभावः, नहि ग्राह्यं विना ग्राहकः सम्भवति। तस्मात् सवासनक्लेशसमुच्छेदात् विज्ञानोपरमलक्षणैव ब्रह्मप्राप्तिरिति ये त्वाहुस्तान् प्रत्याह– अनादिनिधनमिति।

न च मुक्त्यर्थानां शास्त्राणाम् प्रवृत्तीनाञ्च वैयर्थ्यम् शङ्क्यम् अविद्याया निवर्त्यत्वात्। ननु कारणनाशात् कार्यनाशो दृष्टः, निर्हेतुरनादिरविद्या कथमुच्छेद्येति चेन्न, न वयमेवोपालभ्यां सर्वैरेव वादिभिरनादिरप्यविद्योच्छेद्याऽङ्गीक्रियते। दृश्यते च अनादेरपि प्रागभावस्योच्छेदः। ननु न ब्रूमोऽनादेर्नोच्छेदः इति, किन्तु नित्यस्य ब्रह्मणः स्वभावस्येति चेच्छृणु-अविद्यायाः ब्रह्मणः स्वभावाभावात्। यद्यविद्या न ब्रह्मणः स्वभावस्तर्हि ब्रह्मणोऽर्थान्तरमापद्येत, ततश्च द्वैतहानिः स्यात्, यदि तद्भयादर्थान्तर- मपि न स्वीक्रियेत, तदाऽविद्यैव नास्ति अथ किं निवर्त्यम्? अत्र केचित् तत्त्वग्रहणाभावो हि अविद्या, अभावस्याऽवस्तुत्वात् कथमर्थान्तरं सा स्यादिति चेन्न, अविद्यायाः अवस्तुत्वादेवाऽनिवृत्तिप्रसङ्गात्, सर्वप्रमाणानां प्रमेयग्रहणार्थत्वात् अविद्योऽनिवृत्तौ सत्यपि प्रमाणे प्रमेयग्रहणन्न स्यात्, इत्याहुः। तन्न चारु, तत्त्वग्रह्णाभात्मिकाह्यविद्या तत्त्वग्रह्णात्मिकया विद्यया निवर्त्तते, सा च ब्रह्मभावत्त्वात्, नित्या अतो नित्य निवृत्तैवाविद्या, न तन्निवृत्त्यर्थत्वेन शास्त्राणामर्थवत्तेति। अथ ब्रह्मणो नाविद्या, किन्तु जीवानां ब्रह्मविषया, सा तेषां श्रवणादिप्रयत्नलभ्ययाऽगन्तुकया विद्यया निवर्तते, अतो न नित्यमविद्यानिवृत्तिप्रसङ्ग इति चेन्न, ब्रह्म व्यतिरिक्तजीवाभ्युपगमे द्वैतप्रसङ्गात्। न च ब्रह्मणि विद्याविद्ये द्वे अपि वाच्ये, विरुद्धत्वात्। रूपरसपदविरुद्धेऽपि न कदाचिन्निवर्तेत।

येऽपि विपर्ययग्रहणमविद्येति लक्षणमङ्गीकुर्वन्ति, तेषामपि अविद्या ब्रह्मस्वभावश्चेत् स नित्यः कथं निवर्तेत, अस्वभावश्चेदर्थान्तरमापद्येत, कस्याऽविद्या वाच्या ब्रह्मणोऽन्यस्याभावात्। ब्रह्मण एवेति चेत् विप्रतिषेधः, तस्य विद्यास्वभावात्। रूपरसवदविप्रतिषेधे वा केन निवृत्तिः। विरोधे हि बलीयसा दुर्बलो बाध्यते। अद्वैतमते निवर्त्तकस्यान्यस्याभावात्।

अत्रोच्यते– नाविद्या ब्रह्मणः स्वभावो नाप्यर्थान्तरम्। यदि न ब्रह्मणः स्वभावो नाप्यर्थान्तरम् तर्हि नास्त्येव सेति चेन्न, सा नात्यन्तमसती, नापि सती। ननु– न ब्रह्मणो भिन्ना, अभिन्ना वा न सती नाप्यसती, कीदृशी नाम सेति चेच्छृणु, इयमीदृश्येवानवस्थितैकरूपा, अविद्यामायेत्यादिशब्दैः लोके गीयते। सदसदादिशब्दैः प्रतिपादयितुमशक्येति। नन्वविद्याऽसतीत्यत्र किम्मानम् इति चेच्छृणु–यद्यविद्यासती स्यात्तदा यथार्थत्वादविद्यैव न स्यात् तस्मादसती, एवम् अविद्यायाः ब्रह्मस्वभावत्त्वे ब्रह्मणो नित्यत्वात्तत्स्वभावस्यापि नित्यत्वादनिवृत्तिप्रसङ्गात्। ननु यद्यविद्या न सती, तदा असती स्यात्। नात्यन्तमसती, व्यवहाराङ्गत्वानुपपत्तेः, नह्यसतो व्यवहाराङ्गं दृष्टं कुत्रापि। ननु–अविद्याव्यवहाराङ्गं चेत् ततोऽर्थक्रियाकारित्वात्सा सती स्यात् कथं न सती? मैवम्, देहात्मभावस्याशेषव्यवहारस्यापि परमार्थतोऽसत्वात्। न च तज्ज्ञानं तत्र सदेव व्यवहाराङ्गं वाच्यम् यतो ज्ञानमात्रं व्यवहाराङ्गं न कुत्रापि दृष्टम्।

ननु प्रमाणेन चेत् प्रतीयतेऽविद्या ततो ब्रह्मवत्सती स्यात् नो चेत् खपुष्पवदसती, कथमनिर्वचनीयेति? मैवम्, शुक्तिरूप्यवदवभासिता, न तु प्रमाणेन, अत एव खपुष्पाद्विशिष्यते, न च तावत्सदसती वाच्या, विरोधात्, अस्मादेव बलादनिर्वचनीयमापन्नं सद्सद्भ्याम्। ननु लोके न किमपि वस्तु तादृशं दृष्टम्? मास्तु तथादर्शनम्, उक्तप्रमाणबलादापन्नमनिर्वचनीयमविद्यायाः नापलपनीयम्, नहि पृथिव्याः गन्धवत्त्वमन्यत्रादृष्टं तत्र दृष्टमन्यथा

क्रियते केनापि। यदि वक्तुमशक्याऽविद्या, कथमनिर्वचनीयेत्युच्यते, मैवम्, सदसद्भ्यामिति विशेषितत्वात्। ननु यद्यविद्याङ्गीक्रियते अवश्यं ब्रह्मणो भिन्नाऽभिन्ना वा स्यात् कथमनिर्वचनीयेति चेन्न, तस्याः मिथ्यात्वात्। शुक्तिरूपं हि न शुक्तेर्भिन्नमभिन्नं भिन्नाभिन्नं वा घटते, तस्मादनिर्वचनीयाऽविद्या सर्वैरवाङ्गीकरणीया। तथाहि– शून्यवादिनाम्माध्यमिकानां यादृशं जगत् दृश्यते तादृशं चेत् सत्, ततः परमार्थत्वान्नाविद्या, अथात्यन्तमसत् ततः खपुष्पवन्नावभासेत नापि व्यवहाराङ्गं स्यात्। तस्मादनिर्वचनीयाऽविद्येति सिद्धम्।

नन्वद्वैतिमते ब्रह्मणोऽन्यस्याभावात् कस्याऽविद्या वाच्येति? जीवाश्रया हि सा। ननु–अनेन जीवेनात्मनाऽनुप्रविश्य, इत्यादिश्रुतिषु ब्रह्मवाचकात्मशब्देन सामानाधिकरण्यं जीवस्य दृश्यते, तच्च तयोरभेदे स्व घटते न चक्षतयोर्भेदेघटपटयोरिव तत् स्यात्, तयाऽद्वैतहानिश्च, अतो जीवा अपि न ब्रह्मणो भिद्यन्ते, इति चेत्सत्यम्, तस्य परमार्थत्वात्। भ्रान्तिबुद्ध्या तु भिद्यत्ते। कस्य पुनर्भ्रान्तिर्भेदिकाः न तावत् ब्रह्मणः विद्यात्मनस्तस्य भ्रान्तिशून्यत्वात्, नापि जीवानाम्, भ्रान्तेः प्राक् तेषामभावात्, अन्योन्याश्रयप्रसङ्गात्, भ्रान्त्यधीनो जीवविभागः जीवाश्रया च भ्रान्तिः। अविद्याजीवयोरुभयोर्बीजाङ्कुरसन्तानयोरिवानादित्वान्नान्योन्याश्रयः न ह्यनादौ हेत्वन्वेषणं युक्तम्। तथा चोक्तम् पूर्वाचार्यैः। अनादिरप्रयोजना चाविद्येति। तत्रानादित्वान्नान्योन्याश्रयः, अप्रयोजनत्वान्न भेदप्रपञ्चसर्गप्रयोजनपर्यनुयोगावकाशः इत्याचार्यवरेण्यमण्डनमिश्रा प्राहुः। अत्र अनाद्यविद्ययाऽनाद्यहङ्कारादिकल्पनादतस्तदवच्छिन्नस्तद्गुणसारो जीवः घटाकाश इवेत्य विद्याकल्पनापि बीजाङ्कुरवदनादिरेवेत्यवच्छेदवादोऽवसेयः यमधिकृत्यवाचस्पतिर्विजयते।

ननु–जीवा अपि ब्रह्मतत्त्वाव्यतिरेकाद्विमलस्वभावाः तत् कथं तेष्वविद्यावकाशः? निष्प्रमाणकमेतत्, यथा–बिम्बादभिन्नमपि प्रतिबिम्बम् कृपाणादिषु भिन्नम्, तथा–शुद्धादभिन्नमप्यशुद्धम्भात्येव। कथं पुनर्बिम्बात् प्रतिबिम्बं न भिन्नम्? सावयवस्यावयवसंयोगमन्तरेणानुपत्तेः, सावयवस्य निरन्तरे दर्पणे स्थित्यनुपपत्तेः। बिम्बरूपप्रत्यभिज्ञानात्। स्पर्शनेन चानुपलब्धेश्च। सावयवस्यावयवसंयोगनाशमन्तरेण नाशाभावात्, प्रतिबिम्बस्य बिम्बासन्निधिमात्रेणाभासात्। तस्माद्बिम्बमेव भ्रान्त्याभिन्नभातीति सुस्थिरम्। ननु शुद्धादभिन्नस्याशुद्धिस्तत्त्वतो न घटते, प्रतिबिम्बे तु भ्रान्तिः सेति चेन्न, समानमेतज्जीवानामपि तस्या अशुद्धेर्भ्रान्तित्वात्। तत्त्वतः जीवानामशुद्धस्वभावत्वे तु शुद्धिर्नैव स्यात्, स्वभावहानात्। प्रतिबिम्बे तु कृपाणादयो विभ्रान्तिहेतवः तथेहापि विभ्रमहेतुर्वाच्यः अनादौ विभ्रमे हेत्वन्वेषणमयुक्तम्। ननु हेतूच्छेदाद्धि हेतुमदुच्छेदो दृष्टः, अविद्या तु अनादित्वात्स्वाभाविकीति निर्हेतुः सा कथमुच्छिद्येत। स्वभाविक्याप्यविद्योच्छिद्यत एव। अन्यथा तन्निवृत्यर्थानि शास्त्राणि व्यर्थान्येव भवेयुरिति सर्वैते उपालभ्या न वयमेव। दृश्यते पार्थिवानामणूनां श्यामतादिः पाकजेन वर्णेन निवृत्तः।

ननु मन्यामहे तावत् किञ्चिद्विलक्षणकारणयोपनिपातात्स्वभाविकस्यापि निवृत्तिम्, एकात्मवादिनस्तु। 'आगन्तुकस्य द्वितीयार्थस्याभावात् विलक्षणकारणोपनिपाताभावात् अविद्यायाः कुतो निवृत्तिः?

मास्त्वागन्तुको हेतुः, आत्मनो विद्यात्मकत्वात् स्वभावभूतैव विद्या अविद्यां निवर्त्तयिष्यति, इति चेन्न, यदि विद्याऽविद्ये एकत्रात्मनि इच्छसि ततस्तयोः स्वभावावस्थानादविरोधे

निवर्त्यनिवर्त्तकभावाभावप्रसङ्गात्। विरोधे वा विद्यया आत्मन्यविद्या नित्यनिरस्तैवेति अविद्यानिबन्धनत्वाभावात् नित्यमुक्तं जगत् स्यात्। न चागन्तुकस्यापि श्रवणादिजन्यविद्यान्तरस्य ब्रह्मस्वभावत्वात् श्रवणादिजन्यं विद्यान्तरमविद्यां निवर्तयिष्यतीति शङ्क्यम्, ऐकात्म्यवादे व्यतिरिक्तस्य तस्यायोगात् श्रवणादिजन्यविद्यान्तरस्यानित्यत्वेन नित्यस्य ब्रह्मणः नित्यस्वभावानुपपत्तेश्च। तथा चोक्तम्। स्वाभाविकीमविद्यां तु नोच्छेत्तुं कश्चिदर्हति। विलक्षणोपपाते हि नश्येत स्वाभाविकं क्वचित्।। नत्वैकात्म्याभ्युपायानां हेतुरस्ति विलक्षणः।। इति। तस्माज्जीवाश्रयाऽविद्या, न ब्रह्माश्रया, तस्य विद्यास्वभावत्वेनाऽविद्याकलुषितत्वाभावात्। यद्यविद्या स्याद्ब्रह्मणि तदाब्रह्मभावम्प्राप्तस्यापि नाविद्या निवर्तेत। जीवस्यानिर्मोक्षप्रसङ्गात्। ननु अनेन जीवेनात्मना इत्यादिश्रुतिषु जीवात्मनोः सामानाधिकरणदर्शनान्न जीवाः ब्रह्मणो व्यतिरिक्ता इति। अथ ब्रह्मैव संसरति मुच्यते च, न जीवाः, एकभुक्तौ सर्वभुक्तिप्रसङ्गः। यतो भेददर्शनेन ब्रह्मैव संसरति अभेदर्शनेन मुच्यते च, न जीवाः, अभेददर्शनात् ब्रह्मणि मुक्ते, अन्यस्यभेदद्रष्टुर्बद्धस्याभावात् सर्वभेदप्रत्यस्तमये युगपत्सर्वमोक्षप्रसङ्गः। तस्मादविद्यया जीवाः संसारिणः विद्यया मुच्यन्ते। स्वाभाविकाविद्या कलुषाणां जीवानां विलक्षणप्रत्ययविद्योदयेन सम्भवत्यविद्यानिवृत्तिः। नहि जीवेषु स्वाभाविकी विद्याऽस्ति। अविद्यैव हि स्वाभाविकी। ननु-विद्यास्वभावा ब्रह्मणो जीवानामभेदा कथमुच्यते अविद्यामयत्वमिति चेन्न, यथा-स्वच्छम्मुखादिबिम्बं तत्प्रतिबिम्बं जलादौ मलिनमेवं ब्रह्मणो विद्यात्मकत्वेऽपि जीवानामविद्येति भवति व्यवस्था।

केन पुनरुपायेन जीवानामविद्या निवर्त्तते? श्रवण-मनन-ध्यानाभ्यासैः ब्रह्मचर्यादिभिश्च शास्त्रोक्तैः। श्रवणमध्यात्मशास्त्रस्य, मननम्, तर्केण तदर्थानुसन्धानम्, ध्यानाभ्यासस्तदर्थानु चिन्तना वृत्तिः। एभिरुपायैरविद्या निवर्तते। तत्र श्रवन-मननयोः शाब्दविद्योत्पत्तिक्रमेण, ब्रह्मचर्य्यादेश्च पापक्षयक्रमेण, ध्यानादेश्चयाद्वयात्मप्रकाशाभिक्तक्रमेणेति विवेचनीयम्। ननु-शीतोष्णादौ विजातीयप्रयुक्तमेव निवर्त्तकत्वं दृष्टम्, सजातीयाश्रवणाद्यविद्या कथङ्कारमविद्यां निवर्त्तयिष्यतीति चेन्न, सजातीयस्यापि रजसः प्रतियोगिनः कतकरजोन्तरस्य निवर्त्तकत्वं दृष्टम् विजातीयस्यापिरूपरसादेः प्रतियोगिनो निवर्त्तकत्वं न दृष्टम्। अतः शीतोष्णादावपि प्रतियोगित्वप्रयुक्तमेवनिवर्तते यथा रजःसम्पर्ककलुषितमुदकं कतकद्रव्यविशेषरजःप्रक्षिप्तं रजोन्तराणि संहरत् स्वयमपि संह्रियमाणं स्वच्छां स्वरूपावस्थामुपनयति एवमेव श्रवणादिभिर्भेददर्शने प्रविलीयमाने विशेषाभावात्तद्गते च भेदे, स्वच्छे परिशुद्धे स्वरूपे जीवोवतिष्ठते। अविद्ययैव तु जीवो ब्रह्मणो विभक्तः, तन्निवृत्तौ ब्रह्मस्वरूपमेव भवति। यथा घटादिभेदे तदाकाशं परिशुद्धम्परमाकाशमेव भवति। ननु-ब्रह्मविद् ब्रह्मेव भवतीति श्रुत्या ब्रह्मसदृशो भवतीत्येतावार्थोवगमात् अविद्याविलये जीवः स्वरूपावस्थोऽपि ब्रह्मणो विभक्त एवावतिष्ठते न ब्रह्मभावोऽस्य स्यादिति चेन्न, यदि ब्रह्मणो जीवस्तत्त्वतो भिन्नः स्यात्तदा स्यादेषदोषः अविद्ययैव तु भेदः विद्यया अविद्या निवृत्तौ ब्रह्मस्वरूपमेवेति।

तथा चोक्तम् श्रुत्या-विद्याञ्चाविद्याञ्च यस्तद्भेदोभयं सह। अविद्यया मृत्युं तीर्त्वा, विद्ययाऽमृतमश्नुते।। विद्या-विशुद्धज्ञानं नित्यम्, अविद्या'श्रवणादि, ते हि उपायोपेयभावात् सम्बद्धे।

ननु-यद्यविद्यया विद्योपेया स्यात् तदा साध्या स्यात् न ह्यसाध्यस्योपेयत्वं घटते, ततश्च विद्याया अनित्यत्वप्रसङ्गात्-अत आह-अविद्यया मृत्युं तीर्त्वेत्यादि। मृत्योरविद्याकल्पितत्वात् मृत्युपदेनाविद्योच्यते। अविद्यया अविद्यां तीर्त्वेति तदर्थः। एतदुक्तं भवति-नाविद्या विद्यां जनयति किन्त्वविद्यानिवृत्तिम्, विद्यां तु व्यनक्ति, तेन व्यङ्ग्यतयोपेयत्वं विद्यायाः, न जन्मतया, अतो नानित्यत्वं विद्यायाः।

विद्ययाऽमृतमश्नुते, इत्यत्रेत्थम्भूतलक्षणे तृतीया। तेन निवृत्तायामविद्यायाम् विद्योपलक्षितममृत्व-मश्नुते। विद्यास्वरूपेऽवतिष्ठते। ननु यद्यविद्ययैवाऽविद्या निवर्तते तदा स्वरूपलाभाय प्रयत्नोऽपि व्यर्थ एव स्यादिति चेन्न, यथा-स्फटिकमणेः जपाकुसुमाद्युपाध्यपनयनाय प्रयत्नादेव जपाकुसुमनिबन्धन-रागत्याग-स्तथा श्रवणादिप्रयत्नादेवाविद्यानिवृत्तिः। अतो न प्रयत्नवैयर्थ्यम्।

अत्र मन्त्रे अविद्याशब्देन विद्यापर्युदासेन 'कुर्वन्नेवेह कर्माणि', इति मन्त्रात् प्रकृतं कर्मोच्यते तस्माज्ज्ञानकर्म समुच्चयपरोऽयम्मन्त्रः इति केचिदाहुः। तन्न, अविद्येत्यत्र नञ्श्रुतिः अधर्मवत्स्वशक्त्या विद्याविरूद्धमसम्यग्ज्ञानमज्ञानं च प्रतिपादयति। प्रकरणाद्धिश्रुतिर्बलीयसीतिजैमिनि-सूत्रात्। तस्मान्न ज्ञानकर्मसमुच्चयपरोयम्मन्त्रः। किन्तु श्रवणाद्यविद्ययैवाविद्यानिवृत्तिप्रतिपादनपरोऽयम्। तस्मात् श्रवणाद्यविद्यया विनिवृत्तायामविद्यायाम् विद्योदयात् घटाकाश इव जीवस्योपपद्यते सायुज्यम्। इत्यवच्छेदवादिनां वेदान्तिनामविद्यानिवृत्या सायुज्यप्रकारः।

ये तु अन्तःकरणे चैतन्यस्य प्रतिबिम्बमेव जीव इति मन्यन्ते, तेषां प्रतिबिम्बस्वरूपस्य जीवस्य ब्रह्मणा सह सायुज्येनैव सम्भवति। प्रतिबिम्बस्य मिथ्यात्वात्। नहि मिथ्यावस्तुनः कुत्रापि संयोगो दृष्टः। प्राप्ताभेदज्ञानधीराः सायुज्यानि प्राप्नुवन्त्यर्थकात्रासखायः सख्यानि जानते, इत्यादि श्रुतिविरोधात्, जीवो नित्यो हेतुरस्य त्वनित्यः इति स्मृतिविरोधाच्च उपेक्ष्यः प्रतिबिम्बवाद इति।

वैयाकरणानान्तु व्याकरणेन साधुशब्दज्ञानात्, यज्ञादौ शास्त्रीयप्रक्रियास्मरणपूर्वकं तत्प्रयोगाच्च महान् धर्म उदेति तेन भवत्यविद्यानिवृत्तिः। ततश्च लभते सायुज्यम्। तद्यथा व्याकरणसंस्कृतमनसा वैखरीद्वारा ह्रस्वत्वादिध्वनिधर्मविनिर्मुक्तमध्यमामवगम्य ततः समस्तवाग्विकाराणां प्रकृतिमपराख्यां पश्यन्तीं जानाति। ततः शब्दपूर्वयोगाभ्यासभावनावशात् अनावृतां विशुद्धां ज्योतिःस्वरूपां पराख्यां पश्यन्तीमुपैति। अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते। अत्र सायुज्यपदं व्याहरता हरिणा स्वस्य तात्पर्यमवच्छेदवाद एव ध्वन्यते। एवम् अरणिस्थं यथाज्योतिः प्रकाशान्तरकारणम्। तद्वत् शब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।। अरणिः काष्ठविशेषः, तत्र तिष्ठतीति, अरणिस्थं, काष्ठावच्छिन्नो व्यक्तोऽग्निर्यथा निघर्षणानन्तरम् व्यक्तज्वालाग्नेःकारणं भवति, तथा हृदयाकाशे बुद्धिस्थः अन्तःकरणावच्छिन्नचैतन्यस्वरूपं, शब्दोऽपि व्यक्तस्य वैखरीशब्दस्य कारणं भवतीत्यर्थः एतेन सुस्पष्टमवच्छेदवादो निर्गलितः।

अत्र-यथा सौम्येकेन मृत्पिण्डेन सर्वम्मृण्मयं विज्ञातं स्यात्, वाचारम्भणं विकारो नामधेयम्मृत्तिकेत्येव सत्यम्। इत्यादिश्रुतिषु मृदादिदृष्टान्तदर्शनात् शब्दब्रह्मणःपरिणामित्वं केचिन्मन्यन्ते। यथामृदादिः घटादिरूपेण

परिणमते, प्रकृतित्वात्, तथा शब्दब्रह्म कार्यरूपेण परिणमते, प्रकृतित्वात्, ब्रह्मणः प्रकृतित्वं तु यतो वा इमानि भूतानि जायन्ते, इत्यादिश्रुतिषु प्रसिद्धमेव। तन्मतमपाकरणाय आह–अक्षरमिति।

न क्षरणं स्वधर्माद् यस्य तदक्षरम् अपरिणामि कूटस्थ नित्यमिति यावत्, ननु कूटस्य नित्यं ब्रह्मेत्यत्र किम्मानमिति चेन्न, ध्रुवो नित्य इत्यादिश्रुतिषु दर्शनान्मन्यामहे कूटस्थनित्यं ब्रह्मेति। नहि परिणामे कूटस्थत्वं घटते येन ब्रह्मणः परिणामित्वं स्यादत उक्तानुमानम् श्रुति विरुद्धत्वादुपेक्ष्यम्। यद्यपि मृद इव घटादौ मृत्स्वरूपस्य विनाशाभावात् आत्मनः परिणामित्वेऽपि न नित्यता विनश्यते। तथा चोक्तम् भगवता भाष्यकारेण– यस्मिन् तत्त्वं न विहन्यते तदपि नित्यम्। यस्मिन् कार्यरूपेण परिणतेऽपि तत्त्वं कार्येषु प्रत्यभिज्ञानं कार्येण न व्यावर्त्यते तदपि नित्यमित्यर्थः। एवञ्च ब्रह्मणः परिणामित्वेऽपि नित्यत्वमव्याहतमेव तथापि ब्रह्माणि तादृशं नित्यत्वं न सम्भवति। तद्धि सर्वात्मनो परिणमेत, एकदेशेन वा? यदि सर्वात्मना परिणमेत आत्मतत्त्वस्य विनाशात् अनित्यत्वं स्यात्, एकदेशपरिणताविति चेत् सावयवत्वान्नित्यत्वस्य विघातः स्यात्। यद्धि सावयवम् तदवयवसंयोगजत्वात् कार्यं दृष्टम्, यच्च कार्यं तदनित्यं दृष्टम्, तथा च ब्रह्मणः सावयवत्वे अवयवानां मिथोऽवयविनश्च भेदात् 'एकमेवाद्वितीयं ब्रह्मेति श्रुतिर्व्याकुप्येत। तस्मान्न परिणामपक्षो युक्तः विवर्त्तपक्ष एव ज्यायान्। तत्र पक्षे नित्यत्वमेकत्वं विशुद्धत्वञ्च शक्तिपरिणामेनाक्षतमेव। एवं प्रपञ्चनाशेऽपि नित्यत्वादिकन्तथाविधमेव। अतएव विवर्त्ततेऽर्थभावेनेति हरिणोक्तं संगच्छते।

न च यथा उपाधिभेदादाकाशो भिद्यते घटाकाशो मठाकाश इति तथाऽत्मापि भिद्यत एव मनुष्योऽयम् गौरयमिति एवञ्च विवर्त्तपक्षेऽपि ब्रह्मणः एकत्वादिकं व्याहन्यत एवेति शङ्क्यम्, उपाधेरविद्या कल्पितत्वेन मिथ्यात्वात्। नहि मिथ्या बुद्ध्याकल्पितस्य सत्यत्वं केनापि स्वीक्रियते। अतः प्रपञ्चकाले यदनेकत्वादिकम्प्रतीयते तत्सर्वम्मिथ्यैव। ब्रह्मणः परिणामवादिनस्तु ब्रह्मण एव जगदाकारेण परिणामात् तदनेकत्वादिकम् सत्यमेव स्यात्। यतो ब्रह्मणः सत्यत्वात्। नहि केनापि श्रुत्यनुसारिणा ब्रह्मणौऽसत्यत्वम्मन्यते।

ननु यद्यविद्या कल्पितावच्छेदं ब्रह्मेत्यङ्गीक्रियते तदा कल्पितैकदेशानामेव परिणामोऽस्तु तथा सति ब्रह्मणो नित्यत्वादिकं न व्याहन्येत परिणामस्तु सेत्स्यतीति चेन्न, मिथ्याबुद्ध्याध्यवसितस्य योऽयमेकदेशपरिणामः सोऽयम्मिथ्याबुद्ध्यैव स्यात् न च मिथ्या बुद्ध्याध्यवसितस्य योऽयमेकदेशपरिणामः सोऽयम्मिथ्याबुद्ध्यैव स्यात् न च मिथ्याबुद्ध्याध्यवसितस्य सत्यत्वमिति दत्तोत्तरत्वात्। अतोऽपरिणामित्वमेव ब्रह्मण इति। सिद्धो विवर्त्तपक्षः।

ननु यदि ब्रह्मणोऽपरिणामित्वम्मन्येत तदा –शब्दस्थपरिणामोयमित्याम्नायविदो विदुः। छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्त्तत। इति हरिणोक्तं कथं संगच्छेत, इति चेन्न, अत्र कारिकायां शब्दपदेन वैखरीशब्दस्य ग्रहणात्। तेन वैखरीशब्दस्यायं विश्वः परिणामो न शब्दब्रह्मण इत्यर्थः फलति। अतएव भूरिति व्याहरत् भूमिमसृजदित्यादि श्रुतिरपि संगच्छते। एतेन यदुक्तं केनापि 'शब्दस्य परिणामोऽयमिति कारिकाव्याख्याने यद्यपि परिणामविवर्त्तयोर्भेदः तथापि शब्दस्य परिणामोऽयमित्युपक्रम्य विश्वं व्यवर्ततेत्युपसंहारदर्शनात्

प्राचीनकाले परिणामविवर्त्तयोः पर्यायत्वम्प्रतीयते, अत एव शान्तरक्षितेन 'नाशोत्पादासमालीढं ब्रह्मशब्दमयं च तत्। यत्तस्य परिणामोऽयं भावग्रामः प्रतीयते।। इत्युक्तं, तत्सर्वम् पदार्थानवबोधमूलकत्वादुपेक्ष्यमेव।

अत्र नागोजीभट्टा - प्रलये नियतकालपरिपाकानां सर्वप्राणिनामुपभोगेन प्रलये सर्वं जगन्मायायां लीयते। सा च चेतने ईश्वरे लीयते। लयश्चायं मायाया नात्यन्तिको विनाशः, उत्तरसर्गाऽनुपपत्तेः नापि सर्वथाऽभानम्, प्रतिभासमात्रशरीरस्य मिथ्यावस्तुनोऽनवभासे तदाभावस्यापत्तेः किन्तु तदानीं कार्यप्रवृत्यभावात् सुप्तेव तिष्ठति। स्वप्रतीष्ठेश्वरप्रकाशस्यात्यन्तिकनिर्विकल्पकतया तद्बलात् भासमानापि अभातप्रायैव, ततोऽपरिपक्कप्राणिकर्मभिः कालवशात् न प्राप्तपरिपाकै : स्वफलप्रदानाय भगवतोऽबुद्धिपूर्वकसृष्टिमार्यापुरुषौ प्रादुर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका माया वृत्तिर्जायते। ततो बिन्दुरूपमव्यक्तं जायते। इदमेव शक्तितत्त्वम्। तस्य बिन्दोरचिदंशो बीजम्, चिदचिन्मिश्रोंशो नादः चिदंशो बिन्दुः, इति अचिच्छब्देन शब्दार्थो भयरूपाऽविद्योच्यते। अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्था विशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानमेवरवः परादिशब्दैः व्यवह्रियते। एतत् सर्वगतमपि, प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते।

ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनसंस्कारः। तदभिव्यक्तं शब्दब्रह्मस्वप्रतिष्ठतया निष्पन्दं परा वागुच्यते। इदञ्च सर्वशब्दतदर्थोपादानम्। क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम्। प्रकृतेः बिन्दुरुपिण्याः शब्दब्रह्मा भवत् परा।। इत्युक्तेः। अनादिनिधनमिति शब्दब्रह्मणो नित्यतोक्तिः यावत् सृष्टिस्थित्या व्यवहारनित्यतया वा नेया। एवञ्च एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्द- तदर्थोपादनत्वेनोभयरूपतया उभयोरपि तत्कार्ययोरुभयरूपत्वमिति लघुमञ्जूषायामाहुः। स चायं पन्था न श्रुतिसम्मतः किन्तु तन्त्रशास्त्रानुसारित्वमवलम्बते। तथाहि प्रपञ्चसारतन्त्रे।

प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तमः। अणोरणीयसीस्थूलात् स्थूला व्याप्ता चराचरा।।

स जानाति विपाकांश्च तस्यां सम्यग् व्यवस्थितान्। सा तत्त्वसंज्ञा चिन्मात्रा ज्योतिषः सन्निधे सदा।।

विचीकीर्षुर्घनीभूता सा चिदभ्येति बिन्दुताम्। कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा।।

स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते। स बिन्दुनादबीजत्वभेदेन च निगद्यते।।

बिन्दोस्तस्माद्भिद्यमानात् रवोऽव्यक्तात्मको भवत्। स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति कथ्यते।। इत्यादि।।

अस्यार्थः ललितासहस्रनामभाष्ये भास्कररायेण स्पष्टीकृतः। यथा-

प्रलये सृज्यमानप्राणिकर्मणां परिपाकदशायां तादृशकर्माभिन्नमायावच्छिन्नं ब्रह्मघनीभूतमित्युच्यते। कालवशात् कर्मणां परिपाके सति विनश्यदवस्थः परिपाकप्रागभावो विचिकीर्षेत्युच्यते। ततः परिपाकक्षणे माया वृत्तिरुदेति, तादृशं परिपक्ककर्माकार-परिणतमायाविशिष्टं ब्रह्म अव्यक्तपदवाच्यम्। इदमेव कारणबिन्दुपदवाच्यम्। अस्माच्च कारणबिन्दोः सकाशात् क्रमेण कार्यबिन्दुः ततो नादस्ततो बीजमितित्रयमुत्पन्नम्। योऽयम् कारणबिन्दुरुक्तः स यदा कार्यबिन्द्वादित्रयजननोन्मुखो भिद्यते,

तद्दशायामव्यक्तः शब्दब्रह्माभिधेयो रवस्तत्रोत्पद्यते। सोऽयं रवः कारणबिन्दुतादात्म्यापन्नत्वात् सर्वगतोऽपि व्यञ्जकयत्नसहकृतपवनवशात् प्राणिनां मूलाधारे व्यज्यते। तदिदं कारणबिन्द्वात्मकमव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं परावागुच्यते। अथ तदेवनाभिपर्यन्तमागच्छता तेन पवनेनाभिव्यक्तं विमर्शरूपेण मनसा युक्तं सामान्यस्पन्दप्रकाशरूपं कार्यबिन्दुमयं तत् पश्यन्ती वागुच्यते। अथ तदेव शब्दब्रह्म तेन वायुना हृदयपर्यन्तमागच्छताऽभिव्यज्यमानं निश्चयात्मिका बुद्ध्या युक्तं विशेषस्पन्दप्रकाशरूपनादमयं तत् मध्यमा वागुच्यते। अथ तदेव वदनपर्यन्तं तेनैव वायुना कण्ठादिस्थानेषु अभिव्यज्यमानम् अकारादिवर्णरूपम् परश्रवणयोग्यः स्पष्टतर-प्रकाशरूपं बीजात्मकं सत् वैखरी वागुच्यते। इत्थं चतुर्विधासु परादित्रयमजानन्तो मनुष्याः स्थूलदृशो वैखरीमेव वाचम् मन्यन्ते। तथा च श्रुतिः-'तस्मात् यत् वाचोऽनासं तन्मनुष्या उपजीवन्ति। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्रह्मणा ये मनीषिणः। गुहा त्रीणि निहितानेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति।

अत्र ब्रूमः- ललितासहस्रनामटीकायां यादृशं व्याख्यानं कृतं भास्कररायेण तत् सर्वमतिसुन्दरम्, यतः ललितासहस्त्रनामस्तोत्रस्य तान्त्रिकत्वात्। अतस्तन्त्रशास्त्रसिद्धान्तानुसारेण तादृशं व्याख्यानं युक्तियुक्तम्, परन्तु व्याकरणसिद्धान्तविषयस्य तन्त्रशास्त्रानुसारेण वर्णनम् सर्वथाऽयुक्तमेव, व्याकरणस्य श्रुत्यनुसारित्वात्। यतो धातुप्रत्ययप्रातिपदिकादिसंज्ञाशब्दा अपि श्रुत्यनुसारेण वै कृताः। तथा च श्रुतिः-'को धातुः कः प्रत्ययः किम्प्रातिपदिकम्, इत्यादि। यदि तन्त्रशास्त्रानुमोदितसिद्धान्तानुसारिव्याकरणं स्यात्तदा प्रधानतया तन्त्राङ्गं सत् समेषामुपकारकं स्यान्नतु प्रधानतया वेदाङ्गम् तथा च प्रधानञ्च षट्स्वङ्गेषु व्याकरणमिति भगवद्भाष्यकारोक्तं व्याकुप्येत। तस्मात् श्रुत्यनुसारि व्याख्यानं व्याकरणीयम्। न च श्रुतौ कुत्रापि परादिभेदेन वाचश्चतुर्विधत्वमुक्तम्। किन्तु त्रिविधत्वमेव। अतएव भाष्यकृता 'चत्वारि वाक्परिमितेति व्याख्याने नामाख्यातोपसर्गनिपाताश्चेत्येवमुक्तम्। तथैवोक्तं हरिणाऽपि-

वैखर्यामध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदायास्त्रय्याः वाचः परम्पदम्।। इति। परपदमित्यस्य सर्वोत्कृष्टं स्थानमित्यर्थः। व्याकरणेन त्रयी वाक् ज्ञातुं शक्येति भाव। पश्यन्तीमध्यमा वैखरी चेति त्रिविधैव वाक्। त्रिविधापि सा स्थूला सूक्ष्मा परा चेति भेदत्रयेण भिद्यते। तस्माद्वाचो नव भेदा भवन्ति। वर्णादिविभागशून्या स्वरप्रधानाऽलापादियुक्ता स्वरप्रधाना सङ्गीतरूपा वाक् स्थूला पश्यन्ती। सैव जिज्ञासारूपा सूक्ष्मा पश्यन्ती। जिज्ञासारहिता सैव संविद्रूपा परापश्यन्ती। एवं दुन्दुभिवेणुवीणादौ करतलघातादिना अभिव्यक्ता ध्वनिरूपा वाक् स्थूला मध्यमा। सैव विवादयिषा सूक्ष्मा मध्यमा। सैव विवादयिषा शून्या निरुपाधिका परामध्यमा। एवम्प्रस्फुटितवर्णपदा परश्रवणग्रहणयोग्या वाक् स्थूलावैखरी। सैव विवक्षारूपा सूक्ष्मा वैखरी। सैव विवक्षाशून्या संविद्रूपा परावैखरी। पश्यन्ती वागेव गुणभूमिमतिक्रम्य पराऽपरेति च निगद्यते। यथा- सगुणनिर्गुणभेदेन द्विविधवर्णितस्यापि ब्रह्मणस्तत्त्वत एकत्वं न विहन्यते, तथा-एकैव प्रत्यवमर्शिनी पश्यन्तीवाक् परापरेति च व्यपदिश्यते। तस्मान्न वाचश्चतुष्ट्वम्। किन्तु त्रिविधत्वमेव। अत एव पश्यन्तीवैखर्योर्मध्ये भवा मध्यमेति कथनं संगच्छते। चतुष्ट्वेतु तन्न सम्भवति। एवं वैयाकरणमतानुवादावसरे शिवदृष्टावपि 'इत्याहुस्ते

परं ब्रह्म यदनादि तथाक्षयम्। तदक्षरं शुद्धरूपं सा पश्यन्ती परा हि वाक्।। इत्युक्तं च संगच्छते। यदुक्तं 'तुरीयं वाचो मनुष्या वदन्ति, इति तत् 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि, इति श्रुतिप्रसिद्धं शब्दब्रह्मणश्चतुरंशत्वम्, तदिह तुरीयपदेन ग्राह्यम्। अतएव नामाख्यातोपसर्गनिपातानां चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्याः अवैयाकरणाः वदन्तीति कैयटोक्तमपि संगच्छते।

वाक्यपदीयकाराः श्रुतिसम्मतव्याकरणसिद्धान्तमनुसृत्य कूटस्थनित्यं शब्दब्रह्मशब्दभावेन विवृतं सदर्थभावेन विवर्त्तते, इति अनादिनिधनमिति कारिकया प्रतिपादयन्तः शब्दह्मण एव सर्वजगदुपादानकारणम्मन्यन्ते। नागोजीभट्टास्तु-तन्त्रशास्त्रमनुसृत्य शब्दब्रह्मणोऽनित्यत्वमास्थाय अनादिनिधनमिति अनादिनिधनमिति शब्दब्रह्मणो नित्यतोक्तिः यावत् सृष्टिस्थित्या व्यवहारनित्यतया वा नेयेति वदन्तः, अनादिनिधनमिति कारिकां मन्मथयन्ति, तदेतदक्षरपदार्थानवबोधनिबन्धनमेव। अक्षरशब्दो हि व्युत्पत्तिद्वयबलात् व्यापकार्थकः कूटस्थनित्यार्थश्चेति पूर्वोक्ते न विस्मर्त्तव्यम्। तदयं वैयाकरणमतेन सृष्टिक्रमनिर्णयः सर्गादौ अनादिनिधनम्पश्यन्तीवाग्रूपं ब्रह्मप्राणिकर्मसहकृता परिमितशक्तिविशेष-विशिष्टमायासहितं नामरूपात्मकं सकलं प्रपञ्चं बुद्धावाकलय्य एकोहं बहुस्याम्प्रजायेयमिति संकल्पयति। ततः स्वकीय कालाख्य स्वातन्त्र्यशक्त्या समेतं अपञ्चीकृतानि शब्दादितन्मात्राण्युत्पादयति। ततो महाभूतादय इति शब्दब्रह्मण एव सम्भूता सृष्टिः, लयश्चापि तत्रैवेति। तथैवोक्तं हरिणा-ब्रह्मेदं ब्रह्मनिर्माणं शब्दशक्तिनिबन्धनम्। विवृतं शब्दमात्राभ्यः तास्वेव प्रविलीयते।। तस्मादत्र विषये नागेशमतं नोचितम्। इति शम्।

**विशेषः** – स्वर्याताः पण्डितश्रीकृष्णकान्तझामहोदयाः बिहारराज्ये मधुवनीमण्डलान्तर्गते वरदाहाग्रामे निवसन्ति स्म। एतेषां पदशास्त्रज्ञानामयं गभीरः आलेखः तेषां पुत्रेण श्रीत्रियुगनारायणझामहोदयेन पाण्डुग्रन्थरूपेण प्रकाशनधिया प्रेषितः।

**–सम्पादकः**

# शब्दप्रामाण्यनिरूपणम्

**प्रो. बौआनन्दझाः**

प्रमाकरणत्वं प्रमितिकरणत्वं वा प्रमाणत्वम् इति सर्वतन्त्रसिद्धान्तः। प्रमीयतेऽनेनेति प्रमाणपदनिर्वचनम्। तथा चोक्तं न्यायभाष्ये वात्स्यायनमुनिना– 'प्रमाणमन्तरेण नार्थप्रतिपत्तिः' प्रमाता येनार्थं प्रमिणोति तत् प्रमाणम्। वैशेषिकमतमपि ईदृगेव दरीदृश्यते। मीमांसकमते–अगृहीतग्राहित्वम् प्रमाणत्वम्। तथा चोक्तं कुमारिलभट्टेन– तस्माद् दृढं यदुत्पन्नं नापि संवादमृच्छति। एतच्चौत्पत्तिकसूत्रे–अर्थेऽनुपलब्धे तत्प्रमाणं महर्षिणा जैमिनिनोक्तम्। द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकतमं यत्तत् त्रिविधम् प्रमाणम् इति सांख्यसूत्रमपि तादृशमेव प्रमाणत्वमुपपादयति। योगदर्शनमप्येवमेव प्रतिपादयति। जैनमते–स्वापूर्वार्थव्यवसायात्मकं ज्ञानम् प्रमाणम् इति। बौद्धमते–अनधिगतविषयं प्रमाणम् इति न्यायबिन्दुग्रन्थे प्रतिपादितम्। एषु सर्वेष्वपि विचारेषु प्रमापौरुषेयबोधरूपा भवेत् बुद्धिवृत्तिरूपा वा भवेत् अन्या वा भवेत् सर्वथापि–प्रमीयतेऽनेनेति समाख्यानिर्वचनम्। तथा च प्रमाकरणत्वं प्रमाणत्वमिति न कुत्रापि व्यभिचरति इति सर्वतन्त्रसिद्धान्तत्वमस्य स्फुटी भवति। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति न्यायसूत्रम्। आप्तोपदेशः शब्द इति सिद्धान्तसूत्रे प्रमाणरूपे शब्दे आप्तोपदेशस्य विशेषणत्वात् नानाप्रकारकः शब्द इति ज्ञायते। शब्दस्य प्रमाणान्तरत्वसम्बन्धे चार्वाकान् बौद्धान् कथञ्चिद् वैशेषिकादीनि विहाय नान्येषां विचारकानां वैमत्यमस्ति। प्रत्युत प्रत्यक्षादिप्रमाणापेक्षया शब्दप्रमाणेऽभ्यर्हितत्वमप्यस्ति बहूनां विचारप्रवणानाम् इति नात्र संशीतिलेशोऽपि। आप्तः किल साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा चेति तदुपदेशभूतो यः शब्दः स प्रमाणमिति। स च लौकिकालौकिकभेदेन द्विविधोऽपि प्रमाणत्वेनावधार्यते। तत्र शब्दो न प्रमाणान्तरम् अनुमानगतार्थत्वात्। यथाहि परोक्षार्थस्य ज्ञापकमनुमानं भवति, तथैव शब्दोऽपि परोक्षमर्थम् बोधयति। यथा चानुमानं सामान्यविषयकबोधजनकम्, तथैव शब्दोऽपि सामान्यविषयकमेवबोधं जनयति न तु प्रत्यक्षवत् विशेषार्थबोधकम् भवति। यथा चानुमानं हेतुसाध्ययोः व्याप्तिसम्बन्धसापेक्षम् सत् अनुमितिं जनयति, तथा शब्दोऽपि शब्दार्थयोः वाच्यवाचकभावसम्बन्धज्ञानसापेक्ष एवार्थप्रतीतिमुपपादयति। यथानुमाने धूमप्रत्यक्षात् वह्निरनुमीयते, तथैव शब्दस्य श्रावणप्रत्यक्षानन्तरम् तदर्थोऽवबुध्यते। यथा चानुमानेऽन्वयव्यतिरेकाभ्यां व्याप्तिग्रहस्तथैव शब्देऽपि अन्वयव्यतिरेकाभ्यां शक्तिग्रहो भवति। एवञ्च विषयसामग्रीसाम्यात् शब्दानुमानयोः द्वयोरेकत्वेन नानुमानात् पृथक् शब्दप्रमाणम्। अत्रेदं चिन्तनीयम्– शब्दो द्विविधः पदरूपो वाक्यरूपश्च।

तत्र वाक्यमनवगतसम्बन्धमेव वाक्यार्थमवगमयितुमलम्, अभिनवविरचितश्लोकादपि पदसंस्कृतमतीनां सहृदयानां तदर्थावगमदर्शनात्। अनुमानन्तु–लिङ्गलिङ्गिनो: सम्बन्धाधिगममूलकमेव साध्यानुमितौ प्रवर्त्तते, इति कथमनयो: साम्यतासम्भव:। पदरूप: शब्दो यद्यपि सम्बन्धाधिगमसापेक्ष एवार्थम् बोधयति, तथापि सामग्रीभेदात् विषयभेदाच्चानुमानात् पृथगेव शब्दप्रमाणम्। विषयभेदो यथा– जातिविशिष्टा व्यक्ति: पदस्यार्थ:, आनुमानन्तु वाक्यार्थविषयम् वह्निमान् पर्वत इत्यनुमित्युदयात्। यद्यपि गोमान् कुम्भकार इत्यादिपदान्यपि वाक्यार्थविषयकाणि भवन्ति, तथापि तेभ्योऽनुमानवन्निराकाङ्क्षप्रतीतेरनुदयात्। न च यथानुमाने वह्निविशिष्ट: पर्वत: साध्य: तथा इहाप्यर्थविशिष्ट: शब्द: साध्यो भवत्विति वाच्यम्, शब्दस्यैव हेतुत्वेन हेतुपक्षयो: एकत्वप्रसङ्गात्। किञ्च शब्दात्मके धर्मिणि अर्थविशिष्टत्वम्, अर्थप्रत्यायनशक्तिविशिष्टत्वम्, अर्थप्रतीतिविशिष्टत्वम् वा साध्यते। न तावदर्थविशिष्टत्वरूप: साध्यो भवितुमर्हति, यतो हि वह्निपर्वतयोरिव शब्दार्थयो: धर्मधर्मिभावाभावात्। न च विषयता सम्बन्धेन अर्थविशिष्टत्वं शब्देऽपि सम्भवति इति युक्तम्। तत्प्रतीतिजननमन्तरेण शब्दस्य तद्विषयकत्वानुपपत्ते:, यदि च तत्प्रतीति: पूर्वमेव सिद्धा, तर्हि किंफलमर्थविषयकत्वद्वारेण शब्देऽर्थविशिष्टत्वसाधनेन? यदित्वर्थप्रतीतिर्न पूर्वसिद्धा किन्तु तद्विषयकत्वमूलकं यत् तद्धर्मकत्वं तत्पूर्विकै वार्थप्रतीतिरित्युच्यते, तदा स्फुट: अन्योऽन्याश्रय:, तद्विषयकत्वमूलार्थप्रतीति:, अर्थप्रतीतिमूलश्च तद्विषयकत्वमिति। तस्मान्नार्थविशिष्ट: शब्द: साध्यो भवितुमर्हति नाप्यर्थप्रत्यायनशक्तिविशिष्टत्वेन शब्द: साध्य:, तदर्थत्वेन शब्दप्रयोगाभावात्। नहि शब्दप्रयोक्ता तादृशशक्तिबोधाय शब्दं प्रयुङ्क्ते, किन्त्वर्थबोधायैव। श्रोताप्यर्थावगत्यर्थमेव शब्दं शुश्रूषते, न शक्त्यनगत्यर्थम्। एवं नार्थप्रतीतिविशिष्ट: शब्द: साध्य:, सिद्धय- सिद्धिविकल्पानुपपत्ते:। यदि च अर्थप्रतीति: पूर्वमसिद्धा, तर्हि असिद्ध: तादृशविशिष्टशब्दरूप: पक्ष:। यदि अर्थप्रतीति पूर्वं सिद्धा, तर्हि किमन्यदनुमीयते, तादृशविशिष्टपक्षाद्युपन्यासेनेति। ननु अग्निविशिष्टत्वेन पर्वतस्यानुमेयतापक्षेऽपययं दोष इति चेत् न, न हि तत्रानुमानेन अग्निर्जन्यते, अपितु तत्प्रतीतिर्जन्यते। तथा चानुमिते: पूर्वमग्ने: सिद्धत्वेऽपि तत्प्रतीतेरसिद्धतया तत्प्रतीतेर्जननात् भवत्यनुमितेरूपयोगित्वम्। अत्र तु शब्दपक्षकानुमित्या अर्थप्रतीतिर्जन्यते, अत: सा प्रतीतियदि पक्षविशेषणतया पूर्वमेव सिद्धा, तर्हि ध्रुवं तदनुमितेर्वैयर्थ्यम्। नो सिद्धा चेत् विशिष्ट: पक्ष एवासिद्ध: इति कुतोऽनुमिति: एवञ्च स्फुटोऽत्रकल्पे सिद्ध्यसिद्धिभ्यां व्याघात इति। एवमनुमाने लिंगलिंगिनोरविनाभावरूपसम्बन्ध: कारणत्वेन निर्दिष्ट:, अत्र तु शब्दार्थयो: समयापरनामावाच्यवाचकभाव एव सम्बन्धोऽर्थप्रतीतिकारणत्वेन निर्दिष्ट:। तस्माद्विषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवत् अनुमानाद्भिन्नमेव शब्दप्रामाण्यम्। एतेन घटमानयेत्यादिपदानि तात्पर्यविषयीभूत–पदार्थसंसर्गप्रमापूर्वकाणि परस्परान्वय तात्पर्यकत्वे सति योग्यत्वात् पदान्तरवत्। यद्वा एते पदार्था: मिथ: तात्पर्यविषयीभूतसंसर्गवन्त:, आकांक्षादिमत्पदस्मारितत्वात् इत्यादीनि वैशेषिकानुमानान्यपि निरस्तानि भवन्ति। घटवद् भूतलमिति शब्दश्रवणसमनन्तरं घटप्रकारकानुभवस्यापि सत्त्वात् संसर्गप्रकारिकयानुमत्या तदसंग्रहेण घटादिप्रकारकानुभवार्थं शब्दप्रामाण्यांगीकारस्यावश्यकत्वात्। एवं शाब्दयामीत्यनुभवोऽपि शब्दप्रमाणस्यानुमानप्रमाणात् भेदसिद्धौ मानम्।

अभेदं बोध्यम् नैयायिकसम्मतप्रत्यक्षानुमानोपमानशब्दातिरिक्तानां मीमांसकादिसम्मतार्थापत्त्यादि-प्रमाणान्तं प्रमाणत्वं न निषिद्ध्यते, किन्तु प्रमाणान्तरत्वमेव निषिद्ध्यते। अत उक्तं महर्षिणा गौतमेन-

''शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः' इति द्वितीयाध्यायस्य द्वितीयसूत्रेणेदमुपपादितं यत् ऐतिह्यस्य शब्दरूपत्वात् नैतिह्यं शब्दप्रमाणाद् भिद्यते, एवमेव अर्थापत्तिसम्भवभावानामनुमानेऽन्तर्भावो भवितुमर्हति। अतः प्रत्यक्षादीनि चत्वार्येव प्रमाणानि प्रमेयसाधनानीति युक्तमुत्पश्यामः। यद्यपि सन्ति नाम प्रत्यक्षादीनि सर्वाणि प्रमाणानि प्रमितिसाधनानि, तथापि प्रत्यक्षापेक्षया बहूपकृतं भवत्यनुमानेन, यद्विचारे महान् प्रयासो व्यधायि प्राचीनैर्नव्यैश्च नैयायिकैः। परं शब्दप्रमाणन्तु अनुमानादप्यधिकं जगदुपकरोतीति प्रमाणेषु मध्ये तन्मूर्द्धन्यतमं स्थानमलङ्कुर्वाण आस्ते, नात्र संशीतिलेशोपि। अत एव शब्दप्रमाणमिदं न केवलं नैयायिकाः प्रत्युत मीमांसका वेदान्तिनो वैयाकरणास्तथान्येऽपि शास्त्रकाराः वैशद्येन शब्दप्रमाणमिदं वर्णयामासुः। अतो विषयव्यापकत्वदृष्ट्या सामर्थ्यदृष्ट्या सर्वप्रमाणातिशायि शब्दप्रामाण्यम्। प्रत्यक्षं हि स्थूल सन्निकृष्टमात्रविषयावबोधकम् अल्पशक्तिमत्। तदुक्तम् – ''सम्बद्धं वर्त्तमानं च गृह्यते चक्षुरादिना''। शब्दप्रमाणन्तु सन्निकृष्टविप्रकृष्टस्थूलसूक्ष्मातीतानागतादिसकलविषयावद्योतकं। बहुशक्तिमदिति तदुक्तं सांख्यकारिकायाम्- ''तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्''। किं बहुना प्रत्यक्षादिसकलप्रमाणानां यावन्ति प्रमेयवस्तूनि सन्ति, तावन्ति सर्वाण्येकस्य शब्दप्रमाणस्य विषयतां भजन्ते। तथा चानिर्वचनीयाऽद्भुता च शक्तिः शब्दप्रमाणस्य। अत एव सर्वे लौकिका अलौकिका व्यवहारा न तथा प्रत्यक्षानुमानयोरायतन्ते यथा शब्दायत्ताः सम्पादितप्रत्यक्षा अपि व्यवहर्त्तारः शब्दद्वारैव स्वीयं ज्ञानं जनान्तरेषु संक्रामयन्ति। किमिदं सम्भवि, दूरदूरतरविषयाणां शृंगग्राहिकतया प्रत्यक्षतो बोधसम्पादनम्? अतोऽल्पीयांसः प्रत्यक्षविषयाः, भूयांसश्च शब्दविषयाः। यद्यपि योगिनो योगबलेन सर्वमध्यक्षीकर्त्तुं पारयन्ति। तथापि ते स्वयं तथाकुर्वन्तोऽपि न तथा परानवगमयितुं प्रभव इति परत्र स्वबोधसंक्रमणाय तैरपि शब्दप्रमाणमेव शरणीकरणीयम्भवति। श्रीमद्भगवद्गीताषष्ठाध्यायस्थ-द्वितीयश्लोकस्य मधुसूदनीगूढ़ार्थतत्त्वालोके सर्वतन्त्रस्वतन्त्रेण बच्चाझापरनामधेयेन धर्मदत्तोपाध्यायेन शब्दप्रामाण्यविषये वैशेषिकादीनां विप्रतिपत्तिः प्रदर्शित, तथाहि- शब्दो न प्रमाणम् अनुमानेनैव गतार्थत्वात्। यतोहि प्रयोज्यप्रयोजकव्यवहारेणाद्यशक्तिपरिच्छेदस्थले गामानय कुठारेण च्छिन्धि इत्यादि वाक्यार्थस्यानुमानेनैवावगतत्वशक्तिग्रहाभावेन शब्दतोऽर्थग्रहासम्भवात्। तद्वाक्यम् तु दृष्टान्तीकृत्य घटमानयेति वाक्यं घटकर्मत्वान्वितानयनबोधतात्पर्यकम् घटाद्यर्थस्मारक-साकांक्षपदकदम्बत्वात् गामानयेति वाक्यवत् इत्यनुमानात् ज्ञानावच्छेदकतया वाक्यार्थसिद्धिः सम्भवति। यद्वा एते पदार्थाः मिथः संसर्गवतः तात्पर्यवत्साकांक्षपदकदम्बघटकपदस्मारितत्वात् गोकर्मत्वादिपदार्थवत् इत्यनुमानात् अन्वयबोधसिद्धिः। अथवा कर्मत्वं घटीयं घटस्मारकपदसाकांक्षम् पदस्मारितत्वात् गोकर्मत्ववदानयनं घटकर्मतानिरूपकं द्वितीयान्तघटपदसाकांक्षानयतिस्मारितत्त्वात् इत्येवं विशिष्टवाक्यार्थप्रत्ययसम्भवः इति शब्दो न प्रमाणान्तरमनुमानादिति तेषामाशयः। अत्र नैयायिका वैशेषिकमतमिदमपाकुर्वन्ति यत् अनुमानप्रमाणे शब्दप्रमाणस्यान्तर्भावो नोचितः, यतोहि- व्याप्तिपक्ष-

धर्मत्वाद्यप्रतिसन्धानेऽपि साकांक्षत्वादिग्रहे शाब्दबोधोदयात् अनुमानेन शब्दप्रामाण्यस्य गतार्थयितुमशक्यत्वात् शब्दस्य प्रमाणान्तरत्वावश्यम्भावात्। न च शब्दस्य प्रमाणान्तरत्वे सामग्र्यन्तरकल्पना तत्प्रतिबन्धकत्वान्तर कल्पनादि गौरवाद्वरं सर्वत्र शाब्दस्थले व्याप्त्यादिकल्पनैव युक्ता इति वाच्यम्, अमुमर्थं शृणोमि शाब्दयामि इति विलक्षणज्ञानगोचरानुभवात् विजातीयप्रमासिद्धौ तत्करणान्तरस्यावश्यमुपेयत्वात्, अन्यथा तस्याकस्मिक-त्वापत्तेः अनुमितिसामग्र्याः प्रयोजकत्वे धूमादिलिंगकानुमित्यादिस्थलेऽपि तादृशप्रमोत्पत्त्या शृणोमीत्यनुव्यवसायापत्तेः। न चाकांक्षाज्ञानादिशाब्दक्लृप्तसामग्रीघटितानुमितिसामग्रीजन्यानुमितिरेव श्रु धात्वर्थ इति वाच्यम्। तादृशसामग्रीजन्यत्वाप्रतिसन्धानेऽपि तादृशप्रतीत्युदयात् उक्तार्थे गौरवेण आकांक्षादेरननुगतत्वेन च शक्तैर्वक्तुमशक्यत्वात्। अथ शाब्दत्वजातेः सिद्धावपि तस्याः अनुमितित्वव्याप्यत्वं स्वीकरणीयम्। न च तत्र मानाभाव इति वाच्यम्। समानविषयकप्रत्यक्षसामग्रीसत्त्वे शाब्दवारणाय तस्याः प्रतिबन्धकत्वाकल्पनेन लाघवात्। अनुमितिम् प्रति प्रतिबन्धकत्वस्य क्लृप्ततया अनुमितित्वाभ्युपगमे तत्प्रतिबन्धकतयैव निर्वाहात्। न चेच्छोत्तेजकत्वानुरोधेन प्रतिबन्धकता भेदस्यैव वक्तव्यत्वात् क्व लाघवमिति वाच्यम्। येषु येषु विषयेषु प्रत्यक्षसामग्रीकालेन शाब्देच्छा कदापि जाता तत्तद्विषयशाब्देषु पृथक् प्रतिबन्धकत्वाकल्पनलाघवस्य तथापि सम्भवात्।

अथ शाब्दस्यानुमितित्वोपगमे शाब्दसामग्र्याः व्याप्तिज्ञानादिघटितत्वस्य आवश्यकतया तस्याभिन्न-विषयकप्रत्यक्षादौ प्रतिबन्धकत्वे गौरवम् अनुमितित्वाभावे च प्रतिबन्धकतावच्छेदककोटौ व्याप्तिज्ञानाद्यप्रवेशेन लाघवमिति चेन्न। यथाहि अन्वयव्याप्तिज्ञानघटिता एकानुमितिसामग्री परा च व्यतिरेकव्याप्तिज्ञानघटिता न च तयोरनुगमकं किञ्चित् लिंगभेदेन अननुगमस्तु स्वतराम्, तथापि तत्तत्सामग्रीजन्य सर्वज्ञानेष्वनुमितित्वमनुगतम्। व्यभिचारवारणाय कार्यतावच्छेदके तत्तत्कारणानन्तर्यप्रवेशेऽप्यनुमितित्वस्याकस्मिकत्ववारणाय सकल-कार्यतावच्छेदककोटौ तत्प्रवेशाङ्गीकारात् अनुमितित्वावच्छिन्नं प्रति अभावज्ञानत्वेन कारणत्वोपगमात् व्याप्तिमात्रस्याभावघटितत्वेन सर्वत्रानुमितिस्थले तत्संभवात्। तथापरा व्याप्तिघटिकाप्याकांक्षा ज्ञानादिघटिता सामग्र्युपेयते तत्कार्यतावच्छेदक कोटावप्यनुमितित्वान्तर्भावेन आकांक्षा ज्ञान स्यावहितोत्तरत्व घटकाभाव विषयकत्वेन वा तादृश सामग्रीजन्यज्ञानेऽप्यनुमितित्वसद्भावसंभवः एतादृशकार्यकारणभावे चोक्तलाघव-गौरवस्यैव मानत्वात् एवञ्च शाब्दसामग्रीप्रतिबन्धकतावच्छेदक कोटौ व्याप्तिज्ञानाद्यप्रवेशेन न गौरवावकाशः। अथ शाब्दबोधस्य सिद्धिकालेऽपि विनैवेच्छामुत्पत्तेः अनुमितिकारणस्य पक्षत्वस्य तत्राभावान्न तत्रानुमितित्वसम्भव इति चेन्न। तत्रालिङ्गकानुमितौ तत्तल्लिंगकानुमित्साविरहविशिष्टसिद्ध्यभावत्वेन कारणत्वोपगमात् लिंगाजन्यशाब्द स्थले पक्षत्वाभावेऽपि अनुमितित्वे क्षत्यभावादिति चेदुच्यतेसत्येवमनुमितित्व स्यैव शाब्दत्व व्याप्यत्वं कुतो न स्यात् विनिगमकाभवात्। न च तत्र किं मानमिति वाच्यम्, समानविषयकप्रत्यक्षसामग्र्या अनुमितौ प्रतिबन्धकत्वाकल्पनलाघवस्यैव मानत्वात् क्लृप्तशाब्दप्रतिबन्धकतयैव निर्वाहात्। न चानुमिति सामग्र्यामाकांक्षाज्ञानादीनां तत्रशाब्दत्वनिर्वाहाय प्रवेशनीयतयातस्याः प्रतिबन्धकत्वे गौरवमिति वाच्यम्। आकांक्षाघटितस्यैव व्याप्ति ज्ञानादिघटितस्य शाब्दसामग्रीविशेषस्य स्वीकारात्।

कारणाव्यवहितोत्तरत्वस्य आकांक्षाव्याहयादेरननुगमेन कारणतावच्छेदककोटाववश्यं प्रवेशनीयतया व्यभिचारस्य वारणसम्भवात्। न च तत्र शृणोमीत्यनुव्यवसायापत्तिरिति वाच्यम्। तत्रापि शाब्दस्थले अनुमिनोमि इति अनुव्यवसायापत्तेर्दुरुद्धरत्वात्। शाब्दान्यानुमितित्वेन अनुमिनोमीत्यत्र त्वन्मते अनुमित्यन्यशाब्दत्वेन शृणोमीत्यत्र कारणकत्वकल्पनेनापत्तिवारणस्य समानत्वात्। न चानुमितौ व्याप्तिज्ञानादिकार्यतावच्छेदककोटौ शाब्दत्वाप्रवेशात् कुतः शाब्दत्वस्य सम्भव इति वाच्यम्, आकांक्षाज्ञानादिकार्यतावच्छेदकेऽपि अनुमितित्वस्याप्रवेशात् कुतोऽनुमितित्वस्य सम्भवः इत्यस्य समानत्वात्। यदि चोक्तलाघवानुरोधेनैव अनुमितित्वस्याकांक्षाज्ञानादिकार्यतावच्छेदके प्रवेश इत्युच्यते तदोक्तलाघवानुरोधेन शाब्दत्वस्यापि व्याप्तिज्ञानादिकार्यतावच्छेदककोटौ प्रवेशोपगम इत्यपि वक्तुं शक्यम्। शाब्दत्वावच्छिन्नं प्रति ज्ञानत्वेन कारणत्वोपगमाद्वा शाब्दत्वस्य सम्भवः, निर्विशेषसामान्योत्पत्त्यसम्भवेन विशेषसामग्रीविरहेण प्रत्यक्षादौ च शाब्दत्वासम्भवः। अथ न शृणोमि इति विपरीतानुव्यवसायात् न शाब्दत्वामिति चेन्न अनुमिनोमि इत्यनुव्यवसायान्नानुमितित्वमपीत्यापि तुल्यं तस्माद्विरुद्धमेवानुमितित्वं शाब्दत्वं च मानसत्व निराकरणमनुमिताविव शाब्देऽप्यनुसन्धेयम्।

शाब्दबोधे च पदज्ञानस्य करणत्वम्, पदज्ञानजन्यपदार्थोपस्थितिः कारणम् आकांक्षादिज्ञाने सत्यपि पदात् पदार्थानुपस्थितौ शाब्दबोधानुदयात् समवायेनाकाशसम्बन्धित्वेन गृहीतघटादिपदात् आकाशोपस्थितौ तस्य शाब्दबोधाभावात् वृत्तिरूपसम्बन्धेनार्थसम्बन्धितया गृहीतात् पदादेव जायमानोपस्थितिः कारणं भवति। अथ घटपदं घटे शक्तम् गंगापदं तीरसम्बन्धिशक्तमित्यादिज्ञानानामपि घटतीरादिविषयकतया तेषामेवास्तु घटतीरादिशाब्दहेतुत्वं तदुत्तरं पुनर्घटतीराद्युपस्थिति कल्पनमनर्थकमिति चेन्न! यदि हि विशेषण ज्ञानसम्पत्तिमात्रार्थं स्यात्पदार्थज्ञानं ततश्च शाब्दबोधः प्रत्यक्षादितोऽपि घटादिशाने शाब्दबोधः स्यादिति पदप्रयोज्यैव ज्ञानेतदर्थविषयता तदर्थशाब्दप्रयोजिका इति उपेयानुभवानुरोधात्। नहि शक्तिज्ञाने तदर्थविषयता पदप्रयोज्येति न सा शाब्दोपयोगिनीति शक्तिज्ञानाद्यनन्तरं पदप्रयोज्यविषयताकपदार्थोपस्थितिरवश्यमुपेयेति। किञ्चान्वयव्यतिरेकाभ्यां पदज्ञानजन्योपस्थितेर्हेतुत्वे सिद्धे तदुपायतया शक्तिज्ञानादेः कारणत्वकल्पनं न हि तच्छक्ति ज्ञानादितोऽपलपितुं शक्यम्। वस्तुतस्तु शक्तिसम्बन्धेनार्थसम्बन्धितया गृहीतेऽपि पदे बाधकात् पदार्थस्यास्मरणे शाब्दबोधस्याननुभविकत्वात्। पदार्थोपस्थितेस्तज्जन्याया हेतुत्वं विनापि उपस्थितेः शक्तिज्ञानमात्रादित शाब्दस्यानुभविकत्वे उपस्थितिहेतुत्वव्यवस्थापनं गीर्वाणगुरूणामप्यशक्यम् इति मन्तव्यम्। शाब्दबुद्धौ च आकांक्षायोग्यतातात्पर्याणां ज्ञानम् आसत्तिश्च कारणम्। न्यायवार्त्तिकतात्पर्यटीकायां वाचस्पति मिश्रेणोक्तं यत्प्रयोजकवृद्धशब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानोपमानपूर्वकत्वात् शब्दार्थसम्बन्धग्रहणस्य स्वार्थसम्बन्धज्ञानसहकारिणश्च शब्दस्यार्थ प्रत्यायकत्वात् उपमानपूर्वकत्वमिति उपमानानन्तरं शब्दप्रमाणं लक्षयति आप्तोपदेशः शब्दः आप्तश्रुतिराप्तवचनं तु इति आप्तग्रहणेनायुक्ताः शाक्यभिक्षु निर्ग्रन्थिकसंसारमोचकागमाभासाः परिहृता भवन्ति। अयुक्तं चैतेषां विगानात् विच्छिन्नमूलकत्वात्

प्रमाणविरुद्धाभिधानाच्च कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद् बोद्धव्यम्। म्लेच्छाश्च के इति प्रश्ने बोधायने उक्तम्–

**गोमांसखादको यस्तु विरुद्धं बहु भाषते।**
**सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते।।**

आकांक्षा च पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वरूपा। आसत्तिश्च पदानामविलम्बेनोच्चरितत्वम्। वह्निना सिञ्चति इति वाक्यात्शाब्दबोधानुदयात् योग्यताज्ञानमपि हेतुः। अथवा योग्यताज्ञानं न हेतुः, किन्तु आलंकारिकवाक्येभ्यो बोधोदयानुरोधात् वासनाविशेषात्मकोत्तेजकाभावविशिष्ट बाधनिश्चयाभावः शाब्दबोधे हेतुः। शक्तिश्च ''अस्माच्छब्दादयमर्थो बोद्धव्यः इत्याकारिकेश्वरेच्छारूपेति न्यायविदः। पदार्थान्तरमिति मीमांसकाः। बोधजनकत्वमेव शक्तिरिति वैयाकरणाः। एवं लाक्षणिकार्थेऽपि शक्तिरेव। अत एव तन्मते सर्वे सर्वार्थवाचकाः सन्ति। शक्तिग्रहश्च व्याकरणादिना भवति। तदुक्तम्–

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

अनुमानोपमानशब्दाः शक्तिग्राहका इति नव्याः। व्यवहारप्रसिद्धपक्षसान्निध्यविवरणानामनुमाने व्याकरणवाक्यशेषकोशानाञ्च शब्देऽन्तर्भवात् इति। शक्तिवच्छक्यसम्बन्धरूपा लक्षणापि शाब्दबोधोपयोगिनी वृत्तिः, तया गंगायां घोष इति वाक्यात् गंगातीरे घोष इति बोधो जायते। लक्षणा च द्विविधा जहत्स्वार्था अजहत्स्वार्था चेति। वेदान्तिनां मते जहदजहत्स्वार्था तृतीयापि लक्षणा भवति। गंगायां घोष इति जहत्स्वार्था, तत्र स्वार्थस्यप्रवाहस्य त्यागात्। यष्टीः प्रवेशय इति अजहत्स्वार्था, तत्र स्वार्थस्य यष्ट्या अपि क्रियान्वयात्। तत्त्वमसि इति महावाक्ये जहजदहल्लक्षणा, वाक्यार्थयोः अर्धस्य त्यागात् अर्धस्य चापरित्यागात्। अत एव तत्पदार्थत्वंपदार्थयोरभेद (सम्बन्धेन) बोधेन जीवब्रह्मणोरद्वैतं सिद्ध्यति। व्यञ्जनापि वृत्तिरित्यालंकारिकाः। व्यंग्यार्थबोधो मानस एवेति न्यायमतम्। वाक्यार्थोऽपि संसर्गरूपः। स च क्वचित् भेदसंसर्गः क्वचिच्चाभेदसंसर्गात्मकः इति नैयायिकाः। अत एवेतन्मते अन्वयबोधो एव वाक्यार्थबोध इत्युच्यते। अतएव संसर्गरूपवाक्यार्थमानम् संसर्गमर्यादयैव, नच विषणतया नापि विशेष्यतया। प्रकरणादिवशादपि शब्दा विभिन्नाप्रेतार्थात् बोधयितुं क्षमन्त इति नैव तिरोहितं विदुषाम्। शब्दानामेवास्ति माहात्म्यमिदं यल्लिपिबद्धाः सन्तस्ते परस्सहस्रेभ्योऽद्यापि वाल्मीक्यादिमहर्षीणाम् अभिप्रायान् अस्मानवबोधयन्ति। किं बहुना तिर्यञ्चोऽपि परस्परं शब्दैर्व्यवहरन्तो दृश्यन्ते। लोके हि– यावन्तोऽर्थाः सन्ति, तावन्तः शब्दा अपि वर्त्तन्ते। एतावता विज्ञायते यत् सांसारिकपदार्थानां यावान् सम्बन्धः शब्देनास्ति, न तावानन्येन सह केनापि। अतश्चोक्तं भर्तृहरिणा–

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते।।**

अतएव लोके किं दृष्टामितिप्रश्नेऽर्थसूचनाम शब्दः प्रयुज्यते फलमिति। कीदृशं ज्ञानमिति ज्ञानसूचनायाप्युच्यते फलमिति। किमुक्तमितिप्रश्ने शब्दसूचनायापि तदेवोच्यते फलमिति। अर्थात् सर्वोऽप्यर्थः शब्दानुमतः सर्वापि प्रतीतिः शब्दानुमता, शब्दस्तु स्वयं शब्द एवास्तीति अहो शब्दस्य माहात्म्यम्। अत एव शब्दप्रमाणानङ्गीकुर्वाणा अपि प्रतिवादिनो निजाचार्यवचनानि प्रमाणीकुर्वन्ति। तदीयाचार्याश्च स्वमतप्रचाराय विविधागमानुपदिष्टवन्तः। अपि च चक्षुरादिज्ञानं यत्र बाधकज्ञानोदये सति विपरीतज्ञानजननात् विरमति, नेदं रजतमिति बाधोदये रजतमिदमितिविभ्रमस्यापायदर्शनात् तत्र शब्दस्तु शतकृत्वोऽपि बाध्यमानः यदैवोच्चरितः करांगुलिशिखरे करिशतमास्ते इति, तदैव तथाभूतं विकल्पं भूयोऽपि जनयत्येव। स विकल्पः कायम् अयथार्थो भवेत् कामंवास शब्दः प्रमाणभूतेषु शब्दकोटिषु नाटीकेत्। प्रदीपवत् प्रकाशकत्वमात्रं शब्दस्य स्वरूपम्, न तु यथार्थत्वम् अयथार्थत्वं वा स्वरूपेण शब्दे तिष्ठति। यथा हि प्रदीपो विपरीतेऽप्यर्थे प्रकाशरूपतां नातिवर्त्तते, तथैव शब्दोऽपि प्रमाणान्तरबाधिते अर्थे प्रकाशत्वधर्मान्न च्यवते। अयं तु विशेषः प्रदीपे व्युत्पत्तिनिरपेक्षमेव प्रकाशकत्वं, शब्दे तु व्युत्पत्तिसापेक्षमिति विशेषः। अत एव प्रकाशात्मनः शब्दस्य वक्तृगुणदोषाधीने यथार्थेतरत्वे भवतः। तथा चोक्तं श्लोकवार्त्तिके– ''अत्यन्तासत्यपि अर्थे ज्ञानम् शब्दः करोति हि''। अत एव शाब्दबोधे योग्यताज्ञानस्य कारणत्वम् अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं वा न सर्वसम्मतम्। चन्द्रोमुखमितिरूपकवाक्यात् बोधोदयात् ''एष वन्ध्यासुतो याति खपुष्पकृतशेखरः'' इत्यादि श्लोकार्धशाब्दबोधेन चमत्कारातिशयानुभवाच्चेति।

*विभागाध्यक्षचरः,*
*स्नातकोत्तरदर्शनविभागः,*
*कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालय,*
*दरभङ्गा, बिहारराज्यम्*

# विवर्त्ततेऽर्थभावेनेत्यत्र प्रकारचिन्तनम्

**डॉ. कमलनयनशर्मा**

तत्र तावदद्वैतवेदान्ते यथा ब्रह्मविवर्त्तः संसारस्तथैव व्याकरणदर्शननिकाये स्फोटात्मकब्रह्मविवर्त एव शब्दप्रयोगसंसारस्तथान्तिमे क्षणे शब्दब्रह्मतत्त्वज्ञानेन मोक्षमपि प्राप्नुवन्ति साधका इति निश्चिन्वन्ति प्रज्ञावन्तः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिरिति न तिरोहितं केषाञ्चिदपिसङ्ख्यावताम्। यद्यपि यत्क्षणावच्छेदेन ब्रह्म विवर्त्तते तत्क्षणावच्छेदेन न कश्चिदपि भवति सहायः। अन्यथा 'एकमेवाद्वितीयं ब्रह्म[१]' इति सिद्धान्तभङ्गापत्तिः। तथापि स्वसहायतां करोत्येव, यथा 'प्रकृतिं स्वामधिष्ठाय सम्भवामि[२]' इति भगवद्वचनं प्रमाणन्तथैवात्रपि। न सा प्रकृतिः काचिद्भिन्ना, अतएव 'स्वाम्' इति पदोपादानम्। अन्यथानवस्थाप्रसक्तिरपि स्यात्। स्फोटब्रह्मापि संसारशब्दप्रक्रियानिर्वाहाय विवर्त्तते, तत्र न भवति कश्चित्सहायः, स्वयमेव सर्वसमर्थत्वात्तथाप्यर्थप्रकाशनसाधनी भूतानि कानिचित्तत्त्वानि समुद्भावयति। तेन च सहायेनार्थं प्रकाशयति। तच्च तत्त्वं वृत्तिरूपम्, वृत्तिश्च त्रिधा परिकल्पिता-शक्तिर्लक्षणाव्यञ्जना च[३]। वृत्तित्वञ्च स्पष्टयति नागेशो यथा - शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थ-सम्बन्धत्वम्[४]। शक्तिस्वरूपविषये मतभेदो वर्त्तते दार्शनिकानाम्, स नात्र विचारविषयः। यथा साधुशब्दात्पदार्थबोधस्तथैवासाधुशब्दादपि। असाधुशब्दात्पदार्थबोधे व्युत्पन्नस्य साधुशब्दस्य स्मरणात् , अव्युत्पन्नस्य शक्तिभ्रमादेव बोध इति भेदः। तत्र व्युत्पन्नाश्च द्विविधाः - तत्तद्वाचकसंस्कृतविशेषज्ञानवन्तः, तद्विकलाश्च। तत्र प्रथमस्य साधुस्मरणमन्यस्य च सर्वनामस्मृतेस्तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा बोधः। अनेन प्रकारेण शक्तिमधिष्ठाय पदपदार्थरूपेण विवर्त्तते भगवान् स्फोटः।यत्र शक्त्या वृत्त्या पदार्थोपस्थितिर्न जायते, तत्र लक्षणा प्रवर्त्तते। तत्र स्फोटः लक्षणामधिष्ठाय तत्तत्पदार्थबोधाय विवर्त्तते, यथा 'गङ्गायां घोषः' इत्यादिः। अत्र भगीरथरथखातावच्छिन्ने जलप्रवाहे घोषस्यासम्भवान्न शक्तिः प्रवर्त्तते, न वा शक्तिमधिष्ठाय विवर्त्तते, अतएव तत्र लक्षणा प्रवर्त्तते। विषयेऽत्रापि स्वरूपविषये वर्त्तते विवादस्तथापि न तत्राहं गच्छामि।

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया[५]॥**

इति सिद्धान्तमनुसृत्य पदार्थं बोधाय विवर्त्तते' अतश्च गङ्गापदस्य गङ्गातीरे लक्षणा स्वीक्रियते। तेन

च लक्षणाबोध्य शैत्यपावनत्वादिबोधो भवत्येव। तेनैव रूपेण विवर्त्तते स्फोट इति बोध्यम्। तस्य सर्वसमर्थत्वात् ब्रह्मस्वरूपत्वात्।

यत्र च न प्रवर्त्तते शक्तिः, न वा लक्षणा, तत्र व्यञ्जनामधिष्ठाय जगत्प्रक्रियानिर्वाहाय विवर्त्तते। व्यञ्जनास्वरूपञ्च- 'मुख्यार्थसम्बद्धासम्बद्धसाधारणमुख्यार्थबाधग्रहाद्यप्रयोज्याप्रसिद्धाद्यर्थविषयकधी-जनकत्वम्[६]'। एतादृशी व्यञ्जना शब्दतदर्थपदैकदेशवर्णरचना चेष्टादिषु सर्वत्र भवति। अनया च कटाक्षेणाप्यर्थाभिलषितः पदार्थविशेषोऽभिव्यज्यते। इदमेव महत्त्वमस्याः। वृत्तित्रयमेतदधिष्ठाय विवर्त्तते स्फोटस्तेन चार्थबोध इति सिद्धान्तः।

तत्र सर्वप्रथमं धातुरूपेण विवर्त्तते, सकलशब्दमूलभूतत्वाद्धातोः। अतएव ज्येष्ठत्वं श्रेष्ठत्वञ्च। तथा च नागेशः -'सकलशब्दमूलभूतत्वादिति[७]'। तथा चामरः -'शब्दयोनिश्च धातवः[८]' इति। दधाति धीयते। 'धाञ् जुहोत्यादिगणः[९]'। 'सितनिगममिमसिसच्यविविधाञ् क्रशिम्यस्तुन्[१०]' इत्यणादिसूत्रेण तुन्प्रत्ययः। डुधाञ् धारणपोषणयोः:धाधातोस्तुन्प्रत्यये कृते धातुरिति। धारयति प्रत्ययादेशागमादीनीतिभावः। एवमेव हलायुधोऽपि यथा - धीयते सर्वस्मिन्निति धातुः[११]। व्युत्पत्तिश्च पूर्ववदेव। शब्दमूलम्। तच्च साधुप्रकृतिः - भू-पच्-पठ् प्रभृतयः। शब्दनिर्मितिनिष्ठकार्यतानिरूपितकारणताश्रयोधातुरित्यर्थः। धातवश्च नैके सन्ति। लोकव्यवहारसिद्धये तत्तदर्थविशेषप्रतिपादनरूपेण विवर्त्तते। लोकव्यवहारं यावद्विवृत्तिः। तत्र भवति, करोति इत्यादितिङ्ङन्तपदेभ्योऽर्थबोधो जायते, तथापि अनुभूयते, प्रजयति इत्यादिभ्यः कथमर्थबोधः, निपातसम्मिलितत्वात्। ततश्च तत्तदर्थबोधनाय निपातसामान्यविशेषरूपेण विवर्त्तते। ततश्च निपातार्थबोधः, लोकव्यवहारसिद्धिश्च। एवमेव निषेधस्थलार्थबोधसम्पादनाय तदर्थरूपेण विवर्त्तते। नञर्थोऽभावोभेदो वा इत्यत्र सर्वसम्मतिः। अतोऽघटः घटभिन्नः, नाहमस्मि, घटो नास्तीत्यादौ नञर्थस्य बोधः। एवमपि यत्रार्थकात्स्न्र्यरूपार्थबोधाय निर्धारणरूपार्थप्रतिपादनाय वा एवपदप्रयोगस्तत्र न शाब्दबोधः। तत्र तदर्थश्चैवकाररूपेण विवर्त्तते। ततश्चोभयोरर्थयोर्बोध इति ज्ञेयः। अतएव पृथिव्यामेव गन्ध इत्यादिशब्दाद्बोधः। अस्तु। परन्त्वत्र 'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति सिद्धान्ते स्वीक्रियमाणे कथं केवलेभ्यो धातुभ्योऽर्थबोधस्ततोऽप्यर्थबोधाय तिङ्प्रत्ययरूपेण विवर्त्तते। ततश्च भू+ति इति जाते आगमादेशरूपेणापि विवर्त्तते। ततश्च 'भवति' इत्यादि तिङ्ङन्तपदप्रसिद्धिः। ततश्चार्थबोधो लोकव्यवहारश्च। तिङां स्थानीभूताः लकारादयोऽपि तस्यैव विवर्त्तः। तेषाञ्च वर्त्तमानाद्यर्थे विहितत्वात्तत्तदर्था भवन्ति। ततो वर्त्तमानादिकालानां बोधो लोकव्यवहारश्चेति। एतावान् महिमा स्फोटस्य। एवमेव धातवोऽपिनवगणेषु विभक्ताः। तत्र तत्र शबाद्यागमा अपि विभिन्नाः। एते सर्वेऽपि तेन तेन रूपेण तस्यैव भगवतः स्फोटस्य विवर्त्तरूपः।एवमेवार्थविशेषबोधकाः णिच्प्रत्यया अपि सन्ति। ते च णिच्प्रत्ययाः द्विविधाः - स्वार्थिकाः प्रेरणार्थकाश्च। चुरादौ स्वार्थे तथा णिच्प्रकरणे प्रयोजकेऽर्थे णिज्विहितः सोऽपि तस्यैव प्रपञ्चः। भवन्तं प्रेरयतीति भावयतीत्यादिप्रयोगस्य विद्यमानत्वात्। इच्छार्थेऽपि दृश्यते प्रयोगो यथा - पठितुमिच्छतीति पिपठिषतीत्यादिः। तत्र तादृशप्रयोगाय सन्प्रत्ययरूपेण विवर्त्तते। एवमेवान्यार्थप्रतिपादनाय यङ्यङ्लुगादिरूपेण विवर्त्तते। तेषामेव

विवर्त्तरूपा एते। कुत्रचिन्नामापि धातुरूपतामाप्नोति, यथा – आत्मनः पुत्रमिच्छतीति पुत्रीयति। अत्र चानेन रूपविशेषेण विवर्त्तस्तस्यैव। कुत्रचिदुपग्रहव्यतिक्रमोऽपि समवलोक्यते, यथा– लुनातीति परस्मैपदीयप्रयोगस्तथापि कर्मव्यतिहारे आत्मनेपदम्। 'व्यतिलुनीते' इति। अत्राप्यनेकान्युदाहरणानि।

एवमेव कृञ्धातूभयपदीयस्तथापि अनुपराभ्याम् इत्युक्तेः केवलं परस्मैपदीय एव भवति। 'जि जये[१२]' भ्वादिः, जयतीतिपरस्मैपदीयस्तथापि विपराभ्यां उक्ते आत्मनेपदीयः सञ्जायते। लोकव्यवहारसम्पादनायैव तत्तद्रूपेण विवर्त्तते। एवमेव लकारं परिवर्त्यापि विवर्त्तते। अयं भावः – जगतः प्रक्रिया येन येन रूपेण प्रचलेत्तेन तेन रूपेण भगवान् स्फोटो विवर्त्तते। तत्र नातिभारस्तेषामिति बोध्यः।

लोके तावत्तेन कृतः, स कृतवान् इत्याद्यपि जायन्ते प्रयोगास्तत्कथमिति चेत्, उच्यते – धातुप्रकृतिककृत्प्रत्ययरूपेण विवर्त्तते। क्तक्तवतु प्रत्ययरूपेण विवर्त्तमाने लोकव्यवहाराः सङ्गच्छन्त एव। तत्रापि कुत्रचित् कर्त्तरि कुत्रचिच्च कर्मणि प्रत्यया विहिताः सन्ति। तस्य चान्योऽर्थः। कर्त्तरि व्यापाराश्रयः कर्मणि फलाश्रयोऽर्थः। घञादिप्रत्ययेन सिद्धावस्थापन्नो भावोऽर्थः। तत्र क्रियान्तराकाङ्क्षायाः विद्यमानत्वात्। मीमांसकमतेऽपि धात्वर्थः सिद्धावस्थापन्नैव क्रिया। सा च यागादिरूपा। आख्यातार्थेन साध्यावस्थापन्ना क्रिया प्रतिपाद्यते। तथा चोक्तमपि –

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः[१३]॥**

एवमेव समानकर्तृकपूर्वकाले बोध्ये क्त्वाप्रत्ययोऽपि भवति, भुक्त्वा व्रजतीत्यादौ। अनेन च प्रकारेण तस्मादपि भवति लोकप्रक्रिया निर्वाहः। अनेन प्रकारेण सिद्धसाध्योभयक्रियारूपेणानेकप्रकारेण तेषां विवृत्तिस्तथापि न केवलया क्रियया लौकिकार्थक्रिया सम्पद्यते। कर्त्तारं विना क्रियाया असम्भवात्। अतश्च पुनः नाम प्रातिपदिकरूपेण विवर्त्तते। पञ्चकं प्रातिपदिकार्थः सुप्रसिद्धः। तथा चोक्तम् –

**एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा।**
**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः[१४]॥**

नाम च प्रकृतिः। न केवलायास्तस्याः समुपयोगः। तदर्थं सुबादिप्रत्ययरूपेणापि विवर्त्तते। तत्र प्रथमादिसप्तविभक्तयो भवन्ति। तेषु षण्णामेव कारकत्वं प्रतिपादयन्ति, साक्षात्क्रियाजनकत्वात्। षष्ठ्याः साक्षात्क्रियाजनकत्वाभावान्न कारकत्वमिति व्यवहारः। तस्या न साक्षादपितु द्वारेण क्रियाजनकता। रामादिप्रातिपदिकात्सुबर्थो जायते। तत्राप्यनेके विकाराः भवन्ति। सर्वेऽपि तस्यैव ब्रह्मणो विकाररूपाः। ततश्च राम इत्यादि सुबन्तशब्दाः निष्पद्यन्ते। तत्रैव च कर्तृत्वम्, कर्मत्वम्, करणत्वम्, सम्प्रदानत्वम्, अपादानत्वं तथाधिकरणत्वं परिकल्प्यते। तेषाञ्चाचार्याणां विविधपरिष्कारा अपि जायन्ते, सौष्ठवाय शास्त्रस्य ततश्च सुबन्तानां पदानां तिङन्तेन पदेन साकं भवति संयोगः। ततश्च वाक्ययोजना। 'रामो गच्छती'ति वाक्यम् ततश्चातिनिष्कर्षरूपो वाक्यार्थः। एकत्वसंख्याविशिष्टरामाभिन्नकर्तृकोत्तरदेशसंयोगानुकूलो वर्त्तमानकालिको व्यापार इति वाक्यार्थः। अनेन प्रकारेण वृत्त्या पदजन्योपस्थितपदार्थानामाकाङ्क्षादिनान्वयेन वाक्यार्थबोधः।

स्फोटमहिमानेन प्रकारेण लौकिककार्थक्रियाजनकत्वम्। प्रचलति च लोकव्यवहार:। परन्तु राजपुरुष:, अधिगोपम्, अधिहरि, कृष्णश्रित इत्यादिभि: पदै: कथं पदार्थबोध:, तत्रोच्यते, अत्रापि बोधसम्पादनाय समासरूपेण विवर्त्तते। पाणिन्यादिविहिततत्तत्समासशास्त्रेण समासस्यापि विहितत्वात्। समासश्चैकार्थीभावविवक्षायामेव जायते, नान्यत्र। एकार्थत्वञ्चैकोपस्थितिविषयार्थकत्वम्[१५]। अत्र 'समर्थ: पदविधि:' इति सूत्रभाष्यमेव प्रमाणम्। तथाहि - सामर्थ्यञ्चैकार्थीभाव:। किं समर्थं नाम? पृथगर्थानामेकार्थीभाव: समर्थवचनम्। क्व पुन:? पृथगर्थानि, क्वैकार्थानि? 'राज्ञ: पुरुष:' इति वाक्ये पृथगर्थानि 'राजपुरुष:' इति समासे एकार्थानि इति। सर्वश्च तस्यैव विवर्त्त:। समासत्वञ्च -'पाणिन्यादिसङ्केतसम्बन्धेन समासपदवत्त्वम्[१६]'। तत्रापि क्वचिदजहत्स्वार्था तथा कुत्रचिज्जहत्स्वार्थारूपेण विवर्त्तते। समासमधिकृत्याचार्याणां विविधविचारा: स्वस्वशास्त्रे सुप्रसिद्धा:।

नन्वनेन प्रकारेण जगतो भाषाप्रक्रिया प्रचलति, तथापि औपगव:, दाशरथि:, इत्यादयोऽपि प्रयोगा: शब्दमर्यादया भवन्ति, तत्र कथं निर्वाह:? तत्रोच्यते - तत्र तावत्तद्धितप्रत्ययेन विवर्त्त:। पाणिन्यादिसङ्केतविहिता प्रत्यया: भवन्ति। प्रत्ययत्वञ्च -सङ्केतविशेषसम्बन्धेन प्रत्ययपदवत्त्वं जातिविशेषो वा[१७]। तद्धितप्रकरणे प्राय: सप्तदशप्रकरणानि सन्ति। तत्रानेकेष्वर्थेषु प्रत्यया: विहिता सन्ति। यथाशास्त्रं तेषां भवत्युपयोग:, अर्थनिर्धारणे मतभेदोऽप्यत्र समवलोक्यते। अत एवोक्तं हरिणा -

**कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम्।**
**त्वतलोरर्थकथनं टीकायां हरिणा कृतम्[१८]॥**

स्फोटश्चाष्टविध: स्मृत:। लोकव्यवहारे परस्परं भेदोऽपि तन्महिम्नैव जायते। तत्र वर्णपदवाक्यस्फोट-भेदेन त्रय:। अखण्डपदवाक्यभेदेन च द्वौ। सम्मेलनेन पञ्च व्यक्तिस्फोटा भवन्ति। एवमेव वर्णपदवाक्यभेदेन जातिस्फोटास्त्रय:। महासम्मेलनेनाष्टौ स्फोटा भवन्तीति बोध्यम्। जातिश्च का? इत्यत्रोच्यते -जातिश्चाविद्यब्दो धर्मविशेष:[१९]। अथवा तत्र तत्र तदुपाध्यवच्छिन्नब्रह्मसत्तैव वेति। तथा चोक्तम् -

**सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।**
**जातिरित्युच्यते तस्यां सर्वे शब्दा: व्यवस्थिता:॥**
**सा नित्या सा महानात्मा तामाहुस्त्वतलादय:।**
**तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते[२०]॥**

ननु येषु येष्वर्थेषु त्वतलादय: प्रत्यया विहिता: तदर्थवाचकतापि तत्रैव स्यादिति चेत्, न। वाचकता तु ब्रह्मण्येव तिष्ठति। तत्रैव तस्याविद्यमानत्वात्। केवलं शास्त्रप्रक्रिया निर्वाहाय लोकव्यवहारसाधनाय च तेषां तेषां प्रत्ययानां तत्तदर्थविशेषे विधानम्। तदुक्तं नागेशेन -वाचकं ब्रह्मैव, शास्त्रप्रक्रिया तु जातिव्यञ्जक बोधनार्था[२१]। एवं स्फोटस्यैव विवर्त्तरूपोऽयं भाषाप्रपञ्च इति स्वीकर्त्तव्यम्। यथाशास्त्रं किञ्चिद् बुध्वा स्वान्त: सुखाय प्रयतितं मया। तदन्येषामपि मनोरञ्जनाय भवेच्चेन्महान् परितोष:। अन्यथा स्वगतसन्तोष एव फलम्। श्रीशारदासेवाचेति शम्।

**सन्दर्भाः -**


१. छान्दोग्योपनिषद् ६.२.१
२. भगवद्गीता ४.६
३. वै. सि. सि. म. पृ. ०६
४. वै. सि. सि. म. पृ. ०६
५. का. प्र.सू. १२
६. वै. सि. म. पृ. ३१
७. वै. सि. म. पृ. ३९
८. अमरकोशः ३.३.६४
९. जुहोत्यादिगणः १०९२
१०. उणादि सू. १.६९
११. हलायुध पृ. ३७
१२. भ्वादि. ५६
१३. वै. भू. सा. का. १५ पृ. ९१
१४. वै. भू. सा. का. २५ पृ. २०३
१५. पा. सू. २.१.१
१६. टिप्पणी पृ. २११
१७. वै. सि. म. पृ. २२
१८. वै. सि. म. पृ. २७
१९. वै. सि. म. पृ. ३०३
२०. वै. सि. म. पृ. ३०३
२१. वै. सि. म. पृ. ३०३



*धर्मशास्त्रविभागाध्यक्षचरः*
*राष्ट्रियसंस्कृतसंस्थानस्य,*
*जयपुरपरिसरस्य, जयपुरे*

# सव्यभिचारसाधारणलक्षणवर्णनप्रकारः

**प्रो. कोड्डुकुलवेङ्कटसोमयाजुलुः**

**सव्यभिचारसाधारणलक्षणावतारिका -**

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः[1] इति गौतममुनिप्रणीतन्यायसूत्रघटकषोडशपदार्थनिरूपिततत्त्वज्ञानान्मुमुक्षूणान्निश्श्रेयसाधिगमो भवतीति न्यायदर्शनस्यानितरसाधारणो मुख्यस्सिद्धान्तः। तदनुसारम्मुमुक्षूणां निश्श्रेयसाधिगमकषोडशपदार्थेषु हेत्वाभासोऽप्येकोऽन्यतमः पदार्थः। तादृशहेत्वाभासाख्यपदार्थतत्त्वज्ञानादपि मुमुक्षूणान्निश्श्रेयसाधिगमो जायत इति न्यायदर्शनोपासकनिखिलनैयायिकविद्वल्लोककुले व्यपदिश्यते। अनुमानप्रमाणमपि निश्श्रेयससाधकं भवतीति विद्वज्जनविदितमेव। उक्तञ्च नव्यन्यायदर्शनप्रवर्तकेण सर्वतन्त्रस्वतन्त्रेण पुम्भावसरस्वतिना श्रीमता गङ्गेशोपाध्यायेन स्वप्रणीते तत्वचिन्तामणौ - परमप्रयोजनमनुमानस्यापवर्गः[2] इति। अनुमितेरसाधारणकारणमनुमानं भवति। उक्तञ्चान्नम्भट्टेन तर्कसंङ्ग्रहे - अनुमितिकरणमनुमानमिति[3]। अनुमितेः करणमनुमितिकरणम्। करणत्वञ्च व्यापारवत्वे सत्यसाधारणकारणत्वम्। असाधारणकारणत्वञ्च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणता-श्रयत्वम्। तथा चानुमितिकरणमनुमानमितिवाक्यादनुमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमनुमानलक्षणं फलति। पर्वतो वह्निमान् धूमात् इत्याकारकसद्धेतुस्थलेऽस्यानुमानलक्षणस्येत्थं लक्षणसमन्वयः - प्रकृतानुमाने पर्वतः पक्षः। साध्यो वह्निः। धूमश्च हेतुः। पर्वतो वह्निमान् धूमात् इत्याकारकप्रकृतानुमानेव्याप्तिपक्षधर्मतापरामर्शानुमित्याख्यानि चत्वारि यथार्थज्ञानानि राजन्ते। तत्र साध्यव्याप्यो हेतुरिति व्याप्तिज्ञानं भवति। हेतुमान् पक्षः इति पक्षधर्मताज्ञानम्। साध्यव्याप्यहेतुमान् पक्षः इति परामर्शज्ञानम्। पक्षस्साध्यवानित्यनुमितिज्ञानम्। पर्वतो वह्निमान् इत्युदाहरणे वह्निव्याप्यो धूमः इति व्याप्तिज्ञानम्। धूमवान् पर्वतः इति पक्षधर्मताज्ञानम्। वह्निव्याप्यधूमवान् पर्वतः इति परामर्शज्ञानम्। पर्वतो वह्निमान् इत्यनुमितिज्ञानं भवति। एतादृशव्याप्तिपक्षधर्मतापरामर्शानुमित्याख्य-ज्ञानचतुष्टयमेव न्यायदर्शनेऽनुमानप्रमाणमिति नाम्नाभिधीयते। तत्र पूर्वोक्तज्ञानचतुष्टयेऽनुमितिज्ञानं कार्यं भवति। तादृशानुमितिज्ञानोत्पादकानि परामर्शपक्षधर्मताव्याप्तिज्ञानानि प्रकृतानुमित्याख्यकार्यं प्रति व्युत्क्रमेण कारणानि भवन्ति। तथाचात्रानुमानलक्षणेऽनुमितिपदेन पर्वतो वह्निमान् इत्याकारकप्रकृतानुमितिर्गृह्यते। तादृशप्रकृतानुमितित्वावच्छिन्ना या कार्यता, पर्वतो वह्निमान् इत्याकारिकप्रकृतानुमितित्वावच्छिन्ना कार्यता।

तन्निरूपिता या कारणता पर्वतो वह्निमान् धूमात् यथा महानसो यन्नैवं तन्नैवमित्याकारकानुमाननिष्ठा कारणता। तदाश्रयत्वमनुमाने वर्तत इति पूर्वोक्तानुमानलक्षणस्य पर्वतो वह्निमान् धूमात् यथा महानसो यन्नैवं तन्नैवमित्याकारकोदाहरणे लक्षणसमन्वयस्सुसङ्गच्छते।

अत्रायं विशेषः - पूर्वोक्तानुमानलक्षणेऽनुमितिपदेन प्रकृतानुमितिरेव ग्राह्या। नत्वनुमितिसामान्यम्। यदि सर्वत्रानुमिति पदेनानुमितिसामान्यमेव गृह्येत तदा पर्वतो वह्निमान् धूमाद्यथा महानसो यन्नैवं तन्नैवमित्याकारकानुमानस्थले पर्वतो वह्निमान् इत्याकारिकायाः अनुमितिरिव ह्रदो वह्निमान् धूमात् इत्याकारिकानुमितेरपि धर्तुं शक्यत्वेन पर्वतो वह्निमान् इत्याकारिकानुमितिं प्रति धूम इव ह्रदो वह्निमान् इत्याकारिकानुमितिघटकधूमवान् ह्रदः इत्याकारकपक्षधर्मताज्ञानघटकह्रदस्यापि धर्तुं शक्यत्वेन पर्वतो वह्निमान् इत्याकारिकानुमितिं प्रति वह्निव्याप्यधूमवान् पर्वतः इत्याकारकपक्षधर्मताज्ञानस्येव वह्न्यभावव्याप्यजलवान् ह्रदः इत्याकारकपरामर्शज्ञानस्य, तथा धूमवान् पर्वतः इत्याकारकपक्षधर्मताज्ञानस्येव ह्रदो वह्निमान्, वह्न्यभावव्याप्यजलवाँश्च इत्याकारकज्ञानीयवह्न्यभावव्याप्यजलवदध्रदत्वावच्छिन्नह्रदविषयकपक्षधर्मताज्ञानस्यापि पर्वतो वह्निमान् इत्यनुमिते प्रतिकारणत्वापत्तिः। अतस्तद्वारणाय पर्वतो वह्निमान् इत्यत्र वह्निव्याप्यधूमवान् पर्वतः, धूमवान् पर्वतः इत्याकारकप्रकृतपरामर्शपक्षधर्मताज्ञानयोरेव पूर्वोक्तानुमित्युत्पादकविपरीत-क्रमिककारणत्वसाधनायात्रानुमानलक्षणघटकव्याप्तिपक्षधर्मतापरामर्शज्ञानेषु प्रकृतविशेषणन्निवेशनीयम्।

अत्रेदं विचारणीयम् - पर्वतो वह्निमान् इत्याकारिकप्रकृतानुमितिस्थले पर्वतः पक्षः, वह्निस्साध्यो धूमश्च हेतुरिति न्यायदर्शनतत्त्वविद्भिः विदितमेव। पर्वतो वह्निमान् धूमाद्यथा महानसो यन्नैवं तन्नैवमित्याकारकप्रकृतानुमानघटको धूमः पर्वतो वह्निमान् इत्याकारिकानुमित्युत्पादक-पक्षधर्मताज्ञानस्थसद्धेतुर्भवति। पर्वतो वह्निमान् इत्याकारिकप्रकृतानुमित्युत्पादकहेतुपदेन ह्रदो वह्निमान् इत्याकारिकानुमितिज्ञानघटकह्रदो हेतुर्न भवति। किन्तु स हेत्वाभास एव। स एव हेत्वाभासो दुष्टहेतुरिति नाम्ना न्यायदर्शने व्यपदिश्यते। अयञ्च हेत्वाभासः प्रकृतानुमितिप्रतिबन्धको भवति। एतादृशो हेत्वाभासस्सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधभेदेन पञ्चविधः। एतादृशपञ्चविधहेत्वाभाससामान्य-लक्षणनिर्वचनाय नव्यन्यायदर्शनप्रवर्तकसर्वतन्त्रस्वतन्त्रनिखिलनिगमागमवागीशपुम्भावसरस्वती-स्वरूपनव्यन्यायदर्शनसिद्धान्ततत्त्वप्रचारप्रसारकाग्रेसरसार्वभौमेन सनातनार्षविद्याशेमुषीविभववैभवोपेतेन स्वाध्यायतपस्विना श्रीमता गङ्गेशोपाध्यायेन प्रणीते तत्त्वचिन्तामणिग्रन्थे द्वितीयेऽनुमानखण्डे अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति[४]हेत्वाभाससामान्यलक्षणन्निरुक्तम्। इदमेव हेत्वाभाससामान्यलक्षणन्नव्यन्यायदर्शनाध्ययनप्रविवित्सु-बालनैयायिकानायासबोधनाय तर्कसङ्ग्रहव्याख्यानग्रन्थेषु न्यायबोधिनी[५]तर्कसङ्ग्रहदीपिका[६]नीलकण्ठ-प्रकाश[७] आदिग्रन्थेषु तत्तद्ग्रन्थकारैः किञ्चित्सरलशैल्यां प्रत्यपादि। तच्च प्रकृतानुमितिनिष्ठप्रतिबध्यता-निरूपितप्रतिबन्धकतानिरूपकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् इति। ह्रदो वह्निमान् वह्न्यभावव्याप्यजलवाँश्च इत्यस्य हेत्वाभाससामान्यलक्षणस्योदाहरणम्। अत्रोदाहरणे ह्रदो वह्निमान् जलात् इत्यत्र प्रकृतहेत्वाभाससामान्यलक्षणस्येत्थं लक्षणसमन्वयः - पूर्वोक्तहेत्वाभाससामान्यलक्षणे-

ऽनुमितिपदेन प्रकृतानुमितिरेव ग्राह्या। एवं तल्लक्षणघटकानुमितिप्रतिबन्धकपदार्थेन प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्यैव ग्रहणम्। तथा च प्रकृतानुमितिनिष्ठप्रतिबध्यता-निरूपितप्रतिबन्धकतावद्वृत्तियथार्थज्ञानविषयत्वं हेत्वाभाससामान्यलक्षणं फलति। प्रकृतानुमितिः = ह्रदो वह्निमान् वह्निव्याप्यजलवाँश्च इत्याकारिकानुमितिः। तादृशप्रकृतानुमितिनिष्ठा या प्रतिबध्यता? ह्रदो वह्निमान् इत्याकारकज्ञानीयप्रकृतानुमितिनिष्ठह्रदत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्न-प्रतिबध्यता। तन्निरूपिता या प्रतिबन्धकता? ह्रदो वह्न्यभाववान् वह्निव्याप्यजलवाँश्च इत्याकारकज्ञानीयप्रकृतानुमितिनिष्ठह्रदत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्न-प्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नप्रकारताशालि-निश्चयत्वावच्छिन्नप्रतिबन्धकता। तादृशप्रतिबन्धकताविषयत्वस्य वह्न्यभाववद्ध्रदरूपबाधे सत्त्वादस्य हेत्वाभाससामान्यलक्षणस्य वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयस्सुकरः। अयञ्च हेत्वाभासस्सव्यभि-चारविरुद्धसत्प्रतिपक्षासिद्धबाधभेदेन पञ्चविधः। तादृशपञ्चहेत्वाभासचये सव्यभिचारः प्रथमहेत्वाभासो भवति। अयञ्च सव्यभिचारोऽनैकान्तिकपदेनाभिधीयते। स चानैकान्तिकः साधारणासाधारणानुपसंहारि-भेदेन त्रिविधः। एतस्यानैकान्तिकस्य लक्षणनिर्वचनावसरे पुम्भावसरस्वतिना सर्वतन्त्रस्वतन्त्रेण न्यायदर्शनरत्नाकारेण श्रीविश्वनाथपञ्चाननभट्टाचार्येण स्वप्रणीते मुक्तावलीग्रन्थे एवञ्च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम्[८]इत्याकारक ग्रन्थमुखेन सव्यभिचारीयमनैकान्तित्वलक्षणन्निरुक्तम्। अत्र साधारणादीत्यादिपदेनासाधारणानुपसंहारिणोः परिग्रहः। उक्तञ्च दिनकरभट्टेन स्वप्रणीतायां दिनकर्याम्-साधारणादीत्यादिनासाधारणानुपसंहारिणोः परिग्रहः[९] इति। इदानीन्नव्यन्यायदर्शनस्वाध्यायतपोजनितनव्य न्यायदर्शनसिद्धान्ततत्त्वशेमुषीविभववैभवो नव्य-न्यायशास्त्रार्थधुरीणोऽहं सव्यभिचारहेत्वाभासस्थसाधारणादिलक्षणत्रयघटकसाधारणाख्यप्रथमलक्षणम-धिकृत्य नव्यन्यायदर्शनस्थतत्त्वचिन्तामणि हेत्वाभाससामान्यनिरुक्तिसव्यभिचारगादाधरीयसामान्य-निरुक्तिजागदीशीव्यधिकरणतर्कसङ्ग्रहन्यायबोधिनी-तर्कसङ्ग्रहदीपिकानीलकण्ठप्रकाशनिरुक्तिन्यायसि-द्धान्तमुक्तावलीदिनकरीरामरुद्रीयादि ग्रन्थचयस्थसव्यभिचारसाधारणलक्षणविविधसिद्धान्ततत्त्वपरिशो-धनपूर्वकं सव्यभिचारघटकसाधारणलक्षणं मदीयप्रस्तुतानुसन्धानपत्रमाध्यमेनास्मद्गुरुचरणकृपया मत्प्रणीतैतदनुसन्धानपत्रे यथाशक्ति यथामति साङ्गोपाङ्गं निबध्नामि। तथाहि –

**सव्यभिचारसाधारणलक्षणम्-**

साध्याभाववद्वृत्तिहेतुस्साधारणः[१०]इति। तर्कसङ्ग्रहेऽन्नम्भट्टेन साधारणाख्यहेत्वाभासलक्षणं प्रण्यनायि। पूर्वोक्तसव्यभिचारघटकसाधारणलक्षण-घटकसाध्याभावपदार्थनिरूपणावसरे साध्याभाव इत्यत्र साध्यस्याभावस्साध्याभाव इति षष्ठीतत्पुरुषसमासः। तत्र साध्यपदस्य साध्यमर्थः। तत्पदोत्तरषष्ठ्याः प्रतियोगित्वमर्थः। साध्यस्य प्रतियोगितायां निष्ठत्वसम्बन्धेनान्वयः। तादृशसाध्यनिष्ठप्रतियोगितायाः निरूपकत्वसम्बन्धेन पूर्वोक्तसाधारणलक्षणघटकाभावपदवाच्यात्यन्ता-भावनिष्ठस्वरूपसम्बन्धावच्छिन्न-प्रतियोगितानिरूपकात्यन्ताभावेऽन्वयः। तादृशसाध्यनिष्ठप्रतियोगिताकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्न-

प्रतियोगितानिरूपकात्यन्ताभावस्य निष्ठत्वसम्बन्धेनात्यन्ता-भावनिष्ठाधेयतायामन्वयः। तादृशाधेयतायाः निरूपितत्वसम्बन्धेनाधिकरणतायामन्वयः। तादृशाधि-करणतायाः आश्रयत्वसम्बन्धेन वृत्तित्वेऽन्वयः। तादृशवृत्तित्वस्य निष्ठत्वसम्बन्धेन वृत्तित्वनिष्ठप्रतियोगितायामन्वयः। तादृशवृत्तित्वनिष्ठप्रतियोगितायाः हेतुतावच्छेदकसम्बन्धेन हेतावन्वयः। तथा च साध्याभाववद्वृत्तिहेतुः साधारणः इति वाक्यात् साध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिहेतुतावच्छेदक-सम्बन्धावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं सव्यभिचारसाधारणलक्षणं फलति। पर्वतो वह्निमान् प्रमेयत्वात् इति सव्यभिचारलक्षणत्रयघटकप्रथमसाधारणाख्यहेत्वाभासस्योदाहरणम्। अत्रोदाहरणे साध्यम् = वह्निमत्वम्। साध्यनिष्ठप्रतियोगितानिरूपको योऽत्यन्ताभावः? पर्वते प्रमेयत्वेन वह्निर्नास्तीत्या-कारकप्रतीतिसिद्धप्रमेयत्वावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकपर्वतीयवह्न्यभावः स्वीक्रियते। तादृशप्रमेयत्वावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकपर्वतीयवह्न्यत्यन्ताभावनिष्ठ-स्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरण तावद्वृत्तिहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयता-निरूपिताधिकरणतावद्वृत्तित्वस्य प्रमेयत्वरूपहेतौ सत्त्वादेतल्लक्षणसमन्वयः। प्रपञ्चितश्चैतदन्नम्भट्टगोवर्ध-नपण्डिताभ्यां स्वस्वप्रणीतयोः तर्कसङ्ग्रह[११]न्यायबोधिनी[१२]ग्रन्थयोः। इदमेव सव्यभिचारसाधारणलक्षणं नीलकण्ठदीक्षितेन स्वप्रणीते नीलकण्ठप्रकाशे किञ्चित्सङ्क्षेपेण न्यवेशि। तच्च साध्यतावच्छेदकधर्म-सम्बन्धावच्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतानिरूपिता-धिकरणतावत्त्वम्[१३]।

**समीक्षा-**

एतावता प्रबन्धेन तर्कसङ्ग्रहन्यायबोधिनीतर्कसङ्ग्रहदीपिकानीलकण्ठप्रकाशाख्यग्रन्थचतुष्टयमाध्यमेना-नैकान्तिकसव्यभिचारलक्षणत्रय-घटकस्थसाधारणलक्षणं, तत्समन्वयश्च यथाशक्ति यथामति अन्यूनानतिरिक्ततयाऽत्रैतन्मदीयानुसन्धानपत्रे मया व्यवृण्वि। तत्र पूर्वोक्तसव्यभिचारसाधारणलक्षण-निर्वचनावसरे, तल्लक्षणसमन्वयावसरे च पूर्वोपदर्शितग्रन्थचतुष्टये तत्तद्ग्रन्थप्रणेतृभिः पर्वतो वह्निमान् प्रमेयत्वात् इति स्थले पर्वते प्रमेयत्वेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धव्यधिकरणधर्मावच्छिन्नप्रमेयत्वावच्छिन्नवह्नित्वा-वच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वतीयवह्न्यभावमादाय प्रौढया वितण्डावादमाध्यमेन समन्वयो व्यधायि।

वस्तुतस्तु पर्वते प्रमेयत्वेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धव्यधिकरणधर्मावच्छिन्नवह्नित्वा-वच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकपर्वतीयवह्न्यभावस्य निसर्गतोऽप्रसिद्धत्वेन पूर्वोक्ततादृशाप्रसिद्धप्रति-योगितानिरूपकपर्वतीयवह्न्यभावस्याप्यप्रसिद्धत्वेन पूर्वोक्ततादृशाप्रसिद्धप्रतियोगितानिरूपकव्यधिकरण-धर्मावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वतीयवह्न्यभावमादाय पर्वतो वह्निमान् प्रमेयत्वात् इत्यत्र पूर्वोक्तसव्यभिचारसाधारणलक्षणसमन्वयस्तेषां चतुर्णां ग्रन्थप्रणेतॄणामत्यन्तमनुचितोऽसम्भव-दोषग्रस्तश्च। अथाऽपि तर्कसङ्ग्रहन्यायबोधिनीदीपिकानीलकण्ठप्रकाशकृदादिकतिपयनैयायिकमूर्धन्यैः प्रौढ्या, वितण्डावादमाध्यमेन पर्वतो वह्निमान् प्रमेयत्वात् इति स्थलं चित्वा तत्स्थले पर्वते प्रमेयत्वेन

वह्निर्नास्तीत्याकारकप्रतीतिसिद्धव्यधिकरणधर्मावच्छिन्न वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकाप्रसिद्ध प्रतियोगिताकव्यधिकरणधर्मावच्छिन्न प्रतियोगिताकपर्वतीयप्रमेयत्वावच्छिन्नवह्न्यभावमादायैव लक्षणसम-न्वयकरणे इदं वाच्यं ज्ञेयत्वात् इति स्थलमादाय तस्मिन् स्थले पूर्वोक्तताद्दशाप्रसिद्धप्रतियोगिता-कव्यधिकरणधर्मावच्छिन्नवाच्यत्वा वच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकवाच्यत्वाभावमादाय पूर्वोक्तलक्षणस्या-सम्भवदोषप्रतिपादकतत्व चिन्तामणिकारप्रणीतसिद्धान्तलक्षणावतारक तत्त्वचिन्तामणिग्रन्थस्योत्थितिरेव न स्यात्। निष्कर्षे तु पूर्वोक्तसव्यभिचारसाधारणलक्षणस्यास्य पर्वतो वह्निमान् प्रमेयत्वात् इति स्थलमपहाय ह्रदो वह्निमान् जला इत्याद्युदाहरणेष्वेव लक्षणसमन्वयोऽत्यन्तमुचितः परमप्रामाणिको नव्यन्यायदर्शनमुख्यसिद्धान्तसमर्थकश्चेति मदीयं प्रामाणिकमेताद्दशं गवेषणम्। अत्र युक्तमुत्पश्यन्तु न्यायदर्शनप्रामाणिकसिद्धान्ततत्त्वविदः। पूर्वोक्तसव्यभिचारसाधारणलक्षणस्य ह्रदो वह्निमान् जलात् इत्यत्र लक्षणसमन्वयश्चेत्थम् - अत्रोदाहरणे साध्यम् = वह्निमत्त्वम्। साध्यनिष्ठप्रतियोगितानिरूपको योऽत्यन्ताभावः, ह्रदे संयोगसम्बन्धेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धह्रदत्वावच्छिन्न संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपको ह्रदीयवह्न्याभावः स्वीक्रियते। ताद्दशह्रदत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठ-प्रतियोगिताकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयो ह्रदः। ताद्दशह्रदत्वावच्छिन्न-संयोगसम्बन्धावच्छिन्न वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकह्रदीयवह्न्यभावनिष्ठाधेयतानिरूपितहेतुता-वच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपित वृत्तित्वस्य वह्न्यभाववद्ध्रदे सत्त्वात् पूर्वोक्तसव्यभिचारसाधारणलक्षणसमन्वयस्सुसङ्गच्छते।

**सव्यभिचारसाधारणलक्षणस्य दलसार्थक्यानि-**

एतावता प्रबन्धेन साध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणतावद्वृत्तिहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वं सव्यभिचारसाधारणलक्षणं फलति। पूर्वोक्तैताद्दशसव्यभिचारसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि - अत्रोदाहरणे साध्यो वह्निः। साध्यनिष्ठप्रतियोगितानिरूपको योऽत्यन्ताभावः इत्युक्ते पर्वते कालिकसम्बन्धेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धः पर्वतत्वावच्छिन्नकालिकसम्बन्धावच्छिन्न वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकः कालिकसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वतीय-वह्न्यभावस्स्वीक्रियते। ताद्दशकालिकसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वती-यवह्न्यभावाधिकरणं पर्वतः। ताद्दशकालिकसम्बन्धावच्छिन्न वह्निनिष्ठप्रतियोगिताक पर्वतीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमे सत्त्वादुक्तरीत्या पूर्वोक्तसव्यभिचारसाधारणलक्षणस्य कालिकसम्बन्धावच्छिन्नवह्निनिष्ठ प्रतियोगिताकपर्वतीय-वह्न्यभावमादाय पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिस्यात्।

अतस्तद्वारणाय पूर्वोक्तसव्यभिचारसाधारणलक्षणघटकसाध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदक-सम्बन्धावच्छिन्नत्वमिति विशेषणन्निवेशनीयम्। दत्ते च ताद्दग्विशेषणे पूर्वोक्तसव्यभिचारसाधारण-लक्षणघटकसाध्यनिष्ठप्रतियोगितायान्निविष्टसाध्यतावच्छेदकसम्बन्धेन संयोगसम्बन्ध एव धर्तव्यो, न तु

कालिकादिसम्बन्धः। तथाच साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताक-साध्याभाव इत्यनेन पर्वते एव संयोगसम्बन्धेनैव वह्निर्नास्तीत्याकारकप्रतीतिसिद्धपर्वतीयसंयोगसम्बन्धा-वच्छिन्नवह्निनिष्ठ-प्रतियोगिताकवह्न्यभावस्यैव धर्तव्यत्वेन तादृशसाध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताक-पर्वतीयवह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य वह्न्यभावा-धिकरणकमीनशैवालादेव सत्त्वेन पर्वतेऽभावाच्चोक्तदिशा कालिकसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताक-पर्वतीयवह्न्यभावमादाय पर्वतो वह्निमान् धूमात् इत्यत्र नातिव्याप्तिः। तथाच साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिता-निरूपकात्यन्ताभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वं सव्यभिचारसाधारणलक्षणं फलति।

नन्वेवमेतादृशसव्यभिचारसाधारणलक्षणस्यापि महानसीयवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिता-सम्बन्धमादाय पर्वतो महानसीयवह्न्यभाववान् महानसीयवह्न्यभावत्वात् इति स्थले पुनरतिव्याप्तिः प्रसज्यते। तथाहि – साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभाव इत्यनेन वह्नित्वावच्छिन्नवह्नि-निष्ठप्रतियोगित्वसम्बन्धेन पर्वते महानसीयवह्निर्नास्तीत्याकारकप्रतीतिसिद्ध-महानसीयवह्न्यभावस्स्वीक्रियते। तादृशवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितासम्बन्धावच्छिन्नमहानसीय-वह्न्यभावाधिकरणं पर्वत इव महानसीयवह्न्यभावोऽपि भवति। तादृशमहानसीयवह्नित्वावच्छिन्नमहानसीयवह्निनिष्ठप्रतियोगिता-वच्छेदकसम्बन्धावच्छिन्नमहानसीयवह्न्यभावाधिकरणमहानसीयवह्निनिरूपितवृत्तित्वस्य महानसीयवह्न्यभाववति सत्त्वादुक्तदिशा पूर्वोक्तैतादृशसव्यभिचारसाधारणलक्षणस्य पर्वतो महानसीयवह्न्यभाववान् महानसीयवह्न्य-भावत्वादिति स्थले पुनरतिव्याप्तिः प्रसज्यते।

अतस्तद्वारणाय वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितावच्छेदकसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीय-प्रतियोगितायां साध्यतानिरूपित संसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-संसर्गतानिरूपकत्वन्निवेशनीयम्। दत्ते च तादृग्विशेषणे साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रति-योगितावच्छेदकसम्बन्धावच्छिन्न-साध्यतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गतानिरूपक-साध्यनिष्ठप्रतियोगितापदार्थेन पर्वत इव महानसीयवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकमहानसीयवह्न्यभावीय प्रतियोगिताया अपि धर्तुं शक्यत्वेन व्यधिकरणसम्बन्धावच्छिन्नमहानसीयवह्न्य-भावीयप्रतियोगितायाः धर्तुमशक्यत्वेनोक्तदिशा पर्वतो महानसीयवह्न्यभाववान् महानसीयवह्न्यभावत्वात् इत्यत्रातिव्याप्तिः वार्यते। तथाच साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठ-प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यतानिरूपितसंसर्गता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-संसर्गतानिरूपकसाध्यनिष्ठ प्रतियोगिताकव्यधिकरणसम्बन्धावच्छिन्न-साध्यनिष्ठाभावीयप्रतियोगितानिरूपकपर्याप्त्यधिकरणधर्मावच्छिन्न संसर्गतानिरूपकाभावनिष्ठाधेयतानिरूपिता-धिकरणतावन्निरूपितवृत्तित्वं सव्यभिचारसाधारणलक्षणं फलति।

नन्वेवमेतादृशसव्यभिचारसाधारणलक्षणस्यापि संयोगसमवायान्यतरसम्बन्धेन पूर्वोक्ततादृशसाध्यता-वच्छेदकसम्बन्धावच्छिन्न साध्यनिष्ठप्रतियोगिताकवह्न्यभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि – पूर्वोक्ततादृशसव्यभिचारसाधारणलक्षणे तल्लक्षणघटकसाध्यतावच्छेदकसम्बन्धा-

वच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावपदेन पर्वतीयसंयोगसम्बन्धावच्छिन्नवह्निनिष्ठ-प्रतियोगिताकसंयोग-समवायान्यतरसम्बन्धावच्छिन्नसमवायसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकवह्न्यभावस्यापि धर्तुं शक्यत्वेन प्रकृतोदाहरणे साध्यतावच्छेदकसंयोगसम्बन्धेतरसम्बन्धावच्छिन्नसमवाय-सम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिता-कवह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमे सत्त्वेन तादृशधूमत्वाव-च्छिन्नधूमरूपहेत्वधिकरणत्वस्य पर्वते सत्त्वादुक्तरीत्या संयोगसमवायसम्बन्धद्वयघटकसमवायसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकवह्न्यभावाधिकरणके पर्वतो वह्निमान् धूमात् इत्यत्र पूर्वोक्तपर्याप्तिनिवेशघटकसव्यभिचारसाधारणलक्षणस्यातिव्याप्तिः प्रसज्यते।

अस्तद्वारणाय पूर्वोक्तपर्याप्तिनिवेशघटकपूर्वोक्तसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतानिरूपितसाध्य-निष्ठप्रतियोगिताकाभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-संसर्गतानिरूपकत्वमिति विशेषणन्निवेशनीयम्। दत्ते च तादृग्विशेषणे पर्वतो वह्निमान् धूमात् इत्यत्र पूर्वोक्ततादृशसव्यभिचारसाधारणलक्षणघटकपर्याप्त्यधिकरणधर्म इत्यनेन संयोगत्वसमवायत्वान्यतरत्वैतत्त्रितय-धर्मस्यैव धर्तुं शक्यत्वेन तादृशसंयोगत्वसमवायत्वान्यतरत्वाख्य-त्रित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक-वह्न्यभावस्यैव धर्तव्यतया पूर्वोक्ततादृशसंयोगसमवाया-न्यतरसम्बन्धावच्छिन्नव्यधिकरणसम्बन्धावच्छिन्न-व्यधिकरणधर्मा वच्छिन्नसाध्यतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यनिष्ठ प्रतियोगिताकात्यन्ताभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य ह्रदे एव सत्त्वेन पर्वतेऽभावाच्चैतादृशसव्यभिचारसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र नातिव्याप्तिः।

नन्वेवमेतादृशसव्यभिचारसाधारणलक्षणस्यापि संयोगसमवायान्यतरसम्बन्धावच्छिन्न-प्रतियोगिताकसमवायसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वतीयवह्न्यभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। यतो हि समुदायस्य तादृशपर्याप्त्यधिकरणत्वे प्रत्येकस्यापि तदधिकरणत्वमिति नियमात् पूर्वोक्तसाध्यतावच्छेदकसम्बन्धावच्छिन्न संयोगसमवायान्यतरसमवायसम्बन्धावच्छिन्न-पर्वतीयवह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमे सत्त्वात् तादृशधूमनिष्ठाधेयता-निरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य पर्वते सत्त्वादुक्तदिशा पर्वतो वह्निमान् धूमात् इत्यत्र पुनरति व्याप्तिः प्रसज्यते।

अतस्तद्वारणाय पूर्वोक्तसव्यभिचारसाधारणलक्षणघटकपूर्वोक्ततादृशाभावीयप्रतियोगितायां स्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपित-संसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमित्याकारकन्यूनपर्याप्तिकत्वविशेषणं निवेशनीयम्। दत्ते च तादृग्विशेषणे पर्वतो वह्निमान् धूमात् इत्यत्रोक्तदिशा वह्न्यभाव इत्यनेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठस्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिताकपर्या-प्त्यनुयोगिता वच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताकसंयोग सम्बन्धावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताकसंयोगसम्बन्धावच्छिन्न-पर्वतीयवह्न्यभावस्यैवानिवार्यतया धर्तव्यत्वेन तत्र समवायेन वह्न्यभावस्य धर्तुमशक्यत्वेनोक्तरीत्या तादृशन्यूनवारकपर्याप्तिघटकसाध्यतावच्छेदक

संबन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकपर्वतीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य ह्रदे एव सत्त्वेन पर्वतेऽभावाच्च पर्वतो वह्निमान् धूमात् इत्यत्र पूर्वोक्तातिव्याप्तिः वार्यते। तथाच साध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नस्वनिरूपित-संसर्गतावच्छेदकता-प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसाध्यनिष्ठप्रतियोगिताकाभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वं सव्यभिचारसाधारणलक्षणं फलति।

नन्वेवं पूर्वोक्तैतादृशसव्यभिचारसाधारणलक्षणघटकसाध्याभावीयसाध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नत्वमिति विशेषणानुपादाने पूर्वोक्तादृशसव्यभिचारसाधारण-लक्षणस्य कालिकसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकपर्वतीयवह्न्यभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि - पूर्वोक्तसव्यभिचारसाधारणलक्षणे साध्यतावच्छेदक-सम्बन्धावच्छिन्नस्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यता निरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकवद्वृत्तिसाध्यनिष्ठप्रतियोगिताकाभाव इत्यनेन पर्वते कालिकसम्बन्धेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धकालिकसम्बन्धावच्छिन्नवह्निनिष्ठ प्रतियोगिताकवह्न्यभावस्यापि धर्तुं शक्यत्वेन पूर्वोक्तादृशकालिकसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिता-कवह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमे तादृशधूमाधिकरण-त्वस्य पर्वते च सत्त्वदुक्तरीत्या पूर्वोक्तादृशसव्यभिचारसाधारणलक्षणस्य पुनः पर्वतो वह्निमान् धूमादित्यत्रातिव्याप्तिरापद्येत।

अतस्तद्वारणाय पूर्वोक्तादृशसव्यभिचारसाधारणलक्षणघटकपूर्वोक्तादृशसाध्यनिष्ठप्रति-योगितायां साध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नत्वमिति विशेषणन्निवेशनीयम्। दत्ते च तादृग्विशेषणे पूर्वोक्तादृशसव्यभिचारसाधारणलक्षणघटकपूर्वोक्तादृशसाध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्ध इत्यनेन संयोगसम्बन्धस्यैव धर्तव्यतया कालिकसम्बन्धस्य धर्तुमशक्यत्वेन तादृशसाध्यतावच्छेदक-संयोगसम्बन्धावच्छिन्नपूर्वोक्तपर्याप्तिविशिष्टसाध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावपदार्थेन पर्वते संयोगेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धसंयोग-सम्बन्धावच्छिन्नपर्वतीयवह्न्यभावस्यैव धर्तव्यत्वेन पूर्वोक्तादृशसाध्यतावच्छेदकसम्बन्धापरनामक-संयोगसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकपर्वतीयवह्न्य-भावाधिकरणनिरूपितवृत्तित्वस्य ह्रदे एव सत्त्वेन धूमाधिकरणपर्वतेऽसत्त्वाच्च पूर्वोक्तादृशसव्यभिचार-साधारणलक्षणस्य वह्न्यभाववद्धदत्वा-वच्छिन्नह्रदविषयकह्रदे लक्षणसमन्वयः, पर्वतो वह्निमान् धूमात् इत्यत्र नातिव्याप्तिश्च।

नन्वेवमेतादृशसव्यभिचारसाधारणलक्षणस्यापि तत्तद्वह्न्यभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः स्यात्। तथाहि - पूर्वोक्तादृशसव्यभिचारसाधारणलक्षणस्थपर्याप्तिविशेषणघटक-साध्यतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिता-काभाव इत्यनेन पर्वते संयोगसम्बन्धेन महानसीयचत्वरीयगोष्ठीयवह्निर्नास्तीत्याकारकप्रतीतिसिद्धसंयोग-

सम्बन्धावच्छिन्नमहानसीयचत्वरीयगोष्ठीयतत्तद्वह्न्यभावस्स्वीकारे पूर्वोक्तताद्दशसंयोगसम्बन्धावच्छिन्न-महानसीयचत्वरीयगोष्ठीयतत्तद्वह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वस्य पर्वते विद्यमानत्वेन पूर्वोक्तपर्याप्तिविशेषणविशिष्टताद्दशसव्यभिचारसाधारणलक्षणस्य पूर्वोक्तदिशा पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिरापद्येत।

अतस्तद्वारणाय पूर्वोक्तपर्याप्तिविशेषणविशिष्टपूर्वोक्तताद्दशसव्यभिचारसाधारणलक्षणघटक-पूर्वोक्तताद्दशसाध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिति विशेषणन्निवेशनीयम्। दत्ते च ताद्दग्विशेषणे पूर्वोक्तपर्याप्तिविशेषणविशिष्टपूर्वोक्तताद्दशसव्यभिचारसाधारणलक्षणघटकपूर्वोक्तताद्दश-साध्यतावच्छेदकेतर-सम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकसाध्याभावपदार्थेन महानसीयगोष्ठीयचत्वरीयादितत्तद्वह्न्यभावेतरस्य पर्वते एव संयोगसम्बन्धेनैव वह्निर्नास्तीत्याकारक-प्रतीतिसिद्धसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठ-प्रतियोगिताकपर्वतीयवह्न्यभावस्यैव धर्तव्यत्वेन, तत्स्थले तत्तद्वह्न्यभावस्य धर्तुमशक्यत्वात्ताद्दशसंयोग-सम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिता-कपर्वतीयवह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणता-वन्निरूपितवृत्तित्वस्य वह्न्यभावाधिकरणे जलह्रदादावेव सत्त्वेन पर्वतमहानसचत्वरगोष्ठादितत्तद्वह्न्यभावा-धिकरणेष्वभावेन पूर्वोक्तताद्दशतत्तद्वह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमाधिकरणे पर्वतेऽभावा-त्पूर्वोक्तैताद्दशसव्यभिचारसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र तत्तद्वह्न्यभावमादाय नातिव्याप्तिः।

नन्वेवमपि पूर्वोक्तविशेषणविशिष्टसव्यभिचारसाधारणलक्षणस्यापि संयोगेन महानसीयवह्न्य-भावपर्वतीयवह्न्यभावादिकमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि - पूर्वोक्तपर्याप्तिविशेषणविशिष्टपूर्वोक्तानेकविशेषणविशिष्टपूर्वोक्तताद्दशसव्यभिचारसाधारणलक्षणघटक-साध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठ-प्रतियोगिताकसाध्याभाव इत्यनेन महानसीयवह्नित्वपर्वतीयवह्नित्वैतदुभयधर्मावच्छिन्नप्रतियोगिताकः उभयाभावस्स्वीक्रियते। तर्हि ताद्दशमहानसीयवह्नित्वपर्वतीयवह्नित्वैतदुभयधर्मावच्छिन्नप्रतियोगिताक-महानसीयपर्वतीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमाधिकरणे पर्वते सत्त्वेन पूर्वोक्तसव्यभिचार-साधारणलक्षणस्य पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिस्तदवस्थैव।

अतस्तद्वारणाय पूर्वोक्तताद्दशसव्यभिचारसाधारणलक्षणघटकसाध्यतावच्छेदकसम्बन्धेतर-सम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकतदितरोभयधर्मानवच्छिन्नत्वमिति विशेषणं निवेशनीयम्। दत्ते च ताद्दग्विशेषणे पर्वतो वह्निमान् धूमादिति स्थले पूर्वोक्तसव्यभिचारसाधारणलक्षणघटकसाध्याभावपदेन तद्वाच्यसाध्यता-वच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्न साध्यनिष्ठप्रतियोगिताकवह्न्यभावस्यैव धर्तव्यतया तत्र पूर्वोक्तसाध्याभावपदेन पूर्वोक्तसाध्यतावच्छेदकतदितरोभयधर्मावच्छिन्नप्रतियोगिताक-साध्याभावस्याग्रहणात् पूर्वोक्तताद्दशसाध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धा-वच्छिन्नसाध्यतावच्छेदकेतर-

धर्मानवच्छिन्नसाध्यतावच्छेदकतदितरपर्वतीयवह्नित्वमहानसीयवह्नित्वैतदुभयधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्न-साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकवह्न्यभावाधिकरणतावन्निरूपितवृत्तित्वस्य जलह्रदादेव सत्त्वेन धूमाधिकरणपर्वतेऽसत्त्वेन च पूर्वोक्तसव्यभिचार-साधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र नातिव्याप्तिः। तथाचात्र स्वनिरूपितसंसर्गता-वच्छेदकताप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यता निरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतावृत्तिसाध्यतावच्छेदकेतर सम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्न पर्वतीयवह्नित्वमहानसीयवह्नित्वैतदुभयधर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितानिरूपका भावनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वं सव्यभिचारसाधारणलक्षणं फलति।

नन्वेवमेतादृशसव्यभिचारसाधारणलक्षणस्यापि तल्लक्षणघटकाभावपदवाच्यान्योन्याभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि - पूर्वोक्तसव्यभिचारसाधारणलक्षण-घटकसाध्यनिष्ठ-प्रतियोगिताकाभावपदवाच्यात्यन्ताभावस्येव अन्योन्याभावस्यापि धर्तुं शक्यत्वेन तादृशसाध्यता वच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नतदीयव्यासज्यवृत्तिसाध्यता वच्छेदकतदितरोभयधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगिताकान्योन्याभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमाधिकरणे पर्वते एव सत्त्वाज्जलह्रदादिनिष्ठ-मीनशैवालादावसत्वाच्चोक्तदिशा पर्वतो वह्निमान् धूमात् इत्यत्र पुनरतिव्याप्तिस्स्यात्। अतस्तद्वारणाय पूर्वोक्ततादृशसव्यभिचारसाधारणलक्षणघटकसाध्यनिष्ठप्रतियोगिताक-साध्याभावे साध्यनिष्ठप्रतियोगि-ताकसाध्यात्यन्ताभाव इति विशेषणन्निवेशनीयम्। तन्निवेशे च पूर्वोक्तसव्यभिचारसाधारणलक्षणघटक-साध्याभाव इत्यनेन साध्यतावच्छेदकेतरसम्बन्धानवच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यता-वच्छेदकतदितरधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्न पर्वतीयवह्नित्वमहानसीयवह्नित्वोभयधर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकात्यन्ताभावस्यैव धर्तव्यत्वेन तत्र तादात्म्यसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकान्योन्याभावस्य धर्तुमशक्यत्वेन तादृशपूर्वोक्तसाध्यता-वच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकतदितरोभय धर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयता निरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य जलह्रदादिनिष्ठमीनशैवालादावेव सत्त्वेन धूमे, तदधिकरणे पर्वते चाभावेन चोक्तरीत्या पूर्वोक्तनैकविशेषणविशिष्टसव्यभिचारसाधारणलक्षणस्य पर्वतो वह्निमान् धूमाद् इत्यत्र नातिव्याप्तिः।

नन्वेवमपि पूर्वोक्ततादृशसव्यभिचारसाधारणलक्षणस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकपर्वतीयवह्न्य भावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि - पूर्वोक्तपर्याप्तिनिवेश सहितसाध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतर-धर्मानवच्छिन्नसाध्यतावच्छेदकतदितरोभयधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्नसा-ध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावः इत्युक्ते पर्वते संयोगसम्बन्धेन घटत्वेन

वह्निर्नास्तीत्याकारकप्रतीतिसिद्धसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकवह्न्यभाव एव धर्तव्यो, नतु तादात्म्यसम्बन्धानवच्छिन्नस्वरूपसम्बन्धावच्छिन्नघटत्वावच्छिन्नवह्नि-त्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकवह्न्यभावः। संयोगसम्बन्धेन पर्वते घटत्वेन वह्निर्नास्तीत्याकारकप्रतीति-सिद्धतादृशव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवह्न्यत्यन्ताभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमाधिकरणे पर्वतेऽपि विद्यमानत्वात् पूर्वोक्ततादृशसव्यभिचारलक्षणस्य पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिस्स्यात्। अतस्तद्वारणाय नैकविशेषणविशिष्टपूर्वोक्ततादृशसव्यभिचार-साधारणलक्षणघटक साध्यतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मान-वच्छिन्नसाध्यतावच्छेदकतदितरोभयधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्नव्यधिकरणधर्मान वच्छिन्नसाध्यनिष्ठप्रतियोगिताकात्यन्ताभावनिष्ठाधेयतायां स्वरूपसम्बन्धावच्छिन्नत्वमिति विशेषणन्निवेशनीयम्। दत्ते च तादृग्विशेषणे पूर्वोक्तसव्यभिचारसाधारणलक्षणघटकतादृशात्यन्ताभावनिष्ठधेयतापदवाच्याधेयपदार्थेन पर्वते संयोगसम्बन्धेनैव वह्निर्नास्तीत्याकारकप्रतीतिसिद्धपर्वतीयो-द्देश्यतावच्छेदकसम्बन्धावच्छिन्नोद्देश्यता वच्छेदकावच्छिन्नोद्देश्यतानिरूपितसंयोगसम्बन्धावच्छिन्नव्यधिकरणधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मान वच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयताया एवधर्तव्यतया तादृशव्यधिकरणधर्मानवच्छिन्नसंयोगसम्बन्धावच्छिन्नवह्नित्वेतरधर्मानवच्छिन्नवह्नित्वेतरवह्नित्वघटत्वैतदुभय धर्मानवच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता वद्वृत्तित्वस्य पूर्वोक्त-तादृशवह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणतावज्जलहृदादिनिष्ठमीनशैवालादावेव सत्त्वाद्धूमे, तदधिकरणे पर्वते चासत्वात् पूर्वोक्तसव्यभिचारानैकान्तिकलक्षणत्रयघटकाद्यसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र नातिव्याप्तिः।

नन्वेवमेतादृशपूर्वोक्तनैकविशेषणविशिष्टानैकान्तिकापरनामकसव्यभिचारलक्षणत्रयघटकस्थसाधारण लक्षणस्य कालिकसम्बन्धावच्छिन्नपर्वतीयवह्न्यभावमादाय पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिस्स्यात्। तथाहि – पूर्वोक्तपर्याप्तिविशेषणादिनैकविशेषणविशिष्टसाध्यतावच्छेदकेतर-सम्बन्धानवच्छिन्नसाध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यतावच्छेदकतदितरोभयधर्मानवच्छिन्नव्यासज्यवृत्ति-धर्मानवच्छिन्नव्यधिकरणधर्मानवच्छिन्नपर्वतनिष्ठोद्देश्यतावच्छेदकसम्बन्धावच्छिन्नोद्देश्यतावच्छेदकावच्छिन्नपर्वत-त्वावच्छिन्नोद्देश्यतानिरूपितकालिकसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकात्यन्ता-भावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमे, परम्परासम्बन्धेन धूमाधिकरणे पर्वते च सत्वादुक्तरीत्या पूर्वोक्ततादृशसव्यभिचारसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र पुनरतिव्याप्तिस्स्यात्।

अतस्तद्वारणाय पूर्वोक्तनैकविशेषणविशिष्टानैकान्तिकसव्यभिचारलक्षणत्रयघटकाद्यसाधारण-लक्षणस्थ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणता वन्निरूपितवृत्तितायां हेतुतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नहेतुतावच्छेदक-सम्बन्धावच्छिन्नत्वमिति

विशेषणन्निवेशनीयम्। दत्ते च तादृग्विशेषणे पूर्वोक्ततादृशसव्यभिचारसाधारण-लक्षणघटकसाध्यतावच्छेदक-सम्बन्धेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्न-व्यधिकरणधर्मानवच्छिन्नसाध्यतावच्छेदकतदितरपर्वतीयवह्नित्वघटत्वैतदुभय-धर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिहेतुतावच्छेदकसम्बन्धापरनामकसंयोगसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमेऽभावात् पूर्वोक्तानैकान्तिकसव्यभिचारलक्षणत्रय-घटकाद्यसाधारणलक्षणस्य पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतीयकालिकसम्बन्धावच्छिन्नवह्निनिष्ठ-प्रतियोगितानिरूपकवह्न्यभावमादाय पूर्वपक्षिभिर्बलादापादितातिव्याप्तिर्वार्यते।

नन्वेवमेतादृशानैकान्तिकापरनामकसव्यभिचारलक्षणत्रयघटकपूर्वोक्तनैकविशेषणसमलङ्कृत-सव्यभिचारप्रथमसाधारणलक्षणस्य पुनः पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिः प्रसज्यते। तथाहि – एतादृश पूर्वोक्तपर्याप्त्यादिनैकविशेषणविशिष्टसाध्यतावच्छेदकेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यतावच्छेदकतदितरवह्नित्वघटत्वाख्यव्यासज्यवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितानिरूपकात्यन्ताभावपदवाच्याभाव-पदार्थेन पर्वतो वह्निमान् धूमात् इत्यत्र पर्वते संयोगसम्बन्धेन वह्निर्नास्तीत्याकारकप्रतीतिसिद्धपर्वतनिष्ठो-द्देश्यतावच्छेदकसम्बन्धावच्छिन्नोद्देश्यतावच्छेदकावच्छिन्नपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगिताकवह्न्यभावस्य ग्रहणे पूर्वोक्ततादृशवह्न्यभावाधिकरणजलह्रदादिनिरूपितवृत्तित्वस्य मीनशैवालादौ सत्त्वेऽपि तादृशवह्न्यभावाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धा-वच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वस्य धूमघटोभये सत्त्वादुक्तदिशा पुनः पर्वतो वह्निमान् धूमाद् इत्यत्रातिव्याप्तिः प्रसज्यते।

अतस्तद्वारणाय पूर्वोक्तनैकविशेषणविशिष्टसव्यभिचारसाधारणलक्षणघटकपूर्वनिर्दिष्टतादृश-वह्न्यभावाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतायां हेतुतावच्छेदकावच्छिन्नत्व-मिति विशेषणन्निवेशनीयम्। दत्ते च तादृग्विशेषणे पूर्वोक्तनिखिलविशेषणविशिष्टसव्यभिचारसाधारण-लक्षणघटकसाध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठाधेयतायां हेतुतावच्छेदकावच्छिन्नत्वमिति विशेषणदानात् पूर्वोक्तसव्यभिचारसाधारण-लक्षणघटकसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निष्ठवृत्तितापदवाच्यवृत्तित्वेन पर्वतो वह्निमान् धूमात् यथा महानसः इत्याकारकानुमाननिष्ठधूमत्वावच्छिन्न-धूमनिष्ठवृत्तितायाः एव ग्रहणात् तदितरपर्वतीयधूमघटोभयनिरूपितवृत्तितायाश्चाग्रहणात् तादृशहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठ-जलह्रदादिनिरूपितवृत्तितायाः मीनशैवालादावेव सत्वेन

धूमाधिकरणपर्वतेऽभावाच्च पर्वतो वह्निमान् धूमात् इत्यत्र धूमधटोभयाभावीयप्रतियोगिताक धूमघटोभयनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपित-वृत्तित्वमादाय प्रसक्तातिव्याप्तिर्वार्यते। निष्कर्षे तु साध्याभाववद्वृत्तिहेतुस्साधारणः इत्याकारक-सव्यभिचारलक्षणत्रयघटकाद्यसाधारणलक्षणप्रबोधकवाक्यात् स्वनिरूपितसंसर्गतावच्छेदकताप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसम्बन्धावच्छिन्नपर्याप्त्यनुयोगितानिरूपकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकावच्छिन्नवृत्तिसाध्यतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यतावच्छेदकतदितरवह्नित्वमहानसीयत्वैतदुभयधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्नव्यधिकरणधर्मानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्रैकालिकसंसर्गावच्छिन्नप्रतियोगिता-कात्यन्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिहेतुतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकतदितरधर्मानवच्छिन्नहेतुतावच्छेदकतदितरवह्नित्वमहानसीयवह्नित्वाख्यैतदुभयधर्मानवच्छिन्नहेतुतावच्छेदकावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वमनैकान्तिकसव्यभिचारलक्षणत्रयघटकप्रथमसाधारणलक्षणं फलति। एतावन्तमनितरसाधारणं सव्यभिचार-साधारणलक्षणसिद्धान्तसारांशं मर्मगर्भं मनस्यनुसन्धाय नव्यन्यायदर्शनप्रवर्तकसर्वतन्त्रस्वतन्त्रसकलास्तिकनास्तिकदर्शनवागीशशास्त्रार्थरत्नाकरोत्तमग्रन्थप्रणेतृपुम्भावसरस्वत्युपाधिधारकनिखिलनिगमागमस्वाध्यायतपस्विमहामहोपाध्यायः श्रीमान् गङ्गेशोपाध्यायः स्वप्रणीततत्त्वचिन्तामणिग्रन्थस्थद्वितीयप्रकरणानुमानखण्डस्थ सव्यभिचारलक्षणत्रयघटकाद्यसाधारणलक्षणं विपक्षगामित्वं साधारणत्वम् इति ग्रन्थमुखेन स्वप्रणीते तत्त्वचिन्तामणि[१४] ग्रन्थे सूत्रप्रायन्निरुक्तवान्। इदमेव सूत्रप्रायं श्रीमद्गङ्गेशोपाध्यायप्रणीतं सव्यभिचारसाधारणलक्षणं परवर्तिकालिकैः रघुनाथशिरोमणिमथुरानाथतर्क-वागीशजगदीशतर्कालङ्कारगदाधरभट्टाचार्यगो लोकनाथभट्टाचार्य बलदेवापाध्यायबच्चाझा प्रभृतिभिर्न्यायदर्शनार्णवनिमज्जन निर्मलीकृतपवित्रशुद्धान्तःकरणैस्स्वाध्याय तपस्विभिस्स्वस्वप्रणीतनव्यन्यायदर्शनग्रन्थेषु शाखाचङ्क्रमणतया साङ्गोपाङ्गं पर्यशोधि। नव्यन्यायदर्शने एकदेशेऽधीत्यहमपि मदीयैतादृशप्रस्तुतशोध-पत्रप्रणयनमाध्यमेन निश्श्रेयसप्राप्तियोग्यो भवितुमर्हामीति निखिलविद्वल्लोकं प्रति सविनयं सश्रद्धं सभक्तिकञ्च विनिवेदयामि। अनया दिशा सव्यभिचारसाधारणलक्षणप्रबोधकं मदीयमिदमप्येतादृश-मनुसन्धानपत्रं विशेषतो नव्यन्यायदर्शनस्वाध्याय प्रविवित्सून्, तन्नव्यन्यायदर्शनग्रन्थ-सिद्धान्ततत्त्वानुसन्धातृँश्चावच्छेदकावच्छेदेनोपकुर्यादिति निखिलदेवगणं भृशं सम्प्रार्थये। मदीयप्रस्तुतानुसन्धानपत्रलेखनविस्तारभयादितोऽप्यधिकमत्र मदीयप्रस्तुतैतादृशानुसन्धानपत्रे नैव तन्यते इत्यलम्पल्लवतल्लजकल्पानल्पजल्पनेनेति दिक्॥

**सन्दर्भाः -**


१. न्यायसूत्रम् - प्रथमाह्निकम् - सूत्रसंख्या - २

२. तत्त्वचिन्तामणिः - द्वितीयप्रकरणम् - अनुमानखण्डः।

३. तर्कसङ्ग्रहः (न्यायबोधिनीपदकृत्यसहितः) अनुमानपरिच्छेदः।

४. तत्त्वचिन्तामणिः - द्वितीयप्रकरणम् - अनुमानखण्डः।
५. न्यायबोधिनी (तर्कसङ्ग्रहव्याख्या)- द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
६. तर्कसङ्ग्रहदीपिका - द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
७. नीलकण्ठप्रकाशः - तर्कसङ्ग्रहदीपिकाव्याख्या - अनुमानपरिच्छेदः।
८. न्यायसिद्धान्तमुक्तावली - दिनकरीरामरुद्रीयसहिता - द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
९. दिनकरी (न्यायसिद्धान्तमुक्तावलीव्याख्या) - अनुमानपरिच्छेदः।
१०. तर्कसङ्ग्रहः (न्यायबोधिनीसहितः) अनुमानपरिच्छेदः - द्वितीयम् - हेत्वाभासप्रकरणम्।
११. तर्कसङ्ग्रहः (न्यायबोधिनीसहितः) द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
१२. न्यायबोधिनी (तर्कसङ्ग्रहव्याख्या) द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
१३. नीलकण्ठप्रकाशः (तर्कसङ्ग्रहदीपिकाव्याख्यानग्रन्थः) - द्वितीयप्रकरणम् - अनुमानपरिच्छेदः।
१४. तत्त्वचिन्तामणिः (दीधितिव्याख्यानसहितः) द्वितीयः अनुमानखण्डः - हेत्वाभासप्रकरणम्।

**ज्ञानाब्धिरक्षिचरणः कणभक्षकश्च**
**श्रीपक्षिलोऽप्युदयनः स च वर्धमानः।**
**गङ्गेश्वरः शशधरो बहवश्च नव्या**
**ग्रन्थैर्व्यरुन्धत इमे हृदयान्धकारम्।।**
**-सुभाषितरत्नभाण्डागारे**

# संस्कृतसाहित्ये सामाजिकी सद्भावना

**प्रो. विष्णुकान्त झा**

संस्कृतभाषा देवभाषा कथ्यते। इयं भाषा अनवरतसदाचारलग्नानां शौचसन्तोषतपःस्वाध्याये-श्वरप्रणिधानादिनियमयतीनां देवानां वाङ्मनसयोः अनितरसाधारणकुशलानां परमर्षीणाम् देवतुल्यानामेव विदुषाम् आचारपरम्पराप्राणपोषिणी।

विश्वस्य सर्वे विद्वांसः संस्कृतभाषायाः प्रतिष्ठां तस्यां निहितानां धर्मादिभावानां वैशिष्ट्यमङ्गीकुर्वन्ति मुक्तकण्ठेन प्रशंसां च कुर्वन्ति। अस्या गिरि ईदृशं विलक्षणं सर्वमनुजानन्दसंदायितत्त्वजातम् यद् अवलोक्य संसारस्य चिन्तकाः आश्चर्यचकिताः भवन्ति। देवा अपि भारतवर्षस्य गीतं गायन्ति –

**गायन्ति देवाः किलगीतकानि,**
**धन्यास्तु ते भारतभूमिभागे**
**स्वर्गापवर्गास्पदहेतुभूते....**
**भवन्ति भूयः पुरुषाः सुरत्वात्॥**

**१. धर्मः –**

संस्कृतसाहित्यशिरोरत्नं धर्म एवास्ति। धर्मो विश्वस्य जगतः प्रतिष्ठा सन्दर्भ अथ च –

**आहारनिद्रा भयमैथुनञ्च समानमेतत्पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥**[१]

धर्मो हि नामात्मनः क्षणिकतुष्टिपरित्यागपूर्वकम् आत्मतत्त्वस्य पूर्णविकासकरं सर्वाभ्युदयपरं तत्त्वोक्तम्। एतं धर्मं विना मानवजीवनं पशुजीवनमिव क्षीणं हसनीयञ्चास्ति अत एवोक्तं –

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम्॥**

**२. परोपकारः –**

सामाजिकसद्भावनासु परोपकारः शेखरायते। अयं प्रोदात्तभावः मानवान् सर्वोत्तमान् करोति। यदा वयं कस्यापि कृते स्वार्थं परित्यज्य स्वजीवनसाफल्यायानवरतविविधान् उपक्रमान् आचरामः तदा तस्य

कल्याणं तु भवत्येव वयं परितुष्यामः। अस्माकं मनसि परमानन्दोल्लासः प्रसरति प्राणा हि अस्माकं नन्दन्ति। अत एव भर्तृहरिणा नीतिशतके प्रोक्तं –

**मनसि वचसि काये पुण्यपीयूषपूर्णा-**
**स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं,**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥**
**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानान्तु वसुधैव कुटुम्बकम्।**

वस्तुतः जीवनं क्षणभङ्गुरं वर्तते। क्षणमप्यवतिष्ठते श्वसन् मदि जन्तुर्ननुलाभवानसौ[२] सहैव –

**वाताभ्रविभ्रममिदं वसुधाधिपत्य-**
**मापातमात्रमधुरो विषयोपभोगः।**
**प्राणास्तृणाग्रजलबिन्दुसमा नराणां,**
**धर्मः सखा परमहो परलोक माने॥**
**धर्मो रक्षति रक्षितः।**

**३. अहिंसाभावना–**

अहिंसाभावना परोत्कृष्टा मानवानां कृते। सदैवोक्ता मा हिंस्यात्सर्वभूतानि इति श्रुतिः प्रेरयति अस्मान् मानवान् सदैव, कस्यापि हिंसा नो विधेया। अस्माकं कर्तव्यं सर्वेषां मानवानां कृते सुखदानम्। तत्र यदि वयं हिंसां कुर्मः तर्हि भगवान् अस्मभ्यं ऋुध्यति, अस्माकं मानवता विलुप्यते मननशीलता कलङ्कायते, वयं परमपापिनो भवामः, अस्माकं कर्तव्यम् पुनीतम्, सर्वत्र सर्वदा अहिंसात्मकता।

**अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।**
**भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥**[३]

तात्पर्यमिदं यत्प्राणिनां पीदातो निवृत्तिः अहिंसा भवति। चित्तस्य रागद्वेषादिभिः राहित्यं समतोच्यते। भोग्यपदार्थेषु एतद्धि पर्यासम् इति बुद्धि तुष्टिरुक्ता बुधैः। शास्त्रीयमार्गेण शरीरेन्द्रियाणां शोषणं तप उक्तम्। देशकालानुसारेण श्रद्धापूर्वकं यथाशक्ति सत्पात्रेभ्यो द्रव्यार्पणं दानं कथितम्। धर्मनिमित्तेन प्राप्यमाणा लोकप्रंशसारूपा प्रसिद्धिः यशः कीर्तितम् अधर्मनिमित्ता लोकनिन्दारूपा प्रसिद्धिः अयशः कथ्यते, अतः मनुष्यैः एषु भावेषु बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः अहिंसा यश इत्याख्याः अष्टौ भावाः अवश्यं लब्धव्याः।

**४. पुरुषार्थः**

**उद्योगे नास्ति दारिद्र्यम् जपतो नास्ति पातकम्।**
**मौनेन कलहो नास्ति, नास्ति जागरिते भयम्॥**[४]

पुरुषार्थे आचरिते दरिद्रता न भवति। यदि सर्वे जनाः उत्साहसम्पन्नाः दीर्घसूत्रत्वं विहाय क्रियाविधिज्ञतां दर्शयन्तः व्यसनेषु चानासक्ताः शूराः कृतज्ञा दृढसौहृदाश्च स्युः तर्हि विश्वस्य विशेषतोऽस्माकं राष्ट्रस्य दारिद्र्यं क्षणेनैव इतः प्रस्थास्यते यथोक्तं –

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः,**
**दैवेन देयमिति कापुरुषा वदन्ति।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या,**
**यत्ने कृते यदि न सिद्ध्यति कोऽर्थः दोषः॥**[५]
**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते**

ज्ञानमेव मानवजीवनस्य परमोज्ज्वलं नक्षत्रम्, इतः आत्मज्योतिः प्रकाशितं भवति। तमस्तोमहरं ज्ञानं सर्वस्योन्नतिदायकम्। ज्ञानबलेनैव जीवनस्य सर्वाणि सुखानि वयं प्राप्नुमः। समाजे शिक्षायाः सुविकासः सर्वत्र इष्यते। प्रत्येकं जनः सुपठितः सुशीलः सुलक्षणश्च भवेदिति सदैव सर्वान् सुशिक्षयति सुरगवी।

**५. जननी जन्मभूमिश्च**

**'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'**[६]

स्वर्गे एव सर्वं सुखं प्राप्यते अनायासेनैवेति सर्वे संगिरन्ते। तत्र वाञ्छितं सकलं वस्तु सम्प्राप्यते न तत्र परिश्रमः कश्चित्करणीयो भवति। यावन्ति भोग्योपभोगवस्तुजातानि तानि सर्वाणि वाञ्छायां सत्यां त्वरितं समीपमागच्छन्ति स्वर्गे, इति प्रायः जानन्ति मानवाः परन्तु तस्मादपि स्वर्गात् जननी उच्चतरा भवति।

किमिदं वचः केवलं कल्पनाप्रसूतमथवा वास्तविकमिति जिज्ञासिते उत्तरं भवति, सत्यमेवास्ति उपर्युक्तं वचोरत्नम्। वस्तुतः जनन्याः क्रोडे यदा वयं भवामः तदा अत्यन्तं सुखं लभामहे काचिदपि पीडा त्वरितमेव दूरीक्रियते। तत्र स्थितस्य मम सर्वस्य किलकिलायितकै शोरके अपि माताऽस्मभ्यं सत्परामर्शान् प्रयच्छति। यावज्जीवनं प्राणपणेन निःस्वार्थमेव माताऽस्या परिपालयति। स्वर्गेऽनुत्तमो भावः स्नेहः कुत्र लभ्येत, स स्नेहः मातुः क्रोडे भूरि मिलति अतः सत्यमेव रामवचनमिदं कथितम्–

**दशाचार्याननुपाध्याय उपाध्यायान् पितादश,**
**पितॄन् दश तु मातैका सर्वां वा पृथिवीमपि॥**[७]
**गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः।**

इदमेव समर्थितवान् भासोऽपि –

**माता परं दैवतम्।**
**कुक्षौ सन्धारणाद्धात्री जननाज्जननी तथा।**
**अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः॥**
**शिशोः शुश्रूषणाच्छक्तिर्मातास्यान्माननाच्च सा॥**

जन्मभूरिति कस्यापि पुरुषस्य जन्मस्थानं निगद्यते। सा तु प्रायशस्तन्नगरं ग्रामो वाऽभिधीयते। यत्र कश्चित्पुरुषः जायते। यतः तत्रैव उत्पन्नेन अन्नेन, जलेन वा तच्छरीरं सम्पुष्टं भवति तत्रस्थितेन पक्षिवृक्षसमूहेन क्रीडनेन च प्रसाधितम्।

तद्यथा कालिदासः अयोध्यायाः सरय्वा धातृत्वं रामोद्गारेण प्रमाणीकरोति –

**यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानां,**
**सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम्।**
**सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता।**
**दूरं वसन्तं शिशिरानिलैर्मां तरङ्ग हस्तैरुपगूहितैव।**[8]

तद्यथा कस्यापि पुरुषस्य ग्रामस्थितस्य नगरस्थस्य वा व्यक्तित्वनिर्माणे ग्रामस्य नगरस्य वा महत्त्वमस्ति। एवमेव तस्य तस्य जनस्य व्यक्तित्वोन्नतौ यस्मिन् देशे स जायते तस्य देशस्य राष्ट्रस्याधिकं महत्त्वं स्वीक्रियते। अत एव जन्मभूमेः देशस्य राष्ट्रस्य च गरीयस्त्वं रामेणोक्तं रामायणे।

**६. मोक्ष-**

भावना अर्थात् अपुनर्भवः मोक्षासये अस्माभिरवश्यं प्रयतनीयम् यतः दर्शनानुसारं दुःखमेव सर्वं विवेकिनः, किन्तु वयं तु मन्यामहे ईश्वरे भक्तिं श्रेष्ठाम् –

यद्विषये पण्डितराजैः प्रोक्तं भामिनीविलासे – रे चेतः! कथयामि ते हितमिदं वृन्दावने चारयन् वृन्दं कोऽपि गवां नवाम्बुदनिभो बन्धुर्नकार्यस्त्वया सौन्दर्यामृतमुद्गिरद्भिरभितो सम्मोघ्य मन्दस्मितैः एष त्वां तव वल्लभांश्चविषयानाशुक्षयं नेष्यति॥

**सन्दर्भाः–**


१. हितोपदेशमित्रलाभः
२. रघुवंशम्
३. भगवद्गीता १०
४. चा.नीतिदर्पणः, तृतीयाध्यायः,११दशः श्लोकः
५. श्रीमद्भगवद्गीता
६. वाल्मीकिः
७. व्यासः
८. रघुवंशम्

# सुराष्ट्रनिर्माणे संस्कृतसाहित्यस्य उपादेयता

**प्रो. सन्तोषमित्तलः**

भारतीयसंस्कृतौ विचारस्वातन्त्र्यं, सदाचारपालनं, धर्मप्राधान्यं, दुर्भावदमनं, पापापाकरणं, दुःखदहनं, ज्ञानज्योतिप्रदानं, सुखसाधनं, सत्यस्थापनं, असत्यप्रशमनं, शान्तिप्रदानं, विश्वबन्धुत्वस्थापनं, मनोऽमलीकरणम् आदयः दुर्लभाः गुणाः विराजन्ते, यैः संस्कृतिरेषा सर्वस्मिन् जगति स्वप्रभावं विस्तारयन्ती जनान् आकर्षयति। मनुना अपि उक्तम् -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[१]

वर्तमानराष्ट्रे भौतिकसंसाधनानां प्राधान्यं दृश्यते। अनेन राष्ट्रनिर्माणे पूर्णतोतापूर्णता दरीदृश्यते। सर्वे जनाः सुखं समृद्धिं च वाञ्छन्ति। जनानां सुखसमृद्ध्यादिकं तु राष्ट्रशासकस्य सहयोगेनैव सम्भवति। राष्ट्रसुरक्षायां प्रजायाः शासकस्य च सद्गुणसम्पन्नता परमपेक्षिता भवति। अस्मिन् सन्दर्भे वैदिकाः केचिद् उपदेशा अस्माकं कृते उपयोगिनः सन्ति। ते अस्माकं राष्ट्रिय-सामाजिक-पारिवारिक-आर्थिक-राजनैतिक-धार्मिक-वैयक्तिकादिजीवनेषु हितकारिमार्गदर्शनं कुर्वन्ति। यथोक्तम्- **वेदोऽखिलो धर्ममूलम्।**[२] किमात्मानं विना शरीरस्य महत्त्वं प्रचक्ष्यते, यथा नाणकस्य (coin) द्वयोः पक्षयोः महत्त्वं, नाणकस्य (coin) मूल्यं प्रतिपादयति तथैव राष्ट्रनिर्माणे तस्य भौतिकविकासेन सह आध्यात्मिकविकासस्य अपि आवश्यकता भवति। इदानीन्तनसमये सन्दर्भेऽस्मिन् नैके प्रश्नाः समागच्छन्ति, यथा -

१. राष्ट्रस्य स्वरूपं कीदृशम् आसीत्?

२. सम्प्रति कीदृशी दशा वर्तते?

३. राष्ट्रस्य स्वरूपं कीदृशं भवेत्?

त्रयाणां प्रश्नानां समाधानं यदि सम्यक्तया क्रियते उत करिष्यते तर्हि निश्चप्रचमेव सुराष्ट्रनिर्माणं सम्भविष्यति।

उपर्युक्तप्रश्नानां समाधानं कुतः प्राप्यते? इत्याशये संस्कृतग्रन्था एव श्रेष्ठमार्गा इति स्वाभिमतम्। वेद-पुराण-स्मृति-भागवत-रामायण-महाभारतादिग्रन्थाः अद्यापि सुराष्ट्रनिर्माणे सहायकाः वर्तन्ते।

सम्प्रति राष्ट्रनेतारः स्वाभिलाषानुसारं भारतस्य राजनैतिक-सामाजिक-सांस्कृतिकादीनां स्थितीनां मूल्यनिर्धारणं कुर्वन्ति। स्वार्थवशात् स्वकेन्द्रितनियमावल्या राष्ट्रनिर्माणस्य राष्ट्रोत्थानस्य च कल्पनां कुर्वन्ति। परं प्राचीनपरम्परायाम् आदर्शराष्ट्रस्य लक्षणं किमासीदिति ज्ञानं **संस्कृतग्रन्थेषु** एव समुपलब्धं वर्तते यथा –

**अविरोधेन सर्वेषां हितं चक्रे युधिष्ठिरः।**
**प्रीयतां दीयतां सर्वे मुक्त्वा कोषं बलं विना॥**
**साधु धर्मेति पार्थस्य नान्यच्छ्रूयते भाषितम्॥**

महाराजायुधिष्ठिरवर्येण अविरोधेन समेषां हितं कृतम्। श्रद्धया देयं, प्रीतिभावेन जीवनं यापनं स्यात्, मानवस्योपरि बलप्रयोगः न करणीयः चेति तस्मिन् काले विचारोऽऽसीत्। जना अपि सानन्देन युधिष्ठिरस्य राष्ट्रधर्मस्य प्रशंसाम् अकुर्वन्।

क्रमेऽस्मिन् **रामशासनकालेऽपि** आदर्शराष्ट्रस्य लक्षणं संलक्ष्यते यथा –

**आसन् प्रजा धर्मपरा रामे शासति नानृताः।**
**सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः॥**[३]

न केवलं राज्ञः धर्मः राष्ट्रानुकूलो अलभ्यत अपि तु प्रजानां धर्मोऽपि राष्ट्रानुकूलमासीत्। प्रजानां सत्यव्यवहारः, उत्तमगुणसम्पन्नः, धर्मानुगुणम् आचरणपद्धतिश्च सुराष्ट्रनिर्माणे सहायकाः वर्तन्ते स्म। सः एव आदर्शराष्ट्रो भवति। यथा –

**काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः।**
**हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा॥**
**नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।**
**नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति॥**[४]

रामराज्ये किमपि असौविध्यं नाभवत्। वर्षाकाले वृष्टेः, धनधान्यस्य नगरेषु ग्रामेषु च परिपूर्णजनानाम् उपस्थितेः च सुव्यवस्थिता आसीत्। असमये कस्यापि मरणं न जातम् प्राणिनः निरोगिणः आसन्। राष्ट्रे अनावश्यकताया अनिष्टमपि नाभवत्।

सुराष्ट्रस्य लक्षणानुसारं विचारयामश्चेत् सम्प्रति विपरीतेन सर्वाणि कार्याणि भवन्ति। वर्तमानराष्ट्रे प्रायशः एकमेव उद्देश्यं दृश्यते तदेव धनार्जनम्, तदनृतं नृतं वा भवतु। राष्ट्रस्य विकासः न केवलमनृतेन धनेन सम्भवति। नृतधनेन सह नागरिकाणां कानिचन कर्त्तव्यानि सन्ति। तान्यपि करणीयानि भविष्यन्ति। मानवाः स्ववैयक्तिकस्वार्थानुसारं सर्वं कार्यं सम्पादयन्ति। यद्यप्यावश्यकतापरिपूर्णार्थं धनस्यावश्यकता वर्तते किन्तु आवश्यकतानां परिपूर्तौ मनुष्यः असामाजिकं कार्यं करोति। समाजे गुरु-माता-पिता-बान्धवान् प्रति श्रद्धा मानवेषु न अस्ति। राष्ट्रे प्रतिव्यक्तेः महत्त्वं भवति यदि प्रत्येकं मानवः अनेन प्रकारेण अनैतिककार्यं करिष्यति

तर्हि सुराष्ट्रनिर्माणं कथं सम्भाव्यते। एतदर्थम् आवश्यकमस्ति यत् देशस्य नागरिकाः आत्मचिन्तनं कुर्वन्तु यथोक्तम्-

**स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः।**
**अभीष्टदेवतानां तु कुर्वीत स्मरणं नरः॥**

वर्तमानसमये मानवाः स्वाधिकारान् प्रति सजगाः सन्ति न तु कर्त्तव्यानि प्रति। ये कर्त्तव्यपरायणाः सन्ति तेषाङ्कृते मनुना उक्तम् -

**स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः।**
**प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः॥**

इदानीन्तने समये दुखात्मिकाः स्थितयः परिलक्ष्यन्ते, यथा पितृणां कृते वृद्धाश्रमाणां व्यवस्था क्रियते। वृद्धपितृणां स्वगृहे सेवार्थं स्वीयेन सह स्थातुञ्च पुत्रपुत्रीणाङ्कृते निर्देशाय अधिनियमानां निर्माणं क्रियते। किन्तु **मनुस्मृतौ** उल्लिखितमस्ति - यत् मातृपितृगुरुशुश्रूषा सततं कल्याणकारिणी भवति। सा चतुर्विधां श्रियमावहति। अत एव तेन संस्तूयते -

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥**

पारिवारिकाभ्युदयाय मातृपितृगुरुशुश्रूषा, पितृनिदेशानुसरणं, मातृभक्तिः पतिपरिचरणं चेष्यते -

**अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।**
**जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥**[५]

सम्प्रति अशोचनीयानि सजुगुप्साकार्याणि कुत्सिदाचरणानि च संदृश्यन्ते। येनैतेषां कृते स्वतन्त्रतया अधिनियमानां (laws) आवश्यकतानुभूयते। परमस्य चर्चा प्रागेव संस्कृतग्रन्थेषु समुपालभ्यत।

लोके प्रचलिता विषयासक्तिः मानवविनाशकारिणी। घृतप्रदीप्तो वह्निरिव विषयोपभोगो दोषायैव प्रवर्तते। अतो विषयासक्तिर्हेयोपेक्ष्या च -

**न जातुः कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥**[६]

सर्वेषां कृते समानन्यायव्यवस्था प्राचीनकालेऽऽसीत्। समाजस्य देशस्य राष्ट्रस्य च सर्वविधसमुन्नत्यै विचारसाम्यं मतैक्यं सामञ्जस्यं चाभीष्टम्। विचारसाम्ये एव समवेतत्वं, समन्विता कार्यवृत्तिश्च -

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥**[७]

इत्थमेव यजुर्वेदे समत्वदृष्टिसम्पादनेन स्वपरहितविभेदनिवारणेन सार्वभौतिकीं सार्वलौकिकीञ्च उन्नतिं निर्दिशति –

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**
**मित्रस्य चक्षुषा समीक्षामहे॥**[८]

सुराष्ट्रस्य निर्माणे यथा व्यक्तेः महत्त्वं तथा परिवारस्य। समावर्त्तनसंस्कारे धनार्जनेन सह सामाजिक-पारिवारिक-सांस्कृतिकज्ञानानि अपि अदीयन्त यथा – तैत्तिरीयोपनिषदः शिक्षावल्याः एकादशानुवाके उल्लिखितम् अस्ति –

'सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिः देवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि।'

वर्तमानराष्ट्रियचेतनायाः दृष्ट्यापि संस्कृतमेव सामान्यतः वर्धमानं दृश्यते। न्यायालयेऽपि 'सत्यमेव जयते'इत्युपनिषद्वाक्यं सैद्धान्तिकरूपेण स्वीकृतम्। बङ्किमचन्द्रप्रणीतं 'वन्दे मातरम्' इति राष्ट्रगीतं प्रायेण संस्कृतपदैरेवान्वितं विद्यते। एवमेव रवीन्द्रनाथप्रणीतं 'जनगणमन' इति राष्ट्रगानमपि संस्कृतपदविपुलत्वेन समन्वितमस्ति। आकाशवाण्या प्रयुक्तं आदर्शवाक्यं 'बहुजनहिताय बहुजनसुखाय' दूरदर्शनेन 'सत्यं शिवं सुन्दरम्' चिकित्सालयेषु 'सर्वे सन्तु निरामयाः'भारतीयजीवनबीमानिगमेन 'योगक्षेमं वहाम्यहम्' जलसेनया 'शं नो वरुणः' विदेशनीतेः 'पञ्चशीलम्' एवं विविधानि चादर्शवाक्यानि एवमेव अन्यैरपि प्रशासनिकविभागैः स्वीकृतानि आदर्शवाक्यानि प्राचीनैः ऋषिभिः संस्कृतभाषायां प्रणीतेभ्यः ग्रन्थेभ्यः उद्धृतानि विद्यन्ते।

वर्तमानकाले पितापुत्रयोः, भ्राताभ्रात्रोः मध्ये च परस्परं सम्पत्तिविवादाः प्रचलन्ति किन्तु अस्माभिः कथम् आचरणीयं विषयेऽस्मिन् ईशावास्योपनिषदि वर्णनम् अस्ति –

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥**
**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[९]

भारतीयसंविधाने लोककल्याणकारिराज्यम् भवेत् एतादृशी संकल्पना अस्ति। अस्याः विचारविमर्शः प्रागेव संस्कृतग्रन्थेषु परिचर्च्यन्ते स्म –

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**[१०]

एषा भावना अपि मानवानां मनसि स्फुरन्ति –

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुःखभाग्भवेत्॥**[११]

**निष्कर्षतः–**

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। संस्कृतिमूलं संस्कृतम्। साहित्यं संस्कृतिवाहकमस्ति। संस्कृतं भारतीयसंस्कृतेरात्मा। संस्कृतिः संस्कृताश्रया। कपिलमहाभागेनोक्तम्–

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**
**वेदतत्त्वार्थसंजुष्टं लोकालोककरं शिवम्॥**

**सन्दर्भाः–**


१. मनुस्मृति २/२०
२. वाल्मीकिरामायणम्
३. वाल्मीकिरामायणम्
४. मनुस्मृति २/१२१
५. अथर्ववेद ३/३०/२
६. श्रीमद्भागवत १/१९/१४
७. ऋग्वेद ८/४९/४
८. यजुर्वेद ३६/१८
९. ईशावास्योपनिषद्
१०. महोपनिषद ४/७१, हितोपदेशसन्धिप्रकरणे
११. भविष्यपुराणम् ३/२/३५/१४



*आचार्या*
*शिक्षाशास्त्रविभागे,*
*राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे,*
*जयपुरे*

# शिक्षायां तुलनात्मकशिक्षाया महत्त्वम्

**प्रो. सोहनलाल पाण्डेय**

अस्मिन् वैज्ञानिकयुगे, सर्वेषु क्षेत्रेषु वैश्वीकरणम् अतिशीघ्रतया क्रियते। एकस्मिन् देशे या घटना भवति तस्या: समाचार: शीघ्रमेव सम्पूर्णजगति प्रसरति। कस्यचिदेकस्य देशस्य धार्मिकसामाजिकराजनैतिकवातावरणस्य प्रभाव: तस्य प्रतिवेशिषु देशेषु अवश्यमेव दृश्यते एव। एकस्मिन् देशे कश्चन आविष्कारो भवति शीघ्रमेव तस्य प्रचार: प्रयोगश्च अन्येषु देशेषु दृश्यते। विश्वस्य सर्वेषां देशानां क्रियाकलापानां प्रचार प्रसार: प्रयोग: च परस्परं भवति। वेददर्शनशिक्षादीनां विकास: उद्भव: च भारते अभवत् किन्तु सम्प्रति सम्पूणविश्वे एतेषां प्रचार-प्रसार: प्रभावश्च दृश्यते। एतेषु शिक्षा तु प्राचीनकालादेव भारतस्य प्रतिष्ठास्ति। प्राचीनकाले विविधदेशेभ्य: जना: भारतमागत्य शिक्षा गृहणन्ति स्म। यथा-व्हेन्साङ्ग: फाह्यानादय:। मध्यकाले यवनाक्रमणै: भारतीयशिक्षाव्यवस्था ध्वस्ता जाता किन्तु अस्या: प्रचार-प्रसार: विदेशेषु अभवत् यतो हि केचन आक्रान्तार: भारतीयग्रन्थान् अपि स्वदेशान् अनयन्। आङ्ग्लकाले विविधभारतीयग्रन्थानाम् अनुवाद: आङ्ग्लजनै: आभाषायां कृत्वा स्वदेशे नीतम्। आधुनिकयुगे सर्वेषा देशानां स्व-स्वनियमाधारेण शिक्षाव्यवस्था कृता किन्तु विविधदेशानां शिक्षाया: समन्वितरूपेणाध्ययनं सर्वप्रथमं Mave Antoine Jullien De Pavis नामधेयेन जनेन कृतम्। फ्रांसदेशीय: अयं जन: विविधदेशानां शैक्षिक - सिद्धान्तानां क्रमबद्धरूपेणाध्ययनं विश्लेषणं च अकरोत्।

**तुलनात्मकशिक्षायाः अभिप्रायः**

तुलनात्मकशिक्षाया: अर्थ: तु नाम्ना एव स्पष्टोऽस्ति। तुलनात्मकशिक्षा अर्थात् ईदृशी शिक्षा यस्यां शिक्षाया: तुलनात्मकाध्ययनं भवति। वयं जानीम: यत् तुलनायां न्यूनातिन्यूनविषयद्वयं तु भवत्येव। अत्र तुलना शब्दस्यार्थ: अस्ति गुणदोषविशेषतादीनां समन्विताध्ययनम्। विविधदेशानां शिक्षायां समन्वितरूपेण अध्ययनमेव तुलनात्मकशिक्षा अस्ति।

**तुलनात्मकशिक्षायाः परिभाषा -**

तुलनात्मकशिक्षाया: सम्प्रत्ययं स्पष्टीकरणाय विविधविद्वद्भि: विविधपरिभाषा: प्रदत्ता: ॥

**जार्जब्रेडे-महोदयानुसारम् -**

'तुलनात्मकशिक्षायां तुलनाया: कारकाणां विश्लेषणमैतिहासिकविकासक्रमे क्रियते समस्याभ्य:

समाधानानामन्वेषणं क्रियते। एतेषामध्ययनानां निष्कर्षाः तुलनात्मकशिक्षायाः क्षेत्रात् बहिः सन्ति। एतेषां सम्बन्धः शिक्षाप्रबन्धनेन सह भवति।'' मेरी आण्टोइन जुलियन-महोदयानुसारम् - 'शिक्षा एकसकारात्मकविज्ञानमस्ति। अस्याः नियन्त्रणं प्रशासकानां सङ्कुचितनिर्णयदृष्टिकोणविचारैः न भवेत्। सङ्कुचितनियमानामपि अनुपालनं न भवति। शिक्षाप्रारूपमन्धविश्वासाधारितं न स्यात्।

**रणजीतसिंहरघुवंशी-महोदयानुसारम् -**

तुलनात्मकशिक्षा विविधदेशानां शिक्षाव्यवस्थायाः परिज्ञानाय एका कुञ्जिका अस्ति ।''

**तुलनात्मकशिक्षाया विस्तारः**

तुलनात्मकशिक्षायाः क्षेत्रे निम्नलिखितबिन्दूनामध्ययनं क्रियते -

1. राष्ट्रीयस्तरस्य शैक्षिक समस्यानामध्ययनम्।
2. अपरराष्ट्रस्य तेषां गुणानामध्ययनं येषां प्रयोगः अन्यराष्ट्रेषु अपेक्षितोऽस्ति।
3. विविधराष्ट्राणां शिक्षाप्रक्रियाणाम् अध्ययनम्।
4. विविधराष्ट्राणां धार्मिकभौगोलिकैतिहासिकराजनैतिकपरिस्थितीनामाध्ययनम्।

विविधराष्ट्रेभ्यः लाभकारिणां विधीनामन्वेषणं प्रयोगकरणं च।

6. विविधराष्ट्राणामायोगस्थितीनां समितीनां शिक्षाव्यवस्थानामध्ययनम्।
7. शिक्षायां विकासाय विविधराष्ट्राणां शैक्षिकयोजनानामध्ययनम्।

**तुलनात्मकशिक्षायाः प्रयोजनानि**

Geovge Beveday महोदयस्य मते तुलनात्मकशिक्षाया उद्दश्यानि अधोलिखितानि सन्ति।

**1. आत्मबोधनम् -**

तुलनात्मकशिक्षायाः प्रथमोद्देश्यमस्ति आत्मबोधनम् अर्थात् अस्माकं स्वदेशस्य शिक्षाव्यवस्थायाः परिज्ञानम्। यावत् वयं विविधदेशानां शिक्षाव्यवस्थाः न अवलोकयामः तावत् अस्माकं दोषः, कथं प्रकटीकरणरूपे आगमिष्यन्ति। अतः तुलनात्मकशिक्षायां विविधदेशानामध्ययनव्यवस्थां शिक्षाव्यवस्थां वा दृष्ट्वा एव अस्माकं दोषनिवारणं भवति।

**2. ज्ञानार्जनम् -**

तुलनात्मकशिक्षायाः द्वितीयमुद्देश्यमस्ति ज्ञानार्जनम्। विविधदेशानां शिक्षाव्यवस्थाभ्यः अस्माकं कृते ज्ञानप्राप्तिः भवति। नवीनतायाः विकासः पुरातनविधिसु परिष्कारश्च भवति। अन्यदेशानां शिक्षायाः अपेक्षितगुणानां ग्रहणमपि भवति।

**3. पराबोधनम् -**

तुलनात्मकशिक्षायाम् अन्येषां देशानां शैक्षिकव्यवस्थायाः परिस्थितीनां च बोधः भवति। कस्मिन्

विषये कस्मिन् देशे किं प्रचलति? किं वा अभूत्? केषां विषयाणामध्ययनं कस्मिन् देशे भवति? केषां देशानां शिक्षाव्यवस्था उच्चतरा अस्ति? इत्येतेषां प्रश्नानामुत्तराणि प्राप्यन्ते।

**4. परिष्करणम् –**

तुलनात्मकशिक्षया विविधदेशानां शिक्षाप्रणालीनां ज्ञानं भवति। अनेन ज्ञानेन अस्माकं शिक्षायां नवीनशिक्षाप्रणाल्याः विकासो भवति। अनेनैव शिक्षाप्रबन्धे परिष्कारो भवति। नवाचाराणां विकासो भवति।

**5. विश्वस्तरीयमध्ययनम् –**

तुलनात्मकशिक्षायां शिक्षायाः विश्वस्तरीयाध्ययनम् अपि भवति। विश्वशिक्षायाः ज्ञानं भवति। शिक्षायाः विश्वस्तरीयसमस्यानां समाधानं क्रियते।

**विविधपक्षाणां ज्ञानम् –**

तुलनात्मकशिक्षया विविधदेशानां विविधशैक्षिकसामाजिकराजनैतिकधार्मिकपक्षाणां ज्ञानमपि भवति।

**अन्तःराष्ट्रीयम् अन्ताराष्ट्रीयं च शैक्षिकविश्लेषणम् –**

**तुलनात्मकशिक्षायामेतयोः विश्लेषणमपि भवति।**

**अन्तराष्ट्रीयशैक्षिकविश्लेषणम् –**

अस्मिन् विश्लेषणे विश्वस्य द्वयोः अधिकेषु वा प्रचलितशिक्षाव्यावस्थायाः तुलनात्मकाध्ययनं भवति।

**अन्तारिष्ट्रियशैक्षिकविश्लेषणम् –**

अस्मिन् विश्लेषणे एकस्यैव राष्ट्रस्य एकस्यैव विषयस्य च विविधस्तरेषु अध्ययनं क्रियते। N.C.T.E. द्वारा अपि निर्धारितमस्ति यत् एकस्यैव प्रकारस्य शिक्षाव्यवस्थायाः शैक्षिकमापदण्डानां वा अन्ताराष्ट्रीय स्तरे अध्ययनं भवति।

**तुलनात्मकशिक्षायाः आयामाः**

तुलनात्मकशिक्षायाः निम्नलिखिता उपागमा सन्ति–

**1. दार्शनिकोपागमाः –**

शिक्षायाः मूलाधारः तु दर्शनाधारित, एवास्ति। अत एव शिक्षायाः पाठ्यक्रमनिर्धारणे दर्शनस्यावश्यकता भवति। यतोहि शिक्षादर्शनयोः अन्योन्यसम्बन्धः अस्ति। अतः तुलनात्मकशिक्षायाः दार्शनिकोपागमा महत्वपूर्णाः।

**2. समाजशास्त्रीयोपागमाः –**

शिक्षा एका सामाजिकी प्रक्रियास्ति, विना समाजं शिक्षायाः प्राक्कल्पना अपि न कर्तुं शक्यते। अतः शिक्षासमाजयोरपि घनिष्टसम्बन्धोऽस्ति। तुलनात्मकशिक्षायामपि शिक्षामाध्ययमेन

विविधदेशसमाजानामध्ययनं भवति। यद्यपि अस्मिन् क्षेत्रे समाजाध्ययनं प्रधानं नास्ति प्रधानं तु शिक्षाध्ययनम्।

**3. ऐतिहासिकोपागमाः –**

इतिहासस्यानुभवै रेव सर्वे सर्वत्र सर्वकार्याणि कुर्वन्ति। भारते तु शिक्षैतिहासः सर्वप्राचीन वर्तते। ऐतिहासिकाध्ययनेन एव भविष्यस्य अध्ययनमार्गः प्रशस्तः भवति। अस्माकं या शिक्षा अधुना दृश्यते तस्याः उद्भवः तु वेदारण्यकोपनिषद्दर्शनेभ्यः एव अभवत् यद्यपि तस्याः स्वरूपं परिवर्तितं जातं तथापि वृक्षस्य मूलम् तु बीज एव भवति। ऐतिहासिकाध्ययनेनैवानुसन्धानस्य मार्ग प्रशस्तः भवति। प्रत्येकं देशस्य शिक्षाव्यवस्था तस्य देशस्येतिहासेन प्रत्यक्षाप्रत्यक्षरूपेण वा प्रभाविता भवत्येव।

**विश्वस्य विविधदेशेषु शिक्षाव्यवस्था –**

**भारते शैक्षिकव्यवस्था**

प्रमुखदेशानां शिक्षाव्यवस्था–

**पूर्वप्राथमिकशिक्षा** – भारते पूर्वप्राथमिकशिक्षायां सर्वकारस्य कापि भूमिका नास्ति। केवलम् अशासकीयविद्यालयेषु एवं पूर्वप्राथमिकशिक्षायाः व्यवस्थास्ति। पूर्वप्राथमिककक्षायां प्रवेशायुः अस्ति 2–5 वर्षाणि।

**प्राथमिकशिक्षा –**

कक्षा 1 तः 5 पर्यन्तं प्राथमिकशिक्षा भवति। अस्यां प्रवेशायुरस्ति 6–14 वर्षाणि। प्राथमिकशिक्षायाः व्यवस्था सर्वकारेणापि क्रियते अशासकीयविद्यालया अपि सन्ति।

**उच्चप्राथमिकशिक्षा –**

कक्षा 6 तः 8 पर्यन्तं भवति उच्चप्राथमिकशिक्षा। अस्याः अपि द्विस्तरीयाः विद्यालयाः सन्ति शासकीया अशासकीयाश्च।

**माध्यमिकशिक्षा–**

कक्षा 9 तः 10 पर्यन्त भवति। विद्यालयाः द्विस्तरीयाः सन्ति।

**उच्चतरमाध्यमिकशिक्षा –**

कक्षा 11 तः 12 पर्यन्तं भवति। द्विस्तरीयाः विद्यालयाः सन्ति। अस्मिन् स्तरे छात्राः स्वेच्छानुसारं विषयसमूहं स्वीकृत्य पठन्ति। यथा – कलासङ्कायः विज्ञानसङ्कायश्च।

**उच्चशिक्षा –**

कक्षा स्नातकतः स्नातकोत्तरविद्यावारिधिपर्यन्तम्। इयं शिक्षाव्यवस्था विश्वविद्यालयैः नियंत्रितमहाविद्यालयेषु अस्ति। महाविद्यालयाः विश्वविद्यालयाश्च शासकीयाः, अशासकीया अपि सन्ति।

**अमेरिकादेशे शिक्षाव्यवस्था -**

अमेरिकादेशे शिक्षाव्यवस्था निम्नलिखितस्तरेषु अस्ति -

**पूर्वप्राथमिकशिक्षा -**

अमेरिकादेशे पूर्वप्राथमिकशिक्षायाः व्यवस्थास्ति किन्तु अनिवार्या नास्ति।

**प्राथमिकशिक्षा-**

अमेरिकादेशे प्राथमिकशिक्षायाः यत्र भागा भवन्ति तेषु

(अ) प्राथमिककक्षा 1-3 (ब) माध्यमिककक्षा 4-6 (स) उच्चकक्षा 7-10

**माध्यमिककक्षा -**

अमेरिकादेशे माध्यमिकशिक्षायाः कृते द्विविधविद्यालयाः सन्ति। जूनियर हाईस्कूल, सीनियर हाईस्कू ल इति। अमेरिकादेशे माध्यमिकशिक्षा केवलं सैद्धांतिकी नास्ति अपितु व्यावहारिकी अपि अस्ति।

**उच्चशिक्षा -**

अमेरिकायाम् उच्चशिक्षायाः कृते विश्वविद्यालयसङ्गठनमस्ति। तेनैव महाविद्यालय-विश्वविद्यालयव्यवस्था क्रियते। अमेरिकायां संपूर्णशिक्षायाः उत्तरदायित्वं राज्यशासनस्यास्ति न तु केन्द्रशासनस्य।

उच्चशिक्षायाः कृते महाविद्यालया विश्वविद्यालयाश्च शासकीया अशासकीयाश्च द्विविधाः सन्ति। उच्चशिक्षायां तकनीकीशिक्षा उत् महत्वपूर्णा मन्यते विज्ञानगणितसङ्गणकादीनां छात्राणां संख्याधिकास्ति। 1884 तमे वर्षे अन्तर्राष्ट्रीयप्रदर्शनी आयोजिता तस्मादारभ्यैव तकनीकी शिक्षा अत्र विशिष्टतां गता। अस्मिन् देशे पेस्टालाजी-हर्बर्टादिविद्वद्भिः अध्यापकशिक्षा प्रोत्साहिता। सेनाप्रशिक्षणसंस्थानान्यपि सन्ति। अन्तरिक्षानुसन्धानकेन्द्राणि अपि सन्ति NASAA तु अतिप्रसिद्धमस्ति। अमेरिकादेशे भौतिकविकासस्य विलासितायाः च साधनानामभावः नास्ति॥

**ब्रिटेनदेशे शिक्षाव्यवस्था -**

ब्रिटेनदेशे शिक्षायाः सम्यक् व्यवस्थास्ति। ब्रिटेनदेशे संवैधानिकराजतन्त्रमस्ति।

**प्राथमिकशिक्षा -**

प्राथमिकशिक्षायाः कृते द्विविधविद्यालयाः सन्ति। इन्फेण्टविद्यालयाः, जूनियरविद्यालयाश्च। प्राथमिकशिक्षा अनिवार्यास्ति, प्रवेशार्थायुसीमास्ति 5-11 वर्षाणि।

**माध्यमिकशिक्षा -**

माध्यमिकशिक्षायाः कृते त्रिविधविद्यालयाः सन्ति

(अ) माध्यमिक ग्रामरविद्यालयाः

(ब) माध्यमिकतकनीकीविद्यालया:

(स) माध्यमिकाधुनिकाविद्यालया:! अधिनियम – 1944 द्वारा तकनीकीशिक्षाया विकासोऽभवत्।

**उच्चशिक्षा –**

उच्चशिक्षा विशिष्टाध्ययनाय अस्ति॥ एकादशवर्षीयाधारभूतशिक्षास्ति। मुक्तविश्वविद्यालया अपि सन्ति। महाविद्यालया विश्वविद्यालयाश्च शासकीया अशासकीयाश्च सन्ति। विश्वविद्यालया: स्वायत्ता: सन्ति। अध्यापकशिक्षाया अपि ब्रिटेनदेशे सम्यक् व्यवस्थास्ति।

**सारांश:**

युगेऽस्मिन् तुलनात्मकशिक्षाया महती भूमिकास्ति। अस्मिन् वैश्वीकरणस्य युगे तुलनात्मकशिक्षया एव एकदेशस्य शैक्षिकप्रणाली-व्यवस्था-नवाचारादीणां प्रचार-प्रसार: सम्पूर्णविश्वे भवति। सम्पूर्णविश्व: समन्वितो व्यवस्थितश्च अभवत्। सर्वेषां देशानां परस्पर-सम्बन्धा भवन्ति। एकदेशस्य नागरिका: छात्रा: वा अन्यस्मिन् देशे गत्वा तत्र पठन्ति निवसन्ति च। विश्वस्य विविधदेशेषु गणितविज्ञानवाणिज्यचिकित्साशिक्षाभियांत्रिकीविधिसम्बन्धितविषयाणां विविधविश्वविद्यालया: संस्थानानि च सन्ति। आधुनिकयुगे अन्तर्जालमाध्यमेनापि विविधदेशानाम् अतितीव्रगामी सेवा व्यवस्था प्राप्यते। यथा वयं जगत: विविधदेशानां शिक्षापद्धतीनाम् अध्ययनं कर्तु शक्नुम:। अत: तुलनात्मकशिक्षया एव इदं सर्वं सम्भवं जातम्।

**सन्दर्भग्रन्था:**


१. जायसवाल, सीताराम; (१९८७) तुलनात्मकशिक्षा, विनोद पुस्तक मन्दिर, आगरा।

२. पाठक, आर.पी.; (२०१२) 'तुलनात्मक शिक्षा के आधार' कनिष्का पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स, नई दिल्ली।

३. यादव, केदारनाथसिंह (२००६) 'तुलनात्मकशिक्षा और शिक्षा मनोविज्ञान, हिन्दी बुक सेन्टर, दिल्ली

४. Sharma, Archna; (2011) Comparative Education an Analysis, Ancient Publishing House, New Delhi



*आचार्य:, अध्यक्षश्च,*
*शिक्षाशास्त्रविभाग:,*
*राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसर:,*
*जयपुरम्*

# अथ किमिदं व्याकरणम्? किञ्च तस्य दर्शनत्वम्?

प्रो. शिवकान्तझाः

तत्र व्याक्रियन्ते व्युत्पाद्यन्ते अनेन इति व्याकरणम् - इत्थं व्याकरणं नाम अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीन् विशेषेण-संस्कारविशेषेण आसमन्तात् वैदिकान् लौकिकांश्च शब्दान् करोतीति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः।

लक्ष्य-लक्षणे व्याकरणमिति महाभाष्योक्त्या ज्ञायते यत् लक्ष्यं लक्षणञ्चेति समुदितं व्याकरणं भवति। 'साधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजकनियमविशेषो व्याकरणमि'ति। व्याकरणाध्ययनस्यास्ति विशिष्टपरम्परापद्धतिः न केवलं प्रकृतिप्रत्ययज्ञानपूर्वकं शब्दसाधुत्वचिन्तनमत्र दृश्यते अपितु दर्शनपरम्पराऽपि अत्र दृश्यते।

तत्र हि प्रथमं व्याकरणदर्शनमित्यस्य कोऽर्थः? एवं प्रश्ने तद्घटकदर्शनशब्दस्यार्थः प्रतिपाद्यते। अयं हि दर्शनशब्दो भावसाधनः करणसाधनश्च। तत्र भावसाधनत्वे दृष्टिरित्यर्थस्तस्यावबुध्यते। करणसाधनत्वे तु दृश्यते प्रत्यक्षीक्रियते न तु अनुमीयते नापि शब्दजन्यबोधविषयीक्रियते अनेनेति व्युत्पत्त्या दर्शनसाधनमित्यर्थः। एवं सति यैर्यैरुपायैर्दृश्यते, ते सर्वेऽपि उपाया दर्शनपदव्यपदिष्टा भवितुमर्हन्ति।

भावसाधनत्वे तु -

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥**[1]

इत्युक्त्या श्रुतिवाक्यश्रवणमन्तरा यत् किञ्चिद् ग्रथ्यमानं वस्तु दर्शनमेव नहि भवितुमर्हतीति कथङ्कारं दर्शनपदव्यपदिष्टानां दर्शनपदव्यवहार्यता इति चेदुच्यते, सर्वेषामपि दर्शनानामुद्भावकानां चेतसि सैव भगवती श्रुतिः साक्षात् परम्परया वा स्वकीयं कार्यं विदधती वर्तत एव। तामन्तरा तस्याश्चित्तः प्रकाशस्य खपुष्पायमाणत्वात्। एवं च दर्शनहेतूनां दर्शकं प्रतिपादकं वा शास्त्रं लक्षणया दर्शनपदभाग् भवेदेव किमुत करणसाधनत्वे। तथा च व्याकरणमेव दर्शनमिति कर्मधारये सर्वं व्याकरणं दर्शनमेव भविष्यति। भावसाधनत्वे षष्ठीसमासे व्याकरणस्य दर्शनमित्यर्थः। तत्रापि व्याकरणपदेन व्याख्यानोपसंख्यानादिविशिष्टं शास्त्रं व्याकरणपदेन ग्राह्यम्। तस्य दर्शनमित्यत्र कर्तरि षष्ठ्या समासे शास्त्रेण यद् यद् दृश्यते, तत् सर्वमपि दर्शनमेव भवेत्। अधिकरणस्य सम्बन्धत्वेन विवक्षया षष्ठ्यन्तेन समासे तु व्याकरणशास्त्रे यत्परात्मनः तत्सम्बन्धिनो वा दर्शनस्य

साधकं तदेव दर्शनं स्यात्। एवं सति उक्तासु व्युत्पत्तिषु यः कोऽपि व्याकरणसम्बन्धी विषयः, सर्वोऽपि दर्शनपदव्यपदेश्यः सिध्यति। अस्यां स्थितौ पञ्चानां वृत्तीनामन्येषां वा प्रकृतिप्रत्ययसन्धिसमासकारकादीनां सर्वेषां दर्शनत्वेन न काचिद् बाधाऽऽपतिष्यति। किञ्च येन वैयाकरणेन दृष्टो व्याकरणे पदार्थो व्याकरणदर्शनपद-व्यपदेश्यो भवेत्, तथा चेदं शास्त्रं व्याकरणदर्शनं कथयितुं शक्यते।

तत्र पुनः मनसि जिज्ञासा भवति दर्शनशास्त्रत्वेन केषां शास्त्राणां ग्रहणं भवतीति जिज्ञासायामाह दर्शनशास्त्रत्वेन प्रायो वैदिकदर्शनानि षडेव गृह्यन्ते, यथा न्यायः, वैशेषिकम्, सांख्यम्, योगः, जैमिनीयम्, वेदान्तश्च दर्शनरूपेण स्वीक्रियन्ते, यतोहि दर्शनस्य परिभाषामिमां कुर्वन्ति विद्वांसः यत् – ईश्वरस्य साक्षात्कारः मोक्षादिकञ्च अधिगम्यते येन तद्दर्शनम्। उक्तमपि –

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥**

अनेन प्रकारेण ईश्वरस्य साक्षात्कारो मोक्षादिसाधकञ्च वेदान्तादिदर्शनमेव। श्रुतिरपि प्रमाणयति यत्–

आत्मावारे श्रोतव्यो मन्तव्यो[२] निदिध्यासितव्यः। एवमेवसर्वं[३] खल्विदं ब्रह्म इत्याद्याः श्रुतयो ब्रह्मसूत्राणि च दर्शनपदेन व्यवह्रियन्ते।

परन्तु इदं विचारणीयमस्ति यद्यस्मिन् शास्त्रे पदवाच्यत्वे सति प्रधानतया अध्यात्मविषयस्य प्रतिपादनं कृतमस्ति, भवतु तत्र प्रसङ्गवशाल्लौकिकविषयविवेचनम् अध्यात्मपरकमेव तदपि दर्शनपदव्यपदेश्यमिति विदुषां सम्मतिः, अतस्तथैव व्याकरणशास्त्रमपि आत्मतत्त्वविचारकत्वात् दर्शनशास्त्रत्वेनाङ्गीकरणीयमिति। यद्युच्यते यद् व्याकरणशास्त्रं पदसाधुत्वलक्षणमेव कथं दर्शनपदव्यपदेश्यम्। उक्तमपि पाराशरोपपुराणे –

**'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥'**[४]

अन्यच्च – काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्। इति।

परन्तु अत्रेदमवधेयम् यद् व्याकरणस्य प्रक्रियात्मकः (व्युत्पत्तिपक्षः) दार्शनिकश्च पक्षौ सुपुरातनौ। द्विपर्णो व्याकरणखगो व्याप्नोति त्रिलोकीं सुपर्णवत्। नैतादृशी गतिर्भवति शास्त्रान्तरस्य पक्षद्वयाश्रयात्मिका।

तत्र यो हि प्रथमोंऽशः प्रक्रियारूपः स रेखागवयन्यायेन परिकल्पितोऽस्ति अथवा यथा नित्येऽपि खेऽनित्यादीनां हस्त्यादीनां कल्पना वर्तते तथैव नित्येऽपि शब्दे अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्यययोः परिकल्पनं कृतमस्ति।

एवं व्याकरणस्य द्वितीयोंऽशः दर्शनरूपः। अस्य शास्त्रस्यायं दर्शनभागः महान् उपयोगी वर्तते। दृश्यते विचार्यते आत्मतत्त्वं येन तद्दर्शनम्। आत्मतत्त्वविचारकशास्त्रं दर्शनमिति। अयमाशयः – भारतीयदर्शनानामेष स्वभावो यत् सर्वेषां जनानां कृते कल्याणमार्गं दर्शयेत्, स च मार्ग आत्मतत्त्वविवेचनात्मक एव। तथा च श्रुतिः –तमेव विदित्वाऽतिमृत्युमेति नान्यः[५]पन्था विद्यतेऽयनाय इति। एवमेव सर्वं खल्विदं[६]ब्रह्म, अयमात्मा[७]

ब्रह्म इत्याद्या श्रुतयो ब्रह्मसूत्राणि च दर्शनपदेन व्यवह्रियन्ते। एतद्विषये व्याकरणं पश्चात्पदं न भवति। यतश्चास्तीदमपि आत्मतत्त्वविवेचनम्। उक्तञ्च -दृष्ट्वारूपे व्याकरोत् सत्यानृते प्रजापतिः। अश्रद्धामनृतेऽदधाच्छ्रद्धां[८] सत्ये प्रजापतिः।।इति।

प्रजापतिः शब्दोपादानसृष्टिविधाता वैयाकरणः सम्मिलिते सत्यानृते पृथक्कृत्य परमार्थभूते सत्ये वस्तुनि श्रद्धामसत्येऽनात्मनि अश्रद्धां प्रत्यतिष्ठिपत् इत्यर्थिकयाऽनया श्रुत्या सत्यासत्यविवेचनलक्षणं दर्शनत्वं व्याकरणस्य सुस्पष्टं प्रतिपाद्यते।

किं च प्रकृतिप्रत्ययौ असत्यौ, तदपेक्षया पदानि सत्यानि, ततोऽपि वाक्यानि, पश्यन्त्यादिकं च सर्वं जगदसत्यम्, सर्वापेक्षया पराख्यं वाग्ब्रह्म सत्यमित्येवं निगूढं तात्पर्यम्।

एवमेव नामरूपे व्याकरवाणि[९]इति श्रुतिरपि संश्लिष्टयोः शब्दार्थयोः पृथक्कृतिं बोधयन्ती व्याकरणस्य सत्यासत्यविवेचनलक्षणं दर्शनत्वं प्रकाशयति।

वाग्वै ब्रह्म[१०], वाग्धि ब्रह्म[११], ते मृत्युमतिवर्तन्ते ये वै[१२]वाचमुपासते इत्याद्याः श्रुतयोऽपि वाचो व्याकृतिरूपोपासनया व्याकरणस्य दर्शनत्वं सम्यग् प्रतिपादयन्ति।

एकैव हि वाग् व्याकृताव्याकृताभेदेन द्विविधाऽस्ति। तत्र व्याकृतापदेन पश्यन्ती-मध्यमा-वैखरीणां ग्रहणम्, अव्याकृतपदेन सर्वधर्मरहिताया नित्यायाः पराख्यवाचो ग्रहणमिति सिद्धान्तोऽस्ति। व्याकरणमपि आत्मतत्त्वविचारकमिति। तथा चोक्तम् -

**अपि प्रयोक्तुरात्मनं शब्द[१३]मन्तरवस्थितम्।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते॥**

अपि च -

**अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः[१४]।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥**

अनेन प्रकारेण व्याकरणस्य पक्षप्रतिपादनेन ज्ञायते यद् व्याकरणशास्त्रमपि दर्शनशास्त्रम् अस्तीत्यत्र नास्ति सन्देहावसरः।

सदेव सोम्येदमग्र ब्रह्म आसीदेकमेवाद्वितीयम्[१५],ब्रह्मैवेदं सर्वम्[१६],आत्मैवेदं सर्वम्[१७] इत्यादि श्रुत्याधारेण यथा जगतो हेतुः सत्यत्वमेकत्वं ब्रह्मत्वम् आत्मत्वञ्च ब्रह्म एवास्तीत्यादि वेदान्तादिदर्शनं समर्थ्यते।

तथैव शब्दब्रह्मविषयकमाध्यात्मिकमनाध्यात्मिकं वा व्याकरणदर्शनमपि समर्थयन्ते। वागेवार्थं पश्यति वागेवार्थं निहितं सन्तनोति[१८]। वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते। ओमित्येतदक्षरं परब्रह्म तदेवोपासितव्यम् ओमिति[१९]ब्रह्म।

इत्यादयः श्रुतयः प्रमाणयन्ति यच्छब्दब्रह्मैव जगतो हेतुर्वर्तते।

प्रथमस्तावच्छब्दब्रह्म प्रणवरूप आसीत्, ततोऽक्षरसमाम्नायरूपे ततश्चत्वारो वेदानां सृष्टिरभूत। सूक्ष्मप्रणवस्वरूपब्रह्म परब्रह्मपदेन त्रिमात्रम् ओंकारेण अपरब्रह्मपदेन तथा च शब्दब्रह्मपदेन जानन्ति विद्वांसः।

**श्रुतिरपि प्रमाणयति यद् –**

एतद्वै सत्यकामः परं चापरं च ब्रह्म यदोङ्कारः तस्माद्विद्वानेतेनैवायत[20]नेनैकतरमन्वेति। अनेन प्रकारेण परब्रह्म प्राप्त्युपायः ओंकारो यतोहि तस्मादेकतरपरब्रह्म प्राप्नुवन्ति परब्रह्मणः प्राप्तिर्भवति वा। उक्तमपि –

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च तत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥**[21]

वैयाकरणास्तु शब्दब्रह्म एव परब्रह्मेति मन्यन्ते। शब्दब्रह्मणः प्राप्त्युपायञ्च उक्तमाचार्यभर्तृहरिपादैः–

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः**[22]**परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते॥**

अर्थाच्छब्दसंस्कारानन्तरमेव व्याकरणस्यावबोधो जायते शब्दसंस्कारे जाते सति साध्वसाधुशब्दानां विवेको जायते। अतोऽसाधुशब्दानामुपघातो भवति। तदेव शब्दब्रह्मणः सिद्धिः सिद्ध्युपायो वा उक्तमपि भगवता भाष्यकारेण यत् –

एकः शब्दः सम्यग् ज्ञातः सुष्ठुः प्रयुक्तः[23]स्वर्गे लोके च कामधुग् भवति।

**पुनः व्याकरणाध्ययनस्य प्रयोजनप्रसङ्गे वदति भाष्यकारः –**

महता 'देवेन नः साम्यं यथा स्यादित्यध्येयं[24] व्याकरणमिति। एवं मोक्षरूपं परमं प्रयोजनं व्याकरणस्य। धर्मार्थमपि व्याकरणमिति। तथा चोक्तं भाष्यकारेण शास्त्रपूर्वके प्रयोगे अभ्युदयस्तत्तुल्यं वेदशब्देनेति। शब्दस्य ज्ञाने धर्म आहोस्वित्प्रयोगे इति प्रश्नमुपस्थाप्य सिद्धान्तितं भाष्यकारेणापि।'तस्य शब्दब्रह्मणः प्रवृत्तिः व्यवहारकारणं समेषां पदार्थानां हेतुरूपां पश्यन्तीं ये विदन्ति ते तया विवृतं ब्रह्म प्राप्नोतीत्याशयः। तस्य शब्दब्रह्मणः प्रवृत्तिश्च षड्धा भवति –

जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीत्यादि प्रकारेण तस्य षड्भावविकारा इदमेव नापितु समे जानन्ति यद् गीर्वाणवाणी देववाणी अमरभारती सर्वप्रथममुन्नतशिखरारूढा लोककमनीयकलया च सम्पन्नासीत्। अस्यामेव चत्वारो वेदाः वेदाङ्गानि षट्शास्त्राणि पुराणानि चोपनिबद्धानि तत्रापि व्याकरणशास्त्रं प्राधान्यं भजते। उक्तवन्तो भर्तृहरिपादाः –

**आसन्नं ब्रह्मणस्तस्य**[25] **तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥**

इदं व्याकरणशास्त्रं केवलं प्रकृतिप्रत्ययादिविभागप्रदर्शकम् उताहो पदसाधुत्वलक्षणमेव नास्ति परन्तु ब्रह्मज्ञानसाधकमपि। उक्तवन्तोऽप्याचार्यहरिपादाः –

**शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते[२६]।**
**समारम्भास्तु भावानामनादिब्रह्म शाश्वतम्॥**

अपि च -

**उपायाः शिक्षमाणानां[२७] बालानामुपलालना।**
**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥**

इति ह्यर्युक्त-न्यायेन सारल्येन शब्दसाधुत्वज्ञानाय प्रकृतिप्रत्ययादीनां मृषा कल्पनया स्फोटरूपब्रह्मणः ज्ञानेन सिद्धान्तप्रतिपादनेन दर्शनशास्त्रेष्वपि व्याकरणदर्शनं प्रधानतामादधाति। अपि च लघ्वर्थं चाध्येयं व्याकरणम्[२८]। अथ च -

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः[२९]पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो, ब्रह्मराशिः सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते॥

इति भगवतः पतञ्जलेर्वचनेन वर्णराशिः ब्रह्मप्रतिपादकोऽस्ति अत्रैवाचार्यनागेशभट्टः वर्णोपदेशमपि ब्रह्मज्ञानसाधकं स्वीकृतवानिति आचार्यभर्तृहरिपादास्तु उक्तवन्तो यद्-

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्[३०]।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥**

इत्यादिवचनेन व्याकरणशास्त्रं मोक्षसाधकमस्ति अत एवास्य पाणिनिदर्शनम् इति नाम्ना प्रसिद्धिरपि वर्तते। अतः नूनमेव वक्तुं शक्यते यत् व्याकरणशास्त्रस्य प्रसिद्धा या द्वितीया दर्शनधारा तदस्पृष्टैव। औदुम्बरायण-स्फोटायन-यास्कादीनां शब्दनित्यत्वानित्यत्वादिरूपा व्याकरणस्य दार्शनिकस्य विचारा व्याडिना लक्षश्लोकसंख्यात्मके संग्रहग्रन्थे उपनिबद्धाः। पतञ्जलिना स्वकीये सर्वन्यायबीजे महाभाष्ये व्याकरणस्य धाराद्वयी समावेशिता। व्याकरणदर्शनस्य सर्वाणि तत्त्वानि तत्र संनिवेशितानि दृश्यन्ते, पूर्ववर्तिभ्यो व्याकरणदर्शनग्रन्थेभ्यः समाहृतानि स्वोपज्ञानि च।

भर्तृहरिणा महाभाष्यमाधारीकृत्य दार्शनिकतत्त्वसुगुम्फितं यद् वाक्यपदीयं निरमायि कारिकामयं तदंशतः स्मारयति विलुप्तं संग्रहग्रन्थम्। एवमेव स्फोटप्रतिष्ठा, स्फोटनिरूपणम्, स्फोटवाद इत्यादयो ग्रन्थाः व्याकरणदर्शनस्य मुख्यं प्रतिपाद्यविषयमाख्यान्ति।

षोडशख्रीस्तशताब्दौ वैयाकरणतल्लजेन भट्टोजिदीक्षितेन प्रक्रियात्मिकया दर्शनात्मिकया च दृशा पाणिनीये व्याकरणे समुद्बोधात्मकः कोऽप्यभिनवो वर्त्मा प्रदर्शितः। अष्टाध्यायीं व्याख्यातवता भट्टोजिदीक्षितेन शब्दकौस्तुभे महाभाष्यपस्पशाह्निकसरणिः समाश्रिता। तत्र च न्यायमीमांसादिमतान्यालोच्य व्याकरणदर्शनसिद्धान्तत्वेन प्रतिपादितः। तत्रत्यमेव निर्णीतमर्थं संक्षेपेण कारिकाभिः प्राचीकटत् दीक्षितः। कौण्डभट्टेन वैयाकरणभूषणसाररूपो व्याकरणदर्शनग्रन्थो विनिर्मितः। सप्तदशे ख्रीस्तशताब्दौ वैयाकरणप्रतिभापदवाक्यप्रमाणपारावारिणः नागेशभट्टाख्याः प्रादुरभूवन्। महाभाष्यप्रदीपव्याख्यानम्,

भट्टोजिदीक्षितकृताया वैयाकरणसिद्धान्तकौमुद्या व्याख्यानरूपं शब्देन्दुशेखरम्, वैयाकरणसिद्धान्तमञ्जूषा व्याकरणदर्शनग्रन्थरूपतया विरचिता भट्टनागेशेन।

एवं उपर्युक्तेषु व्याकरणदर्शनग्रन्थेषु अस्य दर्शनस्य स्फोटवादशब्दाद्वैतवादप्रभृतिसिद्धान्तान् खण्डनमण्डनविधया व्याख्यातवन्तोऽन्येपि दार्शनिकाः। तत्र च अन्येऽपि दार्शनिकविचाराः यथा – वाग्ब्रह्म शब्दब्रह्म निरूपणम्, शब्दार्थनिरूपणम्, शब्दार्थसम्बन्धनिरूपणम्, वाक्तत्वनिरूपणम्, जातिनिरूपणम्, क्रियाविचारः, द्रव्यविचारः, कारकविचारः, सम्बन्धविचारः, गुणविचारः, कार्यकारणभावसिद्धान्तविचारः, वृत्तिविचारः, स्फोटमीमांसा (स्फोटस्वरूपम्), स्फोटसमीक्षा, स्फोटमण्डनम्, ज्ञानमीमांसा, पुरुषार्थविचारः, व्याकरणदर्शनवेदान्तदर्शनयोः स्रोतः, अधिष्ठानस्य स्वरूपम्, सविकल्पनिर्विकल्पयोः भेदः, विवर्तवादः, मोक्षश्चेत्यादिबहूनां दार्शनिकतत्त्वानां निरूपणं विहितम् इति।

**सन्दर्भाः –**


१. सांख्य प्र. भा. प्र अ १ सूत्र १
२. वृहदा. उप. २-४-५
३. छान्दोग्य. उप. ३-४-१
४. पाराशरोपपुराणम् १
५. शुक्लयजु. ३१-१८
६. छन्दोग्य. उ. ३-४-१
७. वृहदा.उप २-५-११
८. शुक्लयजु. १९-१७
९. छन्दोग्य. उप. ०-३०, ६-३-२
१०. वृहदा.उप. ४-१-२
११. ऐ. ब्रा. २-१५
१२. छान्दोग्य ३०-५-३-२
१३. भर्तृहरिः – वाक्यपदीयम् – कारिका १३०
१४. भर्तृहरिः वाक्यपदीयम् का. ११२
१५. छान्दोग्य उप. ६-१-१
१६. नृसि. उप. ७-३
१७. छान्दोग्य उप. ७-२५-२
१८. तारसरोपनिषद् २-१
१९. तैत्ति. उप. शिक्षाध्याये सप्तमोऽनुवाक
२०. प्रश्न.उप. ५-२
२१. मैत्र. उप. ६-२२
२२. भर्तृहरिः-वाक्यपदीयम् का. १३१
२३. पतञ्जलिमहाभाष्यम् पस्पशाह्निकम्
२४. तत्रैव
२५. भर्तृहरिः वाक्यपदीयम् का. ११
२६. तत्रैव
२७. तत्रैव
२८. पतञ्जलिः महाभाष्यम् पस्पशाह्निकम्
२९. तत्रैव
३०. भर्तृहरिः वाक्यपदीयम् का. १६



*विभागाध्यक्षः*

*व्याकरणविभागस्य*

*राष्ट्रियसंस्कृतसंस्थानस्य, जयपुरपरिसरस्य,*

*जयपुरे*

# व्याकरणनये अपभ्रंशस्वरूपविमर्शः

**प्रो. सत्यप्रकाश दुबे**

प्रसन्नविमलवाग्धारया विरचितं पातञ्जलं महाभाष्यं नूनं भावगाम्भीर्योपेतमिति संसूचितं प्रदीपकारेण कैयटेन –'भाष्याब्धिः क्वातिगम्भीरः[१]' इति स्ववचोविन्यासेन। तत्र पस्पशाह्निके शास्त्रप्रयोजनाधिकरणे भगवता पतञ्जलिना 'अथ शब्दानुशासनम्[२]' इति शास्त्रारम्भप्रतिज्ञापरकं वचनमुपस्थाप्य 'लौकिकानां वैदिकानां चे' ति धिया लोकवेदसाधारणतया पाणिनीयशब्दानुशासनस्यैव व्याकरणत्वमूरीकृतम्। तत्रापि शब्दानुशासनप्रस्तावे शब्दापशब्दयोर्मध्ये शब्दोपदेशः कर्तव्यः आहोस्विदपशब्दोपदेशः आहोस्विदुभयोपदेश इत्येवंविधमूहापोहपूर्वकमेतन्निर्धारितं यत् शब्दोपदेशः कर्तव्यः अपशब्दापेक्षयाऽस्य लघीयस्त्वात्।

अत्रेयं शङ्का जागर्ति यदपशब्दरूपेण प्रथिताः गावीगोण्यादयः कथमपशब्दाः? किं सर्वत्रैतेऽपशब्दाः न सन्ति अर्थावबोधनाय समर्था इत्येवंविधविचिकित्सायां सत्यामपभ्रंशस्वरूपनिर्णयाय तेषामर्थावबोधायाचार्यैः बहुशः चिन्तनं विहितम्। वाक्यपदीयकारः भर्तृहरिरपभ्रंशरूपाणां वाङ्मलानां विशुद्ध्यर्थमुपस्थापयति कारिकाम्–

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्॥[३]**

अयमर्थः गौरिति प्रयोगेच्छायां सत्यां यः व्याकरणसम्मतप्रकृतिप्रत्ययादिसंस्कारहीनः तत्रार्थे साधुत्वेनाननुशिष्टः गावी गोण्यादिः शब्दः प्रयुज्यते तं विशिष्टार्थनिवेशिनं प्रयुज्यमानं गावी गोण्यादिकं शब्दमपभ्रंशपदवाच्यमिच्छन्ति। अर्थान्तरे तु गोण्यादिशब्दः साधुरेव। तद्यथा – गौरियं गावी सास्नादिमान्। अथवा आवपनेऽर्थे गोणीशब्दः साधुरिति। अत्र विचारिते सति अपभ्रंशविषयकास्त्रयः मानदण्डाः दृष्टिपथमायान्ति –

१. साधुशब्दस्य प्रयोगेच्छा।

२. प्रयुक्तस्य शब्दस्य संस्कारहीनता।

३. साधुशब्दस्यार्थप्रत्यायनाय तस्य प्रयोगः।

प्रथमः तावत् 'साधुशब्दप्रयोगेच्छा'। एतेन कथनेन सिद्धमिदं यद् विकृतिरूपतामापन्नस्यापभ्रंशस्य

प्रथमं रूपं शब्द एव। वैयाकरणानां त्वेष सिद्धान्तः यन्नास्ति कश्चिदेवंविधोऽपशब्दः यस्य मौलिकःस्वरूपःन भवेत् कश्चित् साधुशब्दः। प्रमाणं चात्र –'शब्दप्रकृतिरपभ्रंशः' इति सङ्ग्रहकारः। नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चित् विद्यते। सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृतिः। प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते। एतेनेदं ध्वन्यते यत् साधुशब्दैरेवापभ्रंशानां विकास ऐतिहासिकक्रमे जात इति व्याडिप्रभृतिप्रमुखवैयाकरणानां मतम्।

अत्रेयं जिज्ञासा भवति यदनादौ संसारे शब्दापशब्दयोरुभयोरपि बीजाङ्कुरवदनादित्वेन कः कस्य प्रकृतिरिति विनिगमनाविरहात्। किन्तु प्रकृतिविरहितोऽपभ्रंशो नाम कश्चित् स्वतन्त्र एव शब्दः विद्यते इति न शब्दापशब्दयोरुभयोरनादित्वे समानेऽपि वेदशब्दानां स्वरूपतो नित्यत्वानादित्वाभ्युपगमात् अपभ्रंशानाञ्च प्रवाहानादित्वस्यैव सत्वादित्यम्बाकर्त्रीकारः। अत्रापि देशकालभेदेन प्रातिकूल्यदर्शनात् प्रवाहानादित्वमपि नास्त्यपभ्रंशानाम्। साधुशब्दस्य प्रयोगेच्छायां सत्यामेषः शब्दः प्रयुक्त इति कथमवगन्तव्यम्?

अत्र वृषभदेवः –तच्छब्दप्रयुयुक्षुः कथमवगम्यते इति चेत् तदवयवानामवगमदर्शनात् तत्कार्यस्य च तदर्थप्रत्यायनस्य तत्र दर्शनात्।[४]

एतदेवास्ति तत्त्वं यदैतिहासिकभाषाविज्ञाने भाषाणामानुवंशिकसम्बन्धनिर्धारणाय स्वीकृतमस्ति। एतेनेदमपि सुस्पष्टं भवति यत् यत्र प्राचीनवैयाकरणाः पदविवेचनधिया व्याकरणशास्त्रे वैशिष्ट्यभाज आसन् तत्र भाषाया ऐतिहासिकविकासक्रमे सम्बन्धावधारणाय तार्किकेषु तथ्येष्वप्यवधानं दधति स्म। वररुच्यादिभिः विरचितानि प्राकृतप्रकाशसदृशानि व्याकरणान्यस्य निदर्शनरूपाणि। यत्र प्राकृतभाषाणां तत्प्रकृतीनां निरूपणं संस्कृतभाषया तुलनात्मकदृशा विहितमस्ति।

अपभ्रंशस्वरूपनिर्धारणायापरः मानदण्डः 'प्रयुक्तस्य शब्दस्य संस्काराभावः'। अत्र किं नाम संस्कारशब्दस्यार्थ इति जिज्ञासायां प्रकृतिप्रत्ययादिविभागकल्पनया शब्दान्वाख्यानम्। यथाहि –

**तस्मान्निबध्यते शिष्टैर्व्याकरणविषया स्मृतिः।**[५]
**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः॥**[६]

व्याकरणशास्त्रं शब्दापशब्दयोरुभयोराहोस्विदपशब्दानामन्वाख्यानापेक्षया लाघवार्थमिष्टबोधनार्थं साधूनामेव शब्दानामन्वाख्यानं करोति। यथाहि महाभाष्यकारः पस्पशाह्निके –किं पुनरत्र ज्यायः लघुत्वाच्छब्दोपदेशः लघीयाञ्छब्दोपदेशो गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा 'गौः' इत्यस्य गावी, गोणी, गोता, गोपोतलिका इत्येवमादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति[७]। कथमिष्टान्वाख्यानमित्यत्र दीपिकाकारः –यथाम्नाये शब्दानां स धर्म एवमेषामपि धर्मार्थत्वादिदमुच्यते इष्टान्वाख्यानमिति[८]।

एतेनेदं भवति सुस्पष्टं यत् व्याकरणदृष्टसंस्कारहीनः शब्दोऽपभ्रंश एव। यतोहि न हि शिष्टसमाचारप्रसिद्धेरन्यदेवं प्रकारेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते –शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते

स्मृतिरिति वाक्यपदीयकार:। शिष्टानां त्विदमेव वैशिष्ट्यं यत् ते प्रकृतिप्रत्ययादिविवेचनेन संस्कारद्वारा साधूनेव शब्दान् व्यवस्थापयन्ति नासाधून्। यथाहि –

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**
**अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि[९]॥**

पश्यामो वयम् यत् कश्चित् साधुशब्द: विकृतिभावमापन्न: अन्यस्य साधुशब्दस्य सरूपो भवति। उदाहरणत: 'गौ' शब्द: विकृत: सन् 'गोणी' जात: आवपनार्थस्य 'गोणी' शब्दस्य सरूप:।

सरूपयो: साध्वपभ्रंशरूपयो: शब्दयो: सविवेकस्वरूपनिर्धारणाय तृतीयोऽस्ति मानदण्ड: साधुशब्दस्यार्थप्रत्यायनाय तस्य प्रयोग:॥

अयमाशय: साध्वरपभ्रंशयोश्च व्यवस्था शब्दस्वरूपमात्रे आश्रिता नास्ति। उदाहरणत: 'अस्व' शब्द: 'घोटक:' इत्यर्थेऽसाधुरपभ्रंशो वा किन्तु 'स्व' विहीने अर्थात् निर्धने अर्थे तदेव साधुरस्ति। एवमेव 'गोणी' शब्द: आवपनेऽर्थे साधु: किन्तु 'गौ:' इत्यर्थेऽपभ्रंश:। अत: शब्दापशब्दयो: स्वरूपनिर्धारणायोभयोरर्थ-साम्यमावश्यकम्। यथाहि भर्तृहरि: –

**अस्वगोण्यादय: शब्दा: साधवो विषयान्तरे।**
**निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम्[१०]॥**

नानादिरपभ्रंश: –अपभ्रंश अनादिर्नेति वैयाकरणानां नैयायिकानां मीमांसकानां चेति मतम्। गौरिति शब्दापेक्षया गावी, गोणी इत्यादयोऽसाधव अपभ्रंशा: वा। भर्तृहरिणा 'गौरिति प्रयुयुक्षिते' इत्यनेनैवापभ्रंशानामनादिताया: प्रतिषेध: कृत इति।

नाप्रकृतिरपभ्रंश: स्वतन्त्र: कश्चिद् विद्यते, सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृति:[११]। सङ्ग्रहकारो व्याडिरपि 'शब्दप्रकृतिरपभ्रंश:' वचनेनापभ्रंशानामनादितां फलत: स्वतन्त्रतां च प्रतिषिध्य शब्दस्यैव प्रकृतित्वं साधयति। मीमांसासूत्रकृत: जैमिनेराचार्यस्यापीदमेवाभिमतम् –शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम्[१२]। अयमाशय: – शब्द: प्रयत्नजन्य: तत्रोच्चारयितु: प्रमाद एवापभ्रंशस्य कारणम्। शाबरभाष्यकृता सूत्रस्यास्य व्याख्यानं कुर्वतेदं स्पष्टीकृतं यत् यथा शुष्के पतिष्यामीति कर्दमे पतति, सकृदुपस्प्रक्ष्यामीति द्विरुपस्पृशति। ततोऽपराधात् प्रवृत्ता गाव्यादयो भवेयु:, न नियोगतोऽविच्छिन्नपारम्पर्या एवेति[१३]। साधुशब्दप्रयोगेच्छायां सत्यां पुरुषापराधादशक्तयाऽनवधानतया वा उच्चारितोऽपभ्रंश: कथमनादिरूप:? 'शब्दप्रकृतिरपभ्रंश:' इति सङ्ग्रहकारस्य मतं समर्थयन् अपभ्रंशस्यानादिताया: प्रतिषेधेऽपरामप्युक्तिमुपस्थापयति हेलाराज:। तन्मते एकैकस्य शब्दस्य बहवोऽपभ्रंशा: उपलभ्यन्ते। तथा च भेदस्याभेदपूर्वकत्वात् पुरुषविकल्पा नियमेनानन्तत्वाद् अपशब्दानामभिन्नशब्दपूर्वकत्वमेव निश्चीयत इति शब्दप्रकृतिरपभ्रंश: सिद्ध:[१४]। महाभाष्यकृता तु पूर्वमेवेदं सविस्तरं प्रतिपादितम्। तद्यथा 'गौरित्यस्य शब्दस्य गावी गोणी'त्यादिभि: वचनै: शब्दपूर्वका एवापभ्रंशा इति साधितम्। वाक्यपदीयकृन्मतेऽपभ्रंशस्य सादिता ऐतिह्यप्रमाणेनापि सिद्धा भवति। स स्वोपज्ञवृत्तौ स्पष्टयति

यत् श्रूयते पुराकल्पे स्वशरीरज्योतिषां मनुष्याणां यथैवानृतादिभिरसङ्कीर्णा वागासीत् तथा सर्वैरपभ्रंशैः सा तु सङ्कीर्यमाणा पूर्वदोषाभ्यासभावनानुषङ्गात् कालेन प्रकृतिरिव तेषां प्रयोक्तॄणां रूढिमुपगता[१५]। पुराकल्पे यथा नृवागनृतादिदोषरहिता तथैवापभ्रंशरहिताप्यासीदित्याशयः। जयन्तभट्टेनाप्यपशब्दानामनादितायाः प्रतिषेधः कृतः। एतेनेदं सुस्पष्टं यन्न केवलं वैयाकरणा अपितु मीमांसकाः नैयायिकाश्चापभ्रंशानामनादितां नैव स्वीकुर्वन्ति।

सर्वमेतत् पर्यालोच्येदं प्रतिपादयितुं शक्यते यदपभ्रंशता नाऽनादिरूपा। केषाञ्चित् शब्दानां मौलिके स्वरूपे विकृते सति तेऽपभ्रष्टाः जाताः। अत्रेयं जिज्ञासा स्वाभाविकी यदस्यां परिस्थितौ शब्दापशब्दयोः व्यावहारिकः विवेकः कथं जागृयात् पशुविशेषेऽर्थे प्रयुज्यमानः गौः गावी गोणी गोतादिषु गौरेव शब्दः न गाव्यादयः इत्यत्र किं मानम्? किञ्च गौः उस्रा धेनुरितिवत् गाव्यादयोऽपभ्रंशा अपि कथं न गौरित्यादीनां पर्यायभूताः? वाक्यपदीयकारेणात्र व्याकरणशास्त्रसम्बन्धिनी दृष्टिः स्पष्टीकृता स्वोपज्ञवृत्तौ। यथाहि –

अथ कस्मादेते गोशब्दस्य गाव्यादयः पर्याया न विज्ञायन्ते? न हि शिष्टसमाचारप्रसिद्धेरन्यदेवं प्रकारेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते[१६]। वैयाकरणशिष्टपरम्परा शब्दापशब्दविषये यथा आचरति तदस्मभ्यं प्रमाणम्। यथाहि 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रभाष्ये –के पुनः शिष्टाः? वैयाकरणाः। कुत एतत्? शास्त्रपूर्विका हि शिष्टिः वैयाकरणाश्च शास्त्रज्ञाः। यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम् तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। एवन्तर्हि निवासतश्चाचारतश्च। स चाचार आर्यावर्ते एव।.....कथं पुनरष्टाध्याय्या शिष्टाः शक्याः विज्ञातुम्? अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं ये वाऽस्यां विहिताः शब्दास्तान् प्रयुञ्जानम्[१७]। ते लाघवार्थमिष्टप्रतिपत्त्यर्थं शब्दानामेवानुशासनं कुर्वन्ति नापशब्दानाम्। इत्थं व्याकरणप्रोक्तसंस्कारानुगताः शब्दाः तद्–व्यतिरिक्ताः असंस्कृताः अपशब्दाः। भर्तृहरिरपि न केवलं साध्वसाधुशब्दव्यवस्थामेवापितु अनुमानेन शिष्टजनानां परिज्ञानमपि व्याकरणमुखेन स्वीकृतवान्। यथाहि –

**शब्दार्थसम्बन्धनिमित्ततत्त्वं वाच्याविशेषेऽपि च साध्वसाधून्।**
**साधुप्रयोगानुमितांश्च शिष्टान् न वेद यो व्याकरणं न वेद[१८]॥**

गावीत्यादयो शब्दाः वैयाकरणानां स्मृतिपरम्परायामव्यवहृतत्वादपभ्रंशाः –

**न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।**
**ते यतः स्मृतिमात्रेण तस्मात् साक्षादवाचकाः[१९]॥**

साधुशब्दानामिवासाधुभिरपभ्रंशैरपि वाग्व्यवहारः लोके प्रत्यक्षसिद्धः। अतोऽत्र स्वाभाविकी जिज्ञासा यत् साधुशब्दानामिवासाधुष्वपि शब्देषु वाचकता स्वीकरणीया न वेति? वैयाकरणास्त्वत्रार्थप्रतीत्याधारेण शब्दार्थयोः स्वाभाविकं नित्यसम्बन्धं स्वीकुर्वन्ति। लोके अर्थप्रत्यायनायापभ्रंशानां कृतः प्रयोगः तेषामर्थवत्तायाः साधकः। निश्चितोऽपशब्दः निश्चितमेवार्थप्रत्यायकः। एतेन साधुशब्दवदसाधूनामपि स्वेन स्वेनार्थेन सह स्वाभाविकः सम्बन्धः दृश्यते। फलतः असाधुष्वपि साधुवदिव समानवाचकताशक्तिः स्वीकरणीया। अत्र

वाक्यपदीयकारेण स्थितिभेदेन व्यवस्था निर्धारिता यत् शब्दज्ञेभ्यः अपभ्रंशैः जायमानः अर्थावबोधः 'अनुमानपक्षरूपः'। अनुमानपक्षेण तु सम्बन्धिसम्बन्धादक्षिनिकोचादिवदपभ्रंशाः प्रत्ययविशेषेष्वङ्गभावमुपगच्छन्ति[२०]।

वृषभदेवः स्पष्टयति यत् यथा लिङ्गं स्वज्ञानव्यवधानेन लिङ्गिनमनुमापयति यथा वाऽनुमेयज्ञानं सामान्याकारव्यवधानेन स्वलक्षणम्। तथा गोण्यादयः शब्दाः गोशब्दव्यवधाने[२१]। एतेन ज्ञायते यत् शब्देभ्यः अपशब्देभ्यः जायमानेऽर्थबोधे साक्षादर्थावबोधकः शब्द एवास्ति अपभ्रंशास्तु परम्परासम्बन्धेनैवार्थप्रत्यायकाः-

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।**
**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः[२२]॥**

निदर्शनं चात्र -

**अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते।**
**अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः॥**
**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते[२३]॥**

तदितरेभ्यः अपभ्रंशैः समुत्पन्नः अर्थावबोधः प्रत्यक्षपक्षरूपः।

अयमाशयः येऽशास्त्रज्ञाः साधुशब्दज्ञानविरहिताः तेऽर्थप्रत्यायनायापभ्रंशान् व्यवहरन्ति। केनापि शास्त्रज्ञेन साधुशब्दप्रयोगदशायामेते संशयापन्ना भवन्ति तेषामेतेभ्य अवाचकत्वात्। एतेन साधुशब्दव्यवहारेणार्थविषयके सन्देहेऽसाधुशब्देन च तन्निवृत्तिरेवात्र प्रमाणं यदेवंविधेभ्य अपभ्रंशा एव साक्षादर्थावबोधकाः। यथाहि -

**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।**
**प्रसिद्धिमागता येषु तेषां साधुरवाचकाः[२४]॥**

नैयायिकानामप्येषैव दृष्टिः। यथाहि न्यायमञ्जरीकारो जयन्तभट्टः -गवादय एव वाचकशक्तेराश्रयो न गव्यादयः।.....किमक्षिनिकोचादीनामन्त्यजजनपदवाचां नास्ति शक्तिः? ओमित्युच्यते। कथं तर्हि तेभ्योऽर्थप्रतिपत्तिः? नैसर्गिकी तेषां शक्तिर्नास्तीति ब्रूमः। तत्स्वरूपस्याव्यवस्थितत्वेन निसर्गसिद्धिकशक्तिपात्रतानुपपत्तेः। प्रतिपत्तिस्तु स्वकृतसमयमात्रनिबन्धना तेभ्यः। नैयायिकानां क्व वा न समयः प्रतिपत्युपायः? सत्यम्, स त्वीश्वरप्रणीतः प्रथमसर्गात् प्रभृति प्रवृत्तो मीमांसाऽभ्युपगतनैसर्गिकशक्तिसोदर्य एव न मादृशरचितपरिमितविषयसमयमानः। स च गवादिष्वेव प्राप्तप्रतिष्ठो न गाव्यादिषु। ते तु वर्णसारूप्यच्छायया गवादिशब्दस्मृतिमादधाना तदर्थप्रतिपत्तिहेतुतामुपगच्छन्तीति[२५]।

नापभ्रंशाः साक्षादर्थवाचका इति मीमांसकाः। तन्मते प्रत्ययमात्रदर्शनादभ्युपगम्यते, सादृश्यात् साधुशब्देऽप्यवगते प्रत्ययोऽवकल्पते। शक्तिभ्रमरूपामेनां प्रक्रियां स्पष्टयति मीमांसाभाष्यकारः शबरस्वामी। तन्मते -गोशब्दमुच्चारयितुकामेन केनचिदशक्त्या गावीत्युच्चारितम्। अपरेण ज्ञातं सास्नादिमानस्य विवक्षितोऽर्थः।

तदर्थं गौः इत्युच्चारयितुकामो गावीत्युच्चारयति। ततः शिक्षित्वाऽपरेऽपि सास्नादिमतिः विवक्षिते गावीत्युच्चारयन्ति। तेन गाव्यादिभ्यः सास्नादिमानवगम्यते[२६]। इत्थं गावीशब्देनाज्ञानिषु जाते अर्थबोधे नास्ति सम्बन्धः शक्तिः वा कारणमपितु शक्तिभ्रम एवात्र कारणम्।

**अत्र कौण्डभट्ट नागेशभट्टाभिमतम् -**

वैयाकरणसिद्धान्तमञ्जूषाकारा आचार्यश्रीनागेशा भूषणसारकाराः कौण्डभट्टाश्चापभ्रंशानां वाचकत्वं स्वीकुर्वन्ति -सा च शक्तिः साधुष्विवापभ्रंशेष्वपि, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्[२७]। स्वमतपोषणधिया आचार्यो नागेशः 'समानायामर्थावगतौ शब्देन चापशब्देन चे'ति महाभाष्यकारीयं मतमुपस्थापयति। कौण्डभट्टोऽपि 'असाधुरनुमानेन वाचकः कैश्चिदिष्यते' अत्रत्येन 'कैश्चित्' पदेन नैयायिकमीमांसकादीन् स्वीकरोति। किन्तु सुविचारिते सति एतन्निवेदयितुं शक्यते यत् भाष्यकृतः नास्ति किमपि तथाविधं वचः येनापभ्रंशानां साक्षात् वाचकत्वं व्याकरणसिद्धान्ते सिद्धतां प्राप्नोति। महाभाष्यदीपिकायामेनमेव विचारं भर्तृहरिरपि समर्थयति -अपभ्रंशा ये ते त्वर्थस्य प्रत्यायका न भवन्ति एष एव पक्षो नैतेऽर्थं प्रत्याययन्तीति[२८]।

फलतः शब्दप्रकृतिरपभ्रंशः अतः शब्देनैवार्थोऽभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति वैयाकरणसिद्धान्त इति।

**सन्दर्भाः -**


१. व्याकरणमहाभाष्यम् पस्पशाह्निकस्य प्रदीपव्याख्या श्लोकः ६
२. व्याकरणमहाभाष्यम् पस्पशाह्निकारम्भः
३. वाक्यपदीयम् १/१४७
४. वाक्यपदीयम् १/१४७ वृषभदेवकृतपद्धतिव्याख्या
५. वाक्यपदीयम् १/२९
६. वाक्यपदीयम् १/३३
७. महाभाष्यम् पस्पशाह्निकम्
८. अत्रत्या महाभाष्यदीपिका
९. ऋग्वेदः १०/७१/२
१०. वाक्यपदीयम् १/१४०
११. वाक्यपदीयम् १/१४७ स्वोपज्ञवृत्तिः
१२. मीमांसासूत्रम् १/३/२५
१३. मीमांसासूत्रम् १/३/२५, शाबरभाष्यम्
१४. वाक्यपदीयम् ३/३/३० हेलाराजव्याख्या

१५. वाक्यपदीयम् १/१५४ कारिकास्थम्
१६. तदेव १/१५०
१७. अष्टाध्यायी ६/३/०९ सूत्रस्थभाष्यम्
१८. वाक्यपदीयम् १/१२ स्वोपज्ञवृत्तिः
१९. तदेव १/१५०
२०. तदेव १/१४६ स्वोपज्ञवृत्तिः
२१. तदेव पद्धतिः
२२. तदेव १/१४९
२३. तदेव १/१५२-१५३
२४. तदेव १/१५३
२५. न्यायमञ्जरी भाग - १, पृ. ३८८
२६. १/३/२८ सूत्रस्थं शाबरभाष्यम्
२७. वैयाकरणसिद्धान्तमञ्जूषा
२८. अत्रत्या महाभाष्यदीपिका

*आचार्योऽध्यक्षश्च संस्कृतविभागः,*
*जोधपुरविश्वविद्यालयः*
*जोधपुरम्*

**अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम्।**
**अव्ययेभ्योऽपि ये चार्थान्निष्कर्षन्ति सहस्रशः।।**

# 'लिम्पतीव' इत्यादि तिङ्डन्त से बोध्य क्रियारूप धर्म की उत्प्रेक्षा के स्थल में त्रिविध शाब्दबोध

**प्रो. रामकुमार शर्मा**

पण्डितराज जगन्नाथ ने रसगंगाधर के द्वितीय आनन में उत्प्रेक्षा के दो लक्षण बनाये हैं। प्रथम लक्षण के अनुसार किसी पदार्थ की अन्य पदार्थ के साथ तादात्म्य (अभेद) से संभावना उत्प्रेक्षा है। यहाँ उत्प्रेक्षा का निमित्त रमणीय साधारण धर्म होता है। द्वितीय लक्षण के अनुसार किसी पदार्थ में अन्य पदार्थ के धर्म की समवाय आदि सम्बन्ध से संभावना उत्प्रेक्षा है। यहाँ उत्प्रेक्षा का निमित्त समानाधिकरण रमणीय धर्म होता है[१]। प्रथम उत्प्रेक्षा धर्मी में अन्य धर्मी के अभेद की सम्भावना है और द्वितीय किसी धर्मी में अन्य धर्मी के धर्म की। धर्मी की उत्प्रेक्षा के उदाहरण के रूप में यह गद्य है – '**तनयमैनाकगवेषणजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी**'[२]। अर्थात् यमुना उन भगवती भागीरथी की सखी हैं, जो भगवती भागीरथी मानों समुद्र में छिपे अपने पुत्र मैनाक को खोजने के लिए समुद्र के उदर में प्रवेशित, हिमालय पर्वत की भुजा (बाहु) हैं। यहाँ भागीरथी में हिमालय के भुज की उत्प्रेक्षा अभेद (तादात्म्य) सम्बन्ध से है। हिमगिरि के भुज और भागीरथी में शुक्लता, शैत्य तथा दीर्घत्व आदि साधारण धर्म उत्प्रेक्षा के निमित्त हैं। शुक्लता आदि की साधारण धर्मता का उपपादन विशेष रूप से रसगंगाधर में द्रष्टव्य है। धर्मोत्प्रेक्षा के भी अनेक उदाहरण दिए गए हैं। उनमें 'लिम्पति' इत्यादिरूप तिङ्डन्त से बोध्य क्रियारूप धर्म की उत्प्रेक्षा के प्रसिद्ध उदाहरण में शाब्द बोध की प्रक्रिया का विचार यहाँ विशेषरूप से किया जा रहा है।

क्रियोत्प्रेक्षा के लिए अन्धकार का वर्णन करने वाला मृच्छकटिक प्रकरण का यह श्लोक प्रसिद्ध है–

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥**[३]

अर्थात् तम (अन्धकार) मानों अंगों को लेप रहा है, आकाश मानों काजल की वर्षा कर रहा है। आँख उसी प्रकार विफल हो रही है जैसे असत् पुरुष की सेवा। इस पद्य के पूर्वार्ध में उत्प्रेक्षा है और

उत्तरार्ध में उपमा। पण्डितराज के अनुसार अंगों को व्याप्त करनेवाले तम में लेपनकर्तृत्वरूप धर्म की उत्प्रेक्षा हैं[४]। यह धर्म की उत्प्रेक्षा है। यद्यपि तम में लेपनकर्तृत्व वस्तुतः नहीं है तथापि वह तम में समवाय सम्बन्ध से कवि के द्वारा संभावित है। उत्प्रेक्षा का निमित्त मषी आदि द्रवपदार्थ से लेपन के कर्त्ता किसी व्यक्ति में तथा व्यापन कर्ता तम में रहने वाला श्यामीकरण (काला करना) है। लेपनकर्ता मषी आदि कृष्ण द्रव से भित्ति आदि को काला करता है और व्यापनकर्त्ता तम अंगो को। इसी प्रकार नभ में अंजनवर्षण के कर्तृत्व की उत्प्रेक्षा है। इस प्रकार उत्प्रेक्षा कहीं अभेद सम्बन्ध से और कहीं समवाय आदि भेद सम्बन्ध से होती है। किन्तु मम्मट आदि सर्वत्र अभेद से ही उत्प्रेक्षा मानते हैं। काव्यप्रकाश में कहा गया है कि उक्त श्लोक में तम के व्यापन तथा अधःप्रसरण में लेपन तथा वर्षण की उत्प्रेक्षा अभेद (तादात्म्य) सम्बन्ध से ही हैं[५]। इस प्रकार उत्प्रेक्षा सर्वत्र अभेद से मानी जाए या अन्य सम्बन्ध से भी?- इस के निरूपण के प्रसंग में रसगङ्गाधर आदि में 'लिम्पतीव' इत्यादि तिङ्न्त से बोध्य क्रियारूप धर्म के स्थल में त्रिविध शाब्दबोध का भी संकेत किया गया है। इसी का संक्षेप में विवेचन यहाँ किया जा रहा है। विचारणीय बिन्दु ये हैं –

१. 'लिम्पतीव' इत्यादि स्थल में मम्मट के अनुसार क्रियाविशेष्यक शाब्द बोध।

२. 'लिम्पतीव' इत्यादि स्थल में पण्डितराज के अनुसार द्विविध प्रथमान्तार्थमुख्यविशेष्यक शाब्द बोध।

अब क्रमशः इन पर विचार किया जा रहा है –

**१. 'लिम्पतीव' इत्यादि स्थल में मम्मट के अनुसार क्रियाविशेष्यक शाब्द बोध।**

विभागजविभागविषयेऽपि नैयायिकवैशेषिकयोर्मतद्वैतम्। तत्र वैशेषिक नये विभागस्त्रिविधः १. अन्यतरकर्मजः २. उभयकर्मजः ३. विभागजश्चेति। विभागजो विभागो द्विविधो भवति - कारणमात्रविभागजः कारणाकारण विभाग एको यथा कपालद्वयविभागात् कपालाकाशविभागः। कारणाकारण विभागजश्च कार्याकार्यविभागो द्वितीयो यथा - अङ्गुलितरूविभागाद् हस्ततरुविभाग इति। नैयायिकास्तु विभागाज्जायमानं विभागान्तरं न मन्यन्ते। नहि कपालद्वयविभागो भिन्नो भिन्नश्च कपालाकाशविभागः। एकस्मिन्नेव देशे कपालाकाशयोरवस्थिततत्वेन एकस्यैव विभागस्य आश्रयभेदेन भेदात्। मूर्त्तानामेव समानदेशवृत्तित्वं विरुद्ध्यते। आकाशस्य तु सर्वव्यापकस्यामूर्त्तस्य सर्वदेशवृत्तित्वं न व्याहन्यते।

**उभयोः साम्यम् -**

शास्त्राणां तदेव शास्त्रत्वं यद् अन्याप्रतिपादितप्रतिपादकत्वम्, किञ्चिदपूर्वकथनम्। अन्यथा शास्त्ररचनावैफल्यम्। अतो विभिन्नमुनि प्रवर्त्तकाद वैभिन्यानि कियन्ति परमावश्यकसत्त्वानि प्रादर्शिषतामुयोः किन्तु सतां चापि परस्परं भिन्ने अमूप्रागास्तां समानतन्त्रतया प्रसिद्धिं गते। प्रतितन्त्रसिद्धान्तं लक्षयतः सूत्रस्य भाष्ये वात्स्यायनः प्रतिपादयाञ्चक्रे -पुरुष कर्मादिनिमित्तो भूतसर्गः, कर्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते उत्पन्नं निरुद्धयत् इति योगानाम् इति अनेनाभिप्रैति यदमी सिद्धान्ता नैयायिकानां वैशेषिकाणां चाप्यभिमता एवेति।

षट्पदार्थाः सप्तपदार्था वा वैशेषिकाणां षोडशपदार्थाश्च नैयायिकानामिति तत्कृतो विरोधोऽपि न मन्तव्यः, षट्त्सु एव तेषां नव्यैरन्तर्भावस्य बहुत्र प्रदर्शनात्। शब्दानित्यत्ववादोऽपि समान एवोभयोः। पञ्चानां न्यायावयवानामेव प्रतिज्ञा हेतूदाहरणोपनयनिगमनान्यावयवाः[१८]। इति सूत्रप्रतिपादितानां पर्यायसंज्ञका वैशेषिकाराणामपि प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः पञ्चावयवाः। आत्मनो लिङ्गानि -

इच्छाद्वेषप्रयत्नसुखदु:खज्ञानान्यात्मनो लिङ्गानि[19](न्या.सू.)। प्राणापाननिमेषोन्मेष जीवनमनोगतेन्द्रियान्तरविकाराः सुखदु:खच्छाद्वेष प्रयत्नाश्चात्मनो लिङ्गानि(वै.सू.३.२.४) समानानि। जयन्तभट्टोक्त्या –

**ज्ञातं सम्यगसम्यग् वा यन्मोक्षाय भवाय वा।**
**तत्प्रमेयमिहादिष्टं न प्रमाणार्थमात्रकम्॥ (न्या.)**

अमुया बुद्ध्यते यद् विशिष्टमेव प्रमेयं न्यायेऽभिलक्ष्यते, न तु प्रमाणविषय मात्रमित्यतो द्वादश प्रमेय निरूपकत्वेऽपि न्यायस्य सप्तपदार्थानुक्रमं तदवान्तर विशेषैः प्रमेयबाहुल्यनिरूपकेण वैशेषिकेण सार्कं न परिलक्ष्यते विरोधः कोऽपि प्रमेय कृतोऽपि।

**तदत्यन्तविमोक्षोऽपवर्गः (न्या.सू. १/२२)**
**तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः (वै.सू ५/२/१८)**

इत्यमूभ्यां मोक्षस्वरूपेऽपि समानं मानं तयोः। केचनैकदेशिनो भासर्वज्ञादयो मुक्तावपि सुखसंवेदनं स्वीकुर्वते न वैशेषिकाः किन्तु वात्स्यायनानुसारं वैशेषिकै रेकवाक्यत्वमेवास्मिन् विषयेऽपि।

इत्थं न्यायवैशेषिकदर्शनयोः भेदोऽनयो परिलक्ष्यते यद्यपि तथापि सम्यगनुशीलनं भेदोऽवास्तवः इत्यवगमयति। वैशेषिकाणां मतानुसारे इह जगति तले केवलं सप्तैव पदार्थाः सन्ति। द्रव्यगुणकर्मसामान्यविशेष षट्भावपदार्थाः एकश्च अभावपदार्थः इति। नव्यन्यायेऽपि एतैव सप्तपदार्थाः स्वीकृताः। यतोहि द्रव्यं सकलपदार्थानां आश्रयभूतं भवति। लोके प्रकाशागमनेऽन्धकारस्य नाशस्तथैव ज्ञानोदयेऽज्ञानस्य नाशः। अनेन ज्ञानेनैवात्मनोऽज्ञानमपनीयते। व्यपगते च अज्ञाने असौ सदा तस्य सर्वव्यापकस्य परमेश्वरस्य परमं पदं पश्यति यथा नभसि सूर्यो दृश्यते तथैव तस्य परमेश्वरो दृश्यते यदुक्तं ऋग्वेदे – तद्विष्णोः परमं धाम सदा पश्यन्ति सूर्यः। दिवीव चक्षुराततम् (ऋ.२.२२)

**सन्दर्भाः –**


१. सायणभाष्य (ऋग्वेद)
२. न्यायदर्शने २/२/२
३. न्यायदर्शने वा.भा. – २/२/२ के बाद का भाष्य
४. न्यायदर्शने वा.भा. – २/२/२ के बाद का भाष्य
५. न्यायदर्शने वा.भा. – पृ.६
६. न्यायसूत्रे वात्स्यायन भाष्य – पृ. ९
७. वैशेषिकदर्शन १.१.४
८. प्रशस्तपादभाष्ये पृ.२
९. न्यायसूत्र २.२.३
१०. वै.सू. उपस्कार टीका पृ. १८
११. न्यायसिद्धान्तमुक्तावल्याम् – १/५८
१२. वैशेषिकदर्शन–उपस्कार टीका
१३. वै.द. उपस्कार टीका ७/२/२७
१४. वैशेषिकदर्शन उपस्कार
१५. न्यायदर्शन १.२.४
१६. तार्किकरक्षा
१७. वैशेषिकदर्शने ३.१.५
१८. न्यायसूत्र १.१.३२
१९. न्यायसूत्र १.१/२०



*अध्यक्षा, सर्वदर्शनविभागे,*
*राष्ट्रियसंस्कृतसंस्थानस्य, जयपुरपरिसरस्य, जयपुरे*

# शेखरदृशा अर्थवत्त्वसूत्रविमर्शः

**प्रो. बोधकुमारझाः**

**कौमुद्याम्** - धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्॥

**उदाहरणम्** - अव्युत्पत्तिपक्षे 'घटः 'पटः' इत्यादि। व्युत्पत्तिपक्षे तु बहुपटवः, परमगार्ग्यायणः, शिवभागवतः, इत्यादौ प्रत्ययान्तस्य न प्रातिपदिकत्वम्। (बहुपटु जस्' इत्यस्य, गार्ग्यभगवच्छब्दाभ्यां फगण्विधानेन परम-शिवसहितस्य च तद्धितान्ततदादित्वाभावात् उत्तरसूत्रेण प्रातिपदिकत्वाभावः) इत्यादि।

**प्रत्युदाहरणम्** - अर्थवत् किम् ?'धनं' 'वनमि' त्यादौ प्रतिवर्णं संज्ञा मा भूत्। अधातुरिति किम्? वृत्रम् 'अहन् इति। अप्रत्यय इति किम्? 'हरिषु' इत्यादौ सु-इत्यस्य न प्रातिपदिकत्वम्। प्रत्ययान्त इति किम् ?'रामाभ्याम्' इत्यादौ प्रत्ययान्तस्य न प्रातिपदिकत्वम्।

**विचारबिन्दवः -**

1. सूत्रावतरणम्॥
2. अधातु-अप्रत्ययघटक-नार्थविचारः।
3. प्रत्ययान्ततदादिभिन्न' इत्यर्थलाभप्रकारः।
4. सूत्रार्थः॥
5. प्राचीनमते द्विविधम् अर्थवत्त्वम्।
6. अत्र गौरवदोषः।
7. नागेशसम्मतम् उभयसूत्रसाधारणम् अर्थवत्त्वम्।
8. लक्षणसमन्वयः।
9. एतत्संज्ञा' इत्यत्र समासविचारः।
10. पदकृत्यम्॥
11. नागेशसम्मतस्य अर्थवत्त्वस्य लाभप्रकारः।
12. प्रकृतसूत्रे अर्थवद्ग्रहणस्य सार्थक्यविचारः।
13. 'भाष्यसम्मतदृढतरफलाभावात्'- इत्यस्याशयः।

14. नागेशमते नञ्द्वयघटिते अर्थवत्त्वे एव धातुप्रत्ययान्तपर्युदासस्य सार्थक्यम्।

15. नागेशमते प्रत्ययपर्युदासो व्यर्थः।

16. नागेशस्य उभयसूत्रसाधारणे अर्थवत्त्वे भाष्यकैयटयोः सम्मतिः।

17. अनुवृत्तिसामर्थ्यात्' इत्यनेन सूचना।

18. उभयसूत्रसाधारणे अर्थवत्त्वे फलान्तरम्।

19. प्रत्ययान्तपर्युदासप्रत्याख्याने भाष्यकारस्य हेतुद्वयम्।

20. अर्थवद्ग्रहणस्य फलम्।

*विशेषः।

**1. सूत्रावतरणम्** – इतः पूर्वं दीक्षितेन स्वादिसन्धिः उक्तः। स्वादिविधौ 'प्रातिपदिकात्' इत्यधिकारः। तथाहि प्रातिपदिकज्ञानं विना स्वादिविधायकसूत्रस्य वाक्यार्थबोधाऽसम्भवः। अतः स्वादिविधानात्पूर्वं प्रातिपदिकत्वजिज्ञासाशान्तये प्रथमम् अर्थवत्सूत्रेण प्रातिपदिकसंज्ञामाह।

**2. अधातु-अप्रत्यय-घटकनञर्थविचारः**– अत्र सूत्रे अधातुपदघटकस्य नञः, अप्रत्ययपदघटकस्य नञ्च पर्युदासः (तद्भिन्नः तत्सदृशः) अर्थः, लाघवात् । न च प्रसज्यप्रतिषेधः, तत्स्वीकारे तु असमर्थसमासस्य कल्पना (नञर्थस्य क्रियायामन्वयात्), वाक्यभेदः (विधानवाक्यम्, प्रतिषेधवाक्यञ्चेति), क्रियाध्याहारश्च (भवतिक्रियायाः) कर्तव्यो भवति इति गौरवम्। आरोपितो धातुः इति 'अधातुः' इत्यादेः वाच्योऽर्थः। आरोपस्य भेदसादृश्ये सत्येव सम्भवेन 'धातुभिन्नमित्यादि तु फलितोऽर्थः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति पुंस्त्वम्॥

**3. प्रत्ययान्ततदादिभिन्न'इत्यर्थलाभप्रकारः** – अप्रत्ययघटकप्रत्ययपदे 'प्रत्ययग्रहणे यस्माद्विहितदादेस्तदन्तस्य ग्रहणम्'इति परिभाषया तदादिविशेष्यकतदन्तविधिः। तेन प्रत्ययान्ततदादिभिन्नम् इत्यर्थलाभः। अत्र प्रत्ययमुद्दिश्य. संज्ञाविधानं नास्ति अतः 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति न तदन्तविधेः निषेधः। अत्र उद्देश्यता अर्थवति, न तु प्रत्यये इति बोध्यम्॥

**4. सूत्रार्थः** – तथाहि, धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्ततदादि (अन्ते प्रत्ययः, आदौ च तस्य प्रकृतिश्च भवेत्तादृशः समुदायः) भिन्नं च अर्थवच्छब्दस्वरूपं (अर्थवदिति नपुंसकनिर्देशस्यानुगुणं 'शब्दस्वरूपम् इति विशेष्यमद्ध्याह्रियते) प्रातिपदिकसंज्ञं भवति- इत्यर्थः॥

**5. प्राचीनमते द्विविधम् अर्थवत्त्वम्**– अत्र सूत्रे 'वृत्त्या अर्थविषयकबोधजनकत्वम् अर्थवत्त्वम् इति। अत एव 'हरिषु'इत्यादौ प्रत्ययस्य तादृशार्थवत्त्वात् प्राप्तस्य प्रातिपदिकत्वस्य वारणाय अर्थवत्सूत्रे पाणिनिना 'अप्रत्ययः' इति पर्युदासः कृतः। 'कृत्तद्धित इति सूत्रे च एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वरूपमर्थवत्त्वम्' इति। अत एवोक्तं भाष्ये 'कृत्तद्धितान्तञ्चैवार्थवन्न केवलाः कृतस्तद्धिता वा इति। एकार्थीभावश्च कृत्तद्धितसमासैकशेषधातुरूपासु पञ्चसु वृत्तिषु शक्तिविशेषः।

**6. अत्र गौरवदोषः** – प्राचीनमते प्रत्ययपर्युदास-शब्दाधिकाराश्रयण- (अत्र पक्षे अर्थभेदेन शब्दभेदः) अर्थवत्त्वद्वयाभ्युपगमादिगौरवम् (अर्थवत्त्वद्वये अर्थवत्पदस्य शक्तिद्वयम्, उपस्थितिद्वयम्, शाब्दबोधद्वयम् च)।

**7. नागेशसम्मतम् उभयसूत्रसाधारणम् अर्थवत्त्वम्** – सूत्रद्वयसाधारणम् एकमेव अर्थवत्त्वम् । तच्च 'एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वरूपम् ॥

**8. नागेशमते लाघवम्** – तथा चैतन्मते यद्यपि अर्थवत्त्वं स्वरूपतो गुरुभूतम्, तथापि अर्थवत्पदनिष्ठा एकैव शक्तिः उभयसूत्रशाब्दबोधप्रयोजिका, उपस्थितिरपि एकैव, अर्थाधिकारश्चेति न अर्थभेदेन शब्दभेदः। एतच्च न केवलप्रत्यये, प्रत्ययस्य विभक्तीतर-प्रकृति-समभिव्याहारापेक्षयैव लोके अर्थविषयकबोधजनकत्वात्। अतः 'हरिषु' इत्यादौ सोः प्रातिपदिकत्वाऽप्राप्त्या तद्वारणाय 'अप्रत्यय' इति पर्युदासो न कर्त्तव्य इति लाघवम्।

**9. लक्षणसमन्वयः** – यस्यार्थवत्त्वं चिकीर्षितम् तदेतत्पदेन ग्राह्यम्। तथा च एतस्य = रामशब्दादेः, या संज्ञा = प्रातिपदिकसंज्ञा, तत्फलभूता विभक्तिः = उत्पत्स्यमाना स्वादिविभक्तिः, तदितरो = घटादिः, तत्समभिव्याहारानपेक्षया एव लोके 'राम' इत्यादितो दशरथापत्याद्यर्थविषयकबोधस्य जननात् रामादेः अर्थवत्त्वम्। यद्यपि स्वादिप्रकृतिमात्रस्य रामादेः न बोधजनकत्वम्, तथापि सम्भावितन्तत् तत्रास्त्येवेति न लक्षणस्यानुपपत्तिः।

**10. 'एतत्संज्ञा' इत्यत्र समासविचारः** – अत्र एतस्य संज्ञेति षष्ठीतत्पुरुषः। तेन 'अधातुरिति किम्? अपि काकः श्येनायते' इति प्रत्युदाहरणं संगच्छते। तत्पुरुषपक्षे एतत्पदेन अर्थवत्त्वेन चिकीर्षितस्य ग्रहणम्, तेन एतत्संज्ञापदेन अर्थवति विद्यमानायाः संज्ञायाः ग्रहणम्। तथा च एतत्पदेन श्येनायतेघटक 'श्येनाय' इत्यस्य ग्रहणम्। तस्मिन् विद्यमाना संज्ञा धातुसंज्ञा, तत्फलभूता विभक्तिः 'ते' विभक्तिः, तदितरसमभिव्याहारानपेक्षया एव लोके अर्थबोधजनकत्वात् प्राप्तायाः संज्ञायाः वारणम् अधातुग्रहणेन भवति। कर्मधारयपक्षे तु एतत्संज्ञा इत्यनेन चिकीर्षितप्रातिपदिकसंज्ञाया एव ग्रहणात् तादृशविभक्तीतर 'ते' समभिव्याहारापेक्षयैव लोके 'श्येनाय' इत्यस्य अर्थबोधजनकत्वात् अर्थवत्त्वाभावेनैव संज्ञायाः वारणम्। तदर्थम् अधातुग्रहणमनावश्यकं स्यात्॥

**11. पदकृत्यम्** – (क) एतत्संज्ञाफलभूतेति । विभक्त्याः विशेषणत्वेन एतदनुपादाने 'ओदनं पचति' घटकस्य 'ओदनं पच' इति समुदायस्य 'ति' विभक्तीतरानपेक्षयैव अर्थबोधजनकत्वात् प्रातिपदिकत्वाऽऽपत्तिः। उपादाने च संज्ञापदेन चिकीर्षित-प्रातिपदिकसंज्ञाया एव ग्रहणात् तत्फलभूतविभक्तीतर 'ति' प्रत्ययापेक्षयैव लोके अर्थबोधजनकत्वात् अर्थवत्त्वाभावात् प्रातिपदिकत्वाभावः।

(ख) एतत्संज्ञाफलभूतविभक्तिसमभिव्याहारापेक्षया लोके अर्थबोधजनकत्वम् इति स्थाने नद्वयोपादानम् (इतर + अनपेक्षया) किमर्थम् ? एतदभावे 'दधि' 'मधु' इत्यादौ प्रातिपदिकत्वानापत्तिः, लोके अर्थबोधनाय सुविभक्तेः समभिव्याहारस्य अपेक्षाऽभावात् । नद्धयोपादाने च सुविभक्त्यनपेक्षत्वेऽपि सुविभक्तीतरस्य अनपेक्षितत्वात् प्रातिपदिकत्वम्

(ग) समभिव्याहारे इति। समभिव्याहारो नाम नियतपौर्वापर्य्यम्। 'राम' इत्यादेः विभक्तीतरक्रियावाचकास्त्यादिपदापेक्षयैव अर्थबोधजनकत्वात् अर्थवत्त्वं न स्यात्। सति चास्मिन् क्रियावाचकास्त्यादिपदानां पूर्वापरीभावनियमस्य अनङ्गीकारात् समभिव्याहारानपेक्षत्वाद् अर्थवत्त्वम्।

(घ) विभक्ति- इति। अत्र विभक्तिपदं प्रत्ययागमोभयोपलक्षणम्। तेन 'खट्वा' 'इन्द्राणी' इत्यादौ तादृशविभक्तीतरस्य 'टाप्' 'आनुक् इत्यस्य समभिव्याहारेणैव बोधजनकत्वादपि अर्थवत्त्वस्य न हानिः॥

(ङ) लोके' इत्युपादानात्'हरिषु' इत्यत्र शास्त्रे सोः प्रकृत्यनपेक्षया अर्थबोधजनकत्वेऽपि नार्थवत्त्वम्, लोके सोस्तथा विरहात्॥

**11. नागेशसम्मतस्य अर्थवत्त्वस्य लाभप्रकारः** – उक्तस्य अर्थवत्त्वविशेषस्य अस्वीकारे प्रकृतसूत्रे अर्थवद्ग्रहणस्य वैयर्थ्यं स्यात्। तद्ग्रहणसामर्थ्यात् एतत्संज्ञेत्याद्यर्थवत्त्वस्य लाभः। अत्रायमाशयः – अधातुरिति पर्युदासः। पर्युदासः सदृशग्राहकः। तथाहि अधातुरित्यस्य धातुसदृशः अर्थः। धातुः अर्थवान्, अतः अर्थवत्त्वेन सादृश्यग्रहणात् सामान्यस्य अर्थवत्त्वस्य अन्यथैव (अर्थवद्ग्रहणं विनैव) लाभः स्यात्। ततश्च अनर्थकानां व्यावृत्तिः स्यादेवेति। तदर्थमर्थवद्ग्रहणमनावश्यकम्॥

**आक्षेपः** – कृत्तद्धितसूत्रे अनर्थकव्यावृत्तये उत्तरार्थम् अर्थवद्ग्रहणं चरितार्थमिति।

**समाधानम्** – तन्न, अनर्थककृत्प्रत्ययस्य अनर्थकतद्धितप्रत्ययस्य च अप्रसिद्धत्वात्। अतो न उत्तरार्थं तत्। स्वार्थिकप्रत्ययोऽपि प्रकृत्यर्थेन एव अर्थवान्, अतः सोऽपि सार्थक एवेति नागेशाभिप्रायः।

**12. प्रकृतसूत्रे अर्थवद्ग्रहणस्य सार्थक्यविचारः** – 'नञिवयुक्तन्यायस्य (नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः' इति न्यायशरीरम्। अधिकरणम् = द्रव्यम्। नहि 'अब्राह्मणमानय' इत्युक्ते काष्ठादिकमानीयते, किन्तु ब्राह्मणभिन्नः ब्राह्मणसदृशः क्षत्रियादिः एव आनीयते इति) अनित्यत्वज्ञापनाय प्रकृतसूत्रे एव अर्थवद्ग्रहणमावश्यकम्। तथा च (तस्य वैय-भावात्) न अर्थवद्ग्रहणसामर्थ्यात् निरुक्तार्थवत्त्वस्य लाभ इति चेन्न, तदनित्यत्वज्ञापने भाष्यसम्मतदृढतरफलाभावात् ॥

**13. 'भाष्यसम्मतदृढतरफलाभावात्'- इत्यस्याशयः** – अत्र अंशद्वयम् – (क) भाष्यसम्मतेति, (ख) दृढतरेति।

(क) यद्यपि 'अनचि च' इति सूत्रे पर्युदासे स्वीकृते उक्तन्यायानित्यत्वेन 'वाक्क्' इत्यादौ द्वित्वसिद्धिरूपं फलमस्ति, किन्तु भाष्यकृता तत्र प्रसज्यप्रतिषेधपक्ष एव स्वीकृतः। अतः पर्युदासपक्षं स्वीकृत्य कल्प्यमानं फलं न भाष्यसम्मतम् । अत्रेदं बोध्यम् – पर्युदासे 'अनचि' इत्यस्य अज्भिन्ने हलि इत्यर्थः। तेन हलि परे एव द्वित्वं स्यात् , यच्च 'वाक्क्' इत्यत्र नास्ति। न्यायानित्यत्वे 'अज्रहिते' इत्यर्थः। तेन परभागे अच् न भवेत् इत्येव नियमः। हल् अस्तु, मास्तु वा- इत्यत्र नाग्रहः। तस्माद् द्वित्वं स्यादेव। प्रसज्यप्रतिषेधे चापि 'अज्रहिते' इत्येव तदर्थः।

(ख) वेः स्कन्देरनिष्ठायाम् (उदा. 'विष्कन्ता' इत्यत्र षत्वम्) इत्यस्य न्यायानित्यत्वे कदाचित्

कृदन्तभिन्नतिङन्तेऽपि प्रवृत्तिरूपफलसत्त्वेऽपि 'तिङन्ते षत्वं जायते न वा इति नियामकत्वाभावात् नास्य न्यायानित्यत्वस्य अवश्यं फलमिति दृढतरेत्यस्याभिप्राय:॥

**14. नागेशमते धातुप्रत्ययान्तपर्युदासस्य नञ्द्वयघटिते अर्थवत्त्वे एवं सार्थक्यम्** - 'अहन्' (हन्धातु:,लङ्,प्र. पु.एकवचनम्) 'काण्डे' काण्डशब्द:, सप्तम्येकवचनम्) इत्यादौ अर्थबोधाय प्रातिपदिकसंज्ञासाध्यविभक्ते: अपेक्षा नास्ति, अपि च तादृशविभक्तीतरस्यापि अपेक्षा नास्ति, अत: निरुक्तार्थवत्त्वस्य (नञ्द्वयघटितस्य) सद्भावेन प्राप्ताया: प्रातिपदिकसंज्ञाया वारणाय धातु-प्रत्ययान्तपर्युदास: सार्थक:। प्रातिपदिकत्वे च प्रथमे नलोपापत्ति:, द्वितीये च 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वापत्ति:।

**15. नागेशमते प्रत्ययपर्युदासो व्यर्थ:** - निरुक्तमर्थवत्त्वम् अलुप्तप्रकृतिकस्य केवलप्रत्ययस्य नास्ति, यतो हि लोके अर्थबोधजननाय प्रत्ययस्य कृते तादृशविभक्तीतर- 'प्रकृते:' अपि अपेक्षा भवति । अत: नागेशमते प्रत्ययपर्युदासो व्यर्थ:। अलुप्तप्रकृतिकेत्युक्ते 'इयान्' (अत्र समस्तप्रकृते: लोप:, केवलप्रत्यय: एव) इत्यादौ प्रत्ययमात्रे अर्थवत्त्वेऽपि न हानि:। तदुक्तं भाष्ये- 'नहि लोके केवलेन प्रत्ययेनार्थो गम्यते, केन तर्हि ? सप्रकृतिकेनेति । हरिरप्याह- 'धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते' इत्यादि।

**16.नागेशस्य उभयसूत्रसाधारणे अर्थवत्त्वे भाष्यकैयटयो: सम्मति:** - भाष्ये - (संज्ञाविधौ तदन्तविध्यभावे) 'कृत्तद्धितेति सूत्रेऽन्तग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्- अर्थवदिति वर्त्तते। कृत्तद्धितान्तञ्चैवार्थवत्, न केवला: कृतस्तद्धिता वेति। अत्र कैयट: - 'शास्त्रीयार्थग्रहणे अर्थवद्ग्रहणानुवृत्तिवैयर्थेन तदनुवृत्तिसामर्थ्यात् लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थ: प्रत्ययान्तेषु (सुबन्तेषु) लक्ष्यते (बोद्धभि:) स आश्रीयते' इति आह। तेन नागेशार्थवत्त्वे उभयो: सम्मति: ज्ञायते॥

**17. अनुवृत्तिसामर्थ्यात्' इत्यनेन सूचना** - अर्थवत्सूत्रेऽपि समानमेव अर्थवत्त्वम् इति अनेन सूचितम्। अन्यथा 'सामर्थ्यादि'त्येव वदेत्। पूर्वसूत्रे यादृशार्थवत्त्वग्रहणम्, उत्तरसूत्रेऽपि अनुवृत्तिसामर्थ्यात् तादृशार्थवत्त्वस्यैव ग्रहणमिति । शास्त्री-यार्थग्रहणे तु कृत्तद्धिते तथा कृदन्ते तद्धितान्ते च शास्त्रीयार्थवत्त्वस्य अव्यभिचरितत्वात् विशेषणार्थं तदनुवृत्तियर्था स्यादिति भाव:।

**18. उभयसूत्रसाधारणे अर्थवत्त्वे फलान्तरम्** - भाष्योक्ते प्रत्ययान्तपर्युदासस्य प्रत्याख्यानपक्षे 'पञ्चनावप्रिय: इत्यादौ एतत्संज्ञासाध्यविभक्तीतर-प्रिय-पदस्य समभिव्याहारेणैव पञ्चनाव' इत्यस्य लोके अर्थबोधजनकत्वात् निरुक्तार्थवत्त्वाभावे न पूर्वेण न उत्तरेण वा सूत्रेण प्रातिपदिकत्वम्। प्रातिपदिकत्वे तु टाबापत्ति: स्यात्। (नियमशास्त्राणां निषेधमुखेन प्रवृत्ति: इति प्राचीनमतेन पूर्वेण सूत्रेण, विधिमुखेन प्रवृत्ति: इति नवीनमतेन उत्तरेण सूत्रेण समासस्य प्रातिपदिकत्वं भवतीति बोध्यम्।)

**19. प्रत्ययान्तपर्युदासप्रत्याख्याने भाष्यकारस्य हेतुद्वयम्** - (1.) 'कृत्तद्धितेति सूत्रे तद्धितग्रहणस्य नियमार्थकत्वम् इति प्रथमो हेतु:। अत्रायमाशय: - प्रत्ययान्तपर्युदासभावे 'औपगव:' इत्यादौ तद्धितान्तेऽपि प्रथमसूत्रेणैव प्रातिपदिकत्वं सिद्धम्। पुन: 'कृत्तद्धितेति सूत्रे क्रियमाणं तद्धितग्रहणं व्यर्थं सत् नियमयति -

'प्रत्ययान्तस्य प्रातिपदिकसंज्ञा चेत् तद्धितान्तस्यैव' इति। अनेनैव नियमेन 'काण्डे' इत्यादेः प्रातिपदिकसंज्ञावारणं सम्भवम् । अतः प्रत्ययान्तपर्युदासो व्यर्थः॥

(2.) काण्डे' इत्यत्र फलाभावो द्वितीयो हेतुः। अत्रायमाशयः – प्रत्ययान्तपर्युदासस्य व्यावृत्यैः 'काण्डे इति वर्तते अत्र पर्युदासाभावेऽपि फलाभावेन न प्रातिपदिकत्वम्। नपुंसकत्वप्रयुक्तह्रस्वत्वं तु न फलम्, यतो हि 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रस्थाने 'ह्रस्वो नपुंसके यत्तस्य'इति न्यासेनैव ह्रस्वत्वाऽप्राप्तिः। 'नपुंसकलिङ्गे यद् वर्तमानम्, तस्य ह्रस्वः'इति तदर्थः। 'काण्डे इत्यादौ विभक्त्यन्ते कारकशक्तेः संख्यायाश्च प्राधान्यात् तत्र लिङ्गयोगाभावात् नपुंसके तस्य अवर्तमानात् न ह्रस्वत्वाऽऽपत्तिः॥

**20. अर्थवद्ग्रहणस्य फलम्** – 'दश दाडिमानि षडपूपा' इत्यादि (कुण्डमजाजिनं पललपिण्डः अधारुकमेतत्कुमार्याः स्फय्यकृतस्य पिता प्रतिशीनः) निरर्थकसमुदायस्य प्रातिपदिकसंज्ञाव्यावृत्तिः (वारणम्) अर्थवद्ग्रहणस्य फलम् । सति प्रातिपदिकत्वे 'सुपो धातुप्रातिपदिकयोः' इति लुगापत्तिः।

**अत्रेदं बोध्यम्** – वृक्षप्रचलनन्यायस्वीकारे प्रतिवर्णं प्रातिपदिकत्वेऽपि स्वादिघटितस्य समुदायस्यापि (शाखाप्रचलने वृक्षप्रचलनवत्) प्रातिपदिकत्वे सुपो लुकि प्रतिवर्णं स्वादिश्रवणरूपो न दोषः। तदेवं न्यायस्वीकारे 'दश दाडिमानि' इत्यादि- व्यावृत्तिः फलम् । तदस्वीकारे च 'धनं वनमि' त्यादौ प्रतिवर्णं संज्ञाव्यावृत्तिः फलमिति॥

*__विशेषः__-(1) अत्र लाघवात् 'अर्थ्यधातुः इति तु नोक्तम्, 'अर्थाच्चासन्निहिते' इति सूत्रेण असन्निहितात् अर्थशब्दात् इनेर्विधानात्। अर्थशब्दयोः सदा सन्निहितत्वेन इनेरप्राप्तेः।

2. अर्थशब्दोऽत्र सूत्रे अभिधेयार्थकः। स चार्थश्चतुर्विधः – जातिः, गुणः, क्रिया, द्रव्यञ्चेति । गौः, शुक्लः, पाचकः, डित्थः इति क्रमेणोदाहरणानि ॥

3. केचित्तु अर्थवत्त्वमुभयत्रापि वृत्त्या अर्थविषयकबोधजनकत्वमेव। वृत्तिश्च शक्ति-लक्षणा-व्यञ्जनान्यतमरूपा। लक्षणया वृत्तिमत्त्वस्य 'गोपी'इत्युदाहरणम् । अत्र हि गोपत्वारोपेण गोपशब्दः स्त्रियां वर्तते। व्यञ्जनया वृत्तिमत्त्वं चादिनिपातानाम्।

4. पदं पदं प्रति इति प्रतिपदम्। तदर्हतीति प्रातिपदिकमिति। महासंज्ञाकरणं तु श्रुत्यनुरोधात्॥

5. अधातुरित्यस्य धातुभिन्नमिति फलितोऽर्थः। तत्र भेदश्च धातुत्वपर्याप्तावच्छेदकताकप्रतियोगिताको ग्राह्य इति न धातुघटोभयभेदमादाय दोषः।

*व्याकरणविभागाध्यक्षः राष्ट्रियसंस्कृतसंस्थानम्,*
*क.जे.सोमैयासंस्कृतविद्यापीठम्, मुम्बई*

# 'धातोः किम्? हाहान्' इति दीक्षितमतस्य नागेशदृष्ट्या समीक्षणम्

**प्रो. विष्णुकान्तपाण्डेयः**

'आतो धातोः[१]' इति आकारलोपविधायकं सूत्रं भगवता पाणिनिना षष्ठाध्याये विरचितम्। अस्य सूत्रस्यार्थः –'आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यादिति[२]' भट्टोजिदीक्षितेन कौमुद्यां लिखितः। तेन 'विश्वपः' इत्यादीनि रूपाणि सिद्धानि भवन्ति। विश्वपेत्यत्र पाधातुरस्ति। अत आकारलोपः। श्रीमद्भट्टोजिदीक्षितः कौमुद्यां धातोः किं हाहान्[३]' इति लिखितवान्। हाहा इति गन्धर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकम्। तथा चोक्तम् अमरकोशे –'हाहा हुहुश्चैवमाद्यागन्धर्वास्त्रिदिवौकसामिति[४]'। धातोः किं हाहानित्यस्यायं भावः – हाहाप्रातिपदिकात् द्वितीयाबहुवचनस्य विवक्षायां शस्प्रत्ययेऽनुबन्धलोपे 'हाहा+अस्' इत्यवस्थायां सूत्रे धातुग्रहणाद् आकारस्य धात्ववयवत्वाभावेन लोपो न भवति। किन्तु 'प्रथमयोः पूर्वसवर्णः[५]' इत्यनेन पूर्वसवर्णदीर्घे,'तस्माच्छसो नः पुंसि[६]' इत्यनेन नत्वे च कृते हाहानिति पदं निष्पन्नं भवति। एवं हाहानित्यत्र आकारलोपो मा भूदित्येतदर्थं सूत्रे धातुग्रहणमिति दीक्षितमतम्।

मतेऽस्मिन् हाहाशब्दोऽव्युत्पन्न इति भावः। अस्य क्रियाशब्दत्वे तु 'सान्' इति प्रत्युदाहरणं बोध्यम्। तस्य आकारेण सहेति तान् इत्यर्थो भवति। सहशब्देन सह आकारस्य समास इति भावः। एवं दीक्षितमते धातुभिन्नाऽऽकारस्य लोपव्यावृत्त्यर्थं सूत्रे धातुग्रहणं कृतमस्ति।

नन्वेवं दीक्षितमते 'क्त्वः', 'श्नः' इत्यत्र प्रत्ययस्य आकारस्य लोपो न स्यादिति चेन्न, 'आतः' इति योगविभागादधातोरप्याकारलोपात्। योगविभागस्येष्टसिध्यर्थत्वेन क्वचिदेव अधातोराकारस्य लोप इति दीक्षितमतम्।

अत्र नागेशः –नागेशस्तु 'आतो धातोः' इति सूत्रस्थधातुग्रहणमाबन्तनिवृत्त्यर्थमेव वर्तत इति स्वीकृतवान्। तत्र तेन प्रमाणत्वेन भाष्यमतमुद्धृतम्। उक्तं हि नागेशेन शेखरे –'परे तु[७] 'क्त्वः', 'श्नः' इत्यादिसिध्यर्थम् 'आतोऽनापः' इति वक्तव्यम् इत्युक्ते 'आत' इति योगविभागेन तत्संसाध्य तत्प्रत्याख्यातं भाष्ये। एवञ्च साशब्दादेर्यद्यभिधानं तदा योगविभागेन लोप इष्ट एव। सूत्रे धातुग्रहणमाबन्तनिवृत्त्यर्थमेव भाष्यवार्तिककृतोरज्ञानकल्पनापेक्षयेदृशार्थकल्पनस्यैवौचित्यादिति'।

अयं भावः – महाभाष्यकारेण 'क्त्वः', 'श्नः' इत्यत्र प्रत्ययस्य आकारस्य लोपविधानार्थम् 'आतो धातोः' इति सूत्रस्य स्थाने आब्भिन्नस्य आकारस्य लोपः स्यादित्यर्थकम् 'आतोऽनापः' इति वक्तव्यम् इत्युक्तम्। क्त्वाश्नाप्रत्यययोराकारोऽपि आब्भिन्न आकारोऽस्ति अतोऽस्यापि लोपः। 'आतोऽनापः' इत्यस्य प्रत्याख्यानं महाभाष्यकारेण 'आतः' इति योगविभागेन कृतम्। अर्थात् 'आतो धातोः' इति सूत्रस्थस्य 'आतः' इति पदस्य योगं विभज्य 'क्त्वः', 'श्नः' इत्यादौ आकारस्य लोपः कृतः। तदर्थम् 'आतोऽनापः' इति वचनस्य तावन्नावश्यकता। 'आतोऽनापः' इत्यनेन ज्ञायते यत् आपरूपस्यैव आकारस्य लोपो न भवति। अन्यस्य आकारस्य लोपो भवत्येव। एवम् 'आतोऽनापः' इति वार्तिकस्य योऽर्थोऽभिप्रेतस्सोऽर्थ एव 'आतः' इति योगविभागस्यापि वर्तते, यतो हि तत्प्रत्याख्यानायैव 'आतः' इति योगविभागः कृतः। यदि आब्भिन्नस्य आकारस्य लोपो न स्यात् तर्हि 'आतोऽनापः' इति वार्तिककारस्य तत्प्रत्याख्यानपरभाष्यस्य चाज्ञानापत्तिः स्यात्। अत एव क्त्वः, श्नः इत्यादावपि आलोपो भवति। एवं धातुग्रहणमाबन्तनिवृत्त्यर्थमेव।

धातुग्रहणमाबन्तनिवृत्त्यर्थमेव सूत्रे कृतमिति स्वीकारादेव 'प्रथमयोः पूर्वसवर्णः[८]' इति सूत्रस्थं भाष्यं सङ्गच्छते। तत्र तु एतादृशो विचारः कृतो यत् पररूपं बाध्यसामान्यचिन्तया दीर्घमात्रस्य बाधकमिति पक्षे राम+अस् (शस्) इत्यवस्थायाम् 'रामान्' इत्यत्र 'प्रथमयोः पूर्वसवर्णः' इति दीर्घो न स्यात् 'अतो गुणे' इति पररूपेण बाधादिति चेन्न, अतो दीर्घ इति सुपि चेति चानुवर्तमाने बहुवचने झल्येदिति सूत्रे 'बहुवचने' इति योगविभागेन दीर्घं विधायेष्टसिद्धेः। अर्थात् अदन्तस्य दीर्घो भवति बहुवचने सुपीत्यर्थकेन 'बहुवचने' इति योगविभागेन 'रामान्' इत्यत्र दीर्घो भविष्यति न कश्चन दोषः। एतदनन्तरम् रामाणाम् = 'राम+आम्' इत्यवस्थायाम् अनेन 'बहुवचने' इति योगविभागेन परत्वात्दीर्घे कृते अग्रीनामित्यत्र सावकाशस्य नुटोऽप्राप्तिमाशङ्क्य 'ह्रस्वनद्यापः[९]' इति सूत्रे 'आज्जसेरसुक्[१०]' इति सूत्रात् आद्ग्रहणमनुवर्त्य नुट्सिद्धिः (रामाणामित्यत्र) कृता महाभाष्यकारेण। पुनश्च नुड्विधायके आद्ग्रहणानुवृत्तिपक्षे कीलालपाम् = कीलालपा+आम् इत्यवस्थायाम् अनिष्टनुट्प्रसक्तिः स्यादित्याशङ्कायाम् आतोः धातोरिति सूत्रमावर्त्यआकारलोपेन नुड्बाधकेन नुटो बाधान्न दोषः कीलालपामित्यत्रेत्युक्तम्। एवं नुड्विधायके आब्ग्रहणं न कार्यमिति भाष्याशयः। एतद्धि पररूपं दीर्घमात्रस्य बाधकमिति पक्षे महाभाष्यकारेण प्रतिपादितम्। अधात्ववयव-आकारान्तानां लोपाभावे उक्तभाष्यासङ्गतिः स्पष्टैव।

अयं भावः – यदि अधात्ववयव-आकारान्तानाम् 'आतो धातोः' इति सूत्रेण लोपो न स्यात् तर्हि हाहाम् ='हाहा+आम्' इत्यत्रापि आकारलोपो न स्यात् तथा सति 'ह्रस्वनद्यापो नुट्[११]' इति सूत्रे 'आज्जसेरसुक्[१२]' इति आद्ग्रहणानुवृत्तिपक्षे 'हाहा+आम्' इत्यवस्थायां नुडापत्तिः स्यादेव। अत एव ज्योत्स्नाटीकायाम् तदसङ्गतिरिति नागेशपङ्क्तेराशयं ब्रुवता ज्योत्स्नाकारेणोक्तम् –'अव्युत्पन्नहाहाद्याकारान्ते लोपाप्रवृत्तौ हि कीलालपामित्यादौ धातुविषये लोपेनोक्तरीत्या नुटो बाधेऽपि हाहामित्यादौ नुट्प्रसङ्गस्य वारयितुमशक्यत्वादसङ्गतिरिति[१३]'। इत्थं स्पष्टं यत् धातुग्रहणमाबन्तनिवृत्त्यर्थमेति नागेशमतम्। तथा सति धातोः किम्? हाहान् इति दीक्षितप्रत्युदाहरणं सम्यक् नास्तीत्यलं विस्तरात्।

**सन्दर्भाः –**

१. पा.सू. ६.४.१४०

२. सिद्धान्तकौमुद्याम् 'आतो धातोः' इति सूत्रस्यार्थः प्रतिपादितः।

३. 'आतो धातोः' इति सूत्रे सिद्धान्तकौमुद्याम् प्रत्युदाहरणम्

४. अमरकोशे., स्वर्गवर्गे

५. पा.सू. ६.१.१००

६. पा.सू. ६.१.१०१

७. लघुशब्देन्दुशेखरे आतो धातोरिति व्याख्यावसरे

८. पा.सू. ६.१.१००

९. पा.सू. ७.१.५४

१०. पा.सू. ७.१.५०

११. पा.सू.७.१.५४

१२. पा.सू. ७.१.५०

१३. आतो धातोरिति सूत्रस्य व्याख्यावसरे ज्योत्स्नाटीकायाम्।

**सहायकग्रन्थाः –**

लघुशब्देन्दुशेखरः, प्रौढमनोरमा, महाभाष्यम्

*आचार्यः,*
*व्याकरणविभागे,*
*राष्ट्रियसंस्कृतसंस्थानस्य,*
*जयपुरपरिसरस्य, जयपुरे*

# न्यायनये नञर्थविचारः

प्रो. विष्णुपदमहापात्रः

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्य प्राधान्यात् मोक्षप्राप्तये समेषां दार्शनिकानां प्रवृत्तिः। तत्र दार्शनिकानां विचारशैल्यां पदार्थत्त्वविवेचने वैमत्यदर्शनेऽपि पदार्थतत्त्वज्ञानान्मुक्तिरित्यत्र नास्ति वैमत्यम्। तत्र पदार्थनिरूपणप्रसङ्गे वैशेषिकसूत्रकारैः - धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्[१] इति। अर्थात् सूत्रकारैः द्रव्यगुणकर्मसामान्यविशेषसमवायेति षड्पदार्थानामुल्लेखः कृतः। परन्तु तत्र आत्यन्तिकदुःखनिवृत्तिरूपः मोक्षो भवति। आत्यन्तिकदुःखनिवृत्तेः अभावरूपत्वात् अभावपदार्थस्यानुल्लेखात् सूत्रकारस्य न्यूनतेति नैव विभावनीयं यतः प्रतियोगिनिरूपणाधीनमेव अभावस्य निरूपणं भवतीति नवमाध्यायस्य प्रथमाध्याये अभावनिरूपणविषयकं सूत्रचतुष्टयमुल्लिखितम्। तथाहि -क्रियागुणव्यपदेशाऽभावात् प्रागसत्[२] इत्यनेन प्रागभावस्य सदसत्[३] इत्यनेन प्रध्वंसाभावस्य सच्चाऽसत्[४] इत्यनेन अन्योन्याभावस्य यच्चान्यदसदतस्तदसत्[५] इत्यनेन अत्यन्ताभावस्य विचारः समुपस्थापितः। एतत्सर्वं मनसि निधाय परवर्तिभिः दार्शनिकै : अभावमाहत्य सप्तपदार्थाः स्वीकृताः। अभावस्तु नञर्थ इति तर्कालंकारैः स्वीकृतः तर्कामृतग्रन्थे। तस्य नञर्थस्य विचारात् प्राक् इदमवधेयम् - शाब्दबोधे सार्थकशब्दस्यैव कारणत्वं न तु निरर्थकशब्दस्य। तत्र कोऽसौ सार्थक इति जिज्ञासायां तर्कालंकारैरुच्यते-

**शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।**

**प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा ॥**[६]

अर्थात् यादृशः शब्दः शब्दान्तरं सहकृत्यैव स्वस्य स्वघटकस्य वा वृत्त्युपस्थाप्ययादृशार्थावगाहिबोधं प्रत्यनुकूलः, स तथाविधार्थे सार्थक इति। स च सार्थकः शब्दः प्रकृति-प्रत्यय-निपातभेदेन त्रिविधो भवति। नञ् पदस्तु निपात एव। तस्य निपातस्य किं लक्षणमिति जिज्ञासायां वक्ति -

**स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः।**

**सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः ॥**[७]

अर्थात् यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थे निपातः। चादयो निपाताः स्वार्थे समुच्चयादौ नामाद्यर्थस्याभेदेनान्वयबोधं प्रत्ययोग्याः,

न हि स्मृतमनुभूतञ्चेत्यादितः कस्यापि स्मृतः समुच्चयः इत्यादिरनुभवः, किन्तु स्मृत्यानुभूतयोः समुच्चय इत्यादिरेव। निपातार्थप्रातिपदिकार्थयोः निपातार्थधात्वर्थयोश्च साक्षादभेदान्वयबोधो नैव भवति इत्यतः नियमं प्रदर्शयति –भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः प्रत्ययार्थेन क्वचिन्निपातार्थेन च सममेव जायते न त्वऽन्येन[6]। अर्थात् प्रातिपदिकार्थस्य प्रत्ययार्थेन समं, प्रातिपदिकार्थस्य निपातार्थेन समं, धात्वर्थस्य प्रत्ययार्थेन समं, धात्वर्थस्य निपातार्थेन च समं भेदान्वयबोधो भवति। वस्तुतः अस्य प्रतिज्ञावाक्यस्य अयमेवाशयः – निपातातिरिक्तनामार्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नत्वात् इति। विभक्त्यर्थमन्तराकृत्य राज्ञः पुरुषः इत्यत्र विभक्त्यर्थं स्वत्वमन्तराकृत्य राजपरुषयोः भेदान्वयः सम्भवतीत्यतः साक्षादिति पदमनुशासने प्रदत्तम्।

**वैयाकरणमतम्**

एवञ्च नञ्पदस्य यदि निपातत्वं तर्हि नञर्थः कः इति जिज्ञासायां वैयाकरणैः नञ्पदस्य षडर्थाः परिकीर्तिताः। तथाहि –

**तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥इति।**

अर्थात् अनिक्षुः शटः इत्यत्र सादृश्यस्य अघटः पटः इत्यादौ अन्यत्वस्य अनुदरा कन्या इत्यत्र स्वल्पतायाः अब्राह्मणो वार्द्धुषिकः इत्यत्र अप्राशस्त्यस्य असुरो दैत्यः इत्यत्र विरोधस्य च नञा बोधनात् सादृश्यादीनामपि नञ् पदवाच्यत्वमिति।

**अस्वीकारपक्षः**

षड्विधार्थे नञ् पदस्य या शक्तिः वैयाकरणैरभ्युपगता तन्न युक्ता, यतः सादृश्याद्यर्थे नञ् पदस्य शक्तत्वस्वीकारे बहुतरशक्यतावच्छेदकत्वकल्पनापत्तिः। तदपेक्षया लक्षणया एव तत्तत्प्रयोगसम्पादनसम्भवात् तत्तदर्थे नञ्पदस्य पृथक् शक्तिकल्पनमयुक्तिकरमिति। अत एव जगदीशैः नञर्थोऽभाव इति स्वीकृतः। तथाचोक्तम् –एवं नञर्थोऽभावः। अघटं भूतलम् इत्यादौ घटभिन्ने लक्षणा। न कलञ्जं भक्षयेत् इत्यादौ बलवदनिष्टजनकत्वे लक्षणा[7] इति।

अभिप्रायस्तु – नञर्थः मुख्यार्थः एव। अत्यन्ताभाव एव। यदि अत्यन्ताभावस्य नञर्थत्वं तर्हि अघटं भूतलमित्यत्र अत्यन्ताभावस्य अप्रतीयमानत्वाद् भवति अत्यन्ताभावेऽव्याप्तिः। तदव्याप्तेः परिहारार्थं जगदीशैः अघटपदस्य घटभिन्ने लक्षणा स्वीकृता। यतः अव्ययीभावसमासस्य अव्ययत्वात्। अव्ययीभावसमासस्याव्ययत्वेऽपि निपातत्वविरहेण भेदान्वयासम्भवात् अभेदान्वयबोधोपपादनाय पूर्वपदस्य घटभिन्ने लक्षणा स्वीकर्त्तव्या। अघटमित्यत्र भेदे यदि नञ् पदस्य शक्तिः स्वीक्रियते तर्हि भेदत्वस्य शक्यतावच्छेदकत्वगौरवात् नञ् पदस्य घटभिन्ने लक्षणा घटपदस्य च तात्पर्यग्राहकत्वं स्वीक्रियते। अत्र वैपरीत्यं कथं न स्यादित्याशंकायामित्थं वक्तुं शक्यते अनुभवविरोधात् तथा नाङ्गीक्रियते। भूतले घटो नास्ति इत्यत्र नञो मुख्यार्थत्वमिति जगदीशतर्कालंकारस्याशयः। अपङ्कजं शरः इत्यत्रापि तथैव बोध्यम्।

तत्रेदं चिन्तनीयं अव्ययीभावसमासस्याव्ययतया तत्समासाप्रविष्टपदार्थान्तरस्यान्वयासम्भवात् इति यदनुशासनं विद्यते तदनुशासनं स्वीकृत्य भूतले अघटम्, भूतले उपकुम्भम् भूतलवृत्तिघटात्यन्ताभावस्य अव्युत्पन्नत्वमिति पूर्वपक्षरूपेण प्रदर्श्य नञुपाध्यादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात् इति समाधानं मथुरानाथैः प्रदर्शितम्। एतेन ज्ञायते मथुरानाथैः अव्ययीभावसमासस्य अव्ययत्वेऽपि भेदान्वयबोधः स्वीकृतः। तत्र जगदीशैः मणिकारमतं स्वीकृत्य एव नञोऽत्यन्ताभावमुख्यार्थकत्वं स्वीकृतम्। यतः मणिकारैः न पचतिभूतले न घटः इत्यादौ नञो मुख्यार्थत्वमत्यन्ताभावत्वमिति स्वीकृतम्।

**नव्यमतम्**

वस्तुतः दीधितिकारमते संसर्गाभावोऽन्योन्याभावश्च नञ्पदशक्यः। उक्तञ्च संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः। तत्र चान्वयितावच्छेदकावच्छन्नप्रतियोगिताकत्वं व्युत्पत्तिलभ्यं, नीलघटवति न घटः, नीलघटो न घटः इत्याद्यव्यवहारात्, इह नीलघटवति न पीतोघटः पीतोघटो न नीलः इत्यादि व्यवहाराच्च।[१०]अर्थात् उभयाभावस्य नञ् पदशक्यत्वे शक्यतावच्छेदकत्वन्तु लाघवादखण्डोपाधिरूपमभावत्वमन्योन्याभावत्वञ्च। अभावत्वन्तु संसर्गाभावपरम्। अभिप्रायस्तु न्यायवैशेषिकप्रस्थाने अभावो द्विविधः संसर्गाभाव-अन्योन्याभावभेदेन। उक्तञ्च -

**अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।**
**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥**
**एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।**[११]

अन्योन्याभावस्तु - अन्योन्यत्व - तादात्म्यस्य विरोधी अभावः। यादृशाभावः स्वाश्रये स्वीयप्रतियोगीतः अन्योन्यत्वतादात्म्यस्य विरोधी भवति तादृशाभावः अन्योन्याभावः। यथा घटे पटस्य भेदः तिष्ठति, पटतादात्म्यं नैव तिष्ठति। यस्य अभावस्य प्रतियोगिता तादात्म्यसम्बन्धेन अवच्छिन्ना स अन्योन्याभावः यथा घटो न पटः। एवञ्च नञा अभावबोधने यत्र प्रतियोगिपदे अनुयोगिपदे च प्रथमा भवति तत्र अन्योन्याभावः प्रतीयते। अन्योन्याभावस्थले प्रतियोग्यनुयोगिनोः घटपटयोः परस्परं अभेदाभावः भेदः प्रतीयते।

संसर्गाभावस्तु - संसर्गविरोधी अभावः। संसर्गस्तावत् संसृज्यते एकं वस्तु अन्यवस्तुना आश्रीयते येन असौ संसर्गः तथाच संसर्गाभावस्थले प्रतियोग्यनुयोगिनोः घटभूतलयोः सम्बन्धो नास्तीति पर्यवसाने प्रतीतिः। विशेषतः यत्र प्रतियोगिपदे प्रथमा अनुयोगिपदे च सप्तमी तत्र नञा संसर्गाभावः प्रतीयते। यथा भूतले घटो नास्ति। संसर्गाभावस्तु प्रागभाव-प्रध्वंसाभाव-अत्यन्ताभावभेदेन त्रिविधो भवति। एतत्सर्वमभिलक्ष्य भूतले न घटः इत्यत्रात्यन्ताभावस्य, श्यामघटे रक्तं रूपं नास्ति, इत्यत्र रक्तरूपप्रागभावस्य, रक्तघटे श्यामरूपं नास्ति इत्यत्र श्यामरूपध्वंसस्य, घटो न पटः इत्यत्रन्योन्याभावस्य नञा बोधनात् उभयार्थकत्वे नञ् पदस्य शक्तिः स्वीकार्या।

तत्रेदमपि अवधेयम्- अभावत्वस्याखण्डोपाधित्वे मानाभावाद् भावभिन्नत्वमेव अभावत्वम्,

भावभिन्नत्वञ्च समवायेन-सत्तासम्बन्धित्व-समवायघटितसमानाधिकरण्येनसत्तासम्बन्धित्वैतदन्यतर-त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वरूपमिति नव्याः वदन्ति।

**प्रसज्यप्रतिषेधार्थे नञर्थविचारः**

अन्यत्र मीमांसकैः प्रसज्यप्रतिषेधतया पर्युदासतया च नञर्थः स्वीक्रियते। तथाहि -अभुक्ता भवना नाथ! मुहूर्त्तमपि सा पुरा इत्यादौ स्वार्थस्य निषेधस्य विधेयत्वान्नञः प्रसज्यप्रतिषेधार्थम्। तदुक्तं -

**अप्राधान्यं विधेर्यत्र निषेधे च प्रधानता।**
**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ॥ इति।**

ज्वरितो नान्नमश्नीयात्, अष्टम्यां मांसं नाश्नीयात्, पर्वणि दारान्न गच्छेत इत्यादिस्थले नञः प्रसज्यप्रतिषेधार्थत्वमन्नाशनाभावादेरेव विधेयतया प्राधान्यात्।

**पर्युदासः**

पर्युदासता तु-**प्राधान्यञ्चविधेर्यत्र चाप्रधानताः। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।** तथाहि-जुगोपमानसन्त्रस्तो भेजे धर्ममनातुरः इत्यादौ च स्वार्थस्य निषेधस्य विधेयतयानवगमात् सन्त्रस्तत्वादिकमनूद्यात्मगोपनाद्येव विधेयमतो नञः पर्युदासता। एवञ्च रात्रौ श्राद्धं न कुर्वीत नोद्वहेद्रोगिनीं कन्याम्नोपेयादनृतौ भार्यामित्यादौ च नञः पर्युदासत्वं, प्रथमे अमायां पितृभ्यो दद्यात् इत्यनेन, द्वितीये अरोगिनीं भातृमतीमुद्वहेदविशङ्कतः इत्यनेन, तृतीये ऋतुकालाभिगामी स्यात्, इत्यनेन च वाक्येन एकवाक्यतया रात्रीतरामावस्याधिकरणकश्राद्धकरणस्य, रोगिनीतरभातृमतीविवाहस्य, अनृत्वावच्छेदकेतरकालाधिकरणकभार्यागमनस्य विधेयत्वेन प्राधान्यात्। तथा चोक्तप्रयोगेषु रात्र्यधिकरणकश्राद्धाभावरोगिनीकन्योद्वाहाभाव, ऋत्वनवच्छेदककालावच्छिन्नभार्यागमनाभावानामेव विधेयत्वमत एव प्राधान्यञ्चास्त्विति वाच्यं अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यादित्यनेन जैमिनिना सम्भवत्येकवाक्यत्वे वाक्यभेदकल्पनाया अनादेयत्वस्याभिहितत्वादिति।

**प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ**

नीलो घट इत्यत्र यदि अभेदसम्बन्धेन नीलविशिष्टघट इति यदि शाब्दबोधः स्वीक्रियते तर्हि नञ् समभिव्याहारे घटो न नील इत्यत्रापि अभेदसम्बन्धेन नीलाभावविशिष्टघट इत्याकारकान्वयबोधः स्वीकार्यः। प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ इति अनुशासनात्। अस्यानुशासनस्य अयमेवाभिप्रायः - यादृशसमभिव्याहारस्थले येन सम्बन्धेन यत्र धर्मिणि येन रूपेण यद्वत्वं नञऽसत्त्वे प्रतीयते तादृशस्थले नञा तद्धर्मिणि तादृशसम्बन्धावच्छिन्नतादृशधर्मावच्छिन्नप्रतियोगिताकतदभावबोधस्य व्युत्पत्तिसिद्धत्वात्[१२]। एतादृशानुशासनबलाद् विशेषणभिक्तेरभेदार्थत्वमतेऽपि घटो न नीलः इति नञ् समभिव्याहारस्थले नञा नीलाद्यऽभेदाभाव एव बोधयिष्यते न तु नीलादिभेदः। यदि एतादृशस्थितिः भवेत् तर्हि नञो भेदबोधकत्वं कुत्रापि न स्यात्।तद्वारणाय गदाधरभट्टाचार्यैरुच्यते -अनीलं घटमानय इत्यादौ

घटपटसामानाधिकरण्यानुरोधेनऽनीलपदस्य नीलभिन्नपरतया नञो भेदवत्येव लक्षणाया उपगन्तव्यत्वात्[13] इति। अर्थात् तर्कालंकारैः यथा अनीलादिपदस्य नीलभिन्ने लक्षणा स्वीकृता भट्टाचार्यैरपि तथा कृतेति। वस्तुतः अभेदस्य प्रकारतावादीनये नञ् सत्त्वदशायां घटो न नील इत्य नीलाभेदाभावबोधकत्वेऽपि तृतीयाभावस्य प्रतियोगिस्वरूपतया नञो भेदबोधकत्वं समभवत्येव, परं भेदत्वप्रकारेण भेदो बोधो भवति न वेति तु चिन्तनीयम्। एतत्सर्वं मनसिनिधाय दीधितिकारैरपि सिद्धान्तरूपेण नञ्वादे उक्तं–प्रतियोग्याभावान्वयौ च तुल्ययोगक्षेमौ। तेन यत्पदोपस्थापितस्य अनुयोगिन्याधाराधेयभावसम्बन्धेनान्वयस्तत्र तत्संसर्गाभावस्यापि तथा, यथा पचति चैत्रः न पचति चैत्रः चैत्रस्येदं नेदं चैत्रस्य इत्यादौ तिङाद्यर्थस्य कृत्यादेः प्रथमान्तपदोपस्थापित एव तथेति तदभावस्यापि तत्र तथा[14] इति।

**निपातातिरिक्तत्वादिविशेषणस्य प्रयोजनम्**

निपातातिरिक्तप्रातिपदिकार्थयोः साक्षाद्भेदेनान्वयबोधस्याव्युत्पन्नत्वादिति यदनुशासनं शास्त्रकारैः प्रतिपादितं तत्र निपातातिरिक्तत्वादिविशेषणस्य किं प्रयोजनमिति जिज्ञासायामित्थं वक्तुं शक्यते निपातार्थप्रातिपदिकार्थयोः साक्षाद् भेदसम्बन्धेनान्वयबोधो भवति।तथाच भूतले न घटः इत्यत्र नञो निपातत्वात् नञर्थाभावेन घटस्य स्वप्रतियोगिकत्वसम्बन्धेनान्वयः, घटप्रतियोगिकाभावोभूतलवृत्तिरिति वाक्यजन्यवाक्यार्थबोधः। घटो न पटः अत्र स्वानुयोगिकत्वसम्बन्धेन घटस्य स्वप्रतियोगिकत्वसम्बन्धेन पटस्य च अभावेन साक्षादन्वयः। तथा च पटप्रतियोगिकभेदवान् घट इति वाक्यार्थबोधः।इवपदस्य निपातत्वात् मुखं चन्द्र इव इत्यत्रेवार्थसादृश्येन मुखचन्द्रयोः साक्षादेवान्वयो भवति, तत्र चन्द्रस्य स्वप्रतियोगिकत्वसम्बन्धेन मुखस्य स्वानुयोगिकत्वसम्बन्धेन चान्वयः। तथा च चन्द्रप्रतियोगिकसादृश्यानुयोगि मुखमिति बोधः। एवञ्च जगदीशोक्त निपातलक्षणे केवलपदस्य सार्थक्यनिरूपणावसरे प्रतिपादितं यत् –कार्तिक्यादौ यत्र दानं तदत्यन्तविनिन्दितमित्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः, किन्तु दानाद्यवच्छिन्ने[15] इति। एतेन ज्ञायते निपातातिरिक्तप्रातिपदिकार्थयोः साक्षादभेदान्वयबोधो जायते न तु भेदान्वयः।

**विधिप्रत्ययसमभिव्याहृतनञर्थविचारः**

न कलञ्जं भक्षयेत् इत्यादौ बलवदनिष्टजनकत्वे लक्षणा इति जगदीशः। उक्तस्थले नञ्पदस्य बलवदनिष्टजनके लक्षणां स्वीकृत्य कलञ्जभक्षणमनिष्टजनकमिति वाक्यजन्यवाक्यार्थबोधः। यदि च नञात्यन्ताभावस्य विधिलिङा बलवदनिष्टाननुबन्धीष्टसाधनताया बोधनात् कलञ्जभक्षणं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभाववदित्यन्वयबोधः स्यात् किं लक्षणयेति उच्यते, इत्यपि न युक्तं यतः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गप्रसङ्गाद्विध्यर्थे धात्वर्थस्यानन्वयात्। अत एव तत्र विनैव लक्षणां कलञ्जभक्षणाभावो बलवदनिष्टाननुबन्धीष्टसाधनमित्यपि नान्वयबोधो विधिप्रत्ययसमभिव्याहृते नञ् प्रयोगे नञर्थमुख्यविशेष्यकान्वयबोधस्य व्युत्पन्नत्वाच्च। एवञ्च तत्र विधिलिङस्तात्पर्यग्राहकत्वमिति।

वस्तुतः धात्वर्थनिपातार्थयोः भेदान्वयो भवति। तथाच न कलञ्जं भक्षयेद् इत्यत्र नैयायिकनये

बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वरूपविध्यर्थाऽभावेन नञुपस्थाप्येन सह धात्वर्थभक्षणस्यानुयोगित्वेन रूपेण साक्षादेवान्वयः। कलञ्जकर्मकं भक्षणं बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववत् इति बोधस्य जायमानत्वात्। अत्र च धात्वर्थभक्षणस्यैवाभावानुयोगित्वात्। गुरुमते तु विध्यर्थापूर्वांशे विशेषणतयान्वितेन नञुपस्थाप्याभावेन सह धात्वर्थभक्षणस्य प्रतियोगित्वेन रूपेण साक्षादेवान्वयः। तथाच कलञ्जभक्षणप्रतियोगिका-भाववदपूर्वमुत्पादयेदित्यलम्।

**सन्दर्भाः -**


१. वै.सू. १.१.४

२. वै.सू. ९.१.१

३. वै.सू. ९.१.२

४. वै.सू. ९.१.४

५. वै.सू. ९.१.१५

६. श.श.प्रका. कारिका-०६

७. श.श.प्रका. कारिका-११

८. व्युत्पत्तिवादः - पृ. ६७-६८

९. तर्कामृतम् - पृ. ११३

१०. शिरोमणिकृत नञ् वादः

११. न्या. सि. मु. कारिका १२-१३

१२. व्युत्पत्तिवादः - पृ. २९

१३. व्युत्पत्तिवादः - पृ. २९

१४. नञ् वादः पृ. १०३५

१५. श. श. प्र. ५६



आचार्यः,

श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठे,

नवदेहल्याम्

# तद्वत्ताबुद्धौ बाधसत्प्रतिपक्षयोः प्रतिबन्धकत्वमीमांसा

**डॉ. महेशझाः**

सामान्यतः तद्वत्ताबुद्धिम्प्रति तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वं भवति, तादृशप्रतिबन्धकत्वाभावनिश्चयत्वेन तदभाववत्तानिश्चयाभावस्य तदभावव्याप्यवत्तानिश्चयाभावस्य च कारणत्वं तद्वत्ताबुद्धौ स्वीक्रियते। यतो हि यत्कार्यं प्रति यस्य प्रतिबन्धकता भवति तत्कार्यप्रतिबन्धकीभूतस्य वस्तुनः अभावः कारणं भवति। इत्येवं कार्यकारणभावानुरोधेन कदाचिद्दोषविशेषाजन्यज्ञाने लौकिकसन्निकर्षाजन्यज्ञाने वा विशेषदर्शनस्य प्रतिबन्धकता भवति। अत्र यदि उच्यते प्रत्यक्षात्मकतद्वत्ताबुद्धावेव विशेषदर्शनस्य प्रतिबन्धकत्वं कल्पनीयम्। तन्नोचितम्। सामान्यरूपेणलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिसामान्यं प्रति तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वाभ्युपगमे कस्यचन बाधकस्याभावात्, अथ च बोध्यविषयाभावव्याप्यवत्तानिश्चयस्य तद्वत्ताविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकत्वस्यानुभवसिद्धत्वात्।

अत्रेदं विचिन्तनीयं लौकिकसन्निकर्षाजन्यं दोषविशेषाजन्यं च यत् तद्वत्ताबुद्धिरूपमाहार्यज्ञानं भवति तं प्रति विरोधिनिश्चयस्याप्रतिबन्धकत्वाभ्युपगमात्। यतो हि आहार्यज्ञानं न केनापि प्रतिबध्यं भवति, न वा कस्यापि प्रतिबन्धकं भवति, यथा घटाभाववद्भूतलमित्याकारकबाधनिश्चयसत्त्वदशायां तदुत्तरकाले यदि भूतले घटज्ञानं मे जायताम् इत्याकारिकेच्छा, तदुत्तरं घटवद्भूतलम् इत्याकारकं प्रत्यक्षं भवत्येव। अतः आहार्यज्ञानं नहि केनापि प्रतिबध्यं न वा कस्यापि प्रतिबन्धकम्। इत्थं घटाभाववद्भूतलम् इति बाधनिश्चयदशायां भूतले घटस्य चाक्षुषप्रत्यक्षं मे जायताम् इत्याकारकेच्छासत्त्वे घटवद्भूतलमित्याकारकमाहार्यचाक्षुषं तत्र जायते। अतः कथं तद्वत्ताबुद्धिम्प्रति तदभाववत्तानिश्चयस्य विरोधित्वमित्याशंकायामुच्यते आहार्यचाक्षुषप्रत्यक्षे चाक्षुषप्रत्यक्षविषयिण्याः इच्छायाः कारणत्वस्वीकारान्नहि इच्छारूपकारणमन्तरा विरोधिभूतबाधनिश्चयसत्त्वे घटवद्भूतलमित्याकारकं प्रत्यक्षं सम्भवति। प्रत्यक्षकारणीभूताया इच्छाया अभावात्। इच्छासत्त्वे च घटवद्भूतलमित्याकारकं ज्ञानं भवत्येव। अतः लौकिकसन्निकर्षाजन्यदोषविशेषाजन्य-अनाहार्यतद्वत्ताबुद्धिं प्रत्येव तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वान्नहि तादृशस्थले आहार्यचाक्षुषत्वानुपपत्तिः।

किञ्च यत्र विशेषदर्शनं तिरस्कृत्य विशेषदर्शनसत्त्वेऽपि तदधीनं स्मरणमपि तत्रानुभूयते तदा तादृशस्थले नहि विशेषदर्शनं तद्वत्ताबुद्धौ प्रतिबन्धकम्। इत्थं विशेषदर्शनकाले नाम एककोटिकव्याप्यवत्तानिश्चयकाले तस्य तद्वत्ताबुद्धेः प्रतिबन्धकतया नहि अपरकोटेरनुभवं कर्तुं शक्यते। तादृशानुभवं प्रति विशेषदर्शनस्य

प्रतिबन्धकत्वात्। यदि तत्र स्मरणस्यानुभव: तर्हि एवमभ्युपेयं यत् पूर्वसञ्जाततद्वत्तानुभवस्यैव विशेषदर्शनान्तरं स्मरणं जायते, न तु तद्विषयीभूतं विशिष्टं ज्ञानं भवति, यावद्विशेषदर्शनेन तत्राप्रामाण्यग्रहो जायते। तथा च ज्ञानत्वमेव विशेषदर्शनस्य प्रतिबध्यतावच्छेदकमभ्युपेयं न त्वनुभवत्वं विशेषदर्शनप्रतिबध्यतावच्छेदकम्, अनुभवत्वस्य जातित्वे प्रमाणाभावात्। यदि स्मृतिभिन्नज्ञानत्वमेव विशेषदर्शनप्रतिबध्यतावच्छेदकं स्वीक्रियते तदा गौरवं स्यात्। यथोक्तं दीधितिकृता न च प्रत्यक्ष एव तथा इति[१]। अर्थात् विशेषदर्शनप्रतिबध्यतावच्छेदकं प्रत्यक्षत्वमेव लाघवात्, इति कथनं न समीचीनं, सामान्यधर्मस्य ज्ञानत्वस्य तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबध्यतावच्छेदकत्वे कस्यचन बाधकस्याभावात्। तथा च तदभावव्याप्यवत्तानिश्चय: यथा तद्वत्ताप्रत्यक्षे प्रतिबन्धक: तथैव तद्वत्त्वविषयकशाब्दबोधेऽपि प्रतिबन्धको भवति। एवञ्च ज्ञानसामान्यं प्रति तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वाभ्युपगमादतिरिक्तप्रतिबन्धकत्वकल्पनाया: विरहात् व्यभिचारसन्देह: नहि कार्यकारणभावकल्पनायां विरोधिसम्भवतीति।

किञ्च लोके दृश्यते यदा उर्ध्वत्वादिरूपसामान्यधर्मज्ञाने जाते सति यदि विशेषदर्शनम् अर्थात् स्थाणुत्वव्याप्य-वक्रकोटरादिमानयम् अथ च पुरुषत्वव्याप्यकरादिमानयम् इत्याकारकविशेषदर्शनयोरभावे अयं स्थाणुर्वा पुरुषो वा इत्याकारकस्थाणुत्ववत्ताविषयकसंशय: जायते, तादृशसंशये स्थाणुत्वव्याप्यवक्र-कोटरादिमानयम् इत्याकारकविशेषदर्शने संशयो न जायते। अत: तद्वत्ताबुद्धिं प्रति विशेषदर्शनं प्रतिबन्धकम्। इत्थं तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्तानिश्चयस्य या प्रतिबन्धकता तत्र तद् व्याप्यवत्ताज्ञानस्योत्तेजकत्वमवश्यं स्वीकार्यम् अन्यथा कोटिद्वयव्याप्यदर्शनदशायां प्रत्यक्षात्मकोऽपि संशय: न स्यात्। यथा- वह्निव्याप्यधूमवानयं पर्वत: इत्येको कोटि: अपरा च वह्न्यभावव्याप्यजलवान् पर्वत: इत्याकारकविरोधिकोटिद्वयव्याप्यवत्ताज्ञानकाले संशय: समुत्पद्यते, स न स्यात्। यतो हि तत्प्रतिबन्धकस्य वह्न्यभावव्याप्यवत्तानिश्चयात्मककोटे: विद्यमानत्वात्। अत: वह्न्यभावव्याप्यवत्ता-निश्चयनिष्ठसंशयप्रतिबन्धकतायां वह्निव्याप्यधूमवान् पर्वत इत्याकारकनिश्चयाभावविशिष्टत्वं निवेशनीयम्। तथा निवेशे सति वह्निव्याप्यवत्तानिश्चयकालीनवह्न्यभाव-व्याप्यत्तानिश्चयस्य उत्तेजकाभावविशिष्टत्वेन प्रतिबन्धकत्वं संशयप्रत्यक्षं प्रति निश्चितम्। उत्तेजकस्य वह्निव्याप्यधूमवत्तारूपविशेषदर्शनस्य तत्र विद्यमानतया वह्निव्याप्यवत्तानिश्चयविरहविशिष्ट-वह्न्यभावव्याप्यवत्तानिश्चयस्याभावात् तादृशस्थले विशिष्टप्रतिबन्धकस्य वह्न्यभावव्याप्यवत्तानिश्चय-रूपस्याभावात् भवति संशय:। अत: तादृशस्थले संशयानुभवसत्त्वे नास्ति किञ्चिद्बाधकम्। एवञ्च सत्प्रतिपक्षस्थले उभयो: विरोधिपरामर्शयो: संवलनदशायामुत्तेजकस्यापि समवधानात् तत्र नहि वह्न्यभावव्याप्यवत्तानिश्चयेन वह्निमत्ताबुद्धे: अथवा वह्निव्याप्यवत्तानिश्चयेन वह्न्यभावानुमिते: प्रतिरोध:। अत: सत्प्रतिपक्षस्थले संशयानुमिति: निर्विघ्नैव। अत एवोक्तं दीधितिकृद्भि:[२] विशेषान्तरदर्शनविरहविशिष्टमेव विरोधिज्ञानं तद्वत्ताबुद्धे: प्रतिबन्धकं भवति। एवञ्च वह्निव्याप्यधूमवानयं पर्वत: इत्याकारकनिश्चयविरह-विशिष्टवह्न्यभावव्याप्यवत्तावह्निविधेयकानुमिते: प्रतिबन्धक:, एवं

वह्न्यभावव्याप्यवत्तानिश्चयविरहविशिष्टवह्निव्याप्यधूमवान् पर्वतः इत्याकारकनिश्चये एव वह्न्यभावानुमितेः प्रतिबन्धको भवति।

सत्प्रतिपक्षस्थले उत्तेजकप्रतिबन्धकयोः सहावस्थायित्वात् नहि वह्निमत्त्ववह्न्यभाववत्त्वविषयक-ज्ञानयोः प्रतिबन्धः सम्भवति। फलतः संशयानुमितिः स्यादित्याकारकजिज्ञासायां दीधितिकृतोक्तं यत् यावत्कालपर्यन्तं वह्निव्याप्यवत्तावह्न्यभावव्याप्यवत्त्वावगाहिपरामर्शयोरन्यतरस्मिन् अप्रामाण्यं गृह्यते तावत्कालपर्यन्तमनुमितेः नहि प्रतिरोधः। परन्तु परस्परविरोधिनोः परामर्शयोर्यद्येकस्मिन् परामर्शेऽप्रामाण्यं गृह्यते तदा भवति तदाकारानुमितेः प्रतिबन्धः। एवञ्चानयोः परामर्शयोरेकतरमप्रमा इत्येवं रूपेण सामान्यतः तत्राप्रामाण्यग्रहे जाते विशेषतः उभयत्रैवाप्रामाण्यस्य संशयो जायते। अतस्तत्र प्रत्यक्षसंशयः भवति, यतो हि अगृहीताप्रामाण्यकविशेषदर्शनस्यैव तद्वत्ताबुद्धौ प्रतिबन्धकत्वस्याभ्युपगमात्। अत एव अप्रामाण्यसंशयात् संशयारूपाऽनुमितिः नहि कथमपि सम्भवति। यतो हि अनुमितिं प्रति अगृहीताप्रामाण्यकपरामर्शस्यैव कारणत्वाभ्युपगमादुभयोर्परामर्शयोर्मध्ये एकस्मिन्नपि अप्रामाण्यग्रहे अपरेणागृहीताप्रामाण्यकेन विरोधिभूतेन परामर्शेणैतत् परामर्शस्य प्रतिरोधात् नहि संशयानुमितिः सम्भवति।

इदमत्रावधेयम्। पक्षधरमिश्रमते[3] तद्वत्ताबुद्धिम्प्रति तदभावव्याप्यवत्तानिश्चयः प्रतिबन्धकः। एतादृशप्रति-बन्धकतायां तद् व्याप्यवत्तानिश्चयस्योत्तेजकत्वं भवति। अतः तदभावव्याप्यवत्तानिश्चयसत्वेऽपि यदि तद् व्याप्यवत्तानिश्चयः जायते तदापि प्रत्यक्षसंशयो न भवति। तथैव तद् व्याप्यवत्तानिश्चयस्य तदभावव्याप्य-वत्तानिश्चयरूपस्य वा सत्वेऽपि न संशयानुमितिरुत्पद्यते। यतो हि व्याप्यवत्तानिश्चयः व्यापकवत्तानिश्चयस्य जनकः भवति। अतः वह्निव्याप्यवत्तानिश्चयेन पक्षधर्मिकवह्निमत्ताबुद्धिरेवोत्पद्यते, यतो हि तद् व्याप्यवत्तानिश्चयरूपं कारणं तद् व्यापकवत्तानिश्चयरूपकार्यस्यैव जनकं भवति, न तु तादृशव्याप्यवत्तानिश्चयरूपकारणेन कथमपि संशयाकारानुमितिः सम्भवति। यतो हि अवधारणत्वमनुमितौ व्याप्यदर्शनजन्यप्रत्यक्षे एव कारणं भवति। इत्थम् अवधारणस्वरूप-सामग्रीसमाजात् अवधारणात्मकज्ञानमेव सम्भवति न तु संशयः, अवधारणात्मक-ज्ञानस्य संशयभिन्नत्वात्। किञ्च एककोटिकावधारणात्मकनिश्चये तद्विरोधिकोट्यवधारणजनकीभूतस्य प्रतिबन्धकत्वाभ्युपगमात्। अस्यां परिस्थितौ विरोधिकोटिद्वय-साधनीभूतविरोधिकोटिद्वयविषयकावधारणात्मकनिश्चयस्य कथमप्यसम्भवात्, द्वयोः विरोधिनोः एकत्रैकस्मिन्नधिकरणेऽविद्यमानत्वात्। यदि विरोधिनोः तद् व्याप्यवत्तानिश्चयतदभावव्याप्यवत्तानिश्चययोः एकस्मिन्नधिकरणे विद्यमानत्वं स्वीक्रियते तर्हि तयोः परस्परं प्रतिबध्य-प्रतिबन्धकभावोऽपि न स्यात्। यदि तद् व्याप्यवत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च एकत्रावस्थितिः स्वीक्रियते तर्हि उभयकोटिविषयकनिश्चयात्मकावधारणज्ञानमेव स्यात्। एतद् विषये इष्टापत्तिमपि कर्त्तुं न शक्यते, यतो हि यत्रोभयकोटिकव्याप्यवत्ताज्ञानं भवति तत्र संशयस्यैवोत्पद्यमानतया अथ च अवधारयामि इत्याकारकनिश्चयानुव्यवसायस्याननुभूयमानत्वेन कोटिद्वयव्याप्यवत्तानिश्चयस्थले च तद् व्याप्यवत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानेन अप्रयोजकतया विशेषदर्शनदशायां यथा विशेषणज्ञानादिघटितयादृशसामग्रीसमाजात्

प्रत्यक्षात्मकसंशयो जायते तादृशकोटिद्वयव्याप्यवत्तानिश्चयस्थलेऽपि विद्यमानतया भवति तादृशस्थले संशयात्मकं प्रत्यक्षम्। किन्तु अनुमितिस्थले अवधारणात्मकनिश्चयस्थलसामग्र्यतिरिक्ता काचन सामग्री नहि कल्पिता, प्रयोजनाभावात्। अस्यां परिस्थितौ तत्र स्थले नहि काचन संशयानुमितिः भवितुमर्हति।

इदमत्र विचिन्तनीयं, यत्र विशेषादर्शनदशायां विरोधिकोटिद्वयजनकीभूतायाः सामान्यसामग्र्याः संशयो जायते तत्र संशये विशेषणज्ञानादिघटिता सामग्र्यपि विद्यते। अतः प्रत्यक्षात्मकसंशयस्तु भवति परन्त्वनुमितिस्थले उभयकोटिव्याप्यवत्ताज्ञानातिरिक्तं किञ्चिदन्यत्कारणं नापेक्षते। अतः तत्र परस्परं वह्निव्याप्यवत्ताज्ञानेन वह्न्यभावानुमितेः प्रतिबन्धः, एवं तादृशेन वह्न्यभावव्याप्यवत्ताज्ञानेन तदनुमितेरपि प्रतिबन्धः जायते। अतएव कथमपि परस्परविरुद्धोभयकोटिविधेयिका एव धर्मिका संशयाकारानुमितिः कथं भवेदिति।

वस्तुतः पक्षधरमिश्रमते[४] अवधारणत्वं तावन्नहि सामान्यतः निश्चयत्वं, यतः विपरीतकोटेः अनुमितिदशायां विशेषदर्शनानधीननिश्चयोत्तरम् अवधारयामि इत्याकारक अनुव्यवसायः नोत्पद्यते, किन्तु निर्णयत्वम् उत्कटनिश्चयत्वम्। उत्कटता च विषयताविशेषरूपैव, विषयतातिरिक्तस्य कस्यचिदन्यस्य औत्कट्यस्य विवेचयितुमशक्यत्वात्। अतः विषयताविशेषरूपौत्कट्यविशिष्टनिश्चयत्वमेव प्रत्यक्षानुमितिसाधारणः, व्याप्यवत्तानिश्चयस्य प्रतिबध्यतावच्छेदकश्च भवति। अत्र च निश्चिनोमि अवधारयामि इति प्रतीत्योः समानाकारतया निश्चयत्वमेव अवधारणत्वमभ्युपेयम्। इत्थं मिश्राणामेतन्मतं यत् विषयताविशेषरूपौत्कट्यविशिष्टनिश्चयत्वमेव अवधारणत्वमित्यस्मिन् मते नहि दीधितकृतां निर्भरत्वमिति।

अत्रेदमपि विचारणीयं यत् विरोधिनः ज्ञानस्य विद्यमानतादशायामपि यदि तद्वत्त्वबुद्धिविषयिणी इच्छा जायते, तदा आहार्यज्ञानमुत्पद्यते। यथा ह्रदो वह्न्यभाववान् इत्याकारकबाधनिश्चयस्य सत्वेऽपि ह्रदे वह्निज्ञानं मे जायताम् इत्याकारिका इच्छा यदा जायते तदा वह्न्यभाववान् ह्रदः वह्निमान् इत्याकारकमाहार्यज्ञानमुत्पद्यते। तन्निर्वाहाय अनाहार्यत्वमपि प्रतिबध्यतावच्छेदककोटौ निवेशनीयम्। तच्च अनाहार्यत्वं स्वविषयत्वस्वाव्यवहितोत्तरत्वोभयसम्बन्धेन इच्छाविशिष्टप्रत्यक्षत्वरूपं वाच्यम्। एवञ्च अनाहार्यकिञ्चिद्विशेष्यककिञ्चिद्धर्मप्रकारकतद्वत्ताबुद्धिम्प्रति तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वं वाच्यम्। तादृशानाहार्यत्वस्य च स्वत्वघटिताव्यवहितोत्तरत्वघटितत्वेनानुगतस्य प्रतिबध्य-प्रतिबन्धकभावस्य दुर्वचतया स्वत्वस्य तत्तद्-व्यक्तौ अनुगतधर्मत्वाभावात् तत्तद्-व्यक्तित्वेनैव तद्वत्ताबुद्धेः प्रवेशः कर्तव्यः। तथा च स्वाव्यवहितोत्तरत्वस्वविषयत्वोभयसम्बन्धेन तत्तदिच्छाव्यक्तिविशिष्टप्रत्यक्षभिन्नत्वरूपमनाहार्यत्वं प्रतिबध्यतावच्छेदककोटौ अवश्यं निवेशनीयम्। एवञ्च तत्तदिच्छान्यव्यक्तिस्वरूपाणां प्रतियोगिनामसंख्यतया तत्समसंख्यभेदानां प्रतिबध्यतावच्छेदककोटौ निवेशनीयतया महद्गौरवमापद्येत। यथोक्तं भट्टाचार्यैः[५] इदं त्ववधेयम्। विरोधिज्ञानदशायामाहार्य-ज्ञानोपपत्तये यदि निरुक्तमनाहार्यत्वं प्रतिबध्यतावच्छेदककोटौ निवेश्यते तदा तस्याव्यवहितोत्तरत्वघटिततयाऽव्यवहितोत्तरत्वस्य चानुगतस्य दुर्वचतया इच्छाव्यक्तिसमसंख्यभेदानां निवेशनीयतया महागौरवम्, इच्छायाः आहार्यज्ञानसामग्रीघटकतानिर्वाहाय तस्याः तद्धेतुताधिक्यं चेति इच्छाया उत्तेजकत्वपक्ष एव समुचितः इति। तथा च इच्छायाः आहार्यज्ञानजनकत्वेन आहार्यज्ञानसामग्रीघटकत्वनिर्वाहाय

इच्छायाः आहार्यज्ञानहेतुताधिक्यमपि प्रवेशनीयम्। इत्थं गुरुभूतस्यानाहार्यत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशापेक्षया इच्छायाः उत्तेजकत्वेन निवेश एव उचितः। तथा च प्रत्यक्षशाब्दादिसाधारणः न प्रतिबन्धकतैक्यसम्भवः। यतः विरोधिज्ञानसत्त्वे चाक्षुषत्वादिप्रकारकेच्छासत्त्वे स्पार्शनप्रत्यक्षं न जायते। अतः तत्तद्-जातीयप्रत्यक्षेच्छानां विशेषतः उत्तेजकत्वमभ्युपेत्य विरोधिविशेषदर्शनस्य तत्तद्-जातीयप्रत्यक्षं प्रति पृथक्-पृथक् प्रतिबन्धकतायाः अवश्यं कल्पनीयत्वात्। प्रत्यक्षस्थले एककोटिनिश्चयविषयकेच्छाविरहविशिष्ट-अपरविशेषदर्शनस्य पूर्वकोटिप्रतिबन्धकतया संशयः न जायते, अपि तु एककोटिव्याप्यवत्तारूप-विशेषदर्शनाभावदशायां यदि तदभावस्वरूपापरकोटिव्याप्यवत्तानिश्चयः जायते तर्हि तद्व्याप्यवत्ताकोटितः जायमानस्य तत्कोटिविषयकज्ञानस्य विरोधिकोटिव्याप्यवत्ताज्ञानेन प्रतिरोधान्नहि तत्र संशयः सम्भवति। अनुमितिस्थले च पृथक्प्रतिबन्धकतायाः अप्रामाणिकत्वात् संशयानुमितिर्दुर्वारैव स्यादिति।

अत्र यदि स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षण-ध्वंसाधिकरणक्षणवृत्तित्वरूपमव्यवहितोत्तरत्वं निवेश्यते तदा अननुगमः। यदि च स्वाभावप्रतियोगित्व-स्ववृत्तिमत्त्व-स्वविषयत्व-स्वसमानाधिकरण्यैतच्चतुष्टयसम्बन्धेन इच्छाविशिष्टत्वमनुगताव्यवहितोत्तरत्वमित्येवं रूपमव्यवहितोत्तरत्वं निवेश्य प्रतिबध्य-प्रतिबन्धकभावः समाधत्ते तर्हि तथाविधाव्यवहितोत्तरत्वघटितेच्छाविशिष्टप्रत्यक्षान्यत्वरूपस्य अनाहार्यत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशे नहि गौरवम्। तथापि चाक्षुषस्पार्शनादिभेदेन प्रत्यक्षस्य षड्विधत्वेन प्रत्यक्षस्थले चाक्षुषप्रत्यक्षेच्छाविरहविशिष्टतदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं, तदभावनिश्चयत्वेन च प्रतिबन्धकाभावमुद्रया चाक्षुषं प्रति कारणत्वं वाच्यम्। इत्थमेव षड्विधप्रत्यक्षस्थले तत्तत्प्रत्यक्षेच्छाविरहविशिष्टतदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वम्, एवं तदभावव्याप्यवत्ता-निश्चयरूपप्रतिबन्धकाभावस्य कारणत्वं वाच्यम्। इत्थं कारणत्वप्रतिबन्धकत्वकल्पनया गौरवं स्यादतः चाक्षुषेच्छात्वादिलघुधर्मपुरस्कारेण कारणताषट्कस्य इच्छाविशिष्टान्यज्ञानत्वावच्छिन्नं प्रति विरोधिनिश्चयाभावत्वेन कारणत्वकल्पने भवति लाघवम्। अस्यां परिस्थितौ विरोधिनिश्चयप्रतिबन्धकता-वच्छेदककोटौ विरोधिनिश्चयविशिष्टान्यतद्वत्ताबुद्धिरेव निवेश्यते। तथा च अव्यवहितोत्तरत्वसम्बन्धेन विरोधिनिश्चयविशिष्टान्यतद्वत्ताबुद्धिम्प्रति विरोधिनिश्चयः प्रतिबन्धकः। इत्थं प्रतिबध्य-प्रतिबन्धकभावे स्वीकृते सति अत्र प्रतिबध्य-प्रतिबन्धकभावे दोषविशेषाजन्यत्वस्याप्यनिवेशाद् भवति लाघवम्। यथोक्तं गदाधरैः[२] तदाऽव्यवहितोत्तरत्वसम्बन्धेन विरोधिनिश्चयानवच्छिन्नत्वमेव तत्प्रतिबध्यतावच्छेदकमङ्गीक्रियताम्, तथा सति दोषविशेषाजन्यत्वादेरप्यनिवेशनीयता लाघवात् इति। एवञ्च यदा साध्यव्याप्यवत्तानिश्चयः साध्याभावव्याप्यवत्तानिश्चयश्च विद्यते तदानीं संशयानुमितेः स्वीकारेऽपि तादृशप्रतिबन्धकाभावरूपकारणस्य नहि व्यभिचारः। विरोधिपरामर्शाभावेन अघटिताया एवानुमितिसामग्र्याः अनुमित्युत्पत्तिप्रयोजकत्वस्वीकारात् तादृशस्थले नहि व्यभिचारशंकावकाशः। प्रकृतानुमितौ विरोधिनिश्चयविशिष्टान्यत्वस्याभावात् नहि संशयानुमितित्वमेतादृशप्रतिबन्धकतानिरूपित-प्रतिबध्यतावच्छेदकाक्रान्तम्। यतो हि

विरोधिपरामर्शाभावाघटिताया एवानुमितिसामग्रया: अनुमित्युत्पत्तिप्रयोजकत्वस्वीकारात्। प्रकृते च विरोधिपरामर्शाभावेनाघटितैव सामग्री विद्यते। अत: उभयपरामर्शसत्त्वेनउभयपरामर्शेण जायमानाया: संशयाकारानुमिते: विरोधिनिश्चयविशिष्टान्य-त्वस्याभावान्नहि संशयानुमिते: एतादृशविरोधिनिश्चयेन प्रतिबध्यता सम्भवति। अत: वह्निव्याप्यधूमवान् पर्वत:, वह्न्यभावव्याप्यजलवान् पर्वत: इत्याकारकविरोधिभूतपरामर्शद्वयसम्वलनदशायां भवति संशयाकारानुमिति: इत्येवं रत्नकोषकारा: प्रतिपादयन्ति।

इत्थमव्यवहितोत्तरत्वसम्बन्धेन विरोधिनिश्चयविशिष्टान्यतद्वत्ताबुद्धिम्प्रति तद्विरोधिनिश्चयस्य प्रतिबन्धकत्वाभ्युपगमेन वह्न्यभावव्याप्यवान् पर्वत: इत्याकारकाश्रयासिद्धि: यादृशस्थले विद्यते तत्र वह्निमान् पर्वत: घटवान् इत्याकारिकाऽनुमितिर्न जायते। तादृशानुमितेर्वारणाय वह्निप्रकारकानुमितावपि वह्न्यभावव्याप्यवान् पर्वत: इत्याकारकनिश्चयस्य प्रतिबन्धकत्वमवश्यमेव स्वीकरणीयम्। एवञ्च वह्निप्रकारकसंशयानुमितिं प्रत्यपि वह्न्यभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वमवश्यमेव स्वीकरणीयम् अतो न संशयानुमितेस्सम्भावना, इति कथनमपि नहि साधु प्रतिभाति। विरोधिनिश्चयविशिष्टान्यतद्वत्ताबुद्धित्वेन प्रतिबध्यताया उक्तप्रतिबध्य-प्रतिबन्धकभावे निविष्टतया एतादृशसंशयानुमितेरपि विरोधिनिश्चयविशिष्टान्यानुमितिपदेन धर्तुं शक्यतया, यो हि संशयानुमिते: वारणं क्रियते तन्न समीचीनम्। यतो हि संशयानुमितिस्तावत् विरोधिनिश्चयविशिष्टैव जाता, न तु विरोधिनिश्चयविशिष्टान्या। अतो न तत्र विरोधिनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यता-वच्छेदकाक्रान्तत्वम्। एवञ्च नहि तत्र संशयानुमितिप्रसङ्ग:। तदभावव्याप्यवत्तानिश्चयस्य विरोधिनिश्चया-नवच्छिन्नबुद्धे: प्रतिबन्धकतायां फलानुरोधेन साध्यविशिष्टपक्षकानुमितिसामग्र्या तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकतया तादृशतदभावव्याप्यवत्तानिश्चयाभावस्यानुमिति-सामग्र्यामन्तर्भावेऽपि प्रयोजनविरहात् घटविधेयकानुमितिसामग्र्या: तदन्तर्भावानुपगमादत: भवति संशयानुमितेरुपपत्ति:।

अत्रेदं विचिन्त्यम्। तदभावव्याप्यवत्तानिश्चयस्य प्रत्यक्षस्थले या विरोधिज्ञाननिष्ठप्रतिबन्धकता विद्यते तत्र प्रतिबन्धकतायामिच्छानामुत्तेजकत्त्वम्। एतादृशमतावलम्बिनामयमाशय: प्रत्यक्षविरोधिन्या: तदभावव्याप्यवत्तानिश्चयात्मकसामग्रया: सत्वेऽपि यदि तत्प्रकारकं प्रत्यक्षं मे जायतामितीच्छा विद्यते, तदा प्रत्यक्षो भवति। अत: प्रत्यक्षात्मकज्ञानं प्रति तदभाववत्तातदभावव्याप्यवत्तानिश्चयनिष्ठप्रति-बन्धकतायाम् इच्छाविरहविशिष्टत्वं निवेशनीयम्। तथा च प्रत्यक्षविषयिण्यामिच्छायां सत्यां तदभावव्याप्यवत्तानिश्चय: तत्प्रकारकप्रत्यक्षे न प्रतिबन्धक:, इत्येवं प्रतिबध्यप्रतिबन्धकभाव: स्वीक्रियते। एवमेव परोक्षशाब्दादिबोधस्थले तदभावव्याप्यवत्तानिश्चयनिष्ठाया: प्रतिबन्धकताया: निरूपिता प्रतिबध्यतावच्छेदकता प्रत्यक्षान्यत्वविशिष्टज्ञानत्वे एव स्वीकरणीयम्, न तु तत्प्रकारकशाब्दत्वावच्छिन्नं प्रति तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकता। न वा तदभावप्रकारका-नुमितित्वावच्छिन्नं प्रति विरोधिनिश्चयस्य प्रतिबन्धकत्वम्। एवं यदि स्वीक्रियते तदा शाब्दत्वादिनानाधर्मावच्छिन्नप्रतिबध्यताया: निवेशे गौरवप्रसङ्गात्। एवञ्च नहि विरोधिपरामर्शद्वय-निश्चयदशायां संशयानुमितित्वप्रसङ्ग:।

अत्रेयमाशङ्का जायते यत् प्रत्यक्षान्यत्वज्ञानत्वयो: विद्यमाना या प्रतिबध्यतावच्छेदकता सा

प्रत्यक्षान्यत्वविशिष्टज्ञानत्वे एवाभ्युपेया अनतिप्रसक्तत्वात्। तत्र च प्रत्यक्षान्यत्वविशिष्टज्ञानत्वेन, ज्ञानत्वविशिष्टप्रत्यक्षान्यत्वेन वा प्रतिबध्यत्वमित्यत्र विनिगमनाभावात् पृथक् पृथगेव प्रत्यक्षान्यत्वज्ञानत्वयोः प्रतिबध्यतावच्छेदकत्वं वक्तव्यमित्येवं वक्तुं न शक्यते, प्रत्यक्षान्यत्ववैशिष्ट्यस्य गुणत्वादावपि विद्यमानतया यदि प्रत्यक्षान्यत्ववैशिष्ट्येन रूपेण ज्ञानत्वस्य निवेशः क्रियते तदा इतरव्यावृत्तेरसम्भवात् ज्ञानत्वस्य च विशेष्यत्वे तत्र ज्ञानत्वस्य विशेष्यतावच्छेदकरूपेण निवेशनीयतया गौरवं स्यात्। अतो नहि प्रत्यक्षान्यत्वविशिष्टज्ञानत्वेन प्रतिबध्यता अपि तु स्वतो व्यावृत्तज्ञानत्वविशिष्ट-प्रत्यक्षान्यत्वस्यैव प्रतिबध्यतावच्छेदकत्वमभ्युपेयम्।

केषाञ्चिन्मते[७] महानसीयवह्निर्नास्तीति महानसीयवह्निनिष्ठप्रतियोगितायां महानसीयत्वविशिष्टत्वेन वह्नि-त्वस्यानुपस्थितिदशायामपि यथा धर्मीभूतमहानसीयवह्निरूपप्रतियोगिविशेषणीभूतेषु महानसीयत्व-वह्नित्वादिधर्मेषु परस्परं विशेष्यविशेषणभावानापन्नेष्वपि भवति महानसीयत्वे वह्नित्वे च प्रतियोगिता-वच्छेदकत्वम्। तादृशस्थले केवलस्य महानसीयत्वस्य वह्नित्वस्य वा महानसीयवह्निनिष्ठप्रतियोगिताया अतिप्रसक्तत्वेऽपि अवच्छेद्यभूतायां महानसीयवह्न्यभावीयप्रतियोगितायां महानसीयत्ववह्नित्वरूपनाना-धर्माणामवच्छेदकत्वं भवति, यतो हि एतादृशस्थले महानसीयत्ववह्नित्वरूपसमुदायस्यैवानतिप्रसक्तत्वेन प्रतियोगितावच्छेदकत्वकल्पनात्। यद्यपि महानसीयवह्निर्नास्तीत्यत्रावच्छेदकस्य महानसीयत्वस्य विशेषणसम्बन्धस्य च भिन्नतया महानसीयत्ववह्नित्वनिष्ठावच्छेदकतायाः भिन्नत्वेऽपि तादृशमहानसीयत्ववह्नित्वोभयनिष्ठावच्छेदकतानिरूपितायाः महानसीयवह्न्यभावीयप्रतियोगिताया अवच्छेद्यभूताया न भेदः स्वीक्रियते। यतो हि अवच्छेद्यप्रतीतौ अवच्छेदकप्रकारीभूता विषयता यदि भिन्ना-भिन्ना भवति तदैव अवच्छेद्यस्य भेदः, अवच्छेदकस्य भेदेन विशेषणसम्बन्धस्य च भेदेन अवच्छेद्यभूता प्रतियोगिता भिन्नाभिन्ना न भवति। प्रकृते महानसीयवह्निर्नास्तीत्याकारकप्रतीतौ नानाधर्मप्रकारकसमूहालम्बनज्ञानावृत्तिवह्न्यादिनिष्ठविषयताया ऐक्यात् नहि तत्र महानसीयवह्न्यभावीय-महानसीयवह्निनिष्ठायाः महानसीयत्ववह्नित्वोभयावच्छिन्नायाः प्रतियोगितायाः भेदः, अपित्वैक्यमेव।यथा तत्र महानसीयवह्निर्नास्तीति प्रतीतौ महानसीयवह्निनिष्ठप्रतियोगितानिरूपिताऽवच्छेदकता महानसीयत्वे वह्नित्वे च एकैव, तथैव प्रकृते प्रत्यक्षान्यविशिष्टज्ञानत्वावच्छिन्नात्मकधर्मिविशेषणताऽपन्ने परस्परं विशेष्यविशेषणभावानापन्नयोरपि प्रत्यक्षान्यत्वज्ञानत्वयोः तादृशज्ञाननिष्ठप्रतिबध्यतानिरूपिता-वच्छेदकतायाः प्रत्यक्षान्यत्वे ज्ञानत्वे च सत्त्वे नहि किञ्चिद्बाधकम्। अत एतदुभयधर्मावच्छिन्नप्र-तिबध्यताया ऐक्यमित्येवं केचन प्रतिपादयन्ति। तन्मतं निराकर्तुमाह गदाधरः तन्न। प्रत्यक्षान्यत्वसहित-ज्ञानत्वेन धर्मिणो युगपदुद्भावने एकतरस्यापरधर्मितावच्छेदकत्वभानमावश्यकं समूहालम्बनविलक्षणनिर्धर्मितावच्छेदककोभयभानस्या-प्रामाणिकत्वादिति प्रत्यक्षान्यत्वधर्मितावच्छेदकतापन्नज्ञानत्व-प्रकारिकाया ज्ञानत्वधर्मिकावच्छेदकतापन्न-प्रत्यक्षान्यत्वप्रकारिकायाश्च धर्मिविषयतायाः भेदेन प्रतिबध्यताभेदस्यावश्यकत्वात्[८]। इति। अयमाशयः प्रत्यक्षान्यत्वविशिष्टज्ञानत्वेन तदभावव्याप्य-वत्तानिश्चयरूपविरोधिनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताया अभ्युपगमे यदि धर्मिणः युगपदुद्भावनं क्रियते तदैकत्रापरधर्मितावच्छेदकत्वभानमावश्यकम्। यदि प्रत्यक्षान्यत्वविशिष्टज्ञानत्वेन प्रतिबध्यता स्वीक्रियते, तदा ज्ञानं धर्मि, अथ च प्रत्यक्षान्यत्वं धर्मितावच्छेदकत्वेन भासते।

यदि ज्ञानत्व-विशिष्टप्रत्यक्षान्यत्वेन प्रतिबध्यता स्यात् तदा प्रत्यक्षान्यत्वं धर्मी, तदवच्छेदकतया ज्ञानत्वं भासते, न तु केवलं प्रत्यक्षान्यत्वं ज्ञानत्वञ्च पृथक्-पथक् प्रतिबध्यतावच्छेदकं भवति। यतो हि समूहालम्बनतः भिन्नज्ञाने निर्धर्मितावच्छेदकत्वेनोभयभानं नहि प्रामाणिकम्, विरोधिज्ञानवत् विरोधिज्ञानसामग्र्याः तद्वत्ताबुद्धिसामान्यं प्रति प्रतिबन्धकत्वाभ्युपगमे लौकिकसन्निकर्षजन्यः प्रत्यक्षात्मकसंशयोऽपि नहि सम्भवति। लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिसामान्यं प्रत्येव विरोधिबोधिकायाः तदभावव्याप्यवत्तानिश्चय-सामग्रयाः प्रतिबन्धकत्वस्वीकारात्। इत्थं सत्प्रतिपक्षसंवलनदशायां नहि संशयाकारानुमितिः सम्भवति। साध्याभावव्याप्यवत्तापरामर्शरूपायाः विरोधिभासकसामग्र्याः प्रतिबन्धकीभूतायाः विद्यमानत्वात्। यतो हि संशयानुमितिः नहि लौकिकसन्निकर्षजन्या, न वा दोषविशेषजन्या, यतः प्रतिबध्यतावच्छेदकानाक्रान्ता स्यादतः संशयानुमितेरपि प्रतिबध्यतावच्छेदका-क्रान्ततया नहि संशयानुमितिः तादृशस्थले सम्भवति। अत्र केचन[1] प्रतिपादयन्ति यत् वह्नित्वेन अभावत्वेन च यदा व्यापकत्वग्रहः अर्थात् वह्निव्याप्यवान् पर्वतः एतादृशः यदा परामर्शो जातः तदानीमेव अभावव्याप्यवान् इत्याकारकोऽपि परामर्शः, तत्र यद्यनुमितेः महानसीयवह्निविषयकत्वे महानसीयवह्न्यभावविषयकत्वे च लाघवम् इति लाघवज्ञानदशायां यत्र सत्प्रतिपक्षता विद्यते तादृशस्थले महानसीय-वह्निमान् न वा इत्याकारिका संशयानुमितिर्भवति। एतादृशस्थले संशयानुमितेः तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वं कल्पयित्वा नहि वारयितुं शक्यते। यतो हि शुद्धवह्निव्याप्यवत्तानिश्चयरूपस्य अथवा अभावव्याप्यवत्तानिश्चयरूपस्य विरोधिनिश्चयस्य भिन्नविषयकत्वात् महानसीयवह्न्यभाववत्ताबुद्धिं प्रति महानसीयवह्निमत्ताबुद्धिम्प्रति वा प्रतिबन्धकत्वासम्भवः।

अत्रेदं बोध्यम्। साध्यव्याप्यवत्ताज्ञानरूपविरोधिज्ञानेन नहि सर्वत्र संशयाकारानुमितिवारयितुं शक्यते। यतो हि यादृशस्थले वह्निव्याप्यधूमवानयम्, अभावव्याप्यजलवानयम् इत्याकारकपरामर्शद्वयं विद्यते तादृशस्थले महानसीयवह्निविषयिण्याः महानसीयवह्न्यभावविषयिण्याश्चा-नुमितेरभ्युपगमे लाघवम्, एतादृश लाघवज्ञानसत्त्वे तादृशस्थले पर्वतः महानसीयवह्निमान् न वा इत्याकारिका संशयानुमितिर्भवति। यतो हि वह्निव्याप्यधूमवानयम् इत्याकारकविरोधिपरामर्शरूपा सामग्री वह्न्यभावानुमितिं प्रत्येव विरोधिनी भवति, न तु महानसीयवह्न्यभाव-विषयिणीमनुमितिम्प्रति। किञ्च अभावव्याप्यवानित्याकारिका विरोधिपरामर्शरूपा सामग्री भावविधेयकामनुमितिं प्रत्येव प्रतिबन्धिका, न तु महानसीयवह्न्यभावविधेयकानुमितिम्प्रति प्रति प्रतिबन्धिका। अतः एतादृशस्थले उभयविधपरामर्शाज्जायमानायाः महानसीयवह्निमान् न वा इत्याकारकसंशयानुमितेः परिहारः कथमपि कर्तुं न शक्यते।

यद्यपि महानसीयवह्न्यभावानुमितेः लाघवज्ञानघटितसामग्रीसंवलनदशायां महानसीयविषयकप्रत्यक्षं जायताम्, शाब्दज्ञानं वा जायताम् इत्याकारकेच्छाया असत्त्वदशायाम्, अथ च द्वितीयेच्छायाः सत्त्वदशायां नहि प्रत्यक्षमुत्पद्यते। अतः प्रत्यक्षादीच्छाया उत्तेजकविधया प्रतिबध्यतावच्छेदककोटावश्यं निवेशनीयम्। तदेवोक्तं यत् लाघवज्ञानघटितविरोधिभूताया अनुमितेः यदि सामग्री विद्यते तदा प्रत्यक्षशाब्दादयः न जायन्ते। अतः तादृशसाम्ग्र्याः प्रत्यक्षशाब्दादिबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकत्वं कल्पनीयम्।

एवञ्चानुमितिसाधारणाव्यवहितोत्तरत्वसम्बन्धेन तद्विशिष्टजिज्ञासानवच्छिन्न-तद्विशिष्टबुद्धित्वस्यैव प्रतिबध्यतावच्छेदकत्वोपगमान्नहि संशयानुमितेः सम्भावनापि भवितुमर्हति।

इदमत्रावधेयम् यथा व्याप्यधर्मावच्छिन्ने कार्ये जननीये व्यापकधर्मावच्छिन्नकार्योत्पादकसामग्री अपेक्षिता भवति तथैव व्याप्यधर्मावच्छिन्ने कार्ये व्यापकधर्मावच्छिन्नकार्योत्पादकसामग्र्याः प्रतिबन्धकत्वमभ्युपेयते। इत्थञ्च अभावव्याप्यजलवान् ह्रद इत्याकारिका या अभावत्वप्रकारकह्रदविशेष्यकानुमितिसामग्री तादृशसामग्रीकाले नहि मानसीयवह्निविषयक-प्रत्यक्षसम्भवः। यतो हि लाघवज्ञानघटिततादृशसामग्रीव्यापिकायाः शुद्ध अभावत्वव्याप्यजलवान्ह्रद इत्याकारकपरामर्शघटितायाः व्यापकधर्मावच्छिन्नोत्पादकसामग्र्याः प्रतिबन्धकत्वाभ्युपगमात्। तथैव सामग्र्या प्रतिबन्धादेव न तादृशं महानसीयवह्निविषयकं प्रत्यक्षं सम्भवति। एवञ्च महानसीयवह्निविषयक-प्रत्यक्षस्य तद्विषयकशाब्दस्य च तद्विषयकजिज्ञासाविशिष्टभिन्नतद्विषयकबुद्धिमात्रं प्रति लाघवज्ञानघटिततद्विरोध्यनुमितिसामग्र्याः नहि पृथक् प्रतिबन्धकत्वं कल्पनीयं, येन संशयानुमितेरनुपपत्तिः स्यात्। एवञ्चोक्तदशायां संशयाकारानुमितेः वारणं नहि कर्तुं शक्यते। इत्थं तत्प्रतिबध्यतावच्छेदककोटौ महानसीयवह्नित्वावच्छिन्नविषयकमहानसीयवह्निप्रकारकानुमितिभिन्न-तद्विषयकबुद्धित्वस्यैव निवेशनीयतया संशयानुमितिरत्र निष्प्रत्यूहैव जाता।

किञ्च यद्धर्मे व्यापकतावच्छेदकत्वज्ञानं जायते तद्धर्मावच्छिन्नविधेयताकैवानुमितिर्भवतीति नियमात् लाघवज्ञानसहकृतमहानसीयवह्न्यभावादिप्रकारकानुमितौ महानसीयवह्न्यभावत्वस्यापि विधेयता-वच्छेदकत्वमभ्युपेयम्। एवञ्च शुद्धाभावप्रकारिका या सिद्धिः तस्यां सिद्धौ विद्यमानायां नहि शुद्ध-अभावत्वावच्छिन्न-विधेयिकानुमितिर्जायते। अतः शुद्ध-अभावत्वप्रकारकसिद्धेः समवधानदशायां नहि शुद्ध-भावत्वावच्छिन्न-विधेयकानुमितेः साम्ग्र्याः सम्भवः। तदानीमेव लाघवज्ञानस्य विद्यमानत्वे प्रत्यक्षवारणाय लाघवज्ञानघटितसामग्र्याः पृथक्प्रतिबन्धकत्वकल्पनमावश्यकं भवति। तथापि लाघवज्ञानघटितविरोधिकोटिद्वयानुमित्योः सामग्र्याः सत्त्वदशायां प्रत्यक्षादिवारणाय लाघवज्ञान-घटितायाः तथाविधसामग्र्याः पृथक् प्रतिबन्धकत्वकल्पनमावश्यकं भवति। एवञ्च यदा लाघवज्ञानसहकृता कोटिद्वयानुमित्योः सामग्री विद्यते तद्दशायां प्रत्यक्षशाब्दबोधोत्पत्या एककोटिसाम्ग्र्यामपरकोटिसामग्र्यभावनिवेशस्यावश्यकत्वेन कथं तेन प्रतिबन्धात् संशयानुमितेः वारणं कर्तुं शक्यते।

विषयेऽस्मिन् केचन नैयायिकाः एवं प्रतिपादयन्ति यत् विरोधिविषयकनिश्चयानन्तरं तद्वत्ताबुद्धिर्यथा नोत्पद्यते तथैव विरोधिविषयकनिश्चयजनकसामग्र्यनन्तरमपि इच्छायाः सत्त्वेऽपि किमपि शब्दात्मकमनुमित्यात्मकं वा परोक्षज्ञानं नोत्पद्यते। अस्यामवस्थायां लाघवज्ञानसहकृतविरोधिकोट्यमनु-मितिजनकसामग्रीसत्त्वदशायामिच्छायाः विद्यमानत्वेऽपि नहि तद्वत्ताविषयकशाब्दबोधः अनुमितिर्वा जायते, किन्तु विरोधिकोटिविषयिणी अनुमितिरेव तत्र जायते इति फलानुरोधेन इच्छाभावम् इच्छानवच्छिन्नत्वं वा प्रतिबध्ये विशेषणमनिवेश्य लाघवज्ञानघटितविरोधिविषयकज्ञानजनकसामग्र्याः शाब्दानुमित्यात्मकपरोक्षज्ञाने

प्रतिबन्धकत्वान्तरकल्पनमावश्यकं भवति। इत्थञ्च तादृशविरोधिसामग्री-प्रतिबध्यतावच्छेदकत्त्वस्य परोक्षत्वस्यानुमितिसाधारणत्वेन विरोधिबोधकसामग्रीकाले नहि संशयानुमितिप्रसङ्गः इति मतं निरस्तमेव[१०]। यतोहि विरोधिविषयकनिश्चयजनकीभूतसामग्र्याः सत्वे परोक्षज्ञानोत्पत्यभावस्याप्रामाणिकत्वात्। अत्र सारांशतः इदमेव वक्तुं शक्यते यत् यथा तद्वत्ताबुद्धिम्प्रति तदभाववत्तानिश्चयः प्रतिबन्धको भवति तथैव तदभाववत्ताबोधजनकीभूततदभावव्याप्यवत्ताज्ञानरूपायाः सामग्र्याः परोक्षज्ञानसामान्यं प्रति प्रतिबन्धकत्वेन नहि तत्र संशयानुमितेः सम्भवः, इति यत् केनचित् तार्किकेन संशयानुमितेः नोत्पत्तिसम्भव इत्युक्तं तदपि नहि विचारसहम्। यतो हि यदि विरोधिविषयकनिश्चयजनिकायाः सामग्र्याः तद्वत्ताबुद्धौ प्रतिबन्धकता निश्चिता भवेत् तदा तदभावव्याप्यवत्तानिश्चयरूपसामग्र्यनन्तरं किमपि परोक्षज्ञानं स्यात् किन्तु तद्विषयकपरोक्षज्ञानत्वेन तदभावव्याप्यवत्तारूपविरोधिसामग्र्याः प्रतिबन्धकताया एव अप्रामाणिकत्वादिति शम्॥

**सन्दर्भाः-**


१. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, दीधितिः, पृ. - १८१४
२. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, दीधितिः, पृ. - १८१४
३. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१५
४. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१६
५. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१६
६. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१६-१७
७. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१७
८. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१८
९. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१८
१०. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे, पृ. - १८१९



*अध्यक्षः*
*नव्यन्यायविभागे, श्रीसदाशिवपरिसरस्य,*
*राष्ट्रियसंस्कृतसंस्थानस्य, पुर्याम्*

# निपातार्थविषये नैयायिकमतखण्डनपूर्वकं वैयाकरणमतोपस्थापनम्

डॉ. रामबाबूपाण्डेयः

अथ निपातार्थो विचार्यते। निपातार्थविषये नैयायिकशाब्दिकयोः वैमत्यं वर्तते। नैयायिकाः प्रादयो द्योतकाश्चादयो वाचकाः इति स्वीकुर्वन्ति। वैयाकरणाः प्रादिचादिविषये वैषम्यं न मन्यन्ते। यतोहि वैषम्ये प्रमाणाभावात् युक्तिसाम्यादिति ध्वनयन्तो निपातानां द्योतकत्वं स्वीकुर्वन्ति। निपाताः प्रातिपदिकवत् स्वतन्त्रमर्थं न वहन्ति। नापि प्रत्ययवत् परावलम्बित्वं भजन्ते। उभयोर्मध्ये एषां स्थितिः अंशतः इमे वाचकाः अंशतश्च द्योतकाः। अतएव एषामर्थनिर्धारणे महती विप्रतिपत्तिः दृश्यते। निपातार्थविषये समुपलभ्यमानानां मतमतान्तराणामालोडनेन शास्त्रेषु पक्षत्रयं दृश्यते। तत्र प्रथमपक्षः – निपातार्थादीनामनुभवादीनां धातुमात्रतो बोधाभावेनोपसर्गसम्बन्धात्तद्बोधः इत्युपसर्गाणां विशेषार्थद्योतकत्वं स्पष्टमेव। यथा – 'अनुभवति' इत्यत्रानुभवरूपार्थस्य 'अनु' शब्दो द्योतकः। तदुक्तम् हरिणा –

**क्वचित् सम्भाविनो भेदा केवलैरभिदर्शिताः।**
**उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना॥**[1]

क्वचित्पचत्यादौ प्रकर्षादीनां सम्भवात् केवलैस्तेषामप्रतीतेरुपसर्गसम्बन्धात् तदवगमिति तेषूपसर्गाणां विशेषद्योतकत्वमुच्यते।

द्वितीयपक्षः – क्वचिच्चोपसर्गाणां वाचकत्वमपि स्वीक्रियते। यथा 'प्रतिष्ठते' इत्यादौ धातोर्गतिनिवृत्तिवाचकत्वम् 'प्र' शब्दस्य गतिवाचकत्वम्। उक्तञ्च हरिणा –

**सवाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा।**[2]

न केवलं द्योतकाः यावद्वाचकाः अपि दृश्यन्ते। यथा प्रतिष्ठत इत्यादौ धातोर्गतिनिवृत्तिवाचकत्वं प्रेण तु गतिवाचकत्वं व्यवस्थाप्यते। तथा चोक्तम् –'धात्वर्थो बाधते कश्चित्' इति। धात्वर्थः बाधते कश्चिदित्यत्र उपसर्गकर्तृको धात्वर्थस्य बाधस्तु धात्वर्थप्रतिषिध्यान्यार्थव्यवस्थापनरूपो बोध्यः।

तृतीयपक्षस्तु – सम्भूय धातूपसर्गावर्थमाहतुः उपसर्गस्तु शक्तिमात्रं कुरुत इत्यर्थाभिधाने सहकारिण उपसर्गाः भवन्ति। अभिहितञ्च भर्तृहरिणा –

**शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥**[४]

एवञ्चोपसर्गाः द्योतकाः उपसर्गाः वाचकाः उपसर्गाः अर्थावबोधे सहकारिण इति पक्षत्रये समुपस्थिते कतमः पक्षः श्रेष्ठ इति विचारणायामुपसर्गाणां द्योतकत्वमेव समुचितमिति प्रतीयते। 'प्रतिष्ठते'इत्यत्र धातूनामनेकार्थत्वात् 'स्था' धातोरेव गतिरर्थः 'प्र' शब्दस्तु तस्यार्थस्य द्योतकः। उक्तञ्च वाक्यपदीये –

**स्थादिभिः केवलैर्यच्च गमनादिर्न गम्यते।**
**तत्रानुमानाद् द्विविधात्तद्धर्मा प्रादिरुच्यते॥**[५]

अयम्भावः – स्थाधातुर्गतिनिवृत्तौ प्रसिद्धः अतएव शिष्टैरपि स्थागति–निवृत्ताविति पठ्यते। अतएव च केवले तिष्ठति प्रयोगे गतिनिवृत्तिरेवाभिधीयते, न तु गतिः। एवञ्च 'प्रतिष्ठते' इत्यादावनेकार्थाः धातवः इति सिद्धान्तमभ्युपेत्य सामान्यतो दृष्टादनुमानाद् गतिवाचकत्वमपि स्थाधातोरभ्युपगम्यते। अनुमानाकारश्च स्थाधातुरनेकार्थः धातुत्वादुभयवादिसम्मतानेकार्थः यज्धातुवत्। एवञ्च अन्येषामपि धातूनामनेकार्थत्वं सिद्ध्यति। तथाहि अन्येऽपि धातवः अनेकार्थाः धातुत्वात्, स्थाधातुवत्। एवं चादिनिपातेष्वपि पक्षत्रयम्बोध्यमुपसर्गवत्। तदुक्तं हरिणा –

**निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः।**
**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः॥**[६]

किन्तु अत्रापि द्योतकत्वपक्ष एव न्याय्यः, केवलानां चादिनिपातानां प्रयोगदर्शनाभावात्। निपातानां वाचकत्वस्वीकारे गवादिवत् केवलानामपि प्रयोगापत्तिः। तस्मात् यथा गवादीनां शब्दानां स्वातन्त्र्येण प्रयोगो दृश्यते, तथा नैतेषां चादीनाम्, अतो ज्ञायते यच्चादयो द्योतका एव न वाचकाः। भर्तृहरिणाभिहितम् –

**चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।**
**प्रत्ययो वाचकत्वेऽपि केवले न प्रयुज्यते॥**

अयमाशयः – यतश्चादयः पदत्वे सत्यपि केवलाः न प्रयुज्यन्तेऽतो द्योतकत्वमेव तेषाम्। वाचकत्वे हि गवादिपदवत् युक्तस्तेषां केवलानां प्रयोगः। एवञ्च प्रादीनां चादीनाञ्च निपातानां द्योतकत्वमेवेति भर्तृहरिसिद्धान्तः। नागेशभट्टेभ्योऽपि द्योतकत्वपक्ष एव रोचते। मञ्जूषायां निपातानां द्योतकत्वपक्ष एव समर्थितः तथाऽभिहितम्– 'अनुभूयते सुखम् साक्षात्क्रियते गुरुरित्यादौ निपातानां द्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्मकत्वम्। एतेन निपातस्यैव तदर्थकत्वमित्यपास्तम्'[७]

निपातानामर्थवत्त्वमपि द्योत्यार्थमादायैव। शक्तिलक्षणाद्योतकतान्यतमसम्बन्धेन बोधकस्यैवार्थवत्त्वात्। प्रतिष्ठते इत्यत्र तिष्ठति एव गतिवाची। प्रशब्दस्तु तदर्थगत्यादित्वस्य द्योतकः।

भट्टोजिदीक्षितप्रभृतयः प्राचीनवैयाकरणास्तु निपातत्वावच्छिन्नानां सकलनिपातानां वाचकत्वं द्योतकत्वञ्च स्वीकुर्वन्ति। वैयाकरणभूषणसारस्य निपातार्थनिर्णये प्रादयो द्योतकत्वं तदितरनिपातानां वाचकत्वम् 'साक्षात्प्रत्यक्षतुल्योः' इति कोशात् नमः पदेन 'देवाय नमः' इत्यादौ नमस्कारार्थस्य, दानावसरे 'गवे नमः'

इत्यत्र पूतार्थस्य प्रसिद्धत्वाच्च। सकर्मकत्वञ्च स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलव्यधिकरणवाचकत्वम्।

कर्मत्वञ्च – स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलशालित्वमित्याहुः। इति नैयायिकमतम् अयुक्तं वैषम्ये बीजाभावात्। अनुभूयते इत्यनेन साक्षात्क्रियते इत्यस्य समत्वात् नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयाभावात्। निपातार्थधात्वर्थयोरन्वयस्यैवाऽसम्भवात्, निपातार्थफलाश्रयत्वेऽपि धात्वर्थान्वियं विना कर्मत्वानुपपत्तेश्च। तदुक्तम् –

**द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।**
**उपास्येते हरिहरौ लकारो दृश्यते यथा॥**[८]

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना निपाताः द्योतका इत्यर्थः, द्योतकत्वे न क्षतिः। 'ईश्वरमनुभवति' इत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः 'भवति' इत्यत्राप्यापत्तेः नोपसर्गार्थः तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकव्युत्पत्तेः,'अनुगच्छति' इत्यादावनुभवादिप्रत्ययापत्तेश्च नोपसर्गविशिष्टः तद्धात्वर्थः विशिष्टानुपूर्व्याः शक्ततावच्छेदकत्वे विनिगमनाविरहादव्यवहितोत्तरत्वसम्बन्धेनाऽनुविशिष्टभूशब्दस्याऽव्यवहितपूर्वत्वसम्बन्धेन भूशब्दविशिष्टस्यानोर्वा वाचकत्वकल्पने च गौरवात्। तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा, उपसर्गास्तात्पर्यग्राहका इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वम्। तच्च चादिष्वपि तुल्यम्, उपसर्गाणामिव निपातानामपि द्योतकत्वमेव। 'उपास्येते हरिहरौ' इत्यत्रेयं जिज्ञासा उदेति यदुपासना किमुपसर्गार्थः, विशिष्टस्य, धातुमात्रस्य वा? तदुच्यते न चोपासना उपसर्गार्थः तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूप सकर्मकत्वस्यास्धातोरूपासनारूप–फलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात्। न चोपसर्गविशिष्टस्य धातोरर्थः गौरवात्। धातुमात्रस्यार्थ इति पक्षे त्वागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति। उक्तञ्च भूषणे –

**तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।**
**विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः॥**[९]

तथा प्राद्युपसर्गवत् अन्यत्र साक्षात्क्रियते अलङ्क्रियते ऊरीक्रियते इत्यादौ धातोस्तदर्थे कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवत् द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोर्घटः क्रियते इत्यादौ कर्मणि लकारदर्शनात् सकर्मकत्वमस्त्येव। तथापि साक्षात्कारादिरूपेष्वर्थेषु सकर्मकता न स्यात्। अन्यथा 'वायुर्विकुरुते','सैन्धवा विकुर्वते' इत्यत्रापि स्यादिति।

किञ्च नैयायिकरीत्या अन्यतरघटितस्य सकर्मकत्वलक्षणस्य भेदघटितत्वेनातिगुरुत्वात् दुर्ज्ञेयत्वाच्च। अथ च ओदनं पचति इत्यत्रौदनस्य कर्मत्वसंसर्गेण धात्वर्थपाकेऽन्वयवारणायाभेदातिरिक्तसम्बन्धेन नामार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितिर्हेतुर्वाच्यः। एवञ्च साक्षात् पदाद्यर्थसाक्षात्कारस्य धात्वर्थे साक्षादन्वयो न स्यात्, तत्र प्रत्ययजन्योपस्थितिभावात्। यदि साक्षात्कारादिर्धात्वर्थः स्यात् तदा 'स्तोकं पचति' इत्यत्रेवाभेदान्वयो भवत्येव। तस्मात् साक्षात् पदस्यापि तद्वाचकत्वे मानाभावात् द्योतकत्वमेव न्याय्यम्। अपि

च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः। षष्ठ्यादिकं विना नामार्थयोर्भेदसम्बन्धेनान्वयस्वीकारे 'राजपुरुषः' इत्यस्य राजसम्बन्धी पुरुष इत्यर्थापत्तेरित्यभिप्रेत्याह आदिति। किञ्च चादीनां वाचकत्वे शोभनः समुच्चयः इतिवत् शोभनश्चेत्यपि स्यात्।

ननु प्रातिपदिकार्थयोर्भेदान्वये विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषये एवेति नोक्तदोष इति चेन्न।

**पदार्थः सदृशान्वेति विभागेन कदापि न।**
**निपातेतरसङ्कोचे प्रमाणं किं विभावय॥**[१०]

**अयमाशयः** – समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयतेति कल्पने मानाभावो गौरवञ्च। द्योतकतावादिनां नये तु निपातानां द्योतकत्वादन्वय एव नास्ति। पृथगुपस्थितयोरेव संसर्गस्यान्वयरूपत्वादिति नायं दोषः। अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादित्याह –

**शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।**
**इत्यादावनन्वयो न स्यात् सुपाञ्च श्रवणं ततः॥**[११]

अत्रोस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इव शब्दस्य द्योतकत्वे सत्येव सङ्गच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोध इति तत्त्वम्।

ननु निपातानां द्योतकतावादिमते 'अब्राह्मणः' इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात् , उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादिति चेन्न, नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यार्थमादायैव तमेवार्थमादायैव। तमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वम्।

वस्तुतस्तु सर्वेषां द्योतकत्वपक्षेऽपि निपातानामर्थवत्त्वं तु स्वीकृतमेव। 'निपातानां द्योतकत्वादभिधेयार्थाभावेऽपि द्योत्यार्थसद्भावाद्येषामर्थवत्त्वं तेषां सिध्यत्येव संज्ञा'[१२]। तस्माद् द्योतकत्ववाचकत्वोभयपक्षेऽपि निपातानामर्थवत्त्वसम्भवे किमर्थं 'निपातस्यानर्थकस्य प्रातिपदिकत्वम्' इदं वार्तिकमिति मनसि शङ्कां निधायोक्तं कैयटेन –

**'यस्य तु द्योत्योऽप्यर्थो नास्ति तदर्थवचनम्'**[१३]

तत्रापिना वाच्यार्थः प्रतीयते। एतेनेदमेव प्रतीयते यत् येषां निपातानां वाच्यार्थः द्योत्यार्थः इत्युभयविधार्थो नास्ति, तेषां प्रातिपदिकसंज्ञा विधानार्थमिदं वार्तिकमतो वाचकत्वपक्षे तस्य वैयर्थ्यं नाशङ्कनीयम्।

भाष्यकृता त्विदं वार्तिकं खण्डितम् –'अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति अनर्थकानामप्येतेषां भवति अर्थवत्कृतमिति। यदयम् 'अधिपरी अनर्थकौ' इत्यनर्थकयोर्गत्युपसर्गबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति'[१४]।

'कृत्तद्धितसमासाश्च'[१५]इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रहः इति केचित्। तस्माद्युक्तं निपातानां द्योतकत्वमित्याह भूषणे –

**नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।**
**द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः॥**[१६]

प्राचीनवैयाकरणाः निपातानां वाचकत्वपक्षमपि स्वीकुर्वन्ति। तेषाम्मते निपातानां तदर्थवाचकत्वमपि युक्तम्, बोधकतारूपशक्तेरबाधात्। किञ्चोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणा तु तात्पर्यग्राहकत्वमात्रं तिङादेः स्यात्। अत्र एवमभिधानं तु पक्षद्वयस्याकरप्रतिपादितत्वेन द्वयोरपि मध्ये यस्य कस्यापि पक्षस्य परिग्रहे न क्षतिः। परन्तु नैयायिकाद्युक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्याशयेन –

**निपातानां वाचकत्वमन्वयव्यतिरेकयोः।**
**युक्तं वा न तु तद्युक्तं परेषाम्मतमेव न॥**[१७]

इत्युपसंहृतम्। अत एव विधिनिमन्त्रणेत्यादि[१८]सूत्रे तिङां द्योतकत्वं वाचकत्वं वेति विकल्प्य पक्षद्वयेऽपि युक्तिसाम्यं प्रतिपाद्य अन्ततो द्योतकत्वमेव सिद्धान्तितं कौस्तुभे। भाष्यकृतोऽपि द्योतकत्वमेव स्वीकुर्वन्ति। अत एव 'पच, अजर्घा इत्यादौ धातुमात्रात्सर्वबोधः' सङ्गच्छते।

न च व्यतिसे इत्यत्र धात्वभावेऽपि प्रत्ययमात्रात्सर्वबोधात् वाचकत्वपक्ष एव युक्त इति वाच्यम्। व्यतिसे इत्यादीनामसाधुत्वेनादोषात्।

उपसर्गातिरिक्तनिपातानां द्योतकत्वं वाचकत्वञ्च स्वीकृतं भगवता पतञ्जलिना। तथाहि अव्ययं विभक्तीति सूत्रे भाष्ये सुभद्रा, सुमगधाः, सुपुत्र इत्यादावव्ययीभावसमासमाशङ्क्य पूर्वपदप्रधानास्याऽव्ययीभावत्वेनाऽत्र पूर्वपदप्राधान्यं नास्तीत्युक्त्वा 'अथवा नेमे समासार्था निर्दिश्यन्ते, किन्तर्हि अव्ययार्था इमे निर्दिश्यन्ते एतेष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन सह समस्यते इत्यवोचत्'[१९]।

अथवेत्यादिभाष्यांशं व्याख्याता 'प्रदीपे' कैयटेनोक्तम् –'अव्ययस्य श्रुतत्वादन्तरङ्गत्वात् तस्यैव विभक्त्यादयो विशेषणानि। तत्र यदोत्तरपदार्थावच्छिन्नाः समृद्ध्यादयः प्रतिपिपादयिषिता तदाऽव्ययं समृद्ध्यादीनां वाचकमिति तेषां तदर्थता भवति। सुभद्रा इत्यत्र तु भद्रशब्दः समृद्धिविशिष्टार्थमाह शब्दस्तु समृद्धिद्योतकः न तु वाचक इति व्याख्यातम्[२०]।' अनेन भाष्यकैयटव्याख्यानेन स्पष्टमेव निपातानामुभयं प्रतिभाति।

उपसर्गाणान्तु द्योतकत्वमेवेति 'गतिर्गतौ'[२१] सूत्रभाष्ये स्पष्टम्। 'भूवादयो धातवः'[२२] सूत्रे नागेशेनाप्यभिहितम् क्रियाविशेषद्योतक उपसर्गः क्रियावची धातुरेवेति भावः।

तत्रैव प्रोऽयं दृष्टा प्रचारः आदिकर्मणि वर्तते इति भाष्यस्य प्रोऽयमिति प्रतीकमादाय उक्तं प्रदीपे 'अन्यत्रापि प्रयोगात् ततश्चान्यत्रास्या योऽर्थो द्योत्यः स एवेहापीत्यनुमीयते। अनेकार्थत्वाद् धातूनां तिष्ठतिरेव गतिवाचीति निर्णयः'[२३]।

एवञ्च तत्तद्वचनैस्सिद्धान्तितमेतत् यत् निपातानां तु द्योतकत्वं वाचकत्वं च किन्तु उपसर्गाणान्तु द्योतकत्वमेव। प्रायशः सर्वत्रैव निपातानामपि द्योतकतैव स्वीकृता।

अत्रेदं तत्त्वम् – अप्रामाण्यज्ञानानास्कन्दितप्रतीतिबलात् निपातानां वाचकत्वमवश्यमेव अभ्युपेयम्। अतएव 'न' इत्यतोऽभावबोधः सर्ववादिमतेऽनुभूयते। अपि च 'आ नो दिवः बृहतः पर्वतात्' इत्यत्र पर्वतादर्वाक इत्याद्यर्थबोधात् 'आ' इत्यस्य वाचकत्वं पिधातुं कः प्रभवेत्। यद्यपि निरुक्ते उपसर्गाः अर्थान् निवाहुरित्यपक्रमेऽर्थविकरणम् आ इत्यवागर्थे इति स्पष्टमेवोदीरितम्। द्योतकत्वे च दिग्योगलक्षणपञ्चम्याऽनुपपत्तिः स्यात् तदर्थस्य विशेषणता च स्यात् इति[२४]। एवञ्च निरुक्तप्रामाण्यात् उपसर्गस्यापि वाचकत्वं स्वीकर्तुं न युक्तम्, वैयाकरणानाम्मतेन तत्र 'आ' इत्यस्योपसर्गाभावात्। यतो हि क्रियायोगे एव प्रादीनां उपसर्गसंज्ञा स्वीक्रियते वैयाकरणनिकाये अत्र च 'आ' इत्यस्य न क्रियया योगोऽपितु पदेनैव सम्बन्धस्तेन एतेन निरुक्तप्रामाण्येन निपातानामेव वाचकत्वं स्वीकार्यम् आ इति निपातस्त्वस्त्येव। उक्तञ्च भर्तृहरिणाऽपि –

**निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः।**
**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः[२५]॥**

निपातानां वाचकत्वमपि अवश्यमेवाभ्युपेयम् अतएव उक्तमुद्योते 'निपातानां द्योतकत्वं वाचकत्वं च लक्ष्यानुरोधाच्च व्यवस्थेति भावः[२६]।'

न च निपातानां वाचकत्वे शोभनसमुच्चय इत्यर्थे शोभनश्चेति तथा घटस्य समुच्चय इत्यर्थे घटस्य चेत्यापद्येत् इति वाच्यम् शब्दशक्तिस्वभावात् निपातानां नित्यपरतन्त्रतया तत्र विशेषणयोगस्य षष्ठ्याश्चाप्राप्तेः। अतएव 'यद्यपि केचित्शाब्दिकाः' इत्यादिना वाचकत्वपक्षे दोषमुद्भाव्य स्वयमेव समाहितं नागेशेन।

न च कुत्रचिद् वाचकत्वं कुत्रचिद् द्योतकत्वमितिस्वीकारे अर्धजरतीयतापत्तिः स्यादिति वाच्यम् द्योतकतावादिमतेऽपि अथादौ द्योतकता क्वचिन्निरर्थके ह्रादावद्योतकतेति अर्धजरतीयतायाः दुर्वारत्वात्। तस्मात् 'ययोरेव समो दोषः, परिहारोऽपि तयोः समः, इति रीत्या वाचकत्वपक्षेऽपि दोषोद्धारो बोध्यः।'

निपातानां वाचकत्वस्वीकृतिफलन्तु घटं पटञ्च पश्येत्यादौ घटसमुच्चयादिमतिः घटादीनां लक्षणाया अकरणमेव बोध्यम्। तस्मात् निपातानां वाचकत्वमपि अवश्यमेवभ्युपेयमिति।

**सन्दर्भाः –**

१. वा. प. २/१८७
२. वा. प. २/१८८
३. वा. प. १/१८८ पुण्यराजः
४. वा. प. २/१८८
५. वा. प. २/१९०
६. वा. प. २/१९२

७.	वै. सि. म. निपातार्थविचारः
८.	वै. भू. सा. कारिका ४२
९.	वै. भू. सा. कारिका ४३
१०.	वै. भू सा. कारिका ४४
११.	वै. भू. सा. निपातार्थनिर्णयः कारिका ४५
१२.	भाष्यप्रदीपः १/२/४५
१३.	भाष्यप्रदीपः
१४.	भाष्यप्रदीपः १/२/४५
१५.	पा. सू. १/२/४६
१६.	वै. भू. सा. कारिका ४६
१७.	वै. भू. सा. कारिका ४७
१८.	पा. सू. ३/३/१६१ शब्दकौस्तुभः
१९.	म. भा. २/१/६
२०.	म. भा. प्रदीपः २/१/६
२१.	पा. सू. ८/१/७०
२२.	म. भा. उद्योत १/३/१
२३.	म. भा. प्रदीप ३/१/१
२४.	निरुक्त अध्याय १ खण्ड ३
२५.	वा. प. २/१९४
२६.	म. भा. उद्योत २/१/६

# व्याकरणदर्शने मोक्षस्वरूपम्

डॉ. दयारामदासः

पुरुषार्थचतुष्टये मोक्षः परमपुरुषार्थः। धर्मार्थकामानां पुरुषार्थानाम् अनित्यत्वाद् मोक्षस्य च आत्मरूपत्वात् नित्यत्वम्। स च मोक्ष आनन्दात्मकब्रह्मावाप्तिः सर्वदुःखानाम् आत्यन्तिकनिवृत्तिश्च। तथा च श्रुतिः –ब्रह्मविद ब्रह्मैव भवति[१], तरति शोकमात्मवित्[२], एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छतिइत्यादिस्मृतेश्च मोक्षः, मुक्तिः, निर्वाणं कैवल्यम् इत्यादिशब्दाः पर्यायाः।

स च व्याकरणदर्शने सजातीयविजातीयस्वगतभेदशून्यसच्चिदानन्दशब्दाख्यपरब्रह्मणा सह तादात्म्यमेकत्वमभेदो वा। स च सायुज्यरूपः। युनक्ति=सम्बध्नाति इति युक्। युजा = जीवेन सह सयुग् ब्रह्म, सयुजो भावः सायुज्यम् = चैतन्यम्, सारूप्यम्, तादात्म्यमभेदो वा। उक्तं च भर्तृहरिणा –अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते[४]॥

अस्यार्थः –प्रयोक्तुश्शब्दोच्चारयितुः, अन्तर्बुद्धिगुहायाम् अवस्थितं शब्दं महान्तम् व्यापकम् ऋषभं देवं स्वप्रकाशं ब्रह्मस्वरूपं प्राहुः। येन वृषभेण महता देवेन सायुज्यं शब्दब्रह्माभेद इष्यते मुमुक्षुभिः।

महाभाष्येऽपि पतञ्जलिना उक्तम् –सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि (ऋ. १०.७१.०२)५। अयमर्थः –सखायः = समानख्यातयो भेदग्रहस्य निवृत्तत्वात्सर्वमेकमिति मन्यन्ते। सख्यानि = सायुज्यानीत्यर्थः। अर्थात् ब्रह्मनिरूपिताभेदज्ञानवन्तः सायुज्यानि प्राप्नुवन्तीत्यर्थः। अपि च –महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्[६]। अयमर्थः –महान् परब्रह्मस्वरूपो देवः = अन्तर्यामिरूपः शब्दः, तेन देवेन, नः = अस्माकम्, साम्यम् = सायुज्यम् इत्यर्थः।

**मोक्षसाधनम्**

वैयाकरणस्य व्याकरणहेतुकशब्दसंस्कारज्ञानेन शुक्लो धर्मो जायते, तेन च चित्तशुद्धिद्वारा ज्ञानोत्पत्तिरिति मोक्षमार्गोऽपि हरिणा दर्शितो वाक्यपदीये –

**तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते[७]॥**

**अयमर्थः** –व्याकरणहेतुको यः शब्दसंस्कारः साधुशब्दानामपभ्रंशेभ्यो विवेकेन ज्ञानम्, सा परमात्मनः सिद्धिः सिद्ध्युपायः। कथमित्यत आह – तस्य प्रवृत्तितत्त्वज्ञ इति। तस्य शब्दब्रह्मणः प्रवृत्तितत्त्वज्ञः प्रवृत्तिः क्रिया, ते च षड्भावविकाराः – जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीति तेषामसद्भूतत्वेन तेषां तत्त्वं सत्ता परब्रह्मरूपा प्रतिभाख्या, तज्ज्ञो व्याकरणहेतुकशब्दसंस्कारजन्यधर्मविशेषसहकारेण शब्दप्रवृत्तितत्त्वज्ञो वैयाकरणः, तच्च श्रुतिस्मृतिविद्वदनुभवप्रसिद्धम्, अमृतं जरामरणादिवर्जितं ब्रह्म वस्तुतः स्वात्मभूतम्, अश्नुते प्राप्नोति, अभेदेन साक्षात्करोति, नित्यप्राप्तस्य प्राप्त्यन्तरायोगादिति।

**अयं भावः** –साधुशब्दप्रयोक्तुः पुरुषस्य धर्म आविर्भवति। आविर्भूते धर्मे तस्य प्रसादेन इन्द्रियोपशमो जायते। इन्द्रियनिवृत्तेः पश्चात् स चेन्द्रियोपशमः शब्दब्रह्मप्राप्तिमुद्दिश्यैव भवति। क्रमशो ब्रह्मप्राप्तिर्जायते। स क्रम ईदृशो भवति। प्रथमतः सा वाग् अपभ्रंशेन सम्भिन्नं तिष्ठति। तदनु अपभ्रंशस्यापगमे भेदस्य तिरोधाने अभेदस्य च समुल्लासे प्रतिभाया आविर्भावः। सा च प्रतिभा पश्यन्तीपर्याया। प्रतिभा नाम सर्वेषां वाग्विकाराणां प्रकृतिः। पश्यन्तीसाक्षात्कारानन्तरं प्रत्यस्तमितसर्वविधविकारोल्लेखमात्रस्य परमप्रकृतिभूतस्य ब्रह्मणः प्रकाशो जायते।

अत्र प्रमाणम् उपदर्शितं भर्तृहरिणा स्वोपज्ञवृत्तौ –

**प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः।**
**क्रमसंहारयोगेन संहृत्यात्मानमात्मनि॥**
**वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च।**
**विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम्॥**
**ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरि...।**
**परेण ज्योतिषैकत्वं छित्त्वा ग्रन्थीन् प्रपद्यते॥**

अत्र मोक्षक्रमः उक्तः। तथाहि – व्याकरणेन पूर्वं वैखरीं रूपां वाणीम् असाधुशब्देभ्यः पृथक् कृत्वा ज्ञानरूपः संस्कारः करणीयः। ततः ध्यानक्रमेण बुद्धौ, हृदयदेशे मध्यमारूपेण, नाभिदेशे पश्यन्तीरूपेण च भासमानसूक्ष्मक्रमवत्यां वाचि मनोनिवेश्यम्। ततः मध्यमापश्यन्तीरूपयोः वाचोः बन्धनानि अविद्याहङ्कारादीनि पृथक्करणीयानि, एवम् अविद्यादिबन्धनविमुक्तः परावाग्रूपात्मा साक्षात्करणीयः। नित्यसिद्धस्य परावागात्मनः ज्योतीरूपस्य ब्रह्मणः साक्षात्कारेण मोक्षलाभः।

पुनःतमेवार्थं हरिर्वक्ति –

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते[6]॥**

अत्र सायुज्यपदस्यायमर्थः –अत्यन्तविनिर्भागेन संसर्ग इति। सर्वथैकीभवनमिति यावत्।

अपि च – साधुशब्दप्रयोगवशादभ्युदयो भवति। तथा च कथितं कात्यायनेन – शास्त्रपूर्वके

प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्दनेति[9]। अत्र भाष्यम् – यथा वेदशब्दा नियमपूर्वकमधीताः फलवन्तो भवन्ति, एवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। भगवता भाष्यकारेणाऽप्युक्तम् –

एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति[10]। तथा हि – व्यवस्थितसाधुत्वेन रूपेण शब्दतत्त्वे संस्क्रियमाणेऽपभ्रंशरूपप्रतिबन्धकापगमे धर्मविशेष आविर्भवति। ततः शब्दब्रह्मतादात्म्योपगमरूपा ब्रह्मणः प्राप्तिर्भवतीति।

अपि च वाक्यपदीये भर्तृहरिणा उक्तम् –

**तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते[11]॥**

**अयमर्थः**– तद् व्याकरणमपवर्गस्य द्वारम् – उपायः, तद्यथा साधुशब्दज्ञानपूर्वकात् प्रयोगाद् अभिव्यक्तधर्मराशिर्महान्तं शब्दात्मानं प्राप्नोति। तथा हि – व्याकरणसंस्कृतचेताः पूर्वं वैखरीद्वारा मध्यमामधिगम्य शब्दार्थज्ञानहेतुभूतां पश्यन्तीं पश्यति, तदनु शब्दप्रयोगाभ्यासभावनावशाद् अनावृतां विशुद्धां पराख्यां वाचं प्राप्नोति, तत्तादात्म्यमाप्नोति, इदं तादात्म्यमेवापवर्गः। प्रत्यवायजनकापभ्रंश-प्रयोगरूपस्यापवर्गप्रतिबन्धकस्यापनयनाय व्याकरणस्योपयोग उच्यते – वाङ्मलानां प्रत्यवायहेतूनां वाचो मलानां दुष्टोच्चारणरूपाणां चिकित्सितं सर्वविद्यानां पवित्रम् तथा चोक्तम् –

**आपः पवित्रं परमं पृथिव्याम् अपां पवित्रं परमं च मन्त्रः।**
**तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः॥**

तथाच सर्वासु विद्यासु प्रकाशते, अपभ्रंशप्रयोगाभावाय अपेक्ष्यत इत्यर्थः। अथ च मुमुक्षूणां कृते निष्कपटमार्गरूपं व्याकरणम् – **इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः[12]॥**

इदं व्याकरणं सिद्धिः परमपुरुषार्थसिद्धिः, निःश्रेयसावाप्तिः शब्दतत्त्वब्रह्मसाक्षात्काररूपा, तत्प्राप्तिहेतुभूतानि सोपानपर्वाणि आरोहणमार्गपङ्क्तयः श्रवणादिसाधनानि, तेषामाद्यं यतस्तत्प्राप्तिसाधनारम्भः तद्रूपं पदस्थानं सर्वापेक्षया प्रथमसाधनमित्यर्थः।

यथोच्चैस्तरप्रासादाद्यारोहणे प्रथमसोपानपर्व नोल्लङ्घ्य द्वितीयादिपर्वप्राप्तिः, उल्लङ्घने सति नीचैस्तरदेशपतनं निश्चितम्, अतो द्वितीयाद्यपेक्षया प्रथमसोपानपर्वणः प्राशस्त्यम्, तथेहापि अद्वैतिनां सिद्धान्ते[13] श्रवणस्यैव प्राधान्यम्, मनननिदिध्यासनयोस्तदङ्गत्वेनोपयोगात्। तद्विषयतया शब्दो हेतुः, स च वैयाकरणैकगम्यः। यदाहुर्भाष्यकाराः– य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः। के पुनस्ते? वैयाकरणाः[14] इति। इयं व्याकरणविद्या मुमुक्षूणां कृते सरलो राजमार्गो वर्तते।

महाभारतेऽपि शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वम् महर्षिव्यासेन दर्शितम् –

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति[१५]॥**

अत्र शब्दब्रह्म इत्यनेन वेदो विवक्षितः। वेदस्य ज्ञानं शब्दशास्त्रमन्तरेण न संभवतीति। शब्दब्रह्मज्ञानद्वारा परब्रह्माधिगमरूपं मोक्षं प्रति परम्परया कारणत्वं स्पष्टमेव महर्षिव्यासेन प्रतिपादितम्।

अपि च बृहदारण्यकोपनिषदि वाग्देव्या उपासनया मृत्युसन्तरणं फलं बोधितमस्ति। तथा च श्रुतिः- अयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते वाग् वै सम्राट् परमं ब्रह्म नैनं वाग् जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते[१६]।

**सन्दर्भाः -**


१. मुण्डकोपनिषद् - ३.२.९
२. छान्दोग्योपनिषद् - ७.१.३
३. श्रीमद्भगवद्गीता - २.७२
४. वाक्यपदीयब्रह्मकाण्डकारिका - १३०
५. महाभाष्यम् - १.१.१ पृ. ४६
६. महाभाष्यम् - १.१.१ पृ. ४१
७. वाक्यपदीयब्रह्मकाण्डकारिका - १३१
८. वाक्यपदीयब्रह्मकाण्डकारिका - १३०
९. महाभाष्यम् - प्रथमाह्निकम् - पृ. ७३
१०. महाभाष्यम् - ६.१.८४
११. वाक्यपदीयब्रह्मकाण्डकारिका - १४
१२. वाक्यपदीयब्रह्मकाण्डकारिका - १६
१३. आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृहदा. २.४.५ )
१४. महाभाष्य प्रथमाह्निकम् - पृ. ४५ (सक्तुमिव)
१५. महाभारत शान्तिपर्व अध्याय - २७०, श्लोक सं. - १, २
१६. बृहदारण्यकोपनिषद् - ४.१.२



*सहायकाचार्यः*
*व्याकरणविभागः,*
*ज.रा.रा.सं.विश्वविद्यालयः,*
*जयपुरम्*

# भाट्टमीमांसायां शाब्दबोधः

**डॉ. पवनव्यासः**

भारतीयदर्शनपरम्परायां सर्वेष्वपि प्रस्थानेषु शाब्दबोधमधिकृत्य गभीरो विचारः प्रावर्तत न केवलं भारतीयदर्शने अपि तु पाश्चात्यदर्शनेऽपि विषयेऽस्मिन् महती चर्चा सन्दृश्यते। भारतीयपरम्परायां ये केचन शब्दप्रमाणवादिनो दार्शनिकाः सन्ति तैः शब्दप्रामाण्यनिरूपणावकाशे शाब्दबोधप्रक्रिया महता संरम्भेण प्रतिपादिता आस्तिकपरम्परायां यान्यपि दर्शनप्रस्थानानि परिगण्यन्ते तानि सर्वाण्यपि शब्दप्रमाणमङ्गीकुर्वन्त्येव यतो हि '**नास्तिको वेदनिन्दकः**' इति मनुवचनाद्वेदस्य प्रामाण्यमङ्गीकुर्वतामेवास्तिकसञ्ज्ञा प्रख्याता वेदानां शब्दरूपत्वादिदं फलितं वक्तुं शक्यते यत्शब्दप्रमाणवादिनो दार्शनिकसम्प्रदाया एवास्तिकाः, एतेष्वास्तिकदर्शनेष्वपूर्वमग्रगण्यञ्च विद्यते पूर्वमीमांसादर्शनम्।

**मीमांसापदार्थः** – पूजितविचारवचनो मीमांसाशब्दः इत्याहुर्भामतीकाराः[1]। 'मान पूजायाम्' 'माङ् माने' इति पूजार्थे मानार्थे च द्वौ धातू विद्येते। तत्र 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' इति सूत्रेण माङ् इत्यस्य ङानुबन्धस्य धातोर्नान्तत्वं निपात्य अनिच्छार्थे सन्प्रत्ययेऽभ्यासस्य च दीर्घे मीमांसाशब्दो निष्पद्यते 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्युत्तरसूत्रे इच्छार्थे सन्विधानादयमनिच्छार्थे सन् इत्यभ्युपगम्यते। 'मान् विचारे' इति चुरादिपठितो धातुरन्यः, तस्मादपि मीमांसाशब्दो निष्पद्यते इत्थं पूजार्थे कश्चिद् धातुः विचारार्थे चापरः पूजितविचारविचारार्थे तु न कश्चिद् धातुः कथं तर्हि भामतीकारेण पूजितविचारार्थे मीमांसाशब्दः प्रयुक्त इति जिज्ञासायां तैरैवोक्तं – परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता[2] विषयेऽस्मिन् कल्पतरुकाराः 'प्रसिद्धिबलात् पूजितविचारार्थत्वम्' इति वदन्ति प्रसिद्धिश्च व्यवहारः, तस्यापि शक्तिग्राहकत्वमिष्यत एव पूजितविचारवचनत्वं व्याकरणस्मृत्यसिद्धमपि प्रसिद्धेस्तत्साधकत्वमुपपन्नम् आहोस्विदुभयोर्धात्वोरेकस्य ग्रहणे सति धात्वर्थतयान्यस्यापि धात्वर्थस्य लाभे विशेष्यविशेषणभावेन तादृशार्थवचनत्वं व्याकरणस्मृत्यविरुद्धम् इत्थं पूजितविचार एव मीमांसापदार्थः।

**शाब्दबोधः** – शाब्दबोधो नाम एकपदार्थेऽपरपदार्थसंसर्गविषयकज्ञानं यथा नीलो घट इत्यत्र घटपदार्थे नीलाभेदसंसर्गं विषयीकुर्वत् नीलाभिन्नो घट इत्याकारकं यज्ज्ञानं वाक्यात् संजायते स एव शाब्दबोधपदेनोच्यते अयमेवार्थो शाब्दबोधपदव्युत्पत्त्या अपि लभ्यते, तद्यथा शाब्दः शब्दसम्बद्धः शब्दसमूहात्मकवाक्यजन्यवाक्यार्थलभ्यो बोधः ज्ञानमिति यद्यपि सर्वेष्वपि संस्कृतशास्त्रेषु शाब्दबोधमधिकृत्य

विचारः प्रावर्तत तथापि पदवाक्यप्रमाणशास्त्रेषु यादृशी सूक्ष्मेक्षिका विद्यते न तथान्यत्र अत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं मीमांसा, प्रमाणशास्त्रं नाम न्यायदर्शनम् वेदवाक्यविचारार्थमेवेदं मीमांसाशास्त्रं प्रवृत्तमतः वाक्यशास्त्रमित्यन्वर्थसंज्ञा यदुक्तं नारायणभट्टेन -

**वाक्यार्थस्थापनी सर्वा मीमांसा तर्करूपिणी**[३]

वस्तुतः भारतीयदार्शनिकचिन्तनपरम्परायां मीमांसादर्शनस्येदमेवापूर्वं वैशिष्ट्यं विद्यते यदितरदर्शनप्रस्थानानि जीवजगदीश्वरप्रभृतिषु दार्शनिकविषयेषु स्वकीयसिद्धान्तान् सन्निरूप्य तद्दृढीकरणाय वेदवाक्यानि प्रमाणत्वेन निदर्शयन्ति किन्तु मीमांसादर्शनं वेदवाक्यबोधितसिद्धान्तानां निरूपणाय प्रकर्षतर्कयुक्तिनिवहनिदर्शनेन दार्शनिकस्वरूपमवाप्नोति। मीमांसामते वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो यागादिरेव धर्मः, तस्य प्रतिपादनमेव दर्शनास्यास्य मुख्यं प्रयोजनम् यथोक्तं भट्टपादेन-

**अथातो धर्मजिज्ञासेति सूत्रमाद्यमिदं कृतम्**
**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्**[४]

प्रतिज्ञाविषयो धर्मो वेदप्रमाणक एव, अत एव वेदानां स्वतःप्रामाण्यप्रतिपादनं मीमांसकैरवश्यं कर्तव्यमन्यथा प्रधानप्रमेयस्य धर्मस्य प्रमितिरेव सन्दिग्धा भवेत् वेदानां च स्वतःप्रामाण्यं न तावत् सम्यक् विधातुं शक्यते यावत्तेषामपौरुषेयत्वं न साध्यते शब्दात्मको वेदराशिः, अतः शब्दस्यापि नित्यत्वं प्रतिपादनीयम् वेदार्थो धर्मः अतः अर्थस्यापि नित्यत्वं प्रसाधनीयम् ततश्च वेदाऽपौरुषेयत्ववादिभिस्तयोर्नित्ययोः शब्दार्थयोः सम्बन्धोऽपि नित्य एव निरूपणीयः। इत्थं प्रधानप्रमेयस्य धर्मस्य सम्प्रकाशनाय प्रवृत्तैः मीमांसकैः '**स्वतःप्रामाण्यवादः**' '**वेदाऽपौरुषेयत्ववादः**' **शब्दनित्यतावादश्च** एते त्रयः सिद्धान्ताः संस्थापिताः यैः वेदानां सर्वोच्चप्रामाण्यमभिरक्षितम्। विज्ञेयमत्र यन्मीमांसादर्शने शब्दार्थसम्बन्धः स्वाभाविकः स्वीक्रियते यथा च- **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्**[५] इत्यौत्पत्तिकसूत्रे '**वागित्येतदेषामुक्थ**'[६] इति श्रुतिवचनस्यालोके न केवलं शब्दार्थयोर्नित्यत्वमपि तु तयोरौत्पत्तिकसम्बन्धस्यापि नित्यत्वं प्रसाधितं मुनिना जैमिनिना सम्बन्धस्यास्य नित्यत्वमनादित्वादनुमीयते। यथा च श्लोकवार्तिके -

**सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धितः**
**सिद्धः सम्बन्धः इत्येवं सम्बन्धादिर्न विद्यते**[७]

इत्यनुमानेन शब्दार्थयोः सम्बन्धः अनादिसिद्धः निरूपितः भट्टपादेन इत्थं प्रधानप्रमेयस्य धर्मस्य निरूपणाय यन्मीमांसकैः वेदवाक्यार्थविचारः प्रस्तुतस्तेनास्य दर्शनस्य शाब्दबोधविषयकं गभीरं चिन्तनं प्रकाशितम्।

**मीमांसादर्शने शाब्दबोधप्रक्रिया** - शाब्दबोधप्रक्रियाविषये मीमांसकानां प्रस्थानभेदो दृश्यते कुमारिलभट्टपादाः तदनुयायिनश्च शाब्दबोधे अभिहितान्वयवादं स्वीकुर्वन्ति किन्तु गुरुमतानुयायिनः प्राभाकराः

शाब्दबोधे कार्यान्विताभिधानवादं पुरस्कुर्वन्ति **'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्'**[८] भाष्यकारस्य शबरमुनेः शब्दप्रमाणलक्षणमिदमवलम्ब्य परवर्तिभिः मीमांसकैः शाब्दबोधप्रक्रिया निरूपिता। नीतितत्त्वाविर्भावकारेण चिदानन्दपण्डितेन उक्तं यत् – 'विज्ञातेभ्यः पदेभ्यः पदार्थस्मृतिमुखेनासन्निकृष्टेऽर्थे यज्ज्ञानम्, तच्छाब्दम्'[९] मानमेयोदयकारेण नारायणभट्टेन भाट्टमीमांसाभिमता शाब्दबोधप्रक्रिया इत्थं निरूपिता–

**तत्र तावत्पदैर्ज्ञातैः पदार्थस्मरणे कृते। असन्निकृष्टवाक्यार्थज्ञानं शाब्दमितीर्यते।**[१०]

अनेन ज्ञायते यद्भाट्टमते वाक्यार्थबोधाय सर्वादौ पदज्ञानमपेक्ष्यते, ततः शक्तिबोधेन (भाट्टमते जातौ शक्तिः व्यक्तिस्तु आक्षेपेण लभ्या) पदार्थज्ञानं संजायते, ततश्च आकांक्षायोग्यतासन्निधिवशाद् समन्वये कृते वक्तुः तात्पर्यानुसारेण तात्पर्यवृत्त्या (नारायणभट्टमते च लक्षणावृत्त्या) शाब्दबोधः संजायते, मीमांसामते आख्यातार्थमुख्यविशेष्यकशाब्दबोधः भवति। आख्यातार्थश्च भावना– **सा च भवितुर्भवनानुकूलो भावकव्यापारविशेषः**[११] इति लक्षणेन निरूपिता आपदेवेन। तत्र भवितुः उत्पद्यमानस्य साध्यस्य विधेयस्य वा, यद्भवनमुत्पत्तिः फलं वा, तदनुकूलस्तदुत्पादको (जनकत्वादिसम्बन्धेन), भावकस्य भावयितुः कर्तुः यो व्यापारविशेषः स एव भावनोच्यते मीमांसामते 'तद्भूतार्थानां क्रियार्थेन समाम्नायः', 'भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया' इति न्यायेन सर्वत्र शाब्दबोधे विशेष्यतया प्रत्ययार्थो भावनैव प्रतीयते यदुक्तं भाट्टचिन्तामणौ– सर्वकारकाणां भावनान्वयात् सिद्धं भावनाया मुख्यविशेष्यत्वम्[१२] तद्यथा–

देवदत्तः तण्डुलं पचति इत्यत्र आख्यातार्थः भावना, स एव शाब्दबोधे विशेष्यं भवति, कर्ता चाक्षेपलभ्यः पच्धात्वर्थः विक्लित्तिरूपं फलं मुख्यपदार्थस्य भावनायाः विशेषणम्, यतो ह्यत्र फलभावनयोर्मध्ये जन्यजनकत्वभावसम्बन्धो विद्यते आख्यातविभक्त्यर्थः वर्तमानकालः आर्थभावनायां विशेषणम्, संख्या चाक्षेपलभ्ये कर्तरि विशेषणं भवति 'देवदत्तः' इत्यत्र सुविभक्त्यर्थः प्रातिपदिकार्थः, भावनया आक्षेपलभ्यः कर्ता च इत्यनयोः सामानाधिकरण्यं संजायते 'तण्डुलम्' इत्यत्र विद्यमाना द्वितीया विभक्तिः कर्मकारकस्य वाचिका तदित्थमस्य वाक्यस्य भावनाविशेष्यकशाब्दबोधो भवति– तण्डुलरूपकर्मनिष्ठपाकजनकदेवदत्तरूप-कर्तृनिष्ठवर्तमानकालिका भावना तथैव 'देवदत्तेन तण्डुलः पच्यते' इति कर्मणि प्रयोगे शाब्दबोधः– देवदत्तकर्तृ–निष्ठव्यापारजन्यतण्डुलकर्मनिष्ठपाकजनकभावना मीमांसादर्शनस्य शाब्दबोधप्रक्रियामवगन्तुं भाट्टमतेनाभिहितान्वयवादो गुरुमतेन चान्विताभिधानवादो विज्ञेयो भवति, तदत्र समासेन निरूप्यते।

**अभिहितान्वयवादः** – वाक्यार्थबोधसन्दर्भे कुमारिलभट्टपादैः यः सिद्धान्तः प्रतिपादितः स एव अभिहितान्वयनाम्ना शब्दजगति विख्यातः। पदैः अभिधाशक्त्या अभिहितानाम् उपस्थितानां पदार्थानां तात्पर्यवृत्त्या (वक्तुः तात्पर्यानुसारेण ) वाक्ये अन्वयः परस्परम् आकांक्षायोग्यतासन्निधिजन्यः संसर्गो भवतीति सिद्धान्तमाश्रित्य प्रवर्तितो वादः अभिहितान्वयवादः समासेन अभिहितानामन्वयोऽभिहितान्वयः सिद्धान्तेऽस्मिन् आदौ पदैः मुख्यया शक्त्या पदार्था उच्यन्ते अभिहिता भवन्ति ततो वक्तुस्तात्पर्यानुसारेण तेषां पदार्थानामाकांक्षायोग्यतासन्निधिवशादन्वयो भवतीति भाट्टमीमांसकानां मतम् मतेऽस्मिन् अपदार्थ-स्तात्पर्यार्थोऽपि वाक्यार्थो भवति अतोऽन्वयवृत्तिरेवात्र तात्पर्यवृत्तिरित्युच्यते यदुक्तं काव्यप्रकाशे मम्मटभट्टेन–

तात्पर्यार्थोऽपि केषुचित् आकांक्षायोग्यतासन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहितान्वयवादिनां मतम्[१३] (काव्यप्रकाशे)

मीमांसाशास्त्रपरम्परायामभिहितान्वयवादस्य बीजं 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य निमित्तत्वात्'[१४] इति जैमिनीयसूत्रस्य शाबरभाष्ये समुपलभ्यते । तत्रोक्तं शबरमुनिना यत् 'पदानि हि स्वं स्वं पदार्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्था अवगताः सन्तो वाक्यार्थमवगमयन्ति'।[१५] अनेन भाष्यसन्दर्भेण प्रथमदृष्ट्या प्रतीयते यच्छबरमुनेराशयोऽपि भाट्टानामभिहितान्वयवादमेव पुरस्करोति। पार्थसारथिमिश्रेणापि श्लोकवार्तिकटीकायामन्विताभिधानवादं खण्डयता भाष्यसन्दर्भद्वयमुद्धृतम् – 'न च पदार्था-द्वाक्यार्थावगतिरसम्बन्धात्', 'न च पदार्था एव वाक्यार्थः'। भाष्यमिदं मनसि निधाय भट्टपादै-रन्विताभिधानवादस्य खण्डनमित्थमभिहितम् –

**पदार्थानेव वाक्यार्थं यः सामस्त्येन मन्यते।**
**गौरश्वः पुरुषो हस्तीत्यत्राप्यस्य प्रसज्यते॥[१६]**

न पदार्था एव वाक्यार्थः यतः पदैः पदार्थसामान्य एव ज्ञायते किन्तु वाक्यार्थस्तु तात्पर्यानुसारेणाकाङ्क्षादिभिरन्वितविशेषो भवति। यदि पदार्था एव वाक्यार्थः स्युस्तर्हि गौरश्वः पुरुषो हस्तीत्यत्रापि वाक्यत्वं प्रसज्येत, न च तत् कदाचिदपि सम्भवति। अतः न पदार्था एव वाक्यार्थ इति सिद्धान्तो युक्तियुक्तः। अपि चोक्तं वार्तिककारेण–

**साक्षाद् यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।**
**वर्णास्तथापि नैतस्मिन् पर्यवस्यति निष्फले॥**
**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥[१७]**

वर्णसंघातरूपाणि पदानि यद्यपि साक्षात् पदार्थान् प्रतिपादयन्ति तथापि न तावन्मात्रे एव तेषां पर्यवसानमवगन्तव्यं यतो हि शब्दप्रमाणे केवलपदार्थः निष्फल एव स्वीक्रियते। यथा काष्ठानां ज्वाला पाकाय अपरिहार्या तद्वदेव वाक्यार्थबोधनाय प्रवृत्तानां पदार्थानां प्रतिपादनमपि तदर्थमेव मन्तव्यम्। यतः वाक्यार्थबोधने एव पदार्थानां सार्थकत्वम्। तदेतद् सर्वं विमृश्य पार्थसारथिमिश्रेणोक्तं – पदार्थावसिताभिधा–व्यापाराणामपि पदानां तत्रानवसिततात्पर्याणां वाक्यार्थावगतावेव तात्पर्यम्।[१८] अस्याशयो वर्तते यत् पदार्थबोधने एव अभिधाव्यापारः कृतार्थो भवति किन्तु पदार्थबोधमात्रेण वाक्यार्थः नावगम्यते, तदर्थं तु तात्पर्यवृत्तिबोधः अपेक्ष्यते। इत्थमत्र पार्थसारथिमिश्रेण तात्पर्यवृत्तिरपि संकेतिता। भाट्टमतानुयायिनः सर्वेऽपि दार्शनिकाः प्रायः वाक्यार्थबोधे तात्पर्यवृत्तिमिमां स्वीकुर्वन्त्येव किन्तु मानमेयोदयकारेणात्र लक्षणावृत्तिः स्वीकृता। तद्यथा –

वयं तु पदार्था लक्षणयैव वाक्यार्थं बोधयन्तीति ब्रूमः। वाच्यार्थानुपपत्त्या हि लक्षणा भवति। अत्र च पदैः स्मार्यमाणा गवादिपदार्था यदि अन्योन्यान्वयं विना सामान्यरूपा एवावतिष्ठेरन् तर्हि पदानां

व्युत्पत्तिसमयावधृतमेकविशिष्टार्थबोधतात्पर्यं विरुध्येत इति सामान्यरूपस्य वाच्यस्यनुपपत्तेरन्योन्यान्वयरूपे विशेषे एव पदार्थाः पर्यवस्यन्ति।[१९] नारायणमतानुसारेणाभिहितान्वयवादे पदार्था लक्षणया वाक्यार्थबोधं कारयन्ति। यतो ह्यन्वयं विना वाच्यार्थः नोपपद्यते अतः लक्षणावकाशो विद्यत एवेति भट्टनारायणस्याभिप्रायः। किन्तु कुमारिलभट्टपादैः लक्षणया अन्वयबोधः न क्वचिदपि संकेतितः। अत एव नागेशभट्टेन वैयाकरणसिद्धान्तलघुमञ्जूषायां मतमिदं मीमांसैकदेशिन इत्युक्त्वा खण्डितम्–

**यत्तु मीमांसैकदेशिनः** – वाक्यार्थे वाक्यस्य लक्षणेति, तन्न, वाक्यबोध्यान्वयस्य सम्बन्धरूपत्वेन तत्र वाक्यबोध्यस्य सम्बन्धस्य पदार्थस्य वा सम्बन्धग्रहाननुभवेन वाक्यबोध्यनिरूपितसम्बन्धमूलिकायास्तद्रूपाया वा तस्या असम्भवात्, अनुपपत्तिप्रतिसन्धानं विनापि तद्बोधेन तदप्रसराच्च।[२०] अभिहितान्वयवादे ये केचन वाक्यार्थबोधाय वाक्ये लक्षणां स्वीकुर्वन्ति ते वस्तुतः मीमांसकेकदेशिनः सन्ति न तु मीमांसकाः तात्पर्यवृत्तेः पृथक्कल्पनागौरवाद्भीतास्ते लक्षणामङ्गीकुर्वन्ति।

अभिहितान्वयवादनिरूपणावसरे मानमेयोदये श्रीमता नारायणेन पदानामभिधायकत्वं स्मारकत्वं वेति सन्दर्भे तौताततिमतानुयायिनां मतद्वयमुपन्यस्तम् –

(१) पदैः पदार्थबोधनं शब्दशक्तिजन्यत्वादभिधानमेवेति पार्थसारथिप्रभृतयः।

(२) शब्दोऽपि संस्कारोद्बोधनद्वारेणैव पदार्थं बोधयतीति स्मरणमेव पदार्थज्ञानमिति चिदानन्दप्रभृतयः।[२१]

इत्युक्ते पार्थसारथिमिश्रमते यदभिधायकं तत्पदं तत्र च शक्तिरभिधा किन्तु चिदानन्दमते पदानां स्मारकत्वं स्वीक्रियते यतस्तन्मते शब्दः संस्कारोद्बोधनपूर्वकमेव पदार्थं बोधयति। भवतु नाम पदानां स्मारकत्वं वा बोधकत्वं वा, उभयथा अपि अभिहितान्वयवादे न काचित्क्षतिः। यतः पदार्थज्ञानमभिधानं स्याद्वा स्मरणं वा स्यात् किन्तु पदार्थज्ञानानन्तरं यद्विशिष्टमन्वितरूपं वाक्यार्थज्ञानं तत्रैव पदार्थानां तात्पर्यमस्मिन् सिद्धान्ते स्वीक्रियते। पार्थसारथिमिश्रेण न्यायरत्नमालायां वाक्यार्थनिर्णये युक्तिविस्तरेणान्विताभिधानवादस्य खण्डनं व्यधायि तदत्र विस्तरभयान्न प्रस्तूयते। पार्थसारथिमुखेन अभिहितान्वयवादसारः –

**तस्मान्न वाक्यं न पदानि साक्षाद् वाक्यार्थबुद्धिं जनयन्ति किन्तु।**
**पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत्॥**

**सन्दर्भाः –**


१. ब्रह्मसूत्रशांकरभाष्ये भामतीटीकायाम्, १/१, पृ. ५५
२. तत्रैव, पृ.सं. ५६
३. नारायणभट्टस्य मानमेयोदये, श्लोक सं. २२, पृ.५१
४. श्लोकवार्तिके, १/११
५. मीमांसादर्शनम्, १/१/५
६. बृहदारण्यकोपनिषदि, १४/०४/०५

७. श्लोकवार्तिके, सम्बन्धाक्षेपपरिहारे, श्लोक सं. ४०, पृ.सं. ७९२

८. शाबरभाष्ये, तर्कपादे, पृ.सं. ३७

९. नीतितत्त्वाविर्भावे, पृ.सं. १४४

१०. मानमेयोदये

११. मीमांसान्यायप्रकाशे, पृ.सं. १०

१२. भाट्टचिन्तामणौ

१३. काव्यप्रकाशे, द्वितीये उल्लासे, पृ.सं. ३६

१४. जैमिनिसूत्रे मीमांसादर्शने, ०१/०१/२५

१५. शाबरभाष्ये, मीमांसादर्शने, ०१/०१/२५

१६. श्लोकवार्तिके, वाक्याधिकरणे, १०३

१७ श्लोकवार्तिके, वाक्याधिकरणे, ३४२-३४३

१८. तत्रैव, न्यायरत्नाकरटीकायां, वाक्याधिकरणे,३४२-३४३

१९. मानमेयोदये, शब्दप्रमाणे, श्लोक सं.८९.पृ. सं. ९७

२०. वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ.४१६

२१. मानमेयोदये, शब्दप्रमाणे, श्लोक सं.८९.पृ. सं. ९६



*सहायकाचार्यः (सं.)*

*सर्वदर्शनविभागे, राष्ट्रियसंस्कृतसंस्थानस्य,*

*जयपुरपरिसरस्य, जयपुरे*


**आदौ धर्मे प्रमाणं विविधविधिभिदाशेषतां च प्रयुक्तिं**
**पौर्वापर्याधिकारौ तदनु बहुविधं चातिदेशं तथोहम्।**
**बाधं तन्त्रं प्रसङ्गं नयमनयशतैः सम्यगालोचयद्भ्यो**
**भिन्ना मीमांसकेभ्यो विदधति भुवि के सादरं वेदरक्षाम्।।**
**–सुभाषितरत्नभाण्डागारे**

# न बहुव्रीहौ 'इति सूत्रस्य शेखरानुसारिविमर्शः

**डॉ. नवीनकुमारमिश्रः**

**प्रतिपाद्यबिन्दवः -**

1. सूत्रार्थे चिकीर्षितार्थविचारः।
2. उपसर्जनत्वादेव निषेधः, किं सूत्रेणेति विचारः ॥
3. 'अकृतव्यूह'परिभाषया सूत्रवैयर्थ्यविचारः ।
4. 'न बहुव्रीहावि'त्यस्य वार्त्तिकानुवादकत्वखण्डनम् ।
5. अन्वर्थसञ्ज्ञास्वीकारात् सूत्रवैयर्थ्यविचारः।
6. भाष्यकारमतोपन्यासः॥
7. यथोत्तरं मुनीनाम्प्रामाण्यम्।
8. यथोत्तरं प्रामाण्यस्य भाष्ये ध्वनितत्वम्।
9. महासंज्ञालभ्यार्थविचारः॥
10. 'सर्वादीनि सर्वनामानी'ति सूत्रस्य निष्कृष्टार्थः।
11. अत्र उद्देश्यविधेयभावविचारः।
12. कैयटमतखण्डनम्।
13. 'सन्निवेशाद्' इत्यस्याशयः॥
14. 'संज्ञोपसर्जनीभूतास्तु इत्यत्रोपसर्जनत्वविचारः॥

**1. सूत्रार्थे चिकीर्षितार्थविचारः** - तत्र शास्त्रिदण्ड्यादिमतम् -'बहुव्रीहौ' इत्यत्र विषयसप्तमी। तेन बहुव्रीहिविषये अर्थात् बहुव्रीहौ चिकीर्षिते इत्यर्थलाभः इति। तन्नोचितम्। कथन्तु विषयसप्तम्यां सत्यां बहुव्रीहिविषयतायाः समुदाये एवं सत्त्वेन समुदाये एव सर्वनामसञ्ज्ञायाः निषेधः स्यात्, न तु समुदायावयवस्य। तथाहि त्वत्कपितृकः' इत्यादेः परममूलोक्तस्य उच्छेदः स्यात् (तर्हि युष्मच्छब्दस्य अवयवस्य सर्वनामत्वात् 'त्वकत्पितृकः' इति रूपं स्यादिति भावः)॥

प्राचीनवृत्तिकारमतम् -चिकीर्षिते' इत्यध्याहारलब्धम्। अध्याहारं विना सूत्रस्य वैयर्थ्यापत्तेः।

अयमाशयः – समासे सति तु 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्त्तिकेन उपसर्जनत्वात् एव प्रतिषेधसिद्धे सूत्रस्य वैयर्थ्यं स्यात्। अतः समासात् पूर्वमेव संज्ञानिषेधस्य आवश्यकत्वे 'चिकीर्षिते' इत्यस्य आक्षेपः कर्तव्यो भवतीति। इदमपि नोचितम्, अध्याहारे प्रमाणाभावात् (अनुपपत्त्यभावात्) ॥

अत्र नागेशमतम् –न बहुव्रीहौ' इत्यत्र प्रथमार्थे सप्तमी। तथा च बहुव्रीहिः सर्वनामसंज्ञको न भवतीत्यर्थः॥ 'चिकीर्षिते' इत्यर्थो वृत्तिकृतः एव, न सूत्रकृतः सम्मतः इति। अत एव वृत्तिकृदुक्तः 'प्रक्रियावाक्ये निषेधः' इत्यर्थों भाष्यकृता बहुव्रीहिपदस्य तदर्थ(बहुव्रीह्यर्थ)वाक्यस्थपदलक्षणया साधितः। अन्यथा चिकीर्षिते इति रीत्या सिद्धे तादृशलक्षणाप्रयासो व्यर्थः स्यात्॥

**2. उपसर्जनत्वादेव निषेधः, किं सूत्रेणेति विचारः** – दीक्षितेन त्वत्कपितृकः' इत्यादौ समासात्पूर्वमेव अलौकिकप्रक्रियावाक्ये ('युष्मदसु' 'पितृसु' इत्यादौ) सर्वनामसंज्ञायाः निषेधः उक्तः । अत्र आशङ्कते – अलौकिकप्रक्रियावाक्ये समासस्य प्रवृत्तिः । अतः एकार्थीभावस्यापि कल्पना तत्रैव कर्तव्या भवति । तदित्थम् उपसर्जनत्वात् समासस्येव अलौकिकवाक्येऽपि संज्ञोपसर्जनीभूतास्तु न सर्वादयः इति सर्वनामसंज्ञानिषेधः स्यात् । तेन 'न बहुव्रीहौ' इति सूत्रं व्यर्थमिति।

**समादधाति** – अलौकिकप्रक्रियावाक्ये एकार्थीभावस्य आरोपेऽपि स्वार्थविशिष्टार्थान्तरबोधकत्वरूपस्य उपसर्जनत्वस्य अभावेन (कथन्तु तत्र वस्तुतः एकार्थीभावरूपसमुदायशक्त्यभावात् अर्थान्तरबोधकत्वं नास्ति) 'अतिभवकान् इति तत्पुरुषस्येव प्राप्तस्य अकचोऽभावार्थं संज्ञानिषेधाय सूत्रसार्थक्यम्॥

**3. अकृतव्यूह'परिभाषया सूत्रवैयर्थ्यविचारः** – ननु अनुपसर्जनत्वं सर्वनामसंज्ञायाः निमित्तम्। बहुव्रीहिसमासे कृते च अन्यपदार्थस्यैव प्रधानत्वात् निमित्तस्य (अनुपसर्जनत्वस्य) विनाशो भवति। अतः 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषासञ्चारात् अलौकिकविग्रहवाक्येऽपि सर्वनामसंज्ञा न स्यादिति सूत्रं व्यर्थमिति। तन्न, सिद्धान्ते अकृतव्यूहपरिभाषायाः अस्वीकारात्॥

**4. 'न बहुव्रीहावि'त्यस्य वार्त्तिकानुवादकत्वखण्डनम्** – केचित्तु न बहुव्रीहावि'ति सूत्रं भाष्यकृता प्रत्याख्यातम्। तस्मात् इदं वार्त्तिकद्वारा कृतस्य उपसर्जनप्रतिषेधस्य अनुवादकमिति आहुः (न तु विधायकम्)। तत्खण्डयति नागेशः – सूत्रकृता सूत्रस्य प्रणयनं कृतम्। वार्त्तिककृता च वार्तिकरचना कृता। अतो भिन्नकर्तृकत्वात्, वार्त्तिकस्य च पूर्वकालिकत्वाभावात् सूत्रमिदमनुवादकं न भवितुं शक्नुयात्॥

**5. अन्वर्थसञ्ज्ञास्वीकारात् सूत्रवैयर्थ्यविचारः** – ननु 'सर्वेषां नाम सर्वनाम' इत्यन्वर्थसञ्ज्ञा भाष्यसम्मता। नाम अर्थात् प्राधान्यम्। एवञ्च 'त्वत्कपितृकः' इत्यादौ 'युष्मदसु' इत्यस्य अप्राधान्यात् सर्वनामसञ्ज्ञायाः वारणं स्यात्, स्याच्च सूत्रस्य वैयर्थ्यमिति। तन्न। संज्ञायाः अन्वर्थत्वं भाष्यकृदूहितम्, न सूत्रकृदूहितम्। तस्मात् संज्ञावारणाय सूत्रस्य सार्थक्यं बोध्यम्॥

**6. भाष्यकारमतोपन्यासः** – परममूले 'भाष्यकारस्तु' इत्यादिग्रन्थेन भाष्यकारस्य मतं प्रदर्शितम्। तथा च 'अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयम्' (अर्थात् संशयरहितो भूत्वा समासघटके पूर्वपदे उत्तरपदे

च स्वरस्य, अकच्प्रत्ययस्य च प्रयोग: कर्तव्य:) इति वचनात् भाष्यकार: 'त्वकत्पितृक:' इत्यादिरूपमेव इष्टं मत्वा न बहुव्रीहौ' इति सूत्रस्य प्रत्याख्यानमकार्षीदिति। तदित्थमेतेन प्रत्याख्यानेन वृत्तिकृतां प्रक्रियावाक्यनिषेधरूपं व्याख्यानं न युक्तमिति दीक्षिताशयोऽत्र बोध्य:।

**7. यथोत्तरं मुनीनाम्प्रामाण्यम्** – नन्वेवं सूत्रकृन्मते 'त्वत्कपितृक:', भाष्यकारमते च 'त्वकत्पितृक:' इति रूपद्वये प्राप्ते स्मृतिद्वयप्रामाण्याद् विकल्पोऽस्तु। कथं प्रत्याख्यानम् (सूत्रविरुद्धस्वीकरणम्) इति परिप्रश्न दीक्षित आह –यथोत्तरं मुनीनाम्प्रामाण्यमिति। अर्थात् उत्तरोत्तरमुनिमते पूर्वपूर्वमुने: तात्पर्य्यात् भाष्यकारस्य वचनमेव प्रमाणभूतमिति मन्तव्यम्॥

**8. यथोत्तरं प्रामाण्यस्य भाष्ये ध्वनितत्वम्** – उत्तरोत्तरमुनीनाम्प्रामाण्यमिति 'धिन्विकृण्व्योर चेति सूत्रे भाष्ये ध्वनितम्। तत्र हि किमर्थम् अत्वं विधीयते 'धिवि–प्रीणने' धातोर्वकारस्य, वस्य लोप एवास्त्विति आशक्य – अत्वे, अल्लोपे च स्थानिवत्त्वेन अकारेण बाधात् प्राप्तलघूपधगुणाभावार्थम् अत्वविधानम् इत्युक्तम्। न च वलोपेऽपि न धातुलोप आर्धधातुके' इति गुणनिषेध: सिद्ध: इति वाच्यम्, तत्प्रत्याख्याने गुणप्राप्ते: इत्युक्तम्। एवञ्च तत्सूत्रभाष्योभयमूलकमेवेदम्

अत्र चतुष्टयं ध्वनितम् – 1. सूत्रतस्तत्प्रत्याख्यानवादिमतं प्रबलम्॥

2. प्रत्याख्यानवादिसम्मतलक्ष्यमेव कथञ्चित्सूत्रमतेऽपि साध्यं, न तु तद्विपरीतम्।

3. सूत्रतस्तदसम्भवे सूत्राऽप्रामाण्यमेव॥

4. प्रत्याख्यानं सूत्रसम्मतञ्च॥

**9. महासञ्ज्ञालभ्यार्थविचार:** – सञ्ज्ञाशब्दस्य, उपसर्जनस्य (अन्यविशेषणत्वेन स्वार्थोपस्थापकमुपसर्जनम्) च सर्वादिगणे पाठो नास्ति। कथन्तु सर्वनामसञ्ज्ञा एका अन्वर्थसञ्ज्ञा। तस्मात् अत्र सर्वार्थवाचकस्यैव सर्वादिशब्दस्य सन्निवेश: इति कौमुद्यामुक्तम्। तदेव पल्लवयन् नागेश आह –'सर्वनाम इति महासञ्ज्ञा'। इयञ्च प्राधान्येन उपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्वसमानाधिकरण (एकाधिकरण)वृत्तिसर्वनामपदवत्त्वेन बोधिका। अर्थात् यत्र स्वशब्दोपस्थापितप्रसिद्धसर्वार्थबोधकत्वम्, अथ च सर्वनामपदवत्त्वम् (सर्वनामपदम्) भवति, तदेव 'सर्वनामेति महासञ्ज्ञाबोध्यं भवति। तस्मात् (महासञ्ज्ञाक-रणात्) सर्वार्थोपस्थापकसर्वादे: एव सर्वादिगणे अनुकरणम्। इतरेषां सञ्ज्ञाशब्दानाम्, उपसर्जनीभूतानां च नात्र ग्रहणम्, मानाभावात्।

महासञ्ज्ञालभ्यार्थे पदकृत्यम् – (1) नाम (नम्यते अन्य: अर्थ: इति नाम) पदस्वारस्येन प्राधान्येनेत्यस्य लाभ:। उपसर्जनं हि इतरविशेषणतयैव उपस्थापकमिति तेन तद्व्यावृत्ति:। (2) पूर्वादिसङ्ग्रहाय स्वीयसर्वार्थेति। अन्यथा सर्वविश्वेति शब्दे एव सर्वार्थवाचकत्वम्, पूर्वादिशब्दे तदभावात् सर्वनामसञ्ज्ञाभाव: स्यात्। (3) सञ्ज्ञाशब्दस्य व्यावृत्तये प्रसिद्धेति निवेश: । अयञ्च 'अभिव्यक्तपदार्था ये' इति न्यायमूलक:॥

**10. 'सर्वादीनि सर्वनामानी'ति सूत्रस्य निष्कृष्टार्थ:** – सर्वादीनि, तदन्तानि (सर्वाद्यन्तानि) च

प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्वसमानाधिकरणपदवन्ति इति 'सर्वादिसूत्रार्थः । एवञ्चात्र 'सर्वादीनि' 'सर्वाद्यन्तानि चेति द्वयमुद्देश्यम्, तथा 'पदवन्ति' इति विधेयम् । विधेयेऽस्मिन् अंशद्वयमस्ति – तादृशसर्वार्थवाचकत्वम्, सर्वनामपदवत्त्वञ्च । तत्र 'प्राप्ताप्राप्तविवेक'न्यायेन (प्राप्ताप्राप्तयोः अप्राप्ते एव विधानम्) सर्वनामपदवत्त्वांशे एव विधिः। सर्वार्थवाचकत्वस्य तु लोकतः एव सिद्धिरिति बोध्यम्।

**11. अत्र उद्देश्यविधेयभावविचारः – केचित्तु** – अन्वर्थसञ्ज्ञाबलात् 'सर्वार्थवाचकत्वम् 'सर्वादीनि' इति चोपस्थितौ। तयोः 'सर्वार्थवाचकत्वमि' ति विशेष्यम्, 'सर्वादीनि' इति च विशेषणम्। विशेषणाच्च तदन्तविधिरिति आहुः।

तन्न। भिन्नपदोपस्थाप्ययोः एव अर्थयोः परस्परमुद्देश्यविधेयभावेनान्वयः इति नियमेन अत्र एकपदोपस्थाप्ययोः अर्थयोः तथाऽन्वयस्य अव्युत्पन्नत्वात्॥

किञ्च, रूढ्यर्थस्य, योगार्थस्य च मध्ये अन्यतरस्य त्यागः आवश्यकः, तस्मात् तादृशस्य एकस्य अन्यस्मिन् नान्वयः।।

**12. कै यटमतखण्डनम्** – येन विधिरिति सूत्रे कैयटेन अन्वर्थसञ्ज्ञाया आक्षिप्ता सञ्ज्ञा विशेष्यत्वेन उक्ता, तथा तदीयविशेषणात् सर्वादिशब्दात् तदन्तविधिरिति प्रतिपादितम्॥

खण्डयन्नाह नागेशः – (1) आक्षेपं विनैव निर्वाहात् आक्षेपः अनुचितः । (2) अनुपपत्तौ सत्यामेव आक्षेपः सम्भवः ।अत्र तु अनुपपत्तिर्नास्ति । (3) अपि च, शाब्दबोधे पदवृत्तिज्ञानाधीनोपस्थितिविषयस्यैव परस्परमन्वयः इति नियमः । तथा च आक्षिप्तपदार्थस्य अन्वय एव न सम्भवः इति ।

केचित्तु – सर्वनामपदस्य आवृत्त्या एकस्योद्देश्यतया अपरस्य च विधेयतयाऽन्वयः इति वदन्ति । तन्न सम्यक्, आवृत्तौ गौरवादिति।

**13. सन्निवेशात् इत्यस्याशयः** – दीक्षितेन तदनुगुणानां (सर्वार्थवाचकानाम्) सर्वादिगणे सन्निवेशः उक्तः । तत्र सन्निवेशः अर्थात् अनुमानम्। अनुमानाकारश्च –'सर्वादिगणपठितानि सर्वार्थवाचकानुकरणानि, सर्वनामसञ्ज्ञाप्रयोजकत्वात्, यन्नैवं तन्नैवम् इति॥

**14. सञ्ज्ञोपसर्जनीभूतास्तु' इत्यत्रोपसर्जनत्वविचारः** – सञ्ज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्तिके 'उपसर्जनत्वं नाम इतरविशेषणत्वेन अर्थोपस्थापकत्वम्। न चैतादृशोपसर्जनत्वस्वीकारे 'तदोः सः' इति सूत्रस्थभाष्येण (तत्र कृत्रिमोपसर्जनस्य ग्रहणम्) विरोध इति वाच्यम्, तस्य भाष्यस्यैकदेश्युक्तित्वादिति॥

*व्याकरणप्राध्यापकः*
*क.जे.सोमैयासंस्कृतविद्यापीठम्,*
*राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई*

# मिथिला के कुछ अल्पप्रसिद्ध गङ्गेशपूर्व नैयायिक

**डॉ. उदयनाथ झा 'अशोक'**

**व्योमशिवाचार्य** - वैशेषिकदर्शन में प्रसिद्ध प्रशस्तपादभाष्य की व्याख्या है व्योमवती, जिसके रचयिता हैं व्योमशिवाचार्य। उदयन ने किरणावली में एक प्रसंग उद्धृत किया है -'न चात्माकाशौ तथा भवितुमर्हतो विशेषगुणवत्वात् पृथिव्यादिवदित्याचार्याः' इसके आचार्यपदव्याख्यान में किरणावलीप्रकाशकार वर्धमान उपाध्याय 'व्योमशिवाचार्य' करते हैं। व्योमशिवाचार्य, अपने गुरु के सम्बन्ध में कतिपय स्थलों पर विभिन्न प्रकार से यह तो बताया है कि वे बौद्ध-दार्शनिकों को पराभाव करनेवाले मूर्द्धन्याचार्य थे, जिन्होनें बहुत सारी रचनाओं की रचना की है और वे सुप्रसिद्ध विद्वान् तथा पण्डित-समाज में सम्मानित थे। पर व्योमशिव ने कहीं भी उनका नामोल्लेख तक नहीं किया है, जिससे लगता है कि उसके पीछे उनकी 'आत्मनाम गुरोर्नाम' वाली धारणा ही रही होगी कि गुरु का नाम नहीं लेना चाहिए।

व्योमशिवाचार्य ने 'कणाद' पद की व्याख्या की है, इन्होंने 'कणान् अत्तीति कणादः' को असद् व्याख्यान कहते हुए 'असच्चोद्यनिरासार्थं कणान् ददाति दयते इति वा कणादः' को 'केचन अन्ये' के नाम से परिभाषित किया है। आप शैवसम्प्रदायावलम्बी मूलतः नास्तिकमतविरोधी थे। इसीलिए अपनी कृति व्योमवती में वेदान्त, सांख्य आदि दर्शनों के कतिपय सिद्धान्तों को निरास करते हुए भी मुख्यरूप से जैन और बौद्धदर्शनों को ही अपना लक्ष्य बनाया है। यही कारण है कि परवर्ती उदयनाचार्य, श्रीधराचार्य, शङ्करमिश्र आदि ने आपको अपनी-अपनी कृतियों में, क्रमशः किरणावली, न्यायकन्दली, किरणावलीप्रकाश आदि में प्रमाण रूप से ग्रहण किया है। इससे यह तो निश्चय ही सिद्ध होता है कि आप अपने शास्त्र में कितने प्रौढ और प्रगाढ पाण्डित्य रखते थे और आपका मत कितना महत्त्वपूर्ण होता था।

कतिपय समालोचकों ने इन्हें मालवाधीश श्रीहर्ष (भोजराज के पितामह) का सभासद अथवा समकालिक माना है, जिनका राज्यकाल ९४८-७२ ई. इतिहासकारों ने बताया है, पर कुछ लोग कादम्बरी बाणभट्ट की चर्चा किये जाने से इन्हें हर्षवर्धन (६०६-६४५ई.) का सभ्य मानते हैं। यहाँ मेरी विमति इसलिए है कि व्योमवती में इन्होंने 'श्रीहर्षं देवकुलमिति ज्ञाने' लिखा है और हर्षवर्धन श्रीहर्ष नहीं कहलाते थे। यह तो निश्चित है कि भर्तृहरि, कुमारिल, प्रभाकर, धर्मकीर्त्ति आदि का उल्लेख करने से आप उनके परवर्ती थे, मण्डनमिश्र एवं जैनाचार्य अकलङ्क के मोक्षविषयक विचार का खण्डन करने से वे आपके

पूर्ववर्ती विद्वान् भी सिद्ध होते हैं, किन्तु क्या कोई व्यक्ति सौ–दोसौ वर्ष बाद किसी का उल्लेख नहीं कर सकता, किसी का खण्डन नहीं कर सकता?

कुछ समालोचक विद्वान् व्योमशिवाचार्य को सप्तपदार्थीकार शिवादित्य मिश्र से भिन्न तो कुछ अभिन्न मानते हैं, जबकि मुम्बई विश्वविद्यालय में सुरक्षित सप्तपदार्थी की एक प्राचीन मातृका में उसे व्योमशिवाचार्यकृत ही बताया गया है। इससे दोनों का ऐक्य निर्धारित करना कदापि असंगत नहीं होगा। परन्तु व्योमवती और सप्तपदार्थी के विषयगत मतभेदों से सन्देह उत्पन्न होता है। सप्तपदार्थी में जहाँ दिक् के ग्यारह, सामान्य के तीन, प्रमाण के दो और हेत्वाभास के छः भेद बताये गये हैं, वहीं व्योमवती में इनकी संख्या क्रमशः दश, दो, तीन एवं पाँच कही गई हैं। इससे अवश्य ही दोनों की भिन्नता प्रमाणित होती है। जो भी हो, पर व्योमशिव सुतरां मण्डन मिश्र और उदयन के मध्यवर्ती आचार्य रहे हैं, इसमें दो मत नहीं। साथ ही आप मैथिल थे, कारण आपकी कृतियों का उल्लेख मैथिलेतर किसी विद्वान् ने नहीं किया है।

**चक्राचार्य** – न्यायाचार्य दार्शनिक चक्राचार्य का नाम दर्शनशास्त्र में अज्ञात–सा अवश्य है, पर ये थे परम मूर्द्धन्य आचार्य, जिनका उल्लेख कतिपय परवर्ती मैथिल आचार्यों ने अपने–अपने ग्रन्थों में किया है।इनका कोई ग्रन्थ उपलब्ध नहीं होता और न इस बात का पता ही चलता है कि इन्होंने कौन–सा ग्रन्थ, किस नाम से रचा था। परन्तु चक्रधर नामक आचार्य ने न्यायमञ्जरी–ग्रन्थभङ्ग नामक एक टीका जयन्तभट्टकृत न्यायमञ्जरी की थी। एक दूसरे विद्वान् चक्रपाणि दत्त नामक थे, जिन्होंने किसी पालवंशीय राजा के समय चरकसंहिता के ऊपर विलक्षण व्याख्या लिखी थी। इन्होंने न्यायसूत्र पर किसी टीका या वृत्ति की रचना की थी, जिसका उल्लेख बडौदा से प्रकाशित न्यायालङ्कार की भूमिका (पृ.२२) में किया गया है। ये दोनों विद्वान् हमारे चक्राचार्य से अर्वाचीन है यह भी निश्चित है। ऐसी स्थिति में चक्राचार्य का मैथिल होना तथा उनका न्यायदर्शन में अद्वितीय पाण्डित्य रखना सिद्ध होता है।

**चन्द्रोपाध्याय** – चन्द्र उपाध्याय, तत्त्वचिन्तामणि में गंगेश के द्वारा कतिपय स्थलों पर उद्धृत किये गए हैं। इन्होंने न्याय–मीमांसादर्शन में अमृतबिन्दु नामक एक ग्रन्थ की रचना की थी, जिसकी मातृका एशियाटिक सोसाइटी[1] में पाई जाती है, जिसमें लिखा है –'इतिश्री महामहोपाध्यायश्रीचन्द्रकृतौ अमृतबिन्दुर्नाम प्रकरणं समाप्तम्'। विधिवाद और अपूर्व को लेकर लिखा गया यह ग्रन्थ प्रभाकर–मतावलम्बी प्रतीत होता है, तभी तो कृत्यरत्नाकर[2] में चण्डेश्वर ठाकुर ने इन्हें 'गुरुमताचार्य', शङ्करमिश्र ने वादिविनोद में तथा पद्मनाभ मिश्र ने सेतुटीका में 'प्राभाकरैकदेशिन्' कहा है। चन्द्राचार्य ने निबन्धन, विवरण, प्रकरणपञ्जिका आदि से उद्धरण और प्रमाणों को लेकर अपने उक्त ग्रन्थ की रचना की है। तत्त्वचिन्तामणि में गङ्गेश ने जो '**गुरूभिर्ज्ञात्वा गुरूणां मतम्**' लिखा होगा, वह भी इन्हीं को ध्यान में रखकर प्रतीत होता है। जबकि शब्दखण्ड में विधि और अपूर्व प्रकरण को लेकर उन्हें अमृतबिन्दु से ही ऊर्जा मिली होगी। मणिग्रन्थ के व्याख्याकार बंगीय विद्वान् वासुदेव सार्वभौम ने अपनी रचना शब्दमणिपरीक्षा में इनके

मतों का खण्डन किया है, उनके ही शब्दों में –'अतएव स्वर्गकामबोद्धृकं यागविषयकं कार्यमिति प्रथमतोऽन्वयानुभवे अन्वयप्रयोजकबोद्धृत्वोपस्थितावनन्तरं यागविषयकं स्वर्गकामिकार्यमित्यमृतबिन्दुदर्शितः पन्थाः निरस्तः'। अन्यत्र भी इन्होंने लिखा है कि –'अयञ्च सिद्धान्तविरोधः प्रभाकरं प्रति, न तु मिश्रं तेनाश्वानामेवात्र देवतात्वास्वीकारात्। तन्मतं तु वक्ष्यमाण–चन्द्र–राद्धान्तदूषणेनैव दूषितमित्युपेक्षितम्'। सार्वभौम के पुत्र वाहिनीपति भट्टाचार्य ने भी अपने शब्दालोक–उद्योत में चन्द्र और अमृतबिन्दु दोनों को उद्धृत किया है[3]। रुचिदत्त मिश्र भी शब्दमणिप्रकाश में एक स्थल पर लिखते हैं– '**अतएव व्यक्तौ सदपि शक्तिज्ञानं न कारणं जातिविषयत्वेन शक्तिज्ञानादेव व्यक्तिधीसम्भवात्तयोरेक–धीवेद्यत्वनियमादिति चन्द्रेणापास्तम्**'[4]। वाचस्पति द्वितीय ने अपने न्यायतत्त्वालोक में इनके आठ प्रकार के स्वत्व को उद्धृत किया है –'**इत्यगत्याष्टमः पदार्थः स्वत्वमिति चन्द्रः**'। चन्द्रोपाध्याय की दूसरी रचना 'नयरत्नाकर' है, कहते हैं कि यह नेपाल के दरवार पुस्तकालय में संरक्षित है[5], जिसमें आप लिखते हैं –

**'असौ चन्द्रः श्रीमानकृत नयरत्नाकरमिमम्।**
**निबन्धं पोशाली–कुलकमलकेदारमिहिरः॥'**

इससे विदित होता है कि आप पोशालीमूलक ब्राह्मण थे, जो कुल मिथिला में काश्यप गोत्र में आता है। कुछ विद्वान् इन्हें बंगदेशीय भी मानते हैं[6], जबकि उन दिनों में बंगाल में 'महामहोपाध्याय' की उपाधि नहीं हुआ करती थी।और तो और यह कुल–मूल की परम्परा भी बंगाल में मिथिला की तुलना में सर्वथा नवीन है।

नयरत्नाकर में चन्द्राचार्य ने भवनाथकृत नयविवेक से उद्धरण ग्रहण किया है, जिनका समय विद्वानों ने १०६०–१११० ई. के मध्य स्थिर किया है[7]। इन्हीं सबके आधार पर म.म.डॉ. उमेशमिश्र ने इनका समय ११०० ई. से पहले बताया है[8]।

**सोण्ढलोपाध्याय** – अपने समय के मूर्धन्य नैयायिकों में से एक, जिन्हें तत्त्वचिन्तामणि में गङ्गेश ने एकाधिक स्थलों पर उद्धृत किया है, ये किसी ग्रन्थ के रचयिता हैं अथवा नहीं, कृति के अभाव में कहा नहीं जा सकता। हाँ, डॉ. किशोरनाथ झा के मत में 'व्यधिकरणधर्मावच्छिन्न प्रतियोगिता' के अभाव का चिन्तन अवश्य ही सोण्ढल की निजी देन है[9]। परन्तु उत्तरवर्ती कतिपय आचार्यों ने इनके मतों को आगे करके अवश्य ही गहन विचार किया है। अनुमानमणिपरीक्षा में वासुदेवसार्वभौमजी लिखते हैं– '**तत्र केवलान्वयिनि सोन्दडीयां केवलान्वयिसाध्याभाव–प्रसिद्धिमाशङ्कते अथेति**'। बाध–प्रकरण में भी सार्वभौम ने एक बृहद् उद्धरण देकर 'इति वदन्ति सोन्दडप्रभृतयः' आदि लिखा है। न्यायतत्त्वालोक में भी वाचस्पति मिश्र द्वितीय ने कहा है –'सोन्दलोपाध्यायास्तु – **य एव परदुःखस्यात्मन्यत्यन्ताभावः स एव सुखदुःखप्रागभावेऽपि। तथा च यदा ते सहकारिसम्पन्ना भवन्ति तदा दुःखं जनयन्ति नो चेत् पण्डा एवेति युक्ता प्रव्रज्या।......मैवम्**।' बंगदेशीय विद्वान् कृपाराम तर्कवागीश (१७६४ ई.) कृत 'नव्यधर्मप्रदीप' में एक दीर्घ उद्धरण पाया जाता है, जिसके अन्त में लिखा है– '**स्तुत्या तु तस्य विधेयत्वं**

**लभ्यते एव यत्स्तूयते तद्विधेयमिति न्यायादिति सोन्दडोपाध्यायफक्किका**'[१०]। धर्मशास्त्रीय निबन्ध तत्त्वनिर्णय में भी सपिण्डीकरण के प्रसंग पक्षधर उपाध्याय लिखते हैं- '**अत्र च महाजनानां सोण्ढलोपाध्यायानामन्येषां च व्यवहार उपष्टम्भक इत्याहुः**[११]।'

सोण्ढल की वर्तनी में कई प्रकार के भेद भी देखे जाते हैं, अतः इनका मूलनाम क्या था कह पाना कठिन है। क्योंकि पाए जानेवाले नामों में एकरूपता कहीं नहीं मिलती, यथा- सोन्दल, सोन्दड, सोण्डल, सोण्ढल आदि। किन्तु इनका समय विद्वानों ने १३०० ई. के आस-पास निर्धारित किया है, क्योंकि मणिकण्ठ और गङ्गेश ने इन्हें 'नव्याः' 'नव्यास्तु' कहकर उद्धृत किया है। मुझे लगता है कि सोण्ढल १२००-१२५० ई. के मध्य ही कभी हुए होंगे।

**मणिकण्ठ मिश्र-** इनके न्यायरत्न ग्रन्थ पर वाचस्पति मिश्र (द्वितीय)ने व्याख्या लिखी है[१२], जो आज तक मातृका रूप में ही प्राप्त होती है, परन्तु नृसिंहयज्वाकृत द्युतिमालिका टीका के साथ तेरह विभिन्न विभागों में विभाजित यह मूल 'न्यायरत्न' मद्रास के Govt. Oriental Series से सन् १९५३ में प्रकाशित हो चुका है। न्यायरत्न- पुष्पिका से यह विदित होता है कि आप किसी मिथिलेश के धर्माधिकारी थे। तञ्जावुर[१३] में उपलब्ध तेलगुलिपि में लिखित न्यायरत्न की पुष्पिका में कहा है -'तिरुत्तिय (तीरभुक्तिय?) मिश्रोक्तं राजधर्माधिकारिमणिकण्ठकृत न्यायरत्नं नाम प्रकरणं समाप्तम्।' यह तिरुत्तिय शब्द तीरभुक्तिय ही है।

आचार्य सनातनि और तरणिमिश्र को उद्धृत करने के कारण आप जहाँ इन दोनों आचार्यों से अर्वाचीन सिद्ध होते हैं, वहीं गंगेश के द्वारा अपनी कालजयी रचना तत्त्वचिन्तामणि में आपके उल्लेख करने से निश्चय ही आप उनसे प्राचीन हैं। इस आधार पर आपका अनुमानित समय ११७५-१२५० ई. के मध्य निर्धारित किया जा सकता है। न्यायरत्न में जगद्गुरु प्रभाकर और हरिनाथ के भी नाम मिलते हैं, जिससे वे भी आपके पूर्वाचार्य प्रतीत होते हैं।

गङ्गेश ने जहाँ आपको 'नव्याः' करके उल्लेख किया है, वहीं उनके पुत्र वर्द्धमान ने कुसुमाञ्जलिप्रकाश[१४] एवं प्रमाणप्रकाश[१५] में 'सम्प्रदायविद्' कहकर उद्धृत किया है। पक्षधर के शिष्य (यज्ञपतिसुत) नरहरि उपाध्याय ने अनुमानदूषणोद्धार[१६] के पक्षता-विचार क्रम में लिखा है -'न च तत्र पक्षताविरहव्यवहार एव नास्तीति वाच्यं मणिकण्ठेन पक्षताविरहप्रदर्शनात्....साधकमानेति वदतो गङ्गेशस्यापि स्वरसाच्च'। पक्षधर के भ्रातृज और अन्तेवासी वासुदेव मिश्र ने आलोक की टीका करते हुए कहा है[१७]- 'चिन्तामणिमनालोच्य मणिकण्ठप्रदर्शनम्'।

तत्त्वचिन्तामणि की व्याख्या करते हुए अनुमानमणिपरीक्षा में आचार्य वासुदेव सार्वभौम ने आपको सादर स्मरण किया है -'मणिकण्ठीयं मतमाह - अन्ये त्विति'[१८]। 'इदं मणिकण्ठमतमन्ये त्विति कृत्वा स्वासंमतमावेदयतां मणिकृतामयमभिसन्धिः.....'[१९]। 'यत्त्विति मतं स्वमतेन दूषयित्वा अन्येत्त्विति प्रक्रान्तमणिकण्ठमतेन दूषयति केचित्त्विति।.....अयमेव सन्दर्भः। अन्यथा अन्येत्त्विति कृत्वा

मणिकण्ठमतमभिधाय पुनः केचिदिति तन्मताभिधानं पृथक् न युज्येत'[२०]। इसी प्रकार उन्होंने परामर्श-प्रकरण में[२१], तथा सव्यभिचार-प्रसंग में[२२] इनके मतों को व्यक्त किया है।

मणिकण्ठ की दूसरी रचना 'न्यायचिन्तामणि' है, जिसका उल्लेख इन्होंने अपने न्यायरत्न में दो बार किया है। वाचस्पति द्वितीय के समय वह कृति उपलब्ध थी, तभी तो उन्होंने अपनी टीका में न्यायरत्न के इस वाक्य को उद्धृत किया होगा –'अयञ्च विपक्षितविवेको मया न्यायचिन्तामणौ कृत इति तत एवाध्यवसेयमित्यर्थः।'[२३]

**दिवाकर उपाध्याय**- न्याय-वैशेषिक दर्शन के महानतम आचार्यों में से एक थे हमारे दिवाकर उपाध्याय, जिनके पिता किसी मिथिला-नरेश के सभासद हुआ करते थे। जगद्गुरु से ख्यात नैयायिक प्रभाकर उपाध्याय इन्हीं के सगे भाई थे, पर न जाने वे वरज थे या अवरज। यद्यपि इन्होंने कतिपय ग्रन्थों की रचना की है, पर कोई भी रचना उपलब्ध नहीं होती, सिवाय निबन्धोद्योत के, वह भी अप्रकाशित है। परन्तु गङ्गेशोपाध्याय, वर्धमानोपाध्याय, शङ्करमिश्र, वाचस्पति मिश्र द्वितीय, प्रगल्भ मिश्र, त्वन्त उपाध्याय, वासुदेव सार्वभौम, जगदीशतर्कालङ्कार, मल्लिनाथ आदि के द्वारा इनकी कृतियों का उल्लेख होने से इनके वैदुष्य का परिचय तो अवश्य ही प्राप्त हो जाता है।

ईश्वरानुमानचिन्तामणि में गङ्गेशोपाध्याय ने उद्योत और दिवाकर दोनों की चर्चा की है, जबकि उनके पुत्र वर्धमान ने द्रव्यकिरणावली प्रकाश में दो प्राचीनाचार्यों के मतों को बिना नाम लिए उद्धृत किया है –'अवयवानवस्थेति यद्यपि अवस्थानमात्रं.....व्यवस्थाविरह एवानवस्थेत्येके। द्व-यणुकावयवस्य.... महत्त्वं स्यादित्यर्थ इत्यन्ये।' इसकी व्याख्या में प्रगल्भ मिश्र ने स्पष्ट कर दिया है कि 'इत्येके प्रभाकराः' 'इत्यन्ये दिवाकरोपाध्यायाः'। इसी प्रकार प्रगल्भ ने कतिपय स्थलों पर दिवाकर को 'तच्चिन्त्यं दिवाकरविरोधात्','इति दिवाकरस्वरसः', 'तथैव दिवाकरः', 'दिवाकरमतं दूषयति - न चेति' इत्यादि के द्वारा स्मरण किया है तथा लगता है कि वे दिवाकर के अनुगामी विद्वान् रहे हों।

वासुदेव सार्वभौम अपने अनुमानमणिपरीक्षा में इनके प्रमाणोद्योत का उल्लेख करते हैं, जबकि शङ्कर मिश्र और वाचस्पति मिश्र द्वितीय ने भी अपने निबन्ध-व्याख्यान तथा न्यायतत्त्वालोक में उद्योत की चर्चा की है। त्रिसूत्री-निबन्ध व्याख्या में शङ्करमिश्र ने तो कबहा ही है –

**'प्रकाशदर्पणोद्योतकृद्भिर्व्याख्या कृतोज्वला।**
**तथापि योजनामात्रमुद्दिश्यायं ममोद्यमः॥'**

यह उद्योत परिशुद्ध की व्याख्या है, जिसकी मातृका एशियाटिक सोसाइटी के संग्रहालय में सुरक्षित है। शब्दशक्तिप्रकाशिका में जगदीश भट्टाचार्य मे लिखा है –'दिवाकरस्तु संस्कारावच्छिन्नमेव ज्ञानं जानात्यर्थ इत्युक्तस्थले मुख्यमेव कर्मत्वं घटादेरित्याह, तन्मन्दं.....।' मणिटीका के अनुमान प्रकरण में प्रगल्भ मिश्र भी लिखते हैं –'दिवाकरमतमाशङ्कते - अथेति'[२४]। बंगाल के ही पुण्डरीकाक्ष विद्यासागर ने कातन्त्र-प्रदीप के कारक-भाग में लिखा है –'यद्यपि खण्डनटीकायां दिवाकरादिभिः संस्कारावच्छिन्ना बुद्धिर्जानात्यादेरर्थ

इत्युक्तं संस्कारफलावच्छिन्नस्य धात्वर्थादिति – इति न्यायनिबन्धोद्योतेऽपि दृश्यते'[२५]। यहाँ दिवाकर की दो कृतियों का नामोल्लेख हुआ है, एक खण्डनखण्डखाद्यटीका का और दूसरा न्यायनिबन्धोद्योत का। निबन्धोद्योत का उल्लेख तो वाचस्पति द्वितीय ने भी अपने न्यायतत्त्वालोक में किया है –'अतएवैतदुद्योत-तृतीयप्रकाशावेवमेवेति' पर दूसरी की चर्चा सर्वप्रथम पुण्डरीकाक्ष ने ही की है।

दिवाकर ने द्रव्यकिरणावली-विलास की भी रचना की थी, जिसका उल्लेख उन्होंने स्वयं न्यायनिबन्धोद्योत[२६] में किया है –'...व्याख्यानान्तराणि द्रव्यकिरणावलीविलासे कृतान्यस्माभिः'। मातृका का अन्तिम पृष्ठ कुछ खण्डित-सा है, जिसमें लिखा है –'....यथा सांख्यपक्ष उत्थापितस्तत्र दूषणमाह – संसारदशायामिति शेषं सुगमम्। ...... ......मिथिलेश्वरेण श्रीभाजिशान्तिकरणे विहितः पदे यः।

**तत्सूनुनाखिलतमांसि नुदन्निबन्धोद्योतः स्फुटं रचित एष दिवाकरेण॥**
**दिवाकरा....तोऽयं समुद्यतः। विद्वज्जनमनः पद्ममुल्लासयतु सर्वदा॥**

इति महोपाध्यायश्रीदिवाकरकृतो न्यायतृतीयाध्यायनिबन्धोद्योतः समाप्तः।

देवराज्ये देउलाश्रीमत्कटके पीतूपाटकसं उपाध्यायश्रीगिरीश्वरैर्लिखितमिदम्। ल.सं. १६४ ज्यैष्ठवदि ११'। मातृका के पूर्वांश से यह भी विदित होता है कि दिवाकर के पिता किसी मिथिलेश के सभ्य थे।

तार्किकरक्षाकी टीका निष्कण्टका में मल्लिनाथ ने मोक्षप्रकरण के अवसर पर दिवाकर को विलासकार के रूप में उल्लेख किया है –'तथा चैकात्मनिष्ठनिखिलदुःखध्वंस साकल्यं मोक्षः मुमुक्षूणां च प्रत्येकमेकत्वान्नाव्याप्तिश्चेति विलासकारोक्तलक्षणमुक्तमित्यनुसन्धेयम्।' द्रव्यप्रगल्भी में प्रगल्भ मिश्र ने भी दिवाकर का उल्लेख विलासकार के रूप में ही किया है, जबकि पक्षधर मिश्र ने भी अपने द्रव्यविवेक[२७] में विलास और दिवाकर दोनों का नाम-निर्देश किया है।

दिवाकर की एक रचना है उदयनकृत बौद्धाधिकार की व्याख्या आलोक, जैसा कि उन्होंने स्वयं लिखा भी है –'अधिकं त्वालोकनाम्नि बौद्धाधिकारविवरणेऽस्माभिः प्रपञ्चितम्'[२८]। इनकी एक अन्य रचना कुसुमाञ्जलि-परिमल की चर्चा शङ्करमिश्र, त्वन्त उपाध्याय, वर्धमान एवं वासुदेव सार्वभौम ने आमोद, मकरन्द, प्रकाश आदि में की है। इससे प्रतीत होता है कि दिवाकर एक बडे दार्शनिक, न्याय-वैशेषिक और वेदान्त के मूर्द्धन्य आचार्य थे तथा इन्होंने कतिपय ग्रन्थों की रचना भी की थी, जिनमें न्यायनिबन्धोद्योत, खण्डनखण्डखाद्य की टीका, द्रव्यकिरणावली-विलास, बौद्धाधिकार की व्याख्या आलोक एवं कुसुमाञ्जलि-परिमल प्रमुख हैं। इनका समय १२००-१२५० ई. के आस-पास स्थिर होता है।

**प्रभाकर उपाध्याय–** गङ्गेश-पूर्व मैथिल नैयायिकों में आप एक उल्लेखनीय मूर्द्धन्य विद्वान् उल्लेखनीय माने जाते हैं, जिनकी न्याय-वैशेषिक में अव्याहत गति थी। वैसे तो आप प्रभाकर मीमांसक भी थे, तथा वेदान्ती भी, पर उसमें आपकी ख्याति अधिक न हो सकी। न्याय-वैशेषिक में इन्होंने उदयन की कतिपय कृतियों की व्याख्या लिखी है, जिनमें परिशुद्धि और कुसुमाञ्जलि मुख्य हैं। श्रीवल्लभाचार्यकृत

लीलावती की भी आपने व्याख्या की थी, जिसका नाम प्रकाश बताया जाता है। इसी नाम से एक दूसरी व्याख्या है, वर्धमानोपाध्याय की, जिसमें वे लिखते हैं- 'प्रभाकरोपाध्यायमतमाह - .....', पक्षधरमिश्र ने भी लीलावती-विवेक[११] में कतिपय स्थलों पर इन्हें उद्धृत किया है। एक जगह तो उन्होंने लिखा भी है -'अत्राकाशपरिमाणं दृष्टान्तः अन्यतरघटितश्च हेतुः प्रभाकरे प्रकाशे स्फुटः'।

गङ्गेश अपने ग्रन्थ के उपमानखण्ड में लिखते हैं -'प्रभाकरोपाध्यायकृतलक्षणमाह - असाधारणेति', 'प्रभाकरमुत्थापयति - अत्रेति'। अपनी-अपनी मणिटीकाओं में पक्षधर-जयदेव, प्रगल्भ और मथुरानाथ तर्कवागीश आदि ने भी इनका सादर उल्लेख किया है। यथा प्रगल्भ मिश्र -'अत्रैव प्रभाकरोपाध्यायमतमुपष्टम्भकमाहात एवेति'। द्रव्यकिरणावली की टीका में भी प्रगल्भ मिश्र अनेक बार इनका उल्लेख करते हैं -'अतएव त्रसरेणौ परमाणुत्वमेव स्वीक्रियते न महत्त्वम्....साध्यव्यापकत्वादिति प्रभाकर-दिवाकराभ्यां स्वहस्तिततत्वादिति', 'पन्नगानां पवनपानप्रवृत्तिरेवासिद्धिरिति प्रभाकरः','प्रभाकरोपाध्याया आहुः'।

**तरणि मिश्र** - मणिकण्ठ और गङ्गेश ने अपने-अपने ग्रन्थों में रत्नकोशकार तरणि मिश्र की बहुशः चर्चा की है। आचार्य मणिकण्ठमिश्र कहते हैं कि -'संशयविरोधिधर्मद्वयविषयानुमिति जनकत्वं सत्प्रतिपक्षत्वमिति रत्नकोषः' इसकी टिप्पणी में वाचस्पति मिश्र (द्वितीय) ने स्पष्ट करते हुए कहा है - 'तरणिमिश्रमतमाह - संशयेति।' आचार्य गङ्गेश अपनी तत्त्वचिन्तामणि में रत्नकोशकार को इस प्रकार उद्धृत करते हैं -'रत्नकोशकृतस्तु द्विविधं हि सामान्यं जातिरुपाधिश्च, समवेता जातिः असमवेतं चोपाधिसामान्यम्....'। स्मरणीय हो कि इनसे भिन्न एक रत्नकोशकार हैं शशधराचार्य के अनुज पृथ्वीधराचार्य, जिनकी कृति अनुपलब्ध किन्तु चर्चित है।

गदाधरभट्टाचार्य के गुरु नवद्वीप के हरिराम तर्कवागीश ने रत्नकोश की छाया-टीका लिखी थी, जिसका नाम रत्नकोशविचार है। इसमें आप लिखते हैं -'परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः रत्नकोशकारस्तु सत्प्रतिपक्षसंवलनदशायां संशयात्मकानुमितिं स्वीकरोति।' अपने परिशिष्ट प्रकाश में वर्धमानोपाध्याय ने इनको छः बार उद्धृत किया है, जबकि चार बार उन्होंने न्यायनिबन्धप्रकाश में भी तरणिमिश्र को स्मरण किया है। इनका प्रथम उद्धरण यथा -'तत्तदन्ते.....अखण्डोपाधि....इति रत्नकोशकृतः'। लीलावतीप्रकाश, प्रत्यक्षमणिप्रकाश आदि में भी वर्धमान ने इनको उद्धृत किया है। रुचिदत्त, अनुमानप्रकाश के ईश्वरवाद-प्रकरण में लिखते हैं -'तथा च रत्नकोशे तरणिमिश्रैरुक्तम् एवमभावत्वध्वंसत्वादिकं बोध्यम्।' वाचस्पति द्वितीय भी 'तरणिमिश्रमतमाह' करके उनसे उद्धरण ग्रहण किया है। उन्होंने न्यायतत्त्वालोक में कहा है - 'लक्षणं तु तुल्यबलबोधितसाध्यविपर्ययत्वमिति तरणिमिश्राः। तन्न......','तरणिमिश्रास्तु प्रत्यक्षमेव काले मानम्, इदानीं घट इत्यादि प्रत्यक्षस्य सर्वजनसिद्धत्वात्।'

बंगीयदार्शनिक कणादतर्कवागीश ने गङ्गेश-पूर्ववर्ती वृत्तिकारों में इनको भी परिगणित किया है, पर इनकी वृत्ति उपलब्ध नहीं होती। जबकि कुछेक विद्वान् तत्त्वचिन्तामणि, न्यायतत्त्वालोक और

गौतमीयसूत्रप्रकाश जैसे ग्रन्थों से प्राप्त उद्धरण की पंक्तियों से इसे वृत्ति-शैली की ही कृति मानते हैं। इनका समय विद्वानों ने खृस्तीय द्वादश शतक माना है, जबकि कुछ अन्य विद्वानों की राय में आप सन् १३०० ई. के आस-पास मिथिला में विद्यमान थे।

**त्रिलोचनाचार्य-** न्यायभाष्य पर उदयन से पूर्व भी कतिपय वृत्ति व्याख्या लिखी गई थीं, जिनके सन्दर्भ परवर्ती कृतियों में प्राप्त होते हैं और जो मूल रूप में हम लोगों के बीच प्राप्त नहीं हैं। इन्हीं वृत्तिकारों में से एक हैं त्रिलोचनाचार्य। आप त्रिलोचनाचार्य वाचस्पति मिश्र के गुरु थे, जिसका संकेत वाचस्पतिकृत न्यायवार्तिक-व्याख्या तात्पर्यटीका के प्रत्यक्ष लक्षणसूत्र के व्याख्यानक्रम में प्राप्त होता है -

**'त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखैः। यथामानं यथावस्तु व्याख्यातमिदमीदृशम्॥'**

इस संकेत के अतिरिक्त वाचस्पति के उत्तरवर्ती उदयनाचार्य ने तो स्पष्टरूप से ही परिशुद्धि के आरम्भ में त्रिलोचन को इनका गुरु कहा है -'उद्योतकरकालो हि अमूषां यौवनं तच्च कालपरिपाकवशात् गलितमिव। किं नामात्र त्रिलोचनगुरोः सकाशादुपदेशरसायनमासादितममूषां पुनर्नवी भावाय दीयत इति युज्यते।' अर्थात् इन्होंने (वाचस्पति ने) अपने गुरु त्रिलोचन से रसायन पाकर उद्योतकर की अतिवृद्धा वाणी को पुनः जीवनदान करने प्रयास किया है।

त्रिलोचनाचार्य ने न्यायभाष्य पर न्यायमञ्जरी नामक व्याख्या लिखी थी, जो कश्मीर निवासी जयन्त भट्ट की उपलब्ध न्यायमञ्जरी से भिन्न और प्राचीन है। परन्तु दुर्भाग्य, संस्कृत-वाङ्मय का, कि वह न्यायमञ्जरी किसी भी रूप में आज उपलब्ध नहीं है। हाँ, उनका कुछ सिद्धान्त और उनकी न्यायमञ्जरी का नामोल्लेख अवश्य ही उनके परवर्ती अनेक ग्रन्थों में पाये जाते हैं। अनिरुद्धाचार्य की विवरणपञ्जिका[३०], राघवभट्टकृत न्यायसारविचार, ज्ञानश्रीमित्र की निबन्धावली, रत्नकीर्ति की निबन्धावली, दुर्बेक मिश्रकृत धर्मोत्तरप्रदीप आदि में उनके विचार उपनिबद्ध देखे जाते हैं। रत्नकीर्तिकृत सर्वज्ञसिद्धि नामक रचना में तो त्रिलोचनाचार्य की दूसरी कृति न्यायप्रकीर्णक का भी उल्लेख पाया जाता है।

वाचस्पति ने न्यायकणिका में अपनी गुरु की न्यायमञ्जरी का उल्लेख कुछ इस प्रकार किया है -

**'अज्ञानतिमिरशमनीं परदमनीं न्यायमञ्जरीं रुचिकराम्।**
**प्रसवित्रे प्रभवित्रे विद्यातरवे नमो गुरवे॥'**

ज्ञानश्री के क्षणभङ्गाध्याय में भी यथा -'एतेन यदपि न्यायमञ्जरीकारः प्राह -....', 'यथा तर्हि त्रिलोचनश्चर्वयति तथानयोरपि नीयतामभिप्रायः - तथा च न्यायमञ्जरी.....।' ईश्वरवाददूषण में भी जैसे लिखा है -'मञ्जर्यां त्रिलोचनः पुनराह'[३१]। न्यायसारविचार में राघवभट्ट लिखते हैं -'ये तु दृष्टान्तदोषद्वारेणाभासा अभिहितास्ते यथा दृष्टान्तदोषनिश्चयान्निश्चितास्तथा तद्दोषसन्देहात् सन्दिग्धा इति यत्स्वसम्मतं तत् त्रिलोचनाचार्यसंमतमित्याह - अन्ये त्विति'[३२]।

**दुर्बेक मिश्र-** 'जितारि' और 'अतीश' नामक गुरुओं के शिष्य दुर्बेक मिश्र अर्चटालोक[३३] एवं

धर्मोत्तरप्रदीप[३४] के प्रणेता के रूप में उन दिनों विद्वद्गोष्ठी में विख्यात और प्रतिष्ठित थे। धर्मोत्तरप्रदीप में आपने वैशेषिक शब्द की व्युत्पत्ति कुछ इस प्रकार से की है –'द्रव्यगुणकर्मसामान्यविशेषसमवायात्मके पदार्थविशेषे व्यवहरन्तीति वैशेषिकाः।'

**शशधराचार्य** – कहते हैं[३५] आप दो भाई थे – शशधर और मणिधर। इन दोनों भाईयों की शास्त्रार्थ–कला व विद्वत्ता देखकर तत्कालीन विद्वान् इन दोनों को सिंह–व्याघ्र कहने लगे थे और व्याप्ति के प्रकरण में प्रसिद्ध सिंह–व्याघ्रलक्षण इन्हीं के हैं। कहा भी गया है –

**'बाल्येऽपि निर्दलित वादिगजौ जगाद।**
**यौ व्याघ्रसिंहशिशुकाविति सिद्धराजः॥'**

आप अपनी रचना न्यायसिद्धान्तदीप के आरम्भ में लिखते हैं कि प्रतिपक्षियों के सिद्धान्तरूप अन्धकार को नष्ट करके यहाँ गौतम–मत को ही प्रकाशित किया जा रहा है –

**'ध्वंसितनरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम्।**
**नत्वा नित्यमधीशं शशधरशर्मा प्रकाशयति॥'**

मीमांसा–न्याय दर्शनों के अन्धकारवाद, शक्तिवाद, मोक्षवाद आदि सभी (२६) परस्पर विरुद्ध–सिद्धान्तों को इस ग्रन्थ का विवेच्य विषय बनाया गया है, जिसपर पक्षधर–जयदेव, गुणरत्नसूरि(दोनों १५ वी.श.), धर्मराजाध्वरि, अखण्डानन्द सरस्वती, यज्ञनारायण दीक्षित (तीनों१७वीं श.), देवराज पण्डित (१८ वीं श.) तथा विश्वनाथ पण्डित (१९ वीं श.) आदि ने व्याख्याएँ लिखी हैं। इससे ग्रन्थ की लोकप्रियता, उपादेयता और सार्वदेशिकता सिद्ध होती है।जबकि शेषानन्ताचार्य की एक अन्य व्याख्या के साथ यह ग्रन्थ डॉ. विमलकृष्ण मतिमाल के सम्पादन में अहमदाबाद के एल. डी. शोध संस्थान से प्रकाशित है। इसकी भूमिका से विदित होता है कि धरणीधराचार्य इनके पिता और पृथ्वीधर आचार्य इनके अनुज थे। जबकि डॉ. दिनेशचन्द्र भट्टाचार्य के मत में महेश्वराचार्य आपके पितामह थे[३६]। सूचना मिलती है कि किसी और व्याख्या के साथ यह ग्रन्थ १९२४ में वाराणसी से भी प्रकाशित हो चुका था, पर उसे देखने का सौभाग्य मुझे प्राप्त नहीं है।

उदयनाचार्यकृत कुसुमाञ्जलि (५/७) की एक कारिका को इन्होंने अपने ग्रन्थ के विधिवाद प्रसंग में उद्धृत किया है, जबकि गङ्गेशोपाध्याय ने इनके मतों का खण्डन किया है। फलतः आपको इतिहासकारों ने इन दोनों महाविभूतियों के मध्यवर्ती स्थिर किया है, जिससे आपका समय उन्होंने ईसा की बारहवीं सदी माना है। तत्त्वचिन्तामणि के प्रत्यक्ष खण्ड की व्याख्या करते हुए गङ्गेश द्वारा उद्धृत इनके मत पर विद्यानिवास भट्टाचार्य[३७] ने लिखा भी है –'विष्णुपुराणानुसारि शशधरीयलक्षणमाह – यत्तु रागेति।' परन्तु श्रीवल्लभाचार्य (१२ वीं शतक का पूर्वार्ध) कृत व्याप्तिलक्षण का आपके द्वारा खण्डन किये जाने से, अन्धकारवाद पर व्यक्त शिवादित्य के लक्षण को आपके द्वारा उद्धृत करने से, अवश्यमेव आप १३ वीं शताब्दी के प्रतीत होते हैं। आपने शिवादित्य के सप्तपदार्थी ग्रन्थ से उद्धरण लेते हुए कहा है –

'नीलरूपारोपविशिष्टस्तेजः संसर्गाभावस्तम इति केचित्'। इस वाक्यगत 'केचित्' पद की व्याख्या में सिद्धान्तदीप के व्याख्याकारों ने 'शिवादित्यमतमाह – नीलरूपेति' ऐसा लिखा है। स्मरणीय हो कि सप्तपदार्थी में शिवादित्य कहते हैं –'आरोपितनीलरूपोऽभावोऽन्धकारः' इसी का तो खण्डन ऊपर दिखाया गया है। साथ ही मानमनोहरकार वादिवागीश्वर (सन् ११००–१२०० ई.) का भी आपने प्रसंगतः उल्लेख किया है, जिनके मत का खण्डन चित्सुखाचार्य (१२००–१३०० ई.) ने किया था और आप तो वादिवागीश्वर का उल्लेख करते ही हैं, पर कहीं भी चित्सुखाचार्य का प्रत्यक्ष वा परोक्ष रूप से नामग्रहण आप नहीं करते। इससे सिद्ध होता है कि आप इन दोनों के मध्य ही रहे होंगे और आप किसी भी स्थिति में १३ वीं सदी के वादिवागीश्वर से पहले नहीं जा सकते। अतएव आपका समय १३ वीं शताब्दी ही स्थिर किया जा सकता है। जबकि गङ्गेश द्वारा आलोचित होने से आप उनके पूर्ववर्ती तो हैं हीं।

**रवीश्वरोपाध्याय** – तत्त्वचिन्तामणि के मङ्गलवाद प्रकरण में 'अपरे तु' कहकर जिस सन्दर्भ को गङ्गेश ने उठाया है, उसे प्रगल्भमिश्र अपनी व्याख्या में रवीश्वर का मत बताते हैं- '**रवीश्वरमतं दूषयितुमुपन्यस्यति – अपरत्वेति**'[३८]। इसी प्रसंग में न्यायसिद्धान्तदीप के व्याख्याता शेष अनन्ताचार्य ने भी रवीश्वर का उल्लेख किया है। इनका समय १२ वीं सदी कहा जाता है।

वत्सेश्वर –प्रभाकर-मीमांसक वत्सेश्वर उपाध्याय तत्त्वचिन्तामणि में गङ्गेश द्वारा चर्चित होने से उनसे प्राचीन प्रतीत होते हैं। जबकि प्रत्यक्ष-प्रगल्भी[३९] नामक अपने व्याख्यान में आचार्य प्रगल्भ मिश्र ने भी इनको स्मरण किया है।

**हरिनाथोपाध्याय** – गङ्गेश ने इनके सिद्धान्त को इनके नाम-निर्देश के बिना ही उद्धृत किया है, जिसकी व्याख्या में कतिपय टीकाकारों ने उसे हरिनाथ (समय १४वीं सदी का आरम्भ) का मत बताया है। तत्त्वचिन्तामणि के विधिवाद में हिंसा को लेकर गङ्गेश ने कहा है –'अपरे तु अनभिसंहित-नरान्तरव्यापारमद्वारीकृत्य मरणसाधनं हिंसा......तन्न।' इसकी व्याख्या में मथुरानाथ भट्टाचार्य, हरिदास न्यायालङ्कार ने स्पष्ट रूप से 'हरिनाथमतमाह' लिखा है। वस्तुतः हरिनाथकृत स्मृतिसार में यह प्रसंग आया भी है कि- 'तत्र नरान्तराव्यापाराव्यवहितप्राणवियोगफलकव्यापारकर्त्ता साक्षाद्वधी....','अतो व्यापारहेतुभूताभि-सन्धानाविषयनरान्तरव्यापारानपेक्षमरणजनकव्यापारो वधः। तत्कर्त्ता वधीत्यर्थः (वधक इत्यपि पाठः)'[४०]।

**सन्दर्भाः** –


१. Mss. No. iii F 149
२. कृत्यरत्नाकर, पृ. ८२
३. शब्दालोक-उद्योत की मातृका, BORI
४. पण्डित,viii p. 139
५. हरप्रसाद शास्त्री, नेपाल कैट. १९०५, पृ. ११३
६. IHQ iii p. 139
७. IHQ xxii p. 132-35

८. Jha Comme. Vol.
९. सं. वा. बृ. इ ix p. 74
१०. MSS No. 1602, शब्दखण्ड, बंगीय साहित्य परिषद्, कलकत्ता
११. मिथिला विद्यापीठ पाण्डुलिपि
१२. HNNM-p.85
१३. कैट. पृ. ४७३५-७
१४. कुसुमाञ्जलिप्रकाश, iii, p. 36
१५. प्रमाणप्रकाश, पृ. ६९१
१६. अनुमानदूषणोद्धार, तञ्जावुर, Mss. No. 10944, Fol.70a
१७. IOL London, Fol.44b
१८. सरस्वतीभवन मातृका, पृ. १०६बी
१९. वहीं, पृ. १०७-८
२०. वहीं, पृ. १०८ बी
२१. मणिकण्ठसमाधिमाह - पृथगिति, पृ.१३० बी
२२. मणिकण्ठीयं लक्षणं दूषयति - नापि पक्षातिरिक्तेति, पृ. १८९ बी
२३. BORI, mss.no.775 of 1884-87, fol.25a
२४. Mss, fol. 190a RAS Bombay Copy fol. 160a
२५. कातन्त्र-प्रदीप, सम्पा.गुरुनाथ, कलाप, पृ. ७१५
२६. Asiatic Society, Mss No.4770, govt. Collection
२७. मातृका, पृ.९०अ, ९६अ
२८. निबन्धोद्योत, पृ. ५१ब
२९. IOL. London
३०. JOI, Badodara, Dec.54-Mar.55
३१. JBRS vol. xll, pp 508-10, IC vol. xiv. No.v, pp. 36-40
३२. सरस्वतीभवन,Mss. No. 65
३३. GOS में प्रकाशित
३४. १९५५ में पटना से प्रकाशित
३५. सं. वा. बृ. इ. भाग-९, पृ.१५३, डॉ. किशोरनाथ झा
३६. HNNM, p.90
३७. सरस्वती भवन, मातृका, पृ. २२अ
३८. प्रत्यक्ष-प्रगल्भी,ASB, Mss. pp. vzb
३९. ASB, Mss. pp.88b
४०. स्मृतिसार, वधनिरूपण, रा. सं. संस्थान, दिल्ली, सम्पा. उदयनाथ झा 'अशोक', पृ.२०१

*आचार्यः,*
*राष्ट्रियसंस्कृतसंस्थानम्, श्रीसदाशिवपरिसरः, पुरी*

# काव्यप्रयोजनविमर्शः

डॉ. राकेशकुमारजैनः

'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति न्यायेन ज्ञायते यत् किमपि कार्यं निष्प्रयोजनं न भवति। अतः काव्यरचनाया अपि नूनं किमपि प्रयोजनं भवेदेव। भरतमुनेरारभ्याधुनिकालङ्कारिकैरपि काव्यरचनायाः प्रयोजनानि प्रतिपादितानि सन्ति। न केवलं भारतीयालङ्कारिकैरपितु पाश्चात्यविद्वद्भिरपि स्वकीयग्रन्थे यथास्थानं प्रयोजनान्युक्तानि।

**काव्यप्रयोजनविषये प्राचीनाचार्याणां मतानि -**

नाट्यशास्त्रस्य प्रणेता भरतमुनिः नाट्यवेदस्योत्पत्तिप्रसङ्गे नाट्योद्देश्यरूपेण काव्यप्रयोजनानि निर्दिदेश –

**उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।**
**हितोपदेशजननं धृतिक्रीडासुखादिकृत्॥**
**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद्भविष्यति॥**
**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**
**लोकोपदेशजननं नाट्यमेतद्भविष्यति॥**[1]

अर्थात् इदं नाट्यम् उत्तम-मध्यमाधमानां नराणां कर्मणामाश्रयभूतं हितोपदेशजननं धैर्यप्रदं मनोविनोदनं सुखादिकरं विद्यते। दुःखार्तानां पीडितानां शोकसन्तप्तानां जनानां विश्रान्तिप्रदं वर्तते। अनेन धर्मो वर्धते, यशः प्रसरति, आयुश्च वृद्धिमाप्नोति। इदं लोकान् उपदिशति । आचार्यभामहानुसारम् उत्तमकाव्यरचनया धर्मार्थकाममोक्षाणां प्राप्तिर्भवति, कलासु वैलक्षण्यं जायते, यशः प्रसरति सुखञ्चानुभूयते, यथोक्तम् –

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिबन्धनम्॥**[2]

आचार्यवामनः काव्यस्य प्रयोजनद्वयं प्रतिपादयन् काव्यालङ्कारसूत्रे जगाद – काव्यं सद्दृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।[3] अर्थात् काव्यस्य द्वे प्रयोजने स्तः – प्रीतिः(आनन्दः) कीर्तिश्च (यशः)। अत्र हि

आनन्दो काव्यस्य दृष्टप्रयोजनं यशश्च अदृष्टप्रयोजनं वर्तते। एवमेव आचार्यभोजराजोऽपि सरस्वतीकण्ठाभरणे काव्यस्य प्रयोजनद्वयमेवाङ्गीकुर्वन् भणति –

**निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।**
**रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति॥**[4]

अर्थात् दोषरहितं गुणसंयुतम् अलङ्कारैरलङ्कृतं रसैश्च सम्भृतं काव्यं कुर्वन् कविः कीर्तिं प्रीतिञ्च प्राप्नोति। वक्रोक्तिजीविते आचार्यकुन्तक आनन्दरूपं चमत्कारमेव काव्यस्य प्रधानभूतं प्रयोजनं स्वीकरोति, यथोक्तम् –

**धर्मादिसाधनोपायः सुकुमारक्रमोदितः।**
**काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥**
**व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।**
**सत्काव्याधिगमादेव नूतनौचित्यमाप्यते॥**
**चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।**
**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥**[5]

अस्य भावोयं यत् काव्यरचना श्रेष्ठकुलोत्पन्नराजपुत्रादीनामुपकाराय भवति। सुन्दरसरसक्रमप्रोक्तोऽयं धर्मार्थकाममोक्षसाधनोपायो वर्तते। उत्तमकाव्यस्याध्ययनेन सर्वे जनाः व्यवहारविदो भवन्ति। काव्यामृतरसास्वादनेन सहृदयहृदयेषु चतुर्वर्गफलमपि अतिक्रम्य आनन्दानुभूतिरूपश्चमत्कारः समुत्पद्यते। प्रयोजनमुपलक्ष्य आचार्यकुन्तकः काव्य–शास्त्रयोः भेदमपि जगाद। कटुकौषधसम्मितानि शास्त्राणि अविद्यारोगान् विनाशयन्ति। आनन्दामृततुल्यानि काव्यानि अविवेकरोगान् नश्यन्ति। काव्यानुशासने आचार्यवाग्भट्टः काव्यप्रयोजनानि सविशदं व्यवैक्षीत् तेन प्रोक्तम् – **काव्यं प्रमोदायानर्थनिवारणाय व्यवहारज्ञानाय त्रिवर्गफललाभाय कान्तातुल्यतयोपदेशाय कीर्तये च।**[6] अर्थात् प्राचीनाचार्याः काव्यस्य षट् प्रयोजनानि मन्वते – आनन्दावाप्तिः अनर्थनिवारणं व्यवहारज्ञानं धर्मार्थकामाधिगमः कान्तातुल्योपदेशः कीर्तिश्च। अत्र आचार्यवाग्भट्टस्याभिमतं वर्तते यद् एतेषु प्रथमपञ्चोद्देश्यास्तु अन्यैरपि साधनैः प्राप्तुं शक्नुमः, अतः तेषां प्राप्तिः न काव्यरचनाफलम्, मुख्यप्रयोजनन्तु कीर्तिरेव। यथोक्तम् – वयं तु कीर्तिमेवैकां काव्यहेतुतया मन्यामहे।.........अतः कीर्तैरैवैका काव्यहेतुः।[7] आचार्यरुद्रटः काव्यालङ्कारे धर्मादिचतुर्वर्गफलप्राप्तिमेव काव्यप्रयोजनमाह –

**ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।**
**लघु मृदु च नो रसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः॥**[8]

अग्निपुराणकारः धर्मादिचतुष्पुरुषार्थान् काव्यप्रयोजनरूपेण न स्वीकरोति । असौ त्रीनेव पुरुषार्थान् प्रयोजनत्वेनाङ्गीकरोति । यथोक्तम् –

**त्रिवर्गसाधनं नाट्यम्।**[9]

आनन्दवर्धनाचार्योऽपि ध्वन्यालोके काव्यस्य प्रयोजनं प्रतिपादयन् कथयति –

**तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्।**[10]

अर्थात् आचार्यः सहृदयमनः प्रीतिमेव मुख्यं प्रयोजनं प्रत्यपादयत्। नाट्यदर्पणकारौ रामचन्द्रगुणचन्द्रौ सुस्पष्टं काव्यं चतुर्वर्गसाधनं जगदतुः। ताभ्यां काव्यप्रयोजनानि न स्वतन्त्ररूपेण वर्णितानि, परन्तु ग्रन्थस्य मङ्गलाचरणे तानि सङ्केतितान्येव, तद्यथा –

**चतुर्वर्गफलां नित्यां जैनीं वाचमुपास्महे।**
**रूपैर्द्वादशभिर्विश्वं यया नाट्ये धृतं पथि॥**[11]

ताभ्यां वृत्तौ स्पष्टीकृतं यत् काव्यैः धर्मार्थकामास्तु प्राप्यन्त एव, धर्ममधिगम्य परम्परया मोक्षोऽप्यधिगम्यते। नाट्यदर्पणकारौ धर्मार्थकामान् व्यस्तरूपेण प्रधानं फलं मन्वाते, अथ च मोक्षं गौणं फलं भणतः।

आचार्यविश्वनाथेन काव्यस्य यानि प्रयोजनानि प्रोक्तानि तानि काव्यशास्त्रस्यापि सन्त्येव। तत्कृतसाहित्यदर्पणाख्यो ग्रन्थोपि काव्यस्याङ्गं वर्तत एव। अतस्तस्याध्ययनस्य लेखनस्य च काव्यप्रयोजनरूपेण प्रोक्तानि प्रयोजनानि वर्तन्ते। आचार्यविश्वनाथानुसारं काव्यस्य प्रयोजनानि सन्ति –

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव..................................॥**[12]

अर्थात् काव्याद् अल्पधियोऽपि जनाः सुखपूर्वं धर्मार्थकाममोक्षरूपचतुर्वर्गफलं प्राप्नुवन्ति। कथमिति चेत् काव्याद्धर्मप्राप्तिः भगवन्नारायणादिचरणारविन्दस्तवेन भवति। 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादीनि वेदवाक्यान्यपि प्रमाणान्यत्र सन्ति। काव्याद्धनप्राप्तिः प्रसिद्धैवास्ति, सा च प्रत्यक्षसिद्धापि वर्तते। धनलाभात् कामप्राप्तिरपि सम्भवति। अर्थोत्थापितधर्मफलं प्रति अनासक्तिरेव मोक्षहेतुर्वर्तते। काव्ये मोक्षोपयोगिवाक्यप्रयोगादपि मोक्षप्राप्तिः सम्भवति। चतुर्वर्गफलप्राप्तिः वेदादिशास्त्रेभ्योऽपि जायते, परन्तु तत्प्राप्तिः नीरसतया भवति अपि च परिपक्वबुद्धय एव चतुर्वर्गफलं लभन्ते, परन्तु काव्यानां परमानन्ददायकत्वात् मृदुबुद्धयोऽपि सारल्येन चतुर्वर्गफलं लभन्ते। अत्र सन्देहो जायते – यदि वेदादिशास्त्रेभ्यः परिपक्वधियः काव्येभ्यश्च सुकुमारबुद्धयश्चतुर्वर्गफलं लभन्ते, ततः परिपक्वधियः सत्सु वेदादिशास्त्रेषु काव्यानि प्रति प्रयत्नशीलाः न भवेयुरिति। अत्र समाधानं वर्तते यदि कश्चिद् रोगः कटुकौषधसाध्योऽपि सितशर्करासाध्यो वर्तते ततः कस्य रोगिणः प्रवृतिः सितशर्करां प्रति न भविता ? अतः चतुर्वर्गफलप्राप्तये परिपक्वधियामपि सुकुमारबुद्धीनामपि च प्रवृत्तिः काव्यानि प्रति भवत्येव। एवमाचार्यविश्वनाथेन चतुर्वर्गफलप्राप्तिरेव काव्यस्य प्रयोजनं निश्चितम्।

पण्डितराजजगन्नाथः रसगङ्गाधराख्ये ग्रन्थे काव्यप्रयोजनानामुल्लेखस्तु कृतवान् किन्तु न विस्तरेण

विममर्श। काव्यप्रयोजनविषये असौ केवलामेकामेव पङ्क्तिं लिलेख – 'तत्र कीर्तिपरमाह्लादगरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य'[13]। काव्यस्य अनेकानि प्रयोजनानि वर्तन्ते – कीर्तिः परमाह्लादः, गुरुप्रसादो राजप्रसादो देवताप्रसाद इत्यादयः। अत्र गुरुदेवताप्रसादाभ्याम् अनर्थनिवारणम्, अथ च राजदेवताप्रसादाभ्याम् अर्थप्राप्तिरिति प्रयोजनद्वयमपि गृह्यते। आदिपदाद् व्यवहारज्ञानं कान्तासम्मितोपदेशश्च प्रयोजनद्वयं सङ्केत्यते। एवं रसगङ्गाधरस्य अमुना विवेचनेन प्रतीयते – काव्यप्रयोजनप्रतिपादनदृष्ट्या पण्डितराज– जगन्नाथो मम्मटाचार्यमेवानुकृतवान्।

काव्यप्रयोजनमधिकृत्यानेकैः काव्यशास्त्राचार्यैः स्वकीयानि मन्तव्यानि प्रकटितानि परमत्र मम्मटाचार्यो केन्द्रबिन्दुरिव प्रतिभाति। काव्यप्रकाशाख्ये स्वकीये ग्रन्थे असौ काव्यस्य षट् प्रयोजनानि प्रतिपादयति –

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥**[14]

काव्यस्य षट् प्रयोजनानि सन्ति – यशः, धनम् , लोकव्यवहारज्ञानम्, अनिष्टनिवारणम्, आनन्दावाप्तिः, उपदेशश्च। अन्यैराचार्यैः समीक्षितानि प्रयोजनानि षट्स्वेवैतेषु प्रयोजनेषु ह्यन्तर्भावयितुं शक्यन्ते। अतोऽत्र सविशदं विमर्शनमुपयुज्यते।

i. **यशःप्राप्तिः** – काव्यरचनायाः प्रथमं प्रयोजनं यशःप्राप्तिरेव। यथा – रघुवंश–अभिज्ञानशाकुन्तलादिकाव्यानि विरच्य्य महाकविकालिदासः किरातार्जुनीयमहाकाव्यं विलिख्य महाकविभारविः शिशुपालवधमहाकाव्यं प्रणीय महाकविमाघः यशो लेभे। तथैव काव्यद्वारा महद्यशः प्राप्तुं शक्यते।

ii. **धनप्राप्तिः** – धनलाभायापि काव्यरचना क्रियते सुकविभिः। महान्तः कवयः स्वकाव्यकृतिभिर्नरपतीन् प्रजाजनांश्च प्रभाव्य प्रभूतं धनमर्जयन्ति। यथा धावकादयः कवयः काव्यरचनां कृत्वा श्रीहर्षादिभ्यो नरपतिभ्यः प्रभूतं धनमधिगतम्।

iii. **लोकव्यवहारज्ञानम्** – काव्यरचनया काव्यानामध्ययनेन वा लोकव्यवहाराणामपि ज्ञानं भवति। काव्येषु विविधचरितानि व्यवहाराणि च वर्ण्यन्ते। काव्यानां निर्मित्या अध्ययनेन च कवयः सहृदयपाठकाश्च तैर्व्यवहारैः परिचिताः भवन्ति।

iv. **अनिष्टनिवारणम्** – काव्यानां रचनया अध्ययनेन च विविधानामनिष्टानामपि निवारणं जायते। प्रभुभक्ति–देवभक्तिविषयककाव्यानां निबन्धेन पाठेन च बहवो अनर्था निवर्तन्ते। यथा – कुष्ठरोगाक्रान्तः मयूरकविः गङ्गातटमुपगम्य सूर्यमुपासिसीष्ट। सूर्यशतककाव्यं निबध्यासौ प्रतिदिनं तदपठत्। कतिपयेष्वेव दिनेषु कविरसौ कुष्ठरोगविनिर्मुक्तो बभूव।

v. **आनन्दावाप्तिः** – काव्यरचनाकाले काव्यानुभूतिक्षणेषु च कवयः सहृदयाश्च विशेषमलौकिकमानन्दमनुभवन्ति। रसास्वादनजन्येयमनुभूतिः

सर्वलोकविलक्षणालौकिकचमत्कारकारिणी सर्वमप्यन्यद्ज्ञानं तिरोदधाति। आचार्येण प्रधानप्रयोजनत्वेनादः स्वीकृतम्।

vi. **उपदेशः** - काव्यस्यैकं प्रयोजनम् उपदेशोऽपि वर्तते। उपदेशास्त्रिविधा भवन्ति। प्रभुसम्मितः, सुहृत्सम्मितः, कान्तासम्मितश्च। शब्दप्रधानानि वेदशास्त्राणि प्रभुसम्मितानि भवन्ति। अम्युपदेशा आदेशप्रधाना राजादेशवदक्षरशः पालनीया भवन्ति। पुराणादीनामुपदेशा अर्थप्रधाना न च शब्दप्रधानाः। नाक्षरशः पालनीयस्तेषामुपदेशः। स तूपदेशो मित्रतुल्यः। मित्राण्युचितकार्यकरणाय यथा मित्रेभ्य उपदिशन्ति, तद्वदेषां ग्रन्थानामुपदेशोप्युचितकार्यकरणाय परामर्शरूपो भवति। अत एव पुराणादीनामुपेदशः सुहृत्सम्मितः कथ्यते। तृतीयोपदेशः कान्तासम्मितः काव्यैरधिगम्यते। काव्येषु द्वयोरपि शब्दार्थयोः प्राधान्यं वर्तते। अत्र शब्दार्थाभ्यामभिव्यक्तो व्यङ्ग्यार्थः प्रधानो भवति। व्यङ्ग्यार्थस्यातिरमणीयत्वात् काव्यानि सरसतामापाद्योपदिशन्ति। यथा काचित् कान्ता प्रणयप्रदर्शनपूर्वक स्वकान्तं प्रीणयित्वा समुचितमार्गमुपदिशति, तथैवायमुपदेशः काव्यानां भवति।

रामायणमहाकाव्यस्योपदेशो वर्तते - रामादिवद् वर्तितव्यं न रावणादिवत्। रामायणस्यायमुपदेशो न त्वादेशरूपो नापि च परामर्शरूपो वर्तते। परन्तु काव्ये यो व्यङ्ग्यरूपो ध्वनिः, स एव सहृदयान् पाठकानुपदिशति - रामादिवद् व्यवहरणीयं न रावणादिवत्।

विविधाचार्याणां सूक्ष्मावलोकनेन स्पष्टमिदं यन्मम्मटाचार्यस्य विचारणा बुद्धिगम्या व्यावहारिकी च वर्तते। काव्यप्रयोजनविवेचनमिदं स्वाभाविकं वैज्ञानिकं व्यावहारिकञ्च विश्लेषणमभिव्यनक्ति। अत्र सर्वेषामाचार्याणां मन्तव्यान्यन्तर्भवन्ति।

**काव्यप्रयोजनविषये अर्वाचीनाचार्याणां मतानि -**

अर्वाचीनाचार्याणां मन्तव्यानि यदि पश्यामश्चेद् बहुभिराचार्यैस्तु पूर्वाचार्यवदेव तान्येव प्रयोजनानि स्वीकृतानि कैश्चिन्नूतनं चिन्तनं प्रस्तुतम्, तत्क्रमशोऽत्र विचार्यते- पण्डितश्रीपादशास्त्रीहसूरकरः साहित्यमञ्जर्याम् आचार्यमम्मट-विश्वनाथाङ्गिकृतानि प्रयोजनान्येव प्रतिपादितवान्।[15] श्रीकौत्सअप्पल्लसोमेश्वरशर्मा साहित्यविमर्शाख्ये ग्रन्थे आनन्दावाप्तिमेव काव्यप्रयोजनत्वेन स्वीचकार।[16]। आचार्यसर्वेश्वरकविः प्रयोजनं प्रदिपादयन् कथयति - **सकाकुरसगर्भाङ्कं चतुर्वर्गफलाश्रयम्। सर्वप्रीतिकरोदर्कं विज्ञेयं नाटकं बुधैः॥**[17] श्रीछज्जूरामशास्त्री साहित्यबिन्दुग्रन्थे आचार्यभामहवत् काव्यप्रयोजनानि प्रदिपादयन् निगदति - **धर्मस्यार्थस्य कामस्य मोक्षस्यापि प्रयोजनम्। कीर्तिं प्रीतिकरं चाह भामहःकाव्यसेवनम्॥**[18]

प्रो. रेवाप्रसादद्विवेदीमतानुसारं काव्यरचना द्विविधा भवति - निष्प्रयोजनम् (स्वाभाविकरूपेण यथा-महाकविवाल्मीकिना रामायणमहाकाव्यं रचितम् ) सप्रयोजनं च। आचार्यमम्मटस्वीकृतकाव्यप्रयोजनातिरिक्तं काव्यरचनाया अनेकानि प्रयोजनानि भवितुमर्हन्ति यथा - युगावश्यकतापूर्तिः, स्वधर्मरक्षणम्, राष्ट्रदेवप्रबोधनप्रभृतीनि । यथोक्तं काव्यालङ्कारकारिकायाम् -

**युगावश्यकतापूर्तिमन्त्रव्यक्तिरपि क्वचित्। प्रयोजनं रघुव्यक्तौ रघुवंशे यथा कवेः॥**
**अधर्मोत्थानवेलायां धर्मरक्षापि दृश्यते। काव्यार्थस्तुलसी काव्ये यथा यवनशासने॥**
**राष्ट्रदेवप्रबोधेऽपि विश्वदैवतसाक्षिका। काव्यप्रयोजनं पुंभ्यः पुमर्थांश्चतुरो दुहन् ॥**[19]

डा. ब्रह्मानन्दशर्मा अपि काव्यसत्यालोके प्रो. रेवाप्रसादद्विवेदीवत् द्विविधं काव्यप्रवृत्तिं स्वीकोरोति – स्वभावप्रेरितम् प्रयोजनप्रेरितं च।

**प्रवत्तिर्या कवेः सत्ये काव्ये सा परिवर्तते। नात्र प्रयोजनं किञ्चित् स्वभावस्तु प्रवर्तते।**
**प्रयोजनत्वमर्थादेःसम्भवत्यत्र जातुचित्। परं यातीह शैथिल्यं प्रवृत्तिः सा स्वभावजा॥**[20]

डा. रमाशङ्करतिवारी काव्यतत्त्वविवेके कवेः भावकस्य च दृष्ट्या पृथक्पृथक्काव्यप्रयोजनानि प्रतिपादितवान् । प्रो. राधावल्लभत्रिपाठी अभिनवकाव्यालङ्कारसूत्रे काव्यस्य प्रयोजनं मुक्तिमाह। यथोक्तम् – मुक्तिस्तस्य प्रयोजनम्। सृष्टेश्चेतनायास्त्रैविध्येन सा त्रिधा-त्रिधा। अनुषक्तत्वं चासाम्। मुक्तिश्चावरणभङ्गः। आवरणं च सङ्कुचितप्रमातृत्वम्। प्रमाता च कविः सहृदयश्च। तदीय चैतन्यसङ्कोचः सङ्कुचितत्वम्।[21]

प्रो. राजेन्द्रमिश्रः पूर्वाचार्यैः स्वीकृतानि प्रयोजनानि निराकुर्वन् काव्यरचनायाः प्रयोजनद्वयमेव स्वीकरोति – स्वाभाविकं कर्म अपि च यशःप्राप्ति। यथोक्तम् अभिराजयशोभूषणे –

**न धनाय न पुण्याय व्यवहाराय नापि च।**
**न च सद्यःसुखार्थाय काव्यं निर्मात्ययं कविः॥**
**वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम्।**
**यदकृत्वा क्षणं यावन्नासौ शमधिगच्छति॥**
**यथा नोत्पतितुं शक्तो भ्रमरो गुञ्जनादृते।**
**तथा कविरयं काव्यादृते शक्तो ने जीवितुम्॥**
**काव्यमेत्ततो मन्ये कविकर्म स्वभावजम्।**
**जन्मजन्मान्तरावाप्तदिव्यसंस्कारसत्फलम्॥**[22]
**पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।**
**परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते॥**[23]

प्रो. रहसबिहारीद्विवेदी आधुनिककवयः किमुद्दिश्य काव्यं कुर्वन्तीति काव्यप्रयोजनं निरूपयन् दूर्वायाः द्वितीयोन्मेषे वक्ति –

**असन्तं मार्गमुत्सृज्य सन्तं गमयितुं जनम्।**
**हृदाह्लादिकया वाचा प्रज्ञावान् काव्यमङ्क्ते।**
**कविकीर्ति-पुरस्कार-स्वान्तः सुखसमीहया॥**
**प्राक्कथावस्तुसंस्कारं सताञ्च चरिताङ्कनम्।**

**नव्यकाव्यविधोन्मेषं व्यङ्ग्योक्तिं विकृतौ तथा।**
**राष्ट्रभक्तिं युगौचित्यं पर्यावरणचेतनाम्॥**
**राष्ट्रस्वातन्त्र्यवीराणां चरितं चाराध्यमीश्वरम्।**
**समुद्दिश्याधुना काव्यं कुर्वन्ति कवितल्लजाः॥**[24]

एवमर्वाचीनविद्वद्भिरपि स्वकीयप्रतिभया काव्यस्य नूतनानि प्रयोजनान्युद्भावितानि।

**काव्यप्रयोजनविषये पाश्चात्यविदुषां मतानि -**

काव्यरचना पाश्चात्यविद्वद्भिरपि स्व-स्वभाषासु प्रचुरतया विहिता। अतस्तत्रापि प्रयोजनेन भवितव्यम्। प्रसङ्गेऽस्मिन् पाश्चात्यविदुषामपि मन्तव्यानि द्रष्टव्यानि। केषाञ्चित् विदुषां मतानि मुख्यरूपेणात्र प्रस्तूयन्ते -

अरस्तुमहाशयानुसारम् अतिरिक्तमनोवेगविरेचनद्वारेण स्वास्थ्यलाभ एव साहित्यस्य प्रयोजनं वर्तते। शैलेमहाशयानुसारं मानवानां मध्ये सहानुभूत्याः स्नेहभावस्य च आनन्दमयो विस्तार एव काव्यस्य प्रयोजनम्। रिचर्ड्समहाभागानुसारं परस्परविरोधिभिर्मनोवेगैः मनस्तोषोत्पादनमेव काव्यप्रयोजनम्। विषयेऽस्मिन् आर्नल्डवर्यो वक्ति आनन्दसर्जनेन जीवनोपयोगिनो नैतिकत्वस्य विस्तारो जीवनस्य वा नूतनव्याख्याप्रस्तुतीकरणमेव प्रयोजनम्। सार्त्रस्याभिमतमत्र मानवेभ्यः शेषजगन्मुक्तिप्रसङ्गे साहाय्यप्रदानमेव काव्यप्रयोजनम्। फ्रायडमहोदयानुसारं मानवानां दयितातृप्तिपूर्तये मानसिकरूपेण भोगस्य प्रस्तुतीकरणमेव साहित्यस्य प्रयोजनं वर्तते। प्रकृतिवादि-यथार्थवादीनामभिमतमस्ति मानवानामान्तरिकाणां बाह्यानां वा विकृतीनां विश्लेषणं यथावदङ्कनमेव प्रयोजनमत्र। वाल्टरप्रेटरमहाशयो गदति यत् साहित्यस्य प्रमुखः प्रथमश्चोद्देश्यः - कलात्मकसौष्ठवेन सहृदयहृदयाह्लादनम्। जीवनोपयोगिनां वस्तूनां विचारणां भावानां वाप्यभिव्यक्तिस्तत्र प्रयोजनमर्हति। वाइल्डमहाभागस्य चिन्तनं वर्तते यत् साहित्यं स्वयमेवात्मनि सिद्धिर्वर्तते, नापरं किञ्चित्।

पाश्चात्यसाहित्यिकानामभिमतं सूक्ष्मेक्षिकयावलोक्यते चेत् एतदेव प्रतिभाति यत् जीवननिर्माणाय, स्वान्तसुखाय एव काव्यरचना भवति।

अवसाने काव्यस्य साहित्यस्य वा प्रयोजनविषये समग्रतया पश्यामश्चेत् काव्यरचना लौकिकसुखप्राप्तये अलौकिकसुखप्राप्तये च भवतीति शम्।

**सन्दर्भसूची-**


1. नाट्यशास्त्रम् 1.109-113
2. काव्यालङ्कारः 1.2
3. काव्यालङ्कारसूत्रम् 1.1.5
4. सरस्वतीकण्ठाभरणम् 1.2
5. वक्रोक्तिजीवितम् 1.3-5
6. काव्यानुशासनम् पृ.2
7. काव्यानुशासनम् पृ.2

8. काव्यालङ्कारः 12.1
9. अग्निपुराणम् 338.7
10. ध्वन्यालोकः 1.1
11. नाट्यदर्पण 1.1
12. साहित्यदर्पणः 1.2
13. रसगङ्गाधर पृ.13
14. काव्यप्रकाशः 1.2
15. साहित्यमंजरी पृ.सं.1
16. साहित्यविमर्श पृ.सं.40
17. साहित्यसार 1.29
18. साहित्यबिन्दु प्रथमबिन्दु पृ.सं.8
19. काव्यालङ्कारकारिका तृतीय अधिकरण कारिका 22-24
20. काव्यसत्यालोकः पञ्चमोद्योतः कारिका 69-70
21. अभिनवकाव्यालङ्कारसुत्रम् द्वितीयाध्यायः पृ.सं.15
22. अभिराजयशोभूषणम् प्रथमोन्मेष कारिका 23-26
23. अभिराजयशोभूषणम् प्रथमोन्मेष कारिका -28
24. दूर्वा - द्वितीयोन्मेष

*सहायकाचार्यः (सं.) साहित्यविभागः*
*राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः,*
*जयपुरम्*

# भारतीय संविधान का दार्शनिक आधार : धर्मनिरपेक्षता

**डॉ. विनी शर्मा**

प्रत्येक देश के संविधान का अपना दर्शन होता है। भारतीय संविधान की दार्शनिक मान्यताएं महत्त्वपूर्ण हैं। इसके पीछे देश की मूलभूत आस्थाओं, आधारभूत शाश्वत मूल्यों, सिद्धान्तों का समेकित दर्शन होता है। भारतीय संविधान की दार्शनिक मान्यताएँ संविधान की प्रस्तावना, मूल अधिकारों और राज्य के नीति-निर्देशक तत्त्वों में विशेष रूप से साकार हुई है।

**संविधान की दार्शनिक मान्यताएँ -**

संविधान की दार्शनिक मान्यताएँ संविधान का निर्माण करने वाले संविधान निर्माताओं के आदर्श अथवा विचार नहीं हैं, वरन् ये मान्यताएँ राष्ट्रीय आन्दोलन के उस संघर्ष के परिणाम को व्यक्त करती हैं, जो विदेशी आधिपत्य से मुक्ति पाने के लिए लड़ा गया है। यह ब्रिटिश कुशासन के विरुद्ध संघर्षरत रहे उन लोगों की आकांक्षाओं का प्रतिबिम्ब है जो अपनी पृथक राष्ट्रीय पहचान बनाना चाहते थे। यह एक ऐसे राष्ट्र निर्माण की अभिव्यक्ति है जहाँ व्यक्ति के स्वातन्त्रय अधिकारों के साथ न्याय, सामाजिक, आर्थिक तथा राजनीतिक अधिकार सुनिश्चित हो पाये। भारतीय संविधान में निहित दर्शन उस युग के राजनीतिक दर्शन-कल्याणकारी राज्य की ओर उन्मुख उदारवादी लोकतन्त्र के दर्शन के अनुरूप थे, जिसमें संविधान का निर्माण किया गया था। साथ ही इसमें सुव्यवस्थित न्याय आधारित समाज की कल्पना की गयी।

संविधान में समाहित मुख्य दार्शनिक मान्यताएँ :-

1. यह निर्णय किया गया कि भारतीय संविधान एक धर्म-निरपेक्ष राज्य होगा। संविधान में धार्मिक स्वतंत्रता संबंधी उपलब्ध धर्म-निरपेक्ष राज्य की आधारशीला है। धर्म-निरपेक्ष राज्य के अन्तर्गत धर्म को नितान्त वैयक्तिक मामला समझा जाता है। भारत में धार्मिक अल्पसंख्यकों के हित में धर्म-निरपेक्षता का आदर्श ही सबसे बड़ा और कारगर संरक्षण है।
2. संविधान ने प्रस्तावना, मौलिक अधिकारों तथा नीति-निर्देशक सिद्धान्तों के माध्यम से अच्छे समाज के स्वरूप के संबंध में स्पष्ट चित्र प्रस्तुत किये।

3. संविधान ने जाति, सम्प्रदाय, मूलवंश, लिंग के भेदभाव के बिना सभी भारतीयों के लिए समानता के सिद्धान्त का प्रतिपादन किया है।

4. संविधान-सभा ने राज्य रूपी संयन्त्र की रचना करते समय उस सिद्धान्त का प्रतिपादन किया जिस पर नवीन भारतीय राजनीतिक व्यवस्था का निर्माण होना था और यह सिद्धान्त था संसदीय लोकतंत्र का।

5. भारतीय संविधान की मूलभूत दार्शनिक मान्यताओं की चर्चा में बंधुता और राष्ट्रिय एकता के मूल्य को नकारा नहीं जा सकता। इन पर जोर देने का मन्तव्य यह है कि भारत के विभिन्न क्षेत्रों, भाषाओं, जातियों और रीति-रिवाजों के बावजूद एक बुनियादी एकता है और इस एकता को दृढता प्रदान करना राष्ट्र का सर्वसम्मत लक्ष्य है। संविधान ने साम्प्रदायिक निर्वाचनों का और अस्पृश्यता का अन्त कर भारतीय समाज के विभिन्न तत्वों को एक-दूसरे के निकट लाने का प्रयास किया है और एक शक्तिशाली केन्द्र की स्थापना कर देश की एकता पर बल दिया है। सम्पूर्ण देश के लिए एक संविधान, एक ध्वज, एक नागरिकता, एक न्यायपालिका और एक दीवानी व फौजदारी कानून की व्यवस्था और अखिल भारतीय सेवाओं की स्थापना, समूचे देश को एकता के सूत्र में बाँधने तथा राष्ट्रिय बन्धुता को सुदृढ करने के प्रयास है। अन्तर्राष्ट्रीय क्षेत्र में बन्धुता की भावना का यह अभिप्राय है कि भारत विश्व के विभिन्न देशों को एक दूसरे के निकट लाने तथा विश्व शान्ति और भाईचारे की स्थापना करने की दिशा में अपना पूर्ण योगदान देना चाहता है। विश्वभर में भाईचारा अथवा 'वसुधैव कुटुम्बकम्' भारत का परम्परागत मूल मंत्र रहा है।

6. भारतीय राजनीतिक व्यवस्था में उदारवादी दर्शन का समावेश लोकतन्त्र के व्यक्तिवाद के साहचर्य के द्वारा हुआ है। भारतीय संविधान में दोनों तत्व अन्तर्निहित हैं।

7. भारतीय संवधिान में 'फेबियनवाद' की छाप भी स्पष्ट दिखाई देती है। इसे विशेष रूप से प्रस्तावना तथा नीति-निर्देशक सिद्धान्तों में देखा जा सकता है। जिसमें आर्थिक न्याय का उल्लेख किया गया है जिसका फेबियन समाजवाद में विशिष्ट स्थान है।

8. भारतीय राजनीतिक व्यवस्था में गाँधीवादी दर्शन की सुस्पष्ट अभिव्यक्ति देखने को मिलती है। संविधान में पंचायती राज, कुटीर उद्योग-धन्धों को प्रोत्साहन, मद्य निषेध और दुधारू पशुओं की रक्षा आदि का उल्लेख है कि वह गाँधीवादी दर्शन की छाप है।

9. संविधान में विकास और आधुनिकीकरण के दर्शन को भी मान्यता दी गई है।

10. लोक-कल्याणकारी राज्य की स्थापना भी भारतीय संविधान का आधारभूत लक्ष्य रहा है। सामाजिक न्याय, आर्थिक विकास तथा राजनीतिक स्वतन्त्रता की स्थापना इसके मूलाधार है।

**धर्मनिरपेक्षता**

भारतीय संविधान की प्रस्तावना में भारत को एक धर्मनिरपेक्ष (पंथ निरपेक्ष) राज्य घोषित किया गया है।[1] भारत में लम्बे समय से चली आ रही साम्प्रदायिकता की समस्या का हल करने के लिए भारतीय संविधान के निर्माताओं ने भारत के धर्मनिरपेक्ष राज्य बनाने का प्रयत्न किया। 1976 में किए गए 42 वें संशोधन के द्वारा प्रस्तावना में धर्मनिरपेक्ष शब्द जोड़कर भारत को स्पष्ट शब्दों में धर्मनिरपेक्ष राज्य घोषित किया गया है।[2] स्मिथ के शब्दों में धर्मनिरपेक्ष राज्य की धारणा भारतीय लोकतंत्र के भविष्य के लिए बड़ा महत्त्व रखती है। यह धारणा आधुनिक उदारवादी लोकतंत्र के आधारभूत और अविच्छेद तत्त्व के रूप में स्थिर रह सकती है अथवा गिर सकती है।[3]

**धर्मनिरपेक्षता का आदर्श –**

भारतीय संविधान में धर्म–निरपेक्षता/पंथ–निरपेक्षता[4] संबंधी निम्नलिखित आदर्श दृष्टिगत होते हैं –

1. राज्य अपने को किसी धर्म–विशेष से सम्बन्ध नहीं करेगा, न ही किसी धर्म–विशेष के अधीन होगा।
2. राज्य जब किसी व्यक्ति को धार्मिक मान्यता, आचरण एवं प्रचार–प्रसार संबंधी स्वतन्त्रता प्रदान करेगा तो वह किसी व्यक्ति विशेष को अपेक्षाकृत सुविधा नहीं देगा।
3. जब किसी व्यक्ति विशेष के विरुद्ध धर्म अथवा धार्मिक विश्वास के आधार पर राज्य कोई भेदभाव नहीं करेगा।
4. राज्य के अधीन किसी पद को प्राप्त करने हेतु सभी धर्मावलम्बियों को समान अवसर प्राप्त होंगे।

श्री आर.वेंकटरमन ने धर्मनिरपेक्ष राज्य के बारे में लिखा है, ''एक धर्मनिरपेक्ष राज्य न तो धार्मिक, न ही अधार्मिक तथा न ही धर्म–विरोधी होता है। वह धार्मिक सिद्धान्तों तथा कार्यों से पूर्णतया अलग रहता है। अतः वह धार्मिक संबंधों में निष्पक्ष रहता है।''[5]

एच.वी.कामथ ने संविधान सभा में कहा था, ''जब मैं यह कहता हूँ कि राज्य को किसी विशेष धर्म से संबंध नहीं रखना चाहिए तो उसका अर्थ यह नहीं है कि राज्य धर्म विरोधी या अधार्मिक होगा। हमने निस्सन्देह भारत को धर्म निरपेक्ष राज्य घोषित किया है। मेरे विचार में एक धर्मनिरपेक्ष राज्य न तो नास्तिक होता है, न धर्म विरोधी और न अधार्मिक।''[6]

हिन्दू कोड बिल 1951 पर बोलते हुए डॉ. अम्बेडकर ने कहा ''धर्मनिरपेक्ष राज्य का अभिप्राय यह नहीं है कि लोगों की धार्मिक भावनाओं का ख्याल ही नहीं किया जायेगा। इसका अर्थ सिर्फ यह होगा कि संसद को जनता पर किसी विशेष धर्म को लादने की शक्ति नहीं होगी। संविधान द्वारा सिर्फ यही नियंत्रण लगाया जायेगा।''[7]

सी.राजगोपालाचारी के विचारानुसार, ''धर्मनिरपेक्ष राज्य भारतीय धर्मों को न तो हतोत्साहित

करेगा, न उनका विरोध ही वह सभी धर्मों तथा उनकी संस्थाओं से निष्पक्ष व्यवहार रखेगा। वह एक धर्म, एक राज्य अथवा धर्मसापेक्ष राज्य के सिद्धान्त को अस्वीकृत करता है।''[8]

आक्सफोर्ड शब्दकोष के अनुसार ''धर्मनिरपेक्षता से तात्पर्य ऐसे सिद्धान्त से है जिसमें नैतिकता, ईश्वर की मान्यता अथवा भारी जीवन की कल्पना पर आधारित न होकर केवल मानव के लौकिक जीवन में उसके कल्याण पर ही आधारित होना चाहिए।''[9]

**भारत का संविधान धर्मनिरपेक्ष राज्य की स्थापना करता है -**

भारत एक ऐसा देश है जिसमें अनेक धर्मों के मानने वाले, अनेक जातियों के, अनेक भाषा-भाषी एवं अनेक नस्लों के लोग रहते हैं। पहले के नेता इस तथ्य से परिचित थे, इसीलिए वे राष्ट्रीय शिक्षा एवं बहुलवादी समाज की बात करते थे। अंग्रेजों ने मुसलमानों को अधिक सुविधा प्रदान की। स्वतंत्रता के पश्चात भारतीय संविधान में भारत को धर्मनिरपेक्ष राज्य घोषित किया गया। प्रो. अलैक्जैण्ड्रोविच के अनुसार, ''धर्मनिरपेक्ष राज्य के रूप में भारत राज्य ने संवैधानिक रूप से सभी नागरिकों को धार्मिक स्वतंत्रता प्रदान की है तथा किसी विशेष धर्म को कोई स्थान नहीं दिया।''[10]

टर्की के संविधान (1945) की तरह भारत के संविधान में धर्मनिरपेक्ष शब्द का प्रयोग नहीं किया गया था, परन्तु 42 वें संशोधन द्वारा प्रस्तावना में 'धर्मनिरपेक्ष' शब्द जोड़ा गया है। भारतीय संविधान की निम्न विशेषताएँ भारत को सच्चा धर्मनिरपेक्ष राज्य बनाती है :-

1. प्रस्तावना में धर्मनिरपेक्ष शब्द का प्रयोग 1976 में 42 वें संशोधन द्वारा प्रस्तावना में धर्मनिरपेक्ष शब्द अंकित किया गया है।[11]

2. कानून के समक्ष समानता[12] :- संविधान के अनुच्छेद 14 में लिखा है कि भारत के राज्य क्षेत्र में किसी व्यक्ति को विधि के समक्ष सता से अथवा विधियों के समान संरक्षण से राज्य द्वारा वंचित किया नहीं जाएगा। कानून की दृष्टि में सभी धर्म समान है।

3. सरकारी सेवाओं में समान अवसर[13] :- अनुच्छेद 15-16 के अनुसार राज्य धर्म जाति, रंग, लिंग तथा जन्म स्थान के आधार पर कोई भेदभाव नहीं करेगा। बिना किसी भेद-भाव के सब लोगों को सरकारी सेवाओं के लिए समान अवसर मिलेंगे।

4. छुआछूत की समाप्ति[14] :- अनुच्छेद 17 छुआछूत का अन्त करता है। किसी भी व्यक्ति के साथ अछूतों जैसा व्यवहार करना या उसको अछूत समझ कर सार्वजनिक स्थानों, होटलों, तालाबों, कुओं सिनेमाघरों, पार्कों तथा मनोरंजन के स्थानों के उपयोग से रोकना कानूनी अपराध है।

5. धार्मिक स्वतंत्रता का अधिकार[15] :- अनुच्छेद 25 के अनुसार भारत के सब नागरिकों को किसी भी धर्म को मानने की आजादी है। प्रत्येक व्यक्ति को धर्म में विश्वास रखने, धार्मिक कार्य करने तथा प्रचार करने का अधिकार है।

6. धार्मिक संस्था स्थापित करने का अधिकार[16] :- अनुच्छेद 26 में लिखा है कि सभी धर्मों को दान द्वाना इकट्ठे किए गए धन से संस्थाएं स्थापित करने का अधिकार होगा। सभी धर्मों के लोगों को अपने धर्म सम्बन्धी मामलों का प्रबंध करने का अधिकार है और वे चल और अचल सम्पत्ति प्राप्त कर सकते हैं।

7. धार्मिक प्रचार के लिए कर नहीं लगाए जा सकते[17] :- अनुच्छेद 27 में लिखा है कि किसी विशेष धर्म के विकास के लिए सरकार कोई कर नहीं लगा सकती।

8. गैर-सरकारी अनुदान प्राप्त शिक्षा-संस्थाओं में धार्मिक शिक्षा अनिवार्य नहीं है[18] :- अनुच्छेद 28 के अनुसार यह व्यवस्था की गई है कि गैर-सरकारी स्कूलों व कॉलेजों में, जिनको सरकार अनुदान देती है धार्मिक शिक्षा तो दी जा सकती है, परन्तु धार्मिक शिक्षा को अनिवार्य नहीं किया जा सकता।

9. धार्मिक अल्पसंख्यकों के मौलिक अधिकार[19] :- अनुच्छेद 29 और 30 के अनुसार अलपसंख्यकों को अधिकार है कि वे अपनी भाषा, बोली तथा सभ्यता एवं संस्कृति को बनाए रखें, अपनी शिक्षा संस्थाएँ स्थापित करें, जिनके प्रति सरकार कोई भेदभाव नहीं करेगी।

10. साम्प्रदायिक चुनाव प्रणाली की समाप्ति :- भारत में साम्प्रदायिक चुनाव व्यवस्था के स्थान पर सार्वजनिक वयस्क मताधिकार की व्यवस्था की गई है। धर्म, रंग, जाति, भाषा लिंग का भेदभाव न करते हुए सभी निवास करने वालों को समान भारतीय नागरिकता दी गई है।

इस प्रकार स्पष्ट है कि भारत धर्म निरपेक्षतावादी राज्य है।

वे तत्त्व जो भारतीय धर्म-निरपेक्षतावाद के विकास में बाधा उत्पन्न करते हैं :-

धर्मनिपरपेक्षता की नीति आज कसौटी पर खड़ी है। लोक व्यवहार में सामान्यतः देखा जा सकता है कि धर्मनिरपेक्षता का उपयोग मात्र एक वर्ग के हित में किया जाता है। अल्पसंख्यकों के नाम पर शासन कर सम्पूर्ण दृष्टिकोण व्यवहार अल्पसंख्यकों के हित में रहा है। जहाँ कहीं अन्य धर्मावलम्बी अल्पसंख्या में वहाँ उन्हें मात्र लुभाया जाता है और बहुसंख्यकों को कोसा जाता रहा है।

इस व्यवहार के पीछे विचारपूर्ण दृष्टिकोण न होकर राजनीतिक स्वार्थमात्र रहा है। विपिनचन्द्र जैसे वामपन्थी चिंतक का भी मत है कि ''धर्मनिरपेक्ष लोग अल्पसंख्यकों की साम्प्रदायिकता की उतनी लम्बी आलोचना नहीं कर पाते जितनी तीखी आलोचना वे बहुसंख्यक साम्प्रदायिकता की करते हैं।'' शाहबानों के मामले में सरकार ने धर्मांधता तथा कठमुल्लापन के सामने घुटने टेक दिए। तुष्टिकरण और अल्पसंख्यकवाद के पोषण का ही परिणाम है कि कश्मीर घाटी से ढाई लाख हिन्दू पलायन करके अपने देश में ही शरणार्थियों का जीवन व्यतीत कर रहे हैं। 1975 में इंदिरा सरकार ने आपातकाल के समय कई साम्प्रदायिक दलों तथा संगठनों को गैर-कानूनी घोषित किया। 6 दिसम्बर 1992 को अयोध्या का

विवादास्पद ढाँचा गिराये जाने के बाद हुई हिंसा के कारण कांग्रेस सरकार ने राष्ट्रीय स्वयं सेवक संघ, जमायते इस्लामी आदि संगठनों पर प्रतिबन्ध लगा दिया।

डॉ. पी.बी. गजेन्द्र गडकर ने धर्मनिरपेक्ष राज्य की निम्नलिखित प्रमुख समस्याएँ बतलाई हैं[21]:-

1. साम्प्रदायिकता आज की सर्वाधिक गम्भीर समस्या है। यदि राज्य नागरिकों की सम्पत्ति व जीवन की साम्प्रदायिक हिंसा से रक्षा नहीं कर सकता तो धर्मनिरपेक्ष राज्य एक मजाक बनकर रह जाएगा।
2. धर्मनिरपेक्ष राज्य के लिए दूसरी बड़ी समस्या हिन्दू धार्मिक संस्थाओं में राज्य का बहुत अधिक हस्तक्षेप है।
3. वर्तमान भारत में तीसरी बड़ी समस्या कानूनी ढाँचे में धार्मिक निजी कानून की स्थिति है।
4. धर्मनिरपेक्ष राज्य को आधारभूत रूप से परिभाषित करने की है।
5. समान नागरिक संहिता (अनुच्छेद 44) जैसे निदेशक सिद्धान्तों का क्रियान्वयन कठिन हो गया है।

प्रो. स्मिथ ने लिखा है कि ''वर्तमान भारत में, धर्मनिरपेक्ष राज्य की धारणा द्वारा राज्य की विधायिनी शक्तियों पर लगाई गई सीमाओं को, बहुत कम महत्त्व दिया जाता है। प्रायः यह प्रश्न किया जाता है कि यदि सरकार सामाजिक और आर्थिक जीवन जैसे व्यापक क्षेत्र के लिए नियम बना सकती है, उसी प्रकार वह धार्मिक जीवन के लिए नियम क्यों नहीं बना सकती।''[22]

भारत में धर्मनिरपेक्षता के जिस आदर्श को अपनाया गया, उसका लक्ष्य विविध धर्मों के अनुयायियों में धार्मिक विभेद के बावजूद भाईचारे की भावना को जन्म देकर 'भारत के भावात्मक एकीकरण की स्थिति को प्राप्त करना है। हम अब तक इस स्थिति को प्राप्त नहीं कर पाये हैं और दुःखद तथ्य यह है कि हम इस दिशा में आगे नहीं बढ़ रहे हैं। मूलतः संविधान ने धर्मनिरपेक्ष राज्य तो स्थापित कर दिया, लेकिन एक धर्मनिरपेक्ष समाज की स्थापना हम आज तक भी नहीं कर पाये हैं। सभी राजनीतिक दलों ने अपना लक्ष्य 'येन केन प्रकारेण' सत्ता प्राप्ति बना लिया है और सत्ता की इस अंधी दौड़ में वे व्यक्तियों की धार्मिक भावनाओं और जातीय भावनाओं के साथ खिलवाड़ कर रहे हैं। धर्मनिरपेक्षता के मार्ग में आ रही चुनौतियों को दूर करने के लिए हम सबको अपने मन-मस्तिष्क में, अपने सोच विचार में क्रान्तिकारी परिवर्तन लाना होगा। धर्मनिरपेक्षता के लक्ष्य को प्राप्त कर पाना तो तभी सम्भव है जब प्रत्येक भारतीय अपने हृदय में इस बात को संजो ले कि ''हम पहले तथा अन्तिम रूप में भारतीय हैं और हमें अपने भारतीय होने पर गर्व है।''

**सन्दर्भ सूची :-**


1. भारतीय संविधान की प्रस्तावना।
2. 42 वां संविधान संशोधन।
3. डी.ई. स्मिथ : इंडिया ऐ ए सेक्युलर स्टेट ऐड इंडिया।
4. भारत सरकार द्वारा प्रकाशित 'भारत का संविधान' (हिन्दी अनुवाद संस्करण) में 'धर्मनिरपेक्ष' शब्द के स्थान पर –पन्थनिरपेक्ष' शब्द का प्रयोग किया गया है जो अधिक उपयुक्त है। सही अर्थों में Secular शब्द का अनुवाद 'पन्थनिरपेक्ष' ही है। व्यवहार में Secular के लिए 'धर्मनिरपेक्षता' शब्द प्रचलन में है इसलिए यहाँ धर्मनिरपेक्ष शब्द का प्रयोग किया गया है।
5. एस. पुरी, भारतीय शासन एवं राजनीति, 1999 प्र.सं. 17
6. एस.पुरी, उपर्युक्त पृ.सं. 18
7. हिन्दु कोड बिल, 1951
8. एस.पुरी, भारतीय शासन एवं राजनीति, 199, पृ.सं. 18
9. आक्सफोर्ड शब्दकोष
10. एस.पुरी. उपरोक्त प्र.सं. 19
11. भारतीय संविधान की प्रस्तावना
12. अनुच्छेद : 14
13. अनुच्छेद : 15–16
14. अनुच्छेद : 17
15. अनुच्छेद : 25
16. अनुच्छेद : 26
17. अनुच्छेद : 27
18. अनुच्छेद : 28
19. अनुच्छेद : 29–30
20. क.च. कु लिय : ''कॉग्रेस के सामने अस्तित्व का संकट, राजस्थान पत्रिका, 14 नवम्बर 1989
21. पी.बी. गजेन्द्रगडकर : धर्मनिरपेक्षता तथा भारतीय संविधान, 1974, पृ.सं. 104
22. डी.ई. स्मिथ, उपरोक्त, पृ.सं. 499–500



*सहायकाचार्य–राजनीतिविज्ञान (अ.)*
*राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर,*
*जयपुर*

# अध्यात्म एवं ज्योतिर्विज्ञान-एक परिचय

**डॉ. रामेश्वरदयाल शर्मा**

ब्रह्माण्ड में शक्ति की दो सत्ताएँ जड एवं चेतन रूप में विद्यमान है। प्रकृति और पुरुष भी इन्हीं सत्ताओं के अपर नाम है। हमारा शरीर पंचभौतिक तत्त्वों से निर्मित है। अंग अवयवों में रक्त माँस, तन्तु, झिल्ली, अस्थि-मज्जा का मिलन ही एकीकरण है। अत: उनसे इच्छानुसार कार्य कराया जाता है। यह शरीर तन्त्र की प्रकृति का चमत्कार ही है। परन्तु फिर भी अपूर्ण है। इस शरीर के भीतर एक चेतनावस्था की सत्ता विद्यमान है। उसी का अचेतन भाग श्वास-प्रश्वास, निमेष-उन्मेष, आकुंचन-प्रकुंचन सुषुप्ति-जागृति आदि की व्यवस्था करता है। उसी का द्वितीय भाग-सचेतन भाग में विख्यात है जिसमें चिन्तन, मनन एवं इच्छानुसार कार्य करने की भावना को प्रेरित करता है।

इसी प्रसङ्ग में एक आधार प्रभावी सिद्ध हो सका है जिसे आत्म-समीक्षा या निष्पक्ष भाव से कार्य करने की क्षमता कहा जा सकता है। आत्म-बल निर्माण एवं आत्म सुधार हेतु निर्मित यह प्रचण्ड साहस, आत्म-मंथन, परिष्कार एवं आत्म बल की धरोहर तत्त्वदर्शन से ही संभव है। इसी को वैदिक एवं पुरातन भाषा में अध्यात्म नाम की संज्ञा दी जाती है।

वैदिक काल से ज्योतिर्विज्ञान अध्यात्मविज्ञान की ही एक शाखा एवं अपर नाम या संपूरक थी। इसका स्वरूप पवित्र विद्या के रूप में धर्मविज्ञान पर आधारित था। मानव की प्रकृति एवं सम्बन्ध अध्यात्म एवं ज्योतिर्विज्ञान से है। जिसमें पिण्ड-ब्रह्माण्ड- व्यष्टि-समष्टि-आत्मा-परमात्मा का सम्बन्ध निहित है। ग्रह-नक्षत्र-तारें-राशियाँ- मन्दाकिनियाँ-नीहारिकाएँ एवं मानव-प्राणी-पेड़-पौधे-पर्वत-चट्टान आदि खगोलीय एवं ब्रह्माण्डीय घटक प्रत्यक्ष एवं परोक्ष रूप में एक दूसरे को आकर्षित करते है।

ज्यौतिषशास्त्र को लेकर आज का बौद्धिक वर्ग दो भागों में विभक्त हुआ दिखाई दे रहा है। जिसमें एक वर्ग कर्मवादियों का तथा दूसरा भाग्यवादियों का प्रतीत होता है। सम्प्रति कर्मवादी यह नहीं जान पा रहे हैं कि ज्यौतिष मूल रूप में कर्मवाद की ही व्याख्या करता है। उसकी मुख्य लड़ाई भाग्यवाद से ही है। वह भाग्य के सहारे चुप बैठने की बात नही करता है क्योंकि यह उसका मुख्य उद्देश्य ही नहीं है। कोई भी भौतिक पिण्ड तब तक कुछ कार्य नही करता जब तक उसका सम्बन्ध चेतना से न हो। चेतना क्या है? यह एक गम्भीर विषय है। सर्वसाधारण मानता है कि जिसमें आत्मा है वह चेतन है तथा जिसमें आत्मा नहीं वह जड़ है। आत्मसत्ता जड़-चेतन की विभाजक नहीं है क्योंकि आत्मा तो जड़-

चेतन दोनों में विद्यमान है। यदि इसका विभाजक है तो मात्र ''ऐन्द्रिय भाव'', कहा भी गया है कि – ''सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्'' जिन पदार्थों में इन्द्रियाँ विकसित होती है और कार्य करती है, उन्हें हम चेतन तथा जिन में इन्द्रियाँ अविकसित होती हैं उन्हें अचेतन कोटि में रखते हैं। वास्तविक रूप से इस सृष्टि में जड़ कुछ भी नहीं है क्योंकि यदि सृजन है तो कुछ न कुछ अंशों में वह अवश्य चेतन है परन्तु हमको अपनी अपेक्षा न्यूनातिन्यून जान पड़ती है और हम उसे जड़ मान लेते हैं। विचार करें तो जान पड़ता है कि मनुष्य में जो क्रिया शक्ति है, वह वृक्षों में नहीं है फिर भी वृक्ष बढ़ते हैं, अंकुरित होते हैं, फूलते हैं, फलते हैं, पुराने होते हैं, और सूख कर नष्ट हो जाते हैं। अर्थात् पञ्चमहाभूतों में विलीन हो जाते हैं सृष्टि में प्रतिक्षण कुछ न कुछ क्रिया होती रहती है इसी आधार पर भू–गर्भशास्त्रियों ने पाषाण की अवस्था का आकलन किया। पाषाण में होने वाली क्रिया को भी आज अनुभव किया जा चुका है। यही भाव महर्षि व्यास ने गीता के माध्यम से व्यक्त किया कि वह गूढात्मा सबमें प्रतिष्ठित है। हर शरीर (आकृति) में आत्मसत्ता विद्यमान होती है चाहे वह शरीर जड़ हो अथवा चेतन। ऐन्द्रिय भाव में भी अन्तःकरण की प्रधानता ही मानव है। मन, बुद्धि, चित्, अहंकार ही अन्तःकरण होता है। आत्मा के इन चारों अन्तः करणों का अभी तक कोई भौतिक स्वरूप प्रत्यक्ष नही हुआ जबकि प्रत्येक आहार व्यवहार में इन्हीं तत्त्वों की मुख्य भूमिका होती है न कि शरीर की। अगर आज तक इन तत्त्वों का कोई भौतिक स्वरूप होता तो कोई भी व्यक्ति मनचला, मूर्ख, पागल, अपराधी नहीं होता क्योंकि हम भौतिक स्वरूप को शल्य चिकित्सा के द्वारा परिवर्तित कर अनुकूल बना लेते। जब तक व्याधि या विकार शरीर में होता है तभी तक हम उसकी चिकित्सा कर सकते हैं ज्यों हि वह अन्तःकरण की ओर अग्रसर होता है तो असाध्य हो जाता है। चिकित्साशास्त्र किसी रोग का उपचार तब करता है जब रोग शरीर में आ जाता है परन्तु ज्यौतिषशास्त्र रोग की सम्भावना तभी व्यक्त कर देता है जब शरीर भूमण्डल पर आता है क्योंकि वह पहले से ही एक निश्चित प्रक्रिया के तहत चल रहा है। ग्रहों के माध्यम से अन्तःकरण की चिकित्सा करना ही ज्यौतिष का आध्यात्मिक स्वरूप है। बिना आध्यात्मिक स्वरूप के इस सृष्टि का व्यवहार समझना आसान नहीं है। तीन प्रकार के दुःख हमारे आचार्यों ने कहे है– आधिभौतिक, आध्यात्मिक और आधिदैविक। दुःखो को भौतिक उपचारों से नहीं हटाया जा सकता है। ज्यौतिष का उपचार वाला पक्ष ही यह सिद्ध करता है कि यह कर्मवादी शास्त्र है न कि भाग्यवादी। किसी भी पूर्वानुमान का उद्देश्य उससे बचना होता है न कि उसमें डूबना। किसी भी एक शास्त्र को समझने के लिये उसके आधारभूत कई अन्य शास्त्रों को समझना होता है तभी हम किसी शास्त्र को समझ सकते हैं किन्तु आजकल बिना वेदाङ्गों को समझे ही लोग वेद की समीक्षा करने का प्रयास करते हैं।

**यत् पिण्डे तद्ब्रह्माण्डे**[1] अर्थात् जो इस मानव देह में है वही ब्रह्माण्ड में भी है, अभिप्राय उस विराट पुरुष के शरीर में है। जैसे किसी फल में कई बीज होते हैं और उस एक बीज में महाकाय वृक्ष सूक्ष्मरूप से विद्यमान होता है उसी प्रकार मायावच्छिन्न नर शरीर में उस अखिल ब्रह्माण्ड नायक का कल्पनातीत सूक्ष्मरूप विद्यमान रहता है। जैसे–हमारा सम्पूर्ण शरीर एक सजीव इकाई है परन्तु इसे बनाने

वाली सूक्ष्म कोशिकायें भी अपने में एक चैतन्य इकाइयाँ हैं। इन कोशिकाओं की प्रतिक्रियायें ही सम्पूर्ण शरीर की प्रतिक्रियायें होती है उसी के प्रकाश से चेतना का उद्भव हुआ है। समग्रसृष्टि प्रक्रिया को सम्यक् रूप से समझने के लिये हमें अनुमान उपमानादि प्रमाणों का सहारा लेना पडता है। बिना इन सहारों के कुछ भी नहीं जाना जा सकता है। पञ्चज्ञानेन्द्रिय ज्ञान तो मात्र प्रत्यक्ष का ही भान कराता है। इससे हम सब कुछ समझ जाएं असम्भव ही नहीं एक हास्यास्पद बात भी है। प्रत्यक्ष का ज्ञान अनुमान उपमानादि के द्वारा ही सम्भव है। इस जीवन को व्यवस्थित करने में कारणों का जितना योगदान है उतना कार्य का नहीं। किसी भी कार्य के पीछे अवश्य कोई न कोई कारण विद्यमान रहता है। कार्य कारण भाव ही भूत-भविष्य का सङ्केत हमको प्रदान करता है और यही भाव सृजनात्मक एवं प्रलययात्मक दोनों स्थितियों पर विचार करता है।

किसी भी शास्त्र एवं विज्ञान का उद्देश्य समाज को सुखी एवं समृद्ध बनाना है। ज्योतिष मुख्य रूप से वेद का अंग है और वेद वह ज्ञान राशि है जो समग्र एवं शाश्वत है। वेद का मुख्य उद्देश्य अनिष्ट परिहार और इष्ट प्राप्ति है, जो किसी भी ज्ञान एवं विज्ञान का उद्देश्य होता है। सायणाचार्य के अनुसार- '**इष्टप्राप्त्यनिष्टपरिहार-योरलौकिकमुपायं वेदयति यो ग्रन्थो स वेदः।**'[2] भारतीय चिंतन की ज्ञान-विज्ञान की धारा का प्रारम्भ वेदों से ही होता है। वैदिक साहित्य के षड् अंगों में एक अंग ज्योतिषशास्त्र भी है। ज्योतिषशास्त्र को वेद का चक्षु कहा गया है और चक्षु का अभिप्राय समग्र दृष्टि से है।

ज्योतिष एक पूर्ण एवं विश्व का प्राचीनतम विज्ञान है। बौद्धिक अनुभूतियों का निरंतर संघात जब बुद्धि क्षेत्र में एक नियम बनाता है और वह बुद्धि द्वारा परिष्कृत होकर सिद्धांत रूप बन जाता है तो उसे भौतिक एवं पार्थिव विज्ञान कहते हैं। किसी भी शास्त्र का विशेष ज्ञान ही विज्ञान कहलाता है। आध्यात्मिक अनुभूतियाँ हमारे ज्ञानकोश में एक नियमित पद्धति बनाकर ज्ञान द्वारा उपपत्तिमान रूप में अवस्थित होती हैं जिसे हम आध्यात्मिक विज्ञान कहते हैं। मुख्य रूप से विज्ञान को दो भागों में भौतिक और आध्यात्मिक रूप से विभक्त किया जा सकता है। उक्त दोनों विज्ञानों की दो शाखाएं होती हैं। प्रथम शाखा में नियम तथा दूसरी शाखा में उसकी निष्पत्ति तथा यौगिक प्रतिक्रियाएं होती हैं। जिस विज्ञान में ये दो शाखाएं प्रतिपादित हो उसे पूर्णविज्ञान कहा जा सकता है। अत एव ज्योतिषपूर्ण विज्ञान है क्योंकि दोनों शाखाएं गणित एवं फलित रूप से वर्णित है। फलित होने वाली घटनाओं ने ही गणित का विकास किया। ऐसा भी कहा जा सकता है कि गणित की प्रयोगशाला फलित ही है। इसीलिए वेदाङ्ग ज्यौतिष में मुनि लगध ने कहा है कि -

**यथा शिखा मयूराणां नागानां मणयो यथा।**
**तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम्॥**[3]

किसी भी पदार्थ के रहस्य को समझने के लिये हमारे पास आदि काल से ही दो प्रविधियाँ उपलब्ध थी पहली आध्यात्मिक विज्ञान तथा दूसरी भौतिक विज्ञान। आध्यात्मिक विज्ञान में योग एवं दिव्य दृष्टि जैसी प्रक्रियाओं के माध्यम से किसी भी पिण्ड एवं वस्तु का समग्र ज्ञान होता था। यही

प्रविधि समग्रज्ञान के लिये समीचीन है क्योंकि भौतिक प्रविधि (फिजिकल टेक्नोलॉजी) के द्वारा तो मात्र पञ्चज्ञानेन्द्रिय गम्य ज्ञान ही प्राप्त हो सकता है। इससे इतर विषयों का ज्ञान इस प्रविधि के द्वारा सम्भव नहीं है क्योंकि इस प्रविधि का अधिकतर ज्ञान परीक्षणशालाओं में होता है जहाँ परीक्षणशालाओं की सीमायें समाप्त होती हैं वहीं से प्रारम्भ होती है अध्यात्म विज्ञान की सीमा। इसीलिये अध्यात्म विज्ञान सामान्य जनमानस के लिये अगम्य हो जाता है।

इस चराचर जगत में घटनाओं का पूर्वानुमान ही समष्टि एवं व्यष्टिगत भाव से संहिता एवं होरा के रूप में पृथक् पृथक् विवेचन ही फलितशास्त्र है। बिना आधार के किसी भी परिणाम का पूर्वज्ञान सम्भव नहीं है। हमारे आचार्यों ने समग्र परिणामों का पूर्वानुमान ग्रहमण्डल के द्वारा ही किया है। व्यष्टिगत अथवा व्यक्तिगत विचार में जातकशास्त्र का तथा समष्टिगत विचार में संहिताशास्त्र का विकास हुआ। संहिताशास्त्र में सर्वाधिक लोकोपयोगी एवं महत्वपूर्ण विषयों का समायोजन है। ज्यौतिष की इस शाखा का अभी तक विशेषरूप से अध्ययन नहीं हुआ। आगमशास्त्र में ईश्वर को अणु से अणु और महान से महान कहा गया है। यथा–**अणोरणीयान् महतो महीयान्**[4] अणु व्यष्टिरूप में व्यापक तथा समष्टि रूप में महान् है यही अभिप्राय जातकशास्त्र एवं संहिताशास्त्र का भी है।

भारतीय ज्योतिष मुख्यतः सिद्धान्त–संहिता–होरा नामक तीन भागों में विभक्त है इसीलिये इसे त्रिस्कन्ध ज्योतिष भी कहते हैं। इस संदर्भ में मुनि नारद ने कहा है कि –

**सिद्धान्त संहिता होरा रूपस्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम्॥**[5]

कुछ विद्वानों ने इसके बाद ज्योतिष में प्रश्न और शकुन को जोड़कर पांच भागों में विभक्त किया है। इस प्रकार यदि ज्यौतिषशास्त्र के भेदों की बात हम करें तो इस शास्त्र के अनेकों भेद होते हैं। यथा अंतरिक्षविज्ञान मनोविज्ञान, वास्तुविज्ञान, भूविज्ञान, रसायनविज्ञान, भौतिकविज्ञान, रत्नविज्ञान, मौसमविज्ञान, वृष्टिविज्ञान आदि परन्तु ज्यौतिषशास्त्र के प्राचीन आचार्यों ने इन सभी अवयवों को तीन भागों में ही समाहित किया है।

## सन्दर्भसूची-


1. वैदिकदर्शनम् उद्धृत- ब्रह्माण्डपुराण
2. ऋग्वेदभाष्य भूमिका
3. वेदाङ्गज्योतिष
4. कठोपनिषद् 1/2/20
5. नारदसंहिता भूमिका



*सहायक आचार्य (ज्योतिषविभाग)*
*राष्ट्रिय संस्कृत संस्थान,*
*जयपुर परिसर, जयपुर*

# मीमांसादर्शनेषु श्रुत्यादीनां प्रामाण्यविचारः

प्रकाशरंजनमिश्रः

श्रुत्यादयः षट् वेदोक्तार्थनिर्णये प्रमाणानि भविष्यन्ति। तत्र सूत्रम् – श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् इति मन्त्रदेवताहविरादिद्रव्याणां विनियोगः कुत्र कर्तव्यः? इत्याकाक्षायां निर्धारयन्ति श्रुत्यादिषट्प्रमाणानि प्रवर्तन्ते। इमानि षट् एकस्मिन् काले अथवा सर्वदा एकत्र प्रावर्तिष्यन्त् तर्हि अनवस्था स्यात्। अतः पारदौर्बल्यमर्थविप्रकर्षात्[१] इत्युक्तम्। यत्र प्रमाणद्वयस्य सन्निपातः तत्र पूर्वापेक्षया अपरं प्रमाणं दुर्बलमित्युच्यते। एतत्क्रमानुसारं सर्वेषां प्रमाणानां निर्णायकत्वेन मुख्यत्वेन च श्रुतिरेव अन्तिमत्वेन तिष्ठति। अस्याः अपेक्षया अन्ये लिङ्गादयः सर्वे दुर्बलाः भविष्यन्ति।

श्रुतिः द्विप्रकारात्मिका अस्ति – एका साक्षात् पठिता, अन्या अनुमिता। प्रथमस्योदाहरणम् –''ऐन्द्रया गार्हपत्यमुपतिष्ठते'' इति। अत्र देवतासम्बन्धी या ऋक् तस्याः गार्हपत्याग्नि उपस्थाने विनियोगः इति पुरोडाशस्य सदनं करोति इति। वाक्यमेतद् श्रुतिसमूहेषु न कुत्रापि प्राप्यते। स्योनं ते सदनं कृणोमि[२] इति ब्राह्मणवाक्यानुसारं मन्त्रार्थं दृष्ट्वा अनेन लिङ्गात्मकज्ञापकबलेन मन्त्रार्थानुसारं मन्त्रविनियोगं कुर्वन्त्याः श्रुतेरस्याः अनुमानं क्रियते।

अर्थप्रकाशनसामर्थ्यात्मकं यत् तल्लिंगमित्युच्यते। लिंगमेतत् श्रुत्यानुसारं भवति। लिंगमपि द्विविधम्–साक्षाद्, दृश्यमानम्, अनुमितं चेति। साक्षाद् दृश्यमानं लिंगं नाम 'स्योनं ते' इति पुरोडाशस्य सदनं करोति इति भवति। अनुमितलिंगस्योदाहरणम् – ''देवस्य त्वा सवितु प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां जुष्टं निर्वपामि''[३] इति वाक्यम्। आकांक्षायोग्यतादिवशेन परस्परान्वितार्थपदानां यः समूहः तत् वाक्यमित्युच्यते। 'देवस्य त्वा' इति वाक्ये 'अग्नये जुष्टम्' इति भागस्यास्य निर्वापरूपात्मकार्थप्रकाशनसामर्थ्यं प्रत्यक्षत्वेन दृष्टम् तेन एकवाक्येन अवशिष्टभागस्य अनेन वाक्यप्रमाणबलेन अर्थप्रकाशनसामर्थ्यमनुमीयते। तेन समुदितलिङ्गेन देवस्य त्वेति निर्वपति इति श्रुतेः अनुमानं क्रियते इति श्रुतेरपेक्षया लिंगं दुर्बलम्।

लिंगास्यानुमापकवाक्यमपि द्विविधम्–साक्षादनुमितभेदेन वाक्यस्य साक्षादुदाहरणं 'देवस्य त्वा' इति। अन्यस्योदाहरणम् – ''समिधो यजति'' इत्यस्यां श्रुतौ इष्टविशेषनिर्देशाभावात् यागेनानेन कस्याः भावना करणीया? इत्याकांक्षायाम्, एवमेव 'दर्शपूर्णमासाभ्यां स्वर्ग भावयेत्' इत्यस्मिन्नपि वाक्य कथं भावयेत् इत्याकांक्षायाम् इमे द्वे आकांक्षे यत्र प्रतिपादिते स्तः तत्प्रकरणम् भवतीति हेतोः तदेवात्र वाक्यद्वयस्य प्रमाणं

भवति। प्रकरणमेतद् द्वयोस्तयोः एकवाक्यतां सम्पादयति। अर्थात् प्रकारणेन अनुमीयते तयोः एकवाक्यतात्मकः अर्थावबोधः , इति कृत्वा समिधो यजति इति वाक्यं लिङ्गापेक्षया दुर्बलम्।

उभयाकांक्षा यत्र तत्प्रकरणमित्युच्यते। एतदपि द्विविधम्–साक्षात् श्रुतम्, अपरमनिमितं चेति। प्रथमस्योदाहरणं पूर्वमेव प्रतिपादितम्। द्वितीयस्य– 'ऐन्द्राग्रमेकादशकपालं निर्वपेत्'[४] इत्यादिना इष्टविधानं क्रियते। ''इन्द्राग्नी रोचना दिवः''[५] इत्यादि मन्त्रानुसार यथासंख्यपाठानुरोधेन यथाक्रमं विनियोगोऽपि उक्तः। एवं तत्तद्वाक्यं तत्तत्स्थानविशेषेण एकवाक्यत्वं भजते इत्यतः स्थानानुमानेन प्रकरणार्थः निश्चीयते। एवं प्रकरणार्थः वाक्ये, वाक्यं लिङ्गे लिंङ्गं श्रुतौ इति परम्परया प्रकरणार्थस्य विनियोगात् वाक्यापेक्षया प्रकरणं दुर्बलं भवति।

उभयाकांक्षायाः अनुमापकं स्थानप्रमाणमपि द्विविधम्–साक्षादेकम्, अन्यत् समाख्यया अनुमितं चेति। समाख्या नाम योगबलम् अर्थात् अन्वर्थता इत्युच्यते। स्थानस्य साक्षादुदाहरणं प्रकरणे प्रतिपादितम्। अन्यानुमितस्योदाहरणम् –हौत्रम्, औद्गात्रम् इत्यादि। होतुरिदं हौत्रम् इति योगबलेन हौत्रादिसमाख्यया यल्लब्धं कर्म तत् होतुः पुरुषस्य अनुष्ठानयोग्यमिति अनुमीयते। समाख्या सम्बन्धप्रयुक्ता एव भवति। असन्निहितपुरुषेण सह सम्बन्धाभावात्, सम्बन्धप्रयुक्ता एव भवति। असन्निहितपुरुषेण सह सम्बन्धाभावात्, सम्बन्धस्य सिद्ध्यर्थं सन्निधिपाठरूपक्रमस्य कल्पना क्रियते। अनुमानेन पाठक्रमे सिद्धे सति तेन उभयाकांक्षायाः अनुमानं क्रियते। तेनानुमानेन एकवाक्यतायाः सिद्धिः इति हेतोः षट् प्रमाणेषु अन्तिमत्वेन दुर्बला भवति इयं समाख्या।

तस्मात् समाख्या स्थाने अन्तर्भवति, स्थानं प्रकरणे अन्तर्भवति, प्रकरणं वाक्येऽन्तर्भावं भजते, वाक्यं लिङ्गे स्वात्मानमर्पयति, लिङ्गं स्वस्वरूपं श्रुत्या स्वीकरोति इत्यतः जैमिनिना उक्तम्– ''श्रुतिलिङ्ग वाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'' इति श्रुतिः वेदरूपः इत्युच्यते ।

**प्रामाण्यवादविचारः**

प्रमाणानां यः भावः अर्थात् धर्मविशेषः अस्ति तदेव प्रामाण्य मित्युच्यते। यथार्थानुभवः प्रमाणमित्युच्यते। एतद् प्रमाणं प्रमा इत्यपि कथ्यते । यथार्थानुभवे वर्तमानः यः विशेषधर्मः तस्य प्रामाण्यमिति कथनात् एतत् प्रमात्वं, प्रमाणत्वमित्यादिशब्दैः व्यपदिश्यते। भावाभावभेदेन विरुद्धत्वेन अप्रमात्वमप्रमाणत्वमित्यपि कथ्यते। प्रामाण्यकारणत्वेन यः वादः अस्ति तस्य प्रामाण्यवादः इति नाम। अयं वादः द्वेधा व्यवह्रियते –जननकारणविषयकः, ज्ञापककारणविषयकश्चेति। यस्मिन् कार्यस्योत्पत्तिः भवति सः वादः जननकारणविषयकः। ज्ञापक– कारणविषयस्तु यस्मिन् कार्यज्ञानं सम्पाद्यते सः इति । प्रामाण्यस्य कारणं भवति–स्वतः परतश्चेति। यत्र स्वतः परतश्चेति संशयः तत्र वादारम्भो भवति। स्थिते एवं के स्वतः प्रामाण्यं स्वीकुर्वन्ति, के परतः प्रामाण्यमभ्युपगच्छन्ति इति ज्ञापनाय भवत्ययं श्लोकसन्दर्भः

**प्रमाणत्वाप्रमाणात्वे स्वतः सांख्याः समाश्रिताः।**
**नैयायिकास्ते परतः सौगताश्चरमं स्वतः॥**

**प्रथमं परतः प्राहुः, प्रामाण्यं वेदवादिनः।**
**प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्॥**

इति। सांख्याः प्रमाणत्वाप्रमाणत्वयोः जन्म स्वतः इति, नैयायिकाः परतः इति, बौद्धास्तु अप्रामाण्यस्य जन्म स्वतः प्रामाण्यस्य परतः इति। वेदवादिनः मीमांसकास्तु प्रामाण्यं स्वतः अप्रामाण्यं परतः इति स्वतस्त्व मतमुपस्थापयन्ति। एतेषां विस्तारः खण्डनमण्डनात्मको विचारः ग्रन्थान्तरादवलोकनीयः। स्वतःप्रामाण्यं युक्तियुक्तं भवति। यतः प्रामाण्यस्य स्वतः सिद्धत्वं एतद् भवति यत् विज्ञानसामग्रीजन्यम् एवं तद्भिन्नहेत्वजन्यमिति। अयं भावः -येन सामग्रीवशेन विज्ञानमुत्पद्यते, तेनैव वर्तमानं प्रामाण्यमपि उत्पन्नं भवति। प्रामाण्योत्पत्तौ गुणमथवा दोषाभावं विहाय अन्यः हेतुः न कोऽपि तिष्ठति। दोषास्तु प्रमायाः प्रतिबन्धकमात्रत्वेनोच्यन्ते। अयं मीमांसकाभिमतः प्रामाण्यवादविचारः।

सततं प्रामाण्ये मीमांसामतानुसारमनुमाने - विवादास्पद प्रामाण्यं पक्षत्वेन स्वीक्रियते, विज्ञानसामग्रीजन्यं तद्भिन्नहेतुना यदजन्यं तत् साध्यत्वेन स्वीक्रियते, अप्रमायाः अनाश्रयत्वं हेतुत्वेन तिष्ठति, घटादि-प्रमासदृशः दृष्टान्तः भवति इति विवेचनीयम्। एवं विध्यर्थवादमन्त्रनामधेयात्मकैः चतुर्भिः भागैः विभक्तः वेदः धर्मविषये स्वतः प्रामाण्यं भवति। अज्ञातार्थज्ञापकः यः वेदमन्त्रः सः विधिर्भवति। यथा- ''अग्निहोत्रं जुहुयात्स्वर्गकामः'' इति। प्रशंसा अथवा निन्दापरकस्य वेदवाक्यस्य अर्थवादः इति संज्ञा। यथा- ''वायुर्वै क्षेपिष्ठा देवता'' इति वायोः स्तुतिद्वारा ''वायव्यं श्वेतमालभेत'' इति विधेः प्रशंसां करोति। एवमेव सोऽरोदीत्, यदरोदीत्, तद् रुद्रस्य रुद्रत्वम् इति विधेः प्रशंसां करोति। एवमेव ''सोऽरोदीत्, यदरोदीत्'', तद् रुद्रस्य रुद्रत्वम् अनेन वाक्येन रजतस्य निन्दाबोधनं जायते। प्रयोगसमवेतार्थस्मारकत्वेन यद वेदवाक्यं सः मन्त्रः भवति। यथा- ''स्योनं ते सदनं कृणोमि'' इति। अस्य मन्त्रस्य उपयोगः पुरोडाशस्य सुखकराशयद्वारा यज्ञादिकर्मणि भवति। अर्थस्मरणं मन्त्रेणैव कार्यम् इति हेतोः मन्त्रस्यापि आम्नायत्वमुक्तम्। नामनिर्देशपूर्वकं यागस्य विधानं यत् तन्नामधेयत्वेन कथ्यते । यथा- ''श्येनेनाभिचरन् यजेत, उद्भिदा यजेत पशुकामः'' इत्यादयः। एते चत्वारः क्रियापरकाः इति हेतोः एतेषां चतुर्णामपि आम्नायत्वं सिद्धम् ।

मीमांसकाः वेदवादिनः इति हेतोः जैमिनिनोक्तम् - ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्''[६] इति। वेदस्य स्वतः प्रामाण्यमेतैः आचार्यैरेव साधितम् इत्यतः वेदार्थमीमांसारूपमेतद् मीमांसादर्शनं भवति।

**सन्दर्भाः-**


| | | | |
|---|---|---|---|
| १. | जै.सू. -३/३-१४ | २. | तै.ब्रा. - ३-६ |
| ३. | ते.सं. १-१४ | ४. | तै.सं.-२-२-११ |
| ५. | तै.सं.-४-२-११ | ६. | जै.सू.-१-२१ |



*सहायकप्राध्यापकः वेद विभाग*
*राष्ट्रियसंस्कृतसंस्थानम्,*
*जयपुरपरिसरः, जयपुरम्*

# वर्तमानपरिप्रेक्ष्ये प्राच्यन्यायव्यवस्थायाः प्रासङ्गिकता

**डॉ. आरती शर्मा**

**क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्।**
**निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥**[१]

अस्माकं भारतीयराजशास्त्रेषु प्रजापालनरूपस्य धर्मस्य साधनार्थं सुहृत्कोशराष्ट्रदुर्गदण्डशासनबलानि इति सप्त राज्ञः शक्तयः भवन्ति। भगवता मनुनाऽपि राज्यस्य सप्ताङ्गानि एवमुक्तानि –

**स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा।**
**सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते॥** [२]

अर्थात् राज्यस्य निर्माणं स्वामि-मन्त्रि-दुर्ग-राष्ट्र-कोश-दण्ड-मित्राणि इति सप्ताङ्गानां मेलनेन भवति। राज्यस्य सप्ताङ्गेषु न्यायस्य अन्यतमप्रतिष्ठा विद्यते। प्राच्यराजनैतिकविशारदैः सुदृढा न्यायव्यवस्था आद्रियते। 'एकराड्' इति शब्देन ध्वन्यते यत् प्रजापरिपालनेन सह राजा अखण्डराष्ट्रस्य संरक्षणे राज्यव्यवस्थां नियन्त्रितां कुर्वन् न्यायपूर्वकं शासनं विदधतु इति।

वस्तुतः न्यायशब्दस्य अर्थोऽस्ति –'नियमेन ईयते'[३] इति न्यायः। अपि च नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति न्यायः। येन समाजे सन्तुष्टिः प्राप्यते, सन्तुष्ट्या व्यवस्था प्रभवति, व्यवस्थया च धर्मः प्रतिष्ठति, स एव न्यायः। न्यायविषये शुक्रस्य कथनमपि वर्तते –

**न्यायप्रवृत्तो नृपतिरात्मानमथ च प्रजाः।**
**त्रिवर्गेणोपसंधत्ते विनिहन्ति ध्रुवमन्यथा॥**[४]

राज्ञः कर्त्तव्येषु मुख्यं कर्त्तव्यं वर्तते प्रजाभ्यः न्यायः प्रदानम्। प्रजाभ्यः न्यायः पक्षपातरहितः स्यात्। यतो हि न्यायेन राजा प्रजानां पुण्यस्य षड्भागं प्राप्नोति। अपराधज्ञानं न्यायविवेचनं विना न जायते। न्यायविवेचनमपि व्यवहारदर्शनं विना न सम्भाव्यते। अतः व्यवहारदर्शनं अपराधज्ञानं, दण्डव्यवस्थाञ्च राज्ञः न्यायव्यवस्थाऽन्तर्गतं भवति। न्यायस्य व्यवस्थापनं व्यवहारदर्शनं वा सम्प्रति न्यायालये भवति। धर्मशास्त्रे न्यायालयशब्दः धर्माधिकरणपदेन व्यपदिश्यते। यथोक्तं कात्यायनेन –

**धर्मशास्त्रानुसारेण सारासारविवेचनम्।**
**यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत्॥**[५]

तत्र धर्माधिकरणभूता भवति सभा। अतः सभा भवति मुख्यं व्यवहारदर्शनस्थानम्। अन्यान्यपि व्यवहारदर्शनस्थानानि परिलक्ष्यन्ते। यथा –

**दश स्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः।**
**निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः॥**
**आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः सार्थिकैस्तथा।**
**सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः॥**
**उभयानुमतं चैव गृह्यते स्थानमीप्सितम्।**
**कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः॥**[६]

न्यायस्य निर्वचनं न्यायाधीशः करोति, यः न्यायविवेचनार्थं विधिना नियुक्तोऽस्ति इति भारतीयदण्डसंहितायाः धारा १९ तः अवज्ञायते। तथैव धर्मशास्त्रे राजा, ग्रामः, पौरः, गणः, श्रेण्यः, चातुर्विद्यः, कुलिका, प्राड्विकादयश्च न्यायाधीशाः कथ्यन्ते। यथोक्तम् –

व्यवहारदर्शने राज्ञः प्रतिनिधिमाह याज्ञवल्क्यः –

**अपश्यता कार्यवशात् व्यवहारान् नृपेण तु।**
**सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्॥**[७]

अर्थात् ब्राह्मणोऽपि राज्ञः अनुपस्थितौ राजवत् सर्वाणि कार्याणि विचारयेत्। स च विचारकः ब्राह्मणः प्राड्विवाक इत्युच्यते बृहस्पतिना –

**राजा कार्याणि सम्पश्येत् प्राड्विवाकोऽपि वा द्विजः।**
**न्यायाङ्गान्यग्रतः कृत्वा सभ्यशास्त्रमते स्थितः॥**[८]

वर्तमाने काले तु अस्माकं देशस्य राजा राष्ट्राध्यक्षः राष्ट्रपतिरूपेण वा विराजते। सः सामान्यजनोऽपि भूत्वा स्थलविशेषेण राजतान्त्रिकशासनप्रणाल्यां 'सर्वे पदा हस्तिपदे निमग्ना' इत्यस्मिन् रूपे लोकेस्मिन् विराजते। पूर्वं तु गणतन्त्रात्मिका पद्धतिः सीमाविशेषपर्यन्तं वर्तमानस्वरूपान्तर्गते एव समाहिता दृश्यते, यथा – कार्यपालिका, न्यायपालिका, उभयत्र नृपः एव अधिष्ठातृरूपेण आसीत्, यत्र नृपः एव न्यायाधीशरूपेण आसीत्। नृपस्य न्यायवर्त्मनि एव सर्वैः अङ्गीक्रियते स्म। वर्तमानकाले तु उच्चतम न्यायालय-उच्च न्यायालय (Supremecourt -High court-Session court) इत्यादीनामुपस्थापनं वा क्रियते। सम्प्रति न्यायप्रणाल्यां राजनैतिकतन्त्रविशेषस्य प्रभावोऽपि अस्माभिः दृश्यते, यदा अधस्तनस्तरे प्रार्थनां कृत्वा, आवश्यकतायां सत्यामन्ततः उच्चस्तरीयैः निर्णायकैः तस्य न्यायो भवति। पुरा काले तु राज्ञः प्रजापालनं परमधर्म आसीत्। अतः सः झटित्येव न्यायं करोति स्म किन्तु अधुना न्यायः विलम्बेन प्राप्यते। एवं सति सबलानां कृते तु

हानिर्नास्ति परन्तु निर्बलानां कृते प्रताडना जायते। अतः न्यायाधीशस्य दायित्वं भवति, यत् शीघ्रातिशीघ्रं अस्तित्वं कलुषितं भवति।

प्राचीनकाले वर्णितन्यायव्यवस्थायाः स्वरूपम् वर्तमानपरिप्रेक्ष्ये अपि प्रासङ्गिकमस्ति वा? इत्यस्मिन् विषयेऽपि पत्रेऽस्मिन् विचारयामः प्रमाणपुरस्सरम् भारतीयदण्डसंहितानुसारेण प्राच्यग्रन्थानामाधारेण स्मृतीनामाधारेण च।

कदाचित् बालेन (सप्तवर्षेभ्यः द्वादशवर्षेभ्यः वा न्यूनवयस्केन), वृद्धेन (अशीतिवर्षवयस्केन) विकृतमस्तिष्केन अबुद्धया वा केनापि अपराधः क्रियते, तथापि एते दण्डनीयाः न भवन्ति। अर्थात् तत्रापराधो न जायते इति भारतीयदण्डसंहिता एवं भणति (भा.द.सं. 1pc-80-87)। एतस्मिन् विषये मनुनाऽपि उक्तमस्ति -

**छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते।**
**अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च॥**
**छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च।**
**आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत्॥**[९]

अतः स्पष्टं यत् अपराधनिश्चयात्प्राक् कर्मणः पृष्ठे व्यक्तेः इच्छा अनिच्छा च द्रष्टव्या। किन्तु यदि कपटभावेन, छलेन, हिंसया, स्व-असावधानेन च कार्यं हिंसात्मकं भवति तदा तत्र अपराधः जायते इति कथितं भारतीयदण्डसंहितायाम् (भा.द.सं. २४,२५,२८)। एवमेव मनुनाऽपि कथितं यत् -

**प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति।**[१०]

अस्यापराधस्य न्यायविवेचनार्थं न्यायाधीशः अर्थी-प्रत्यर्थी-साक्षीनाम् आकारेङ्गितचेष्टागत्यादिभिः अन्तर्गतमनं विजानीयादिति साक्षात् मनुनोक्तम्। यथोक्तं तेन -

**बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्।**
**स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च॥**
**आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।**
**नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥**[११]

एतैः बाह्यैः स्वरवर्णेङ्गिताकारैः अपराधिनः अन्तर्गतं भावं ज्ञात्वा ततः न्यायपूर्वकं दण्डं निश्चिनुयात्। उक्तं यत् तेनैव -

**अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः।**
**सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत्॥**[१२]

अयं दण्डः चतुर्धा प्रोक्तः तेन । यथा -

**वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम्।**
**तृतीयं धनदण्डं तु वधदण्डमतः परम्॥**[१३]

किञ्च प्रवासनं कारावासञ्च दण्डरुपेण तत्र धर्मशास्त्रेषु परिलक्ष्यते। धर्मशास्त्रे दण्डेषु दण्डप्रदानार्थं न्यायाधीशः साक्षि-लेख्य-भुक्त्यादिप्रमाणां दर्शनं करोति। तत्र यदि कश्चित् लोभादिवशतः साक्षिः साक्ष्येऽसत्यं वदति तर्हि तदर्थं अर्थदण्डः कथ्यते मनुना। यथोक्तं तेन -

**लोभात्सहस्त्रं दण्ड्यस्तु मोहात्पूर्वं तु साहसम्।**
**भयाद् द्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम्॥**
**कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्।**
**अज्ञानात् द्वे शते पूर्णे बालिश्यच्छतमेव तु॥**[१४]

तथैव आधुनिक भारतीयदण्डसंहितायाम् अपि धारा १९१ तः धारा १९६ मध्ये कौटसाक्ष्यकृते ७ वर्षतः १० वर्षं यावत् कारावासस्य तथा अर्थदण्डस्यापि विधानं परिलक्ष्यते। एवमेव कू टलेख्यकृते प्रदर्शनेन वा उत्तमसाहसमिति अर्थकदण्डः तथा जिह्वापाण्यङ्घ्रिच्छेदनरूपश्च दण्डः प्रदीयते धर्मशास्त्रे। तत्र कथ्यते कात्यायनेन-

**कूटकतौ साक्षिणां वाक्याल्लेखकस्य पत्रकम्।**
**नयेच्छुद्धिं न यः कूटं स दाप्यो दममुत्तमम्॥**[१५]

तथा व्यासेन (तत्रैव) -

**स्थावरे विक्रयाधाने लेख्यं कूटं करोति यः।**
**स सम्यग्भावितः कार्यो जिह्वापाण्यङ्घ्रिवर्जितः॥**[१६]

एवं भावेन भारतीयदण्डसंहितायां धारा १९७ एवं १९८ तथा ४६४-४७३ धारा मध्ये मिथ्या हस्ताक्षरितकृत प्रमाणपत्रप्रदर्शनेन मिथ्यासाक्ष्यवत् दण्डः विधीयते। तथैव ऋणदानप्रसङ्गे यदि वादी प्रतिवादी वा सत्यतां कपटपूर्वकं निवारयति, तर्हि तदर्थं वर्षद्वयं कारावासः किम्वा अर्थदण्डः अथवा उभयं दण्डं प्रदीयते अत्र (भा.द.सं. धारा ४२२) अस्मिन् ऋणादानप्रसङ्गे तु धर्मशास्त्रे बहु कथितमस्ति। यथोक्तं कात्यायनेन -

**पीडयेत्तु धनी यत्र ऋणिकं न्यायवादिनम्।**
**तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दमम्॥**[१७]

तथैव अधमर्णः यदि न्यायालये ऋणिकदानविषये मिथ्या वदति तर्हि सः गृहीतधनस्य दशप्रतिशतं दण्डरूपेण दद्यादिति मनुनोक्तम् -

**ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति।**
**अपह्नवे तद् द्विगुणं तन्मनोरनुशासनम्॥**[१८]

तथैव प्रातिभाव्यापलापे द्विगुणं दण्डमाह पितामहः। तथैव यदि कश्चित् जनः निक्षेपद्रव्यस्य दुर्विनियोगं करोति किम्वा स्वस्य उपयोगे संपरिवर्तितं करोति अथवा तत्रत्य संविद् व्यतिक्रमं करोति किम्वा निक्षेपस्य भङ्गं करोति तर्हि तत्र तदर्थं वर्ष त्रयं सप्तवर्षं दशवर्षं वा कारावासः किम्वा अर्थदण्डः अथवा उभयदण्डः प्रदीयते भारतीयदण्डसंहितानुसारम् (भा.द.सं.धारा ४०५-४०९) तथैव धर्मशास्त्रे निक्षेपस्यापहरणे अपह्नवे च तत्समं दण्डविधानं विधीयते। यथोक्तं बृहस्पतिना-

**गृहीत्वापह्नुते यत्र साक्षिभिः शपथेन वा।**

**विभाव्य दापयेन्न्यासं तत्समं विनयं तथा॥**[१९]

तथैव जीवहत्या कृतेऽर्थदण्डः वधदण्डश्च उच्यते धर्मशास्त्रे। यथोक्तं कात्यायनेन -

**द्विपणो द्वादशपणो वधे तु मृगपक्षिणाम्।**

**सर्पमार्जारनकुलाश्वसूकरवधे नृणाहम्॥**[२०]

अस्मिन् प्रसङ्गे जीवहत्याकृते भारतीयदण्डसंहितायां धारा ४२८ तथा ४२९ तमे अर्थदण्डः प्रोक्तः।

अनेन प्रकारेण स्तेय-साहस-स्त्रीसंग्रहण-वाक्पारुष्यादि अपराधस्य कृते समानः मतः दण्डश्च परिलक्ष्यते। भारतीयदण्डसंहितास्मृतिशास्त्रयोर्मध्ये। अत एवात्र निश्चप्रचं वक्तुं शक्यते यत् वर्तमानपरिप्रेक्ष्ये प्राच्यन्यायव्यवस्थायाः प्रासङ्गिकता उपादेयता च सुदृढतया परिलक्ष्यते इति शम्।

**सन्दर्भाः -**


| | | | |
|---|---|---|---|
| १. | मनुस्मृतिः ७/१४४ | २. | मनुस्मृतिः १/२९४ |
| ३. | शब्दकल्पद्रुमः काण्ड - २ | ४. | शुक्र |
| ५. | पराशरस्मृतिः व्यवहार काण्ड पृ. - १७ | ६. | व्य. प्र. पृ. - ८ |
| ७. | व्य. प्र. पृ. - ९ | ८. | पराशरस्मृतिः व्यवहार काण्ड पृ. - २१ |
| ९. | मनुस्मृतिः ८.२९१,२९२ | १०. | मनुस्मृतिः ८.२९४ |
| ११. | मनुस्मृतिः ८.२५-२६ | १२. | मनुस्मृतिः ८.१२६ |
| १३. | मनुस्मृतिः ८.१२९ | १४. | मनुस्मृतिः ८.१२०-१२१ |
| १५. | व्य. प्र. पृ. १५० | १६. | व्य. प्र. पृ. १५० |
| १७. | व्य. प्र. पृ. २६० | १८. | मनुस्मृतिः ८.१३९ |
| १९. | व्य. प्र. पृ. २८४. | २०. | परा. स्मृ. व्य. का. पृ. २९१ |



*सहायकाचार्या,*

*श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे,*

*नवदेहल्याम्*

# राजेन्द्रकर्णपूरस्य वैशिष्ट्यम्

**डॉ. फिरोजः**

राजेन्द्रकर्णपूरः शम्भुकवेः रचना विद्यते। राजेन्द्रकर्णपूरे शम्भुकविना राज्ञः हर्षस्य महिमावर्णने पृथ्व्याकाशौ एकीकृतौ। ग्रन्थेऽस्मिन् पञ्चसप्ततिः श्लोकाः सन्ति। शम्भुकविः कश्मीरदेशे प्रख्यातस्य राज्ञः हर्षदेवस्य सभाकविरासीत्। हर्षस्य राज्यकालः १०८९ ई. तः ११०१ ई. यावत् मन्यते। अतः शम्भोः समयोऽपि एकादशशताब्द्या उत्तरार्धम् अनुमीयते।

राजेन्द्रकर्णपूरः राज्ञः हर्षदेवस्य लघुप्रशस्तिः वर्तते। अस्याः गणना शुद्धरूपेण इतिहासकोटौ तु नैव भवितुमर्हति। कदाचित् ऐतिहासिककाव्येषु शारीरिकसौन्दर्यादिगुणानां वर्णनं काव्यात्मकतया शैल्या विहितमस्ति। प्रतिभातीदं यद् शम्भोः कवेः मुख्यमुद्देश्यं स्वीयाश्रयदातुः स्तुतिं विधाय तस्य राज्ञः कृपापात्रभवनमासीत्। अतः कविना ऐतिहासिकसामग्रीं विहाय गुणस्तवनोपरि अधिकं बलं दत्तम्। राजेन्द्रकर्णपूरे हर्षस्य गुणानां वर्णनं दिग्दिगन्तेषु प्रसारिता कीर्तिः च दृश्येते। स्वर्गलोकभूलोकयोः विविधोपमानैः कविः राज्ञः चित्रणं प्रस्तौति। विद्यानुरागिणि मुञ्जे निधनं प्राप्ते दुःखं गतायाः सरस्वतीदेव्याः स्तनौ कम्पेते। तस्याः अधरोष्ठः अश्रुभिः क्षालितः। सा च शोकाकुला भवति। तां कविः पृच्छति यत् कथमिमां दशामापन्ना? यदि मुञ्जस्य निधनादेव दुःखिता वर्तते चेद् नैव व्याकुला भव। अयं हर्षः मुञ्ज इव इति स्वीकुरु। बुद्धियशःकान्तित्यागनीतिविद्यानुरागसम्पत्त्यादिषु एषो तादृश एव विद्यते। एवं सरस्वती हर्षं प्राप्य हर्षं गता। यथा दर्शितमपि कविना –

**तस्थौ कम्पतरङ्गितस्तनतटं वाष्पाम्बुधौताधरं,**
**शोकाक्रान्तकपोलकीलितकरं द्यां मुञ्जराजे गते।**
**संजाते त्वयि हारिहारवलयक्वाणं कणत्कङ्कणं,**
**चञ्चत्काञ्चनकाञ्चि सा भगवती नर्नर्ति वाग्देवता॥**[१]
**किं तान्तिः किमनिर्वृतिः किमधृतिर्वाग्देवि मुञ्ज( ञ्जे ) गते,**
**किं शून्याऽसि किमाकुलाऽसि किमिति क्लान्ताऽसि कोऽयं क्रमः।**
**एतं विद्धि तमेवमस्य हि मतिः सा विश्रुतिः सा द्युतिः,**
**स त्यागः स नयः स सूक्तिषु रसस्ताः सम्मताः सम्पदः॥**[२]

हर्षस्य भ्रूलतायाः स्पन्दनमात्रेणैव कुबेरस्य निद्रा दूरं गच्छति। लङ्कापतिः रावणः शङ्कितो भवति यत् क्वचित् तस्योपरि आक्रमणं तु न जायते। इन्द्रोऽपि अस्माद् राज्ञः बिभेति। स मुहुर्मुहुः क्रन्दति।

ययातिदुष्यन्तरघुशान्तन्वादीनां यशः भूभृतः हर्षस्याग्रे तुच्छमेव दृश्यते। हर्षस्य यशोगानं स्त्रीभ्यः पुरुषेभ्यः देवीदेवताभ्यः सर्वेभ्यः कर्णप्रियो वर्तते। अतस्तेभ्यः इतरकर्णपूराणाम् आवश्यकता न भवति। केसरोत्पादके देशे कश्मीरे वनिताः विविधैः सुमनोभिः स्वा अलङ्कुर्वन्ति स्म, किन्तु हर्षस्य यशस एव श्रवणे तासां रुचिः वर्तते। मुक्तामणीनाम् आभूषणानि अपि कामीनिभ्यः कमनीयानि आसन् यस्माद्दक्षिणदेशस्य ताम्रवतीनद्याः मुक्ताः ग्राह्याः भवन्ति स्म। परन्तु मृगनयन्यः वनिताः मौक्तिकमालानाम् अभिलाषां न कुर्वन्ति। अतः ताम्रवत्यै कविः सन्देशं प्रेषयति यत् सा चिन्तारहिता भूत्वा प्रियसमागमनाय सज्जां कुर्यात्। तस्याः मौक्तिकानां हरणं कोऽपि काऽपि वा न करिष्यति।

हर्षस्य शुभ्रयशः पर्वतसरिद्सागरदिग्दिगन्तान् यावत् प्रसृतं वर्तते। अस्मिन् शुभ्रे यशसि हर्षस्य यशः तमः नाशयद् दिङ्मण्डलानि प्रक्षालयद् आकाशे व्याप्तं जातम्। शुभ्रत्वे प्रत्येकमपि वस्तु स्वकीयं वर्णं विहाय श्वेतमेव प्रतिभाति। सामान्योऽपि पर्वतो हिमाच्छादितः कैलाशवत् प्रतीतो भवति। सर्पाः शेषनागा इव, हस्तिन ऐरावता इव, पुंस्कोकिला हंसा इव च प्रतीयन्ते।

**व्याप्तव्योमतले मृगाङ्कधवले निर्धौतदिङ्मण्डले,**
**देव! त्वद्यशसि प्रशान्ततमसि प्रौढे जगत्प्रेयसि।**
**कैलासन्ति महीभृतः फणभृतः शेषन्ति पाथोधयः,**
**क्षीरोदन्ति सुरं द्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः॥**[3]

हर्षस्य यशोविस्तारः तस्य शारीरिकसौन्दर्यात् विद्याप्रेमवशात् शौर्यकरणाच्च वर्तते। तस्य सौन्दर्यस्य स्मरणमात्रेणैव कामिन्यः स्वाः विस्मरन्ति। यथा कविना दर्शितम् -

**चैत्रं मा स्मर विस्मर स्मर रतिं किं सायकै र्मारकै -**
**गौंर्धां मुग्ध ( मुञ्च ) मुधावधान जहिहि ज्याबन्धवीरं धनुः।**
**देवेऽस्मिन्नसकृत् स्मृतेऽपि न मतिर्नैव स्मृतिर्न स्थिति-**
**र्नासक्तिर्न धृति ( र्न ) निर्वृतिरपि क्वाप्यस्ति वामभ्रुवाम्॥**[4]

यदा स्वर्गे चारणाः राज्ञः स्तवनमारभन्ते तस्मिन्नैव क्षणे मुक्ताभिरलङ्कृताः सुरसुन्दर्यः कामातुराः सञ्जायन्ते। यथा कविना प्रतिपादितम् -

**नाके मुग्धमधुव्रतप्रणयिनीहुंकारहारिस्वनै-**
**श्चारु त्वच्चरितं व( य )दैव चतुरैरुच्चारितं चारणैः।**
**कान्तामौक्तिकदामनद्धचिकुरस्वःसुन्दरीणां पुरः,**
**प्राप्तो देव तदैव सूत्रितशरासारः ससारः स्मरः॥**[5]

मरुद्गणाः तस्य सौन्दर्यविषये चर्चां कुर्वन्ति। चर्चां च निशम्य उर्वशी तनुत्वं याति। रोहिणी मालिन्यमेति। रम्भा कामज्वरेण पीडां गच्छति।

वीरतायां राजा हर्षः नलादप्यधिको वीरः वर्तते। यथा श्लोके –

**यो वैरिष्वनलो( नलो ) वसुमतीदीपो दिलीपोऽथ यो,**
**यो मानेन पृथुः पृथुर्जगति यो निर्लाघवो राघवः।**
**यः कीर्तौ भरतो रतो नृपगुणैर्यश्शन्तनुः( शन्तनुः )**
**संजाते त्वयि कस्य न क्षितिपते सर्वेऽपि ते विस्मृता॥**[६]

नित्यं नवीनान् विजयान् अधिगच्छन् तस्य खड्गः भगवतः कृष्णस्य साम्यं भजते। रक्षाकर्मणि उत्सुकेन त्रिषु च लोकेषु प्रख्यातेनानेन राज्ञा खड्गेन युद्धस्य कथा एव समाप्तिं नीता। यथा –

**अधिकं समाप्त-सभा( म )रः प्रथितो भुवनेषु गोपनरसोत्कः।**
**भाति सदा नवविजयं कुर्वन्कृष्णस्तवायमसिः॥**[७]

अनेन नृपेण चोलकर्णाटमुरलकेरललाटदेशीयानां स्त्रीणां शोभा हृता। यथा –

**चौडीचूडाभरणहरणः कीर्णकर्णावतंसः,**
**कर्णाटीनां मुषितमुरलीकेरलीहारलीलः।**
**कुर्वन्नुर्वीतिलकतिलकोत्सिञ्चलाटीललाटं,**
**जीयादेकस्तव नवयशःस्वर्णशाणः कृपाणः॥**[८]

कोङ्कणदेशस्य कुन्तलदेशस्य च राजानोऽपि तस्मात् भीत्वा पलायन्ति। यथा –

**जहाति नगरीं गलत्कनककङ्कणैः कैं( कौं ) कणो,**
**वनं विशति विह्वलः स्खलितकुन्तलः कुन्तलः।**
**किमन्यदुदितक्रुधि त्वयि मृगेन्द्रभीमारवं,**
**तटं विशति मारवं च्युतरसा( मा )लवो मालवः॥**[९]

राज्ञः मरुस्थलेऽपि विजयं प्रादर्शयत् कवि द्वाभ्यां पद्याभ्याम् –

**अकङ्कणमेखलागुणमहारमस्ताङ्गदं,**
**वृ( व्र )जन्ति चतुरः पदैर्मरुमरातिवामभ्रुवः।**
**करोत्यसिलतां करे यदसि गर्वमुर्वीभुजो।**
**भुजस्य परिपन्थिनायमदक्षिणे दक्षिणे॥**[१०]
**कण्ठान्तः क्वणितं दिवाकर-कर-क्लान्त्या रजोविप्लवै-**
**स्तन्नेत्राञ्चलकुञ्चनं शितकुशप्रान्तक्षतैः सीत्कृतिः।**

**श्वासोर्मिप्रभवो वनेचरभिया त्वद्वैरिवामभ्रुवा-**
**मेवं देव मरोस्तटेऽपि सुरत-क्रीडानुरूपः क्रमः॥**[११]

धनुषः प्रत्यञ्चायाः चिह्नेनाङ्कितः हर्षस्य भुजः सम्पूर्णपृथिव्याः भारमगृह्णत्। तस्मात् कूर्मावतारः दिग्गज्जाश्च विश्रामं लभन्ते। यथा –

**उर्वीमौर्वीकिणभृति भवद्दोष्णि विभ्रत्यशेषां,**
**शान्तक्लान्तिः किमपि कुरुते नर्मणा कर्म कू र्मः।**
**कृत्वा वेलापुलिनलवलीपल्लव ग्रासगोष्ठीं,**
**दिङ्मातङ्गाः सममथ सरितान्नाथपाथः पिबन्ति॥**[१२]

कविः पृथ्वीं प्रार्थयते यत् सा धारणार्थं कच्छपशेषनागदिगज्जानामुपरि आशान्विता न भवेत्। कविः वक्ति यत् स्वर्गे, पृथिव्यां, सर्वत्र च मया दृष्टम्, किन्तु सौन्दर्ये कीर्तौ नीतौ लोकव्यवहारे काव्यरचनायां च निपुणो नावलोकितः कोऽपि हर्षादधिकः। यथा –

**संजाते जलदात्ययेऽपि फणभृत्पर्यङ्कशय्यातलं,**
**मा मा मुञ्च मुकुन्द कान्त कमलादोःकन्दलालिङ्गितः।**
**जागर्ति स्थितये सतां विरतये येनाऽसतामप्ययं,**
**सनद्धो गुणमौलिमण्डलमणिर्भूमण्डलाखण्डलः॥**[१३]
**श्लाघा राघव लाघवं तव गता दुष्यन्त विश्वं तव,**
**म्लानिं याति यशो गता तव तथा प्रथाऽपार्थताम्।**
**जातेऽस्मिन् गुणिबान्धवे नरपतिश्यामाधवे क्ष्माधवे,**
**कस्याप्यत्र न कर्ण कर्णपदवीं याता भवत्कीर्त्तयः॥**[१४]

काव्येऽस्मिन् वस्तुध्वनिः अलङ्कारध्वनिः रसध्वनिश्च वर्तन्ते। यथा वस्तुध्वने उदाहरणम् –

**हेरम्ब त्यज कर्णतालनिनदं चूडापगे गर्ज मा**
**मा मा काञ्चनकिङ्किणीकलकलं कण्ठे कु( क )कुद्मन् कृथाः।**
**प्रक्रान्तासु सुरैः पुरः पुररिपोर्युष्मद्यशोगीतिषु,**
**व्यग्रस्येति परिस्फुरन्ति वचनान्यानन्दितो ( नो ) नन्दिनः॥**[१५]

हे गणेश! त्वं कर्णतालनिनदं त्यज। शिवजटासु वासिनि हे गङ्गे! सम्प्रति मा गर्ज। हे वृषभ! त्वं कण्ठे स्वर्णमयकिङ्किणीनां मधुरमव्यक्तं च ध्वनिं मा कुरु। एतादृशानि वचनानि देवताभिः राज्ञः हर्षदेवस्य यशोगानारम्भे सति ध्यानेन श्रवणे रतस्य आनन्दितस्य नन्दिनः मुखात् निःसरन्ति।

इत्यत्र तव यशोगानस्य ध्वनि अत्यन्तकर्णमधुरो वर्तते यस्य श्रवणकाले श्रोतारो मनागपि क्लेशं नानुभवन्ति इति वस्तुना वस्तु व्यज्यते। अतस्तव यशः शिवलोकप्रिय इति वस्तुध्वनिः।

व्यतिरेकालङ्कारध्वनेराधिक्यमस्मिन् ग्रन्थे दृश्यते। यथा –

**आलेख्यं चिरमुल्लिलेख विजने सोल्लेखया रेखया,**
**सङ्कल्पानकरोद्विकल्पबहुलाकल्पाननल्पानपि।**
**अद्राक्षीदपरप्रजापतिमतं चक्रे च तीव्रव्रतं,**
**त्वन्निर्माणविधौ कियन्न विदधे बद्धावधानो विधिः॥**[१६]

**सन्दर्भाः –**


१. राजेन्द्रकर्णपूरः–१७
२. राजेन्द्रकर्णपूरः–३६
३. राजेन्द्रकर्णपूरः–४
४. राजेन्द्रकर्णपूरः–११
५. राजेन्द्रकर्णपूरः–३८
६. राजेन्द्रकर्णपूरः–५१
७. राजेन्द्रकर्णपूरः–३४
८. राजेन्द्रकर्णपूरः–६
९. राजेन्द्रकर्णपूरः–१२
१०. राजेन्द्रकर्णपूरः–२१
११. राजेन्द्रकर्णपूरः–५६
१२. राजेन्द्रकर्णपूरः–४७
१३. राजेन्द्रकर्णपूरः–४३
१४. राजेन्द्रकर्णपूरः–४४
१५. राजेन्द्रकर्णपूरः–श्लोक २०
१६. राजेन्द्रकर्णपूरः–२४



*सहायकाचार्यः (अ.), साहित्यविभागः,*
*जयपुरपरिसरः, जयपुरम्*

# पर्यावरण परिशोधन में यज्ञविज्ञान की भूमिका

डॉ. सुनील कुमार शर्मा

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥**
**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[1]

प्रजापति ने सृष्टि की रचना के समय यज्ञ के साथ मानव जाति को उत्पन्न करके उनसे कहा कि इस यज्ञविज्ञान के द्वारा ही आपकी उन्नति होगी और यह यज्ञ आपके लिये मनोऽभिलषित फल देने वाला होगा। आप इस यज्ञ के द्वारा देवताओं को सन्तुष्ट करो और देवता आपको यश, फल -प्रदान कर सन्तुष्ट करेंगें। इस तरह परस्पर आप दोनों अत्यन्त कल्याण पद को प्राप्त करें।

वस्तुतः देखा जाये तो यज्ञ का ज्ञान भी है विज्ञान भी है। यज्ञ का उद्देश्य है वातावरण एवं पर्यावरण का पोषण शोधन। दर्शन की दृष्टि से यज्ञ जीवन जीने का तरीका है। मानव-जाति के जीवन का प्रारम्भ ही यज्ञ से होता है। शास्त्रविधान और श्रद्धापूर्वक किया गया यज्ञ वेद की तरह वैज्ञानिक प्रक्रिया है जो मानवजाति को एक आरोग्य कवच प्रदान करती है। यज्ञ की अग्नि में विधिपूर्वक दी गयी आहुति की शक्ति क्षेत्रफल और गुणात्मक दृष्टि से हजार गुणा बन जाती है जिससे वायुमण्डल में विद्यमान विषैले कीटाणु नष्ट हो जाते हैं और पर्यावरण स्वच्छ हो जाता है। यज्ञ विज्ञान में स्पष्ट बताया गया है कि यज्ञ उपचारमूलक है। वर्षा कराने हेतु, वर्षा रोकने हेतु, विविध रोगों के नाश हेतु, आयु वृद्धि हेतु, पर्यावरण शुद्धि हेतु एवं मानव के शारीरिक, मानसिक, आध्यात्मिक विकास हेतु अखिलविश्व में सर्वोत्तम साधन यज्ञ ही है। डॉ. हैफकिन, तुले, त्रिवल्व, ट्रेल्ड, डॉ. लेडी लिंका, वर्ट होल्ड जैल जैसे वैज्ञानिकों ने अपने शोधों से इसकी वैज्ञानिकता को स्पष्ट किया है। इन्होंने शोधो के निष्कर्ष के आधार पर कहा कि यज्ञ करने के दौरान Farming Aldehyde gas गैस निकलती है जो वातावरण को दूषित करने वाले बैक्टीरिया को नष्ट करने में सक्षम है। यज्ञ में जलाई जाने वाली समिधाओं जैसे मीठे फल- मुनक्का, सेव आदि को सुखाकर जलाने से टाइफाइड कीटाणु तीस मिनट में एवं अन्य रोगों के कीटाणु दो घण्टे में नष्ट हो जाते हैं। इस प्रकार हवन कुण्ड की आग से लेकर यज्ञ की भस्म तक प्रत्येक सूक्ष्मातिसूक्ष्म अंश का वैज्ञानिक विश्लेषण किया गया है जिसका विस्तृत विवेचन हम इस पत्र में करेंगें।

**विषयपरिचय-**

यज्ञ प्रक्रिया ही सृष्टि की उत्पत्ति और स्थिति का आधार है, यह वह विधि है जिससे प्रकृति और प्राकृतिक जगत में सन्तुलन बना रहता है। प्राकृतिक यज्ञ विश्व में प्रतिक्षण चलता रहता है, अतएव यजुर्वेद और अथर्ववेद में यज्ञ को सृष्टि चक्र या विश्व की नाभि कहा गया है -

**अयं यज्ञो भुवनस्य नाभि।**[२]

**अयं यज्ञो विश्वस्य भुवनस्य नाभिः।**[३]

कात्यायन जी ने यज्ञ का लक्षण -द्रव्यं देवतात्यागः किया है। द्रव्य से अभिप्राय समस्त भौतिक पदार्थ, आँख खोलने पर जो भी दिखाई पडे वे सब भौतिक पदार्थ है। देवता से अभिप्राय है - अग्नि, इन्द्र, आदित्यादि देवता। इन दोनों द्रव्य एवं देवता का संयोग होना पुनः उस संयोग से किसी अन्य पदार्थ की सृष्टि होना यज्ञ  कहलाता है। यज्ञ में द्रव्य एवं देवता को मिलाते हैं तब तीसरे पदार्थ की उत्पत्ति होती है वही यज्ञ नाम से व्यवहृत होता है।

वस्तुतः यज्ञ शब्द की व्युत्पत्ति 'यज्' धातु से,यजयाचयतविच्छप्रच्छरक्षो नङ्[४] इस पाणिनीय सूत्र द्वारा नञ् प्रत्यय करने पर होती है। इसके तीन अर्थ हैं - देवपूजा, संगतिकरण और दान। अतः परमेश्वर और प्राकृतिक तत्त्वों की पूजा, विविध कार्यों की सिद्धि के लिये विविध समिधाओं का संयोजन और प्राणिमात्र के कल्याण के लिए स्वार्थरहित समर्पण इत्यादि यज्ञ के व्यापक अर्थ हैं। यज्ञ- शब्द की यौगिक उत्पत्ति कल्पवृक्ष की तरह अभीष्ट को परिपूर्ण करने के लिए पूर्ण समर्थ है।

ऋग्वेदसंहिता ने यज्ञ से मनुष्य के स्वास्थ्य, निरोगता और आयु का सम्बन्ध, प्रतिपादित करते हुये उसे कल्याणमार्ग बताया है। शुक्लयजुर्वेद में भी स्पष्ट उल्लेख है कि कर्मों को करते हुये ही सौ वर्ष तक जीने की इच्छा करनी चाहिए। कर्म के अनुकूल एक ऋचा से स्पष्ट निर्देश है कि - हे मनुष्य प्रतिदिन बढता हुआ सौ वर्ष तक सौ शरद ऋतु तक जीवित रहे। सौ हेमन्त और सौ वसन्त ऋतु तक जिए। इन्द्र, अग्नि, सविता और बृहस्पति ये सब सौ वर्ष की आयु को देने के साथ हवि(हविषा) से इसकी जीवनशक्ति पुनः प्रदान करे।

**शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तानु।**

**शतमिन्द्राग्नि सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥**[५]

यजुर्वेद में अग्नि देव से मन, आयु, प्राण, आत्मा, चक्षु, श्रोत्र आदि की प्राप्ति की प्रार्थनाओं की निहितार्थ भी यज्ञविधान से इष्टकामनाओं की पूर्ति का विवरण ही है।

**आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन**

**कल्पतां श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां मनो**

**यज्ञेन कल्पतामात्मा यज्ञेन कल्पताम्॥**[६]

अर्थात् यज्ञ से आयु की वृद्धि हो, यज्ञ से प्राण बलिष्ठ हो,यज्ञ से नेत्र उत्कृष्टता को प्राप्त हो, यज्ञ से श्रोत्रेन्द्रिय उत्कर्षता को प्राप्त हो, यज्ञ से वाक् इन्द्रिय उत्कर्ष को प्राप्त हो, मन, आत्मा भी उत्कर्ष को प्राप्त हो, यज्ञ से स्वयं प्रकाश परमात्मा प्राप्त हो।

इन वैदिक आधारों की पुष्टि वैज्ञानिकों ने भी अपने शोधों के आधार पर की है। जिस प्रकार उपरि सूक्त में शतायु एवं आयुवृद्धि की बात की गई है उसी को भारत के वैज्ञानिक डॉ. स्वामी सत्यप्रकाश जी ने पुष्ट किया कि यज्ञ करने के दौरान Farming Aldehyde gas नामक गैस निकलती है जो ऑक्सीजन से ज्यादा लाभकारी है एवं वातावरण को दूषित करने करने वाले बैक्टीरिया को नष्ट करने में सक्षम है, यही कारण है कि प्राचीन ऋषियों-मुनियों की आयु लगभग २००-३०० वर्ष हुआ करती थी, इस बात की पुष्टि फ्रांस वैज्ञानिक तुले ने भी की है।

प्राचीनकाल में हमारे देश में नियमित यज्ञ होते थे, अतः अतिवृष्टि और अकाल नहीं पडते थे। यज्ञ से हम जब-जब वर्षा चाहते थे तब तब वर्षा होती थी। इसलिए वेद में कहा गया है -

**निकामे निकामे नः पर्जन्योऽभिवर्षतु।**[७]

इसका तात्पर्य है कि यज्ञ के द्वारा द्युलोक को प्रसन्न किया जाता है और द्युलोक वर्षा के द्वारा पृथ्वी को तृप्त करता है। यज्ञ से मेघ बनते है और मेघ से वर्षा होती है।

**भूमिं पर्जन्यया जिन्वन्ति दिवं जिन्वन्त्यग्नयपः।**[८]

यज्ञ विज्ञान में यज्ञ में सम्मिलित सूक्ष्मातिसूक्ष्म अंश का वैज्ञानिक महत्त्व स्पष्ट किया गया है -

उदाहरण के लिये यज्ञ के जो यज्ञ कुण्ड का आकार बनाया जाता है, उसका नीचे का तापमान ३००° एवं ऊपर का तापमान १३००° होता है, जिससे यज्ञ कुण्ड में न तो बहुत अधिक वायु प्रवेश करती है और ना ही बहुत कम इस प्रकार की संरचना में हर वनस्पति जलाने के लिए उपयुक्त होती है। यज्ञ कुण्ड की अग्नि को नियंत्रित करने के लिए आयताकार (Rectangle) बनाया जाता है एवं यज्ञकुण्डों में भी सबसे ज्यादा लाभकारी तांबा (Copper) के यज्ञकुण्ड को माना जाता है क्योंकि यह Scalar Energy अर्थात् नकारात्मक ऊर्जा को नष्ट करने में सक्षम है।

यज्ञ में मृत ईंधन (कोयला, डीजल, C.N.G, L.P.G)की बजाय जीवित समिधाओं जैसे आम की लकडी, तिल, नारियल, शहद, कपूर, गो घृत इत्यादि का प्रयोग किया जाता है जिससे वातावरण में विद्यमान प्रदूषित गैस के बदले शुद्ध गैस फैलने लगती है, हवा का शुद्धीकरण होने लगता है पैट्रोल, डीजल आदि मृत ईधनों में कार्बन अधिक होता है, जबकि जीवित समिधाओं में सैलूलाइड फ्लूड (Cellulite fluid) निकलने से ऑक्सीजन ज्यादा बनती है, जिससे भी गो घृत की महिमा सर्वाधिक है, इससे पर्यावरण में व्याप्त धुआँ हट जाता है। सुगन्ध फैलाने वाले पदार्थों को जलाने से वातावरण शुद्ध होने लगता है। शुद्धता के प्रमाण के लिए कुछ वैज्ञानिक शोधों के उदाहरण इस प्रकार हें -

P.M. (Particular Matter) २.५ में यज्ञ करने से पहले जब गणना की गई तो २२९ थी और यज्ञ के दौरान घटकर १८१,१३०,११० एवं अन्त में ९५ रह गई। इसी प्रकार PM÷-10 में यज्ञ करने से पहले जब गणना की गई ते ४६५ थी और १ घण्टे में यज्ञ करने के दौरान घट-घटकर ४०३,३७५,२८०,२६०,२२० एवं अन्त में १८० रह गई।

इसी प्रकार दूसरे शोध कार्बनडाइआक्साइड (cow)एवं कार्बनमोनोआक्साइड दोनों गैसों पर यज्ञ के प्रभाव का अध्ययन किया गया। यज्ञ करने से पहले कमरे के बाहर cowLevel६९६ था जो यज्ञ के दौरान ४३० और यज्ञ के तुरन्त बाद घटकर ४१५ रह गया। इसी प्रकार कमरे के अन्दर cowLevel यज्ञ करने से पहले १२८० था, यज्ञ के दौरान ६७७ और बाद में ४७१ ही रह गया। कार्बनमोनोआक्साइड का स्तर (Level) यज्ञ करने से पहले ११ PPM÷ था, यज्ञ के दौरान ४, फिर १ और दो घण्टे पश्चात् मात्र .०१ रह गया। अर्थात् इस शोध से स्पष्ट है कि यज्ञ से निकलने वाली Farming aldehyde gas अन्य दुष्प्रभावी गैसों के प्रभाव को कम करती है और पर्यावरण को सन्तुलित एवं शुद्ध करने में सहायक है।

शोधों से यह स्पष्ट हुआ है कि बंद कमरे में यज्ञ करने से ९४% बैक्टीरिया कम हो जाते है और लगभग २४ घण्टे तक यज्ञ का प्रभाव रहता है अर्थात् १ घण्टा यज्ञ करके हम २४ घण्टे तक शुद्ध वातावरण में रह सकते हैं। यज्ञ में प्रयोग किया जाने वाला गो घृत सर्प की तरह हवा के जहर को खत्म करता है और पर्यावरण को शुद्ध करता है इसलिए इसका नाम सर्पी भी है। यज्ञ का प्रभाव १५ km. के क्षेत्र तक जाता है। यज्ञ की अग्नि से धुआँ उत्पन्न होता है, उससे बादल बनते हैं और वर्षा होती है। यही धुआँ जब व्यक्ति के फेंफडे(Lungs) एवं ऊतक (Tissues) तक पहुंचता है तो अनेक प्रकार के रोगों का शमन होता है।

इसी महिमा का गान तो अथर्ववेद के उन्नीसवें काण्ड में मिलता है -

**घृतस्य जूतिः समना सदेवा संवत्सरं हविषा वर्धयन्ती।**
**श्रोत्रं चक्षुः प्राणोऽच्छिने नो अस्त्वच्छिन्ना वयमायुषो वचर्सः॥**[१]

यज्ञ की उपयोगिता में बाह्य पर्यावरण के प्रदूषण से निदान जितने महत्त्वपूर्ण है उतने ही उल्लेख है - उससे सम्भव होने वाले रोगनाशन, दीर्घायु और अन्य शारीरिक एवं मानसिक उपलब्धियाँ। प्रमाण है- यज्ञ विज्ञानाधारित वैज्ञानिकों के शोध । यथा -

त्रिवल्व नामक वैज्ञानिक के अनुसार यज्ञ समिधाओं में शक्कर मिलाकर जलाने से चेचक, हेजा के कीटाणु मर जाते हैं।

डॉ. हैफकिन के अनुसार समिधाओं में गो घृत मिलाकर डालने से पेट के कीटाणु मर जाते हैं।

Dr. Lady Linca °ß¢ Burthold Jell के अनुसार दुनिया में सबसे अच्छी औषधि है हवन की राख या भस्म। इससे जर्मन में कई मल्लम एवं Eye Drops बनाये जाते हैं। इस धुयें से कपडों में फंगस नहीं लगता है।

यज्ञ की राख पर अनेक प्रयोग किये गये और इसमें सोना तक पाया गया वशर्ते कि इसे जीवित प्रयोग की जाये जिसका कोयला न बने। राख से Atomic Radiation प्रदूषण भी कम होता है।

उदाहरण–Chenove accident में जब भोजन पूरा प्रदूषित हो गया तो हवन की इस राख को पानी में डालकर उसमें चावल डाल दिये गये और २०० वैक्बल से 0 Level मापने पर पता चला कि २४ घण्टे में वे सभी चावल खाने योग्य शुद्ध हो चुके थे।

कृषि में भी इसका प्रयोग किया गया। एक खेत में पौधों में इस राख को खाद के रूप में डाला गया और अन्य में सामान्य खाद। फसल होने पर पता चला कि हवन की राख जिस खेत में खाद के रूप में डाली गयी थी उसमें ५०% अधिक फसल थी। उसके फलों में मिठास अधिक थी।

यदि रोगों की बात की जाये ते समिधाओं में रोग के अनुसार समिधा मिलाकर जलाने से रोग का उपशमन होता है। जैसे मलेरिया के शमन के लिए गूगल, लुहान, कपूर, हल्दी, दारूख, बालछड, देवदारू, नीम के सूखे पत्ते देशी गाय के घी के साथ मिलाकर यज्ञ करना चाहिए। चेचक के शमन के लिए मीठे फल– किशमिशमुनक्का, सेव आदि को सुखाकर अन्य समिधाओं व गो घृत के साथ मिलाकर यज्ञ करना चाहिए। इससे चेचक के कीटाणु तीस मिनट में नष्ट होने का दावा फ्रांस के वैज्ञानिक 'एन् ट्रैल्ड' ने किया है।

ध्वनि प्रदूषण को शान्त करने के उपाय भी सामवेद में हैं – अर्थात् सामवेद सम्पूर्ण संगीतमय है। जब लयानुसार मंत्रों का शुद्धोच्चारण किया जाता है तो भयावह ध्वनि शान्त होती है, आध्यात्मिकता का संचार होता है और सर्वत्र शान्तिमय वातावरण स्थापित होने लगता है। उदाहरण के लिए पर्यावरण संरक्षण के लिए यज्ञ करते हुये इन मन्त्रों का उच्चारण कर शान्ति की प्रार्थना की जाती है –

**ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः।**
**शान्तिवनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः**
**सर्वशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।**[१०]

ऋग्वेदीय ज्ञानसूक्त ने ज्ञान और वाणी के सम्बन्ध पर विचार करते हुए प्रतिपादित किया है कि धीरजनों ने यज्ञ के द्वारा वाक् के यातव्य पथ को प्राप्त किया, अनन्तर ऋषियों में प्रविष्ट उस वाक् को ढूँढ निकाला। प्रमाण है यह मन्त्र –

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥**[११]
**यज्ञेन वाचः पदवीयमायन्।**
**तामन्वविन्दन्नृषिषु प्रविष्टाम्॥**[१२]

वैज्ञानिकों ने भी यज्ञ की राख जिसे हम लौकिक भाषा में 'भबूति' कहते हैं, महत्त्व बतलाते हुये

स्पष्ट किया है कि यह भबूति हमारे शरीर के द्वारा जल्दी अवशोषित कर ली जाती है, इसलिए चुटकी भर लगाने मात्र से ही बुखार, खाँसी, जुकाम आदि रोगों में प्रायशः लाभ मिलता है। इसी कारण प्राचीन ऋषि मुनि यज्ञ के बाद में प्रसाद स्वरूप थोडी-थोडी भबूति दिया करते थे और आज भी हम जब भी मन्दिर जाते हैं, थोडी सी भबूति का टीका लगाते हैं, गले आदि पर लगाते हैं और ग्रहण भी करते हैं। इस प्रकार यज्ञों का वैज्ञानिक स्वरूप स्पष्ट करते हुये यज्ञों से पर्यावरण शुद्धि के, रोगों के शमन के अनेक तथ्यों को स्पष्ट करते हुये वेद का एकमात्र उद्देश्य जो बताया गया है,उसी का उल्लेख करते हुये शोधपत्र समापन की ओर है। उद्देश्य है – यज्ञ का प्रतिपादन करना।

**यज्ञः स्वयम्भ्भूर्वरुणः सूर्य्य पृथ्वी च चन्द्रमाः।**
**पशुयज्ञोऽत्र यज्ञोऽहं यज्ञैर्यज्ञोऽयमिज्यते॥**
**यज्ञस्य यज्ञतां ज्ञात्वा यज्ञैर्यज्ञं यजेत यः।**
**यद्यदिच्छति तत्सर्वं ससाधयति यज्ञतः॥**[१३]

अधिक क्या मुण्डकोपनिषद् में तो यज्ञ को संसार सागर से पार (मुक्ति) होने के लिए 'प्लव' अर्थात् 'नौका' कहा गया है-

**प्लवा ह्येते अदृढा यज्ञरूपाः**[१४]

**सन्दर्भः -**

१. गीता ३/१०-११
२. ऋग्वेदः १/१६४/३५,यजुर्वेदः२३/६२
३. अथर्ववेदः १/१०/१५
४. अष्टाध्यायी ३/३/१०
५. ऋग्वेदः १०/१६१/४
६. यजुर्वेदः १८/२९
७. यजुर्वेदः २२/२२
८. ऋग्वेदः १/१६४/५१
९. अथर्ववेदः १९/५८/१
१०. यजुर्वेदः ३६/१७
११. ऋग्वेदः १०/९०/१६, यजुर्वेदः३६/१६
१२. ऋग्वेदः १०/७२/३
१३. ऋग्वेदः
१४. मुण्डकोपनिषद१/२/७

**सहायकग्रन्थ–**

१. बलवीर आचार्य, ऋग्वेदीय ब्राह्मणों का सांस्कृतिक अध्ययन, दिल्ली,१९८१
२. आद्यादत्त ठाकुर, वेदों में भारतीय संस्कृति, जयपुर।
३. युधिष्ठिर मीमांसक, श्रौत्रयज्ञमीमांसा, सोनीपत।

*सहायकाचार्यः (सं.), शिक्षाशास्त्रविभागः,*
*भोपालपरिसरः, भोपालम्*

# स्मृतिशास्त्रों में दण्ड विधान

**डॉ. अर्चना जैन**

स्मृतिशास्त्र शब्द से अभिप्राय है 'स्मृत्याः शास्त्रम्' 'जो हमेशा स्मरण रहे' उस शास्त्र का चिन्तन करके ही हम शुभ अशुभ कार्यों में प्रवृत्त होते हैं। जो शास्त्रानुगुण हो उसमें प्रवृत्त हो और जो विरुद्ध उससे निवृत्त। स्मृति शास्त्र का पर्यायवाची नाम धर्मशास्त्र है, धर्मशास्त्र से अभिप्राय किसी जाति विशेष से नहीं अपितु मनुष्यमात्र का सामान्य धर्म क्या होना चाहिए इसका वर्णन किया है, मनुस्मृतिकार धर्म का लक्षण करते हुए लिखते हैं -

**'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥'[1]**

मुख्यतः इन दश तत्त्वों को मूल बनाकर इन ग्रन्थों का निर्माण किया गया है। सम्भवतः जब लोग वेद विद्या को सरलतया नहीं जान पा रहे थे तभी मनीषियों ने इन ग्रन्थों की रचना की जिस से घर-घर तक इन शिक्षाओं को पहुँचाया जा सके और लोग वेद विद्या का अनुसरण करते हुए, इस समाज को उन्नति के पथ पर ले जाते हुए सरल और सात्त्विक जीवन जीयें।

इस शास्त्र में जीवन के विभिन्न पक्षों पर ध्यान केन्द्रित किया है, जिसमें दण्ड विधान भी प्रमुख है। जिसके बिना एक अनुशासित समाज की कल्पना नहीं की जा सकती। एक सशक्त समाज बनाने के लिए वहाँ की दण्ड व्यवस्था प्रमुख है ताकि प्रजा को न्यायोचित शासन मिले और यह तभी सम्भव है, जब उस देश की दण्ड व्यवस्था पक्षपात रहित होगी अन्यथा वहाँ अराजकता फैल जाएगी और जल्द ही सम्पूर्ण राज्य और राजा विनाश को प्राप्त होगा। उन मूल-भूत तत्त्व को ध्यान में रखते हुए हमारे स्मृतिकारों ने अपने ग्रन्थों में इस पर प्रकाश डाला है। अर्थशास्त्रकार ने भी दण्ड का महत्त्व प्रतिपादित करते हुए उसे चार विद्याओं में अग्रणी मानते हुए लिखा है -

**'आन्वीक्षकी त्रयीवार्ता दण्डनीतिश्चेति विद्या।'[2]**

इसमें दण्ड को चार विद्याओं में प्रधान माना है क्योंकि दण्ड के द्वारा ही राजा इन अन्य तीन विद्याओं का पालन करवा सकता है। तत्कालीन समाज में राजतान्त्रिक व्यवस्था को ध्यान में रखते हुए दण्ड व्यवस्था का विधान किया है। किस प्रकार राजा को दण्ड की सृष्टि करनी चाहिए? किस प्रकार

उसका उपयोग? एक न्यायोचित दण्ड का क्या महत्त्व है? कौन-सा राजा दण्ड देने का अधिकारी है? और न्यायानुसार दण्ड न देने से हानियाँ इत्यादि विषयों पर विचार किया गया है। मनुस्मृतिकार आचार्य मनु लिखते हैं राजा अथवा प्रजापालक के लिए दण्ड व्यवस्था का निर्माण सृष्टिकार ने सृष्टि के आरम्भ में ही किया था। ताकि सब प्राणी सुरक्षित रहते हुए धर्म का पालन करें, और सभी स्थावरजंगम प्राणी भोगों को भोगने के लिए समर्थ हो सकें। अपराध के अनुसार ही यथायोग्य दण्ड का प्रयोग हो[३]।

राजा दण्ड के द्वारा ही चार वर्णों और चार आश्रमों में प्रजा को धर्मानुसार प्रवृत्त करवाता है। दण्ड ही सोये हुए व्यक्ति को जगाता है, दण्ड से ही मनुष्य चोर आदि पाप कार्यों से भय अनुभव करता है, इसलिए विद्वान् लोग कहते हैं –

**'दण्डं धर्मं विदुर्बुधाः।[४]'**

अर्थात् दण्ड ही साक्षात् धर्म ही है क्योंकि उसके भय से ही लोग सत्कार्यों में प्रवृत्त होते हैं। परन्तु दण्ड न्यायानुसार होना चाहिए। क्योंकि ऐसा दण्ड ही प्रजा को आनन्दित, आत्मसन्तुष्टि और सुरक्षा की भावना पैदा करता है। जो दण्ड बिना विचारे और पक्षपात पूर्ण होता है, वह राज्य और राजा का विनाश कर देता है[५]। अतः आलस्य छोडकर सावधानी पूर्वक दण्ड का विधान करना चाहिए। अन्यथा शक्तिशाली लोग उसी तरह दुर्बल लोगों को मृत्यु के घाट उतार देंगे। जिस प्रकार लोहे की सींक से मच्छलियों को भूनते हैं –

**'शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तरा'।[६]**

इसलिए समुचित दण्ड व्यवस्था परमावश्यक है। दण्ड के वशीभूत होकर ही प्रजा अपने कर्त्तव्यों का पालन करती है –

**सर्वो दण्डजितो लोके दुर्लभो हि शुचिर्नरः।**
**दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते॥[७]**

अतः वही राजा दण्ड देने का अधिकारी है जो सत्यवादी, बुद्धिमान्, धर्म, अर्थ और काम की सिद्धि करने में समर्थ हो या इन गुणों को धारण किए हुए हो[८]।

**दण्ड विधान की मुख्य विधिः-**

आचार्य मनु लिखते हैं यदि समान अपराध भिन्न-भिन्न वर्ण वाले करते हैं तो उनका दण्ड भी भिन्न होना चाहिए इसके पीछे वह तर्क देते हैं कि ब्राह्मण सम्पूर्ण शास्त्र निष्णात होता है यदि वह चोरादि पापकर्म करता है तो उसे चौंसठ गुणा दण्ड देना चाहिए परस्पर क्षत्रिय, वैश्य और शूद्र से[९], ब्राह्मण के समान पापकर्म करने वाले अन्य वर्णों को(क्षत्रिय-बत्तीस गुना, वैश्य-सोलह गुना तथा शूद्र को आठ गुणा) कम दण्ड का विधान करना चाहिए।

**अष्टापाद्यं तु शूद्रस्य एतेय भवति किल्विषम्।**
**षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य॥[१०]**

यह विधान इसलिए किया गया क्योंकि यह वर्ण उत्तरोत्तर कम विद्वान् होते हैं और शूद्र तो उसे कहते हैं जिसने किसी भी शास्त्र का अध्ययन नहीं किया है।

इसी प्रकार यदि साधारण प्रजा को दण्ड का विधान करने वाला राजा भी वही अपराध करता है तो उसे जहाँ साधारण प्रजा से एक पैसा दण्ड लिया जाता है तो राजा से १०००(एक हजार) पैसा लेना चाहिए।

इस प्रकार दण्ड का विधान स्मृतिशास्त्रों में अनेक रूपों में किया गया है। '**दण्डः शास्ति प्रजा सर्वम्**' सूक्ति के अनुसार सभी समस्याओं का समाधान केवल मात्र दण्ड व्यवस्था ही है।

**सन्दर्भाः** -


१. मनुस्मृति ६.९२

२. प्र.अ.द्रि.आ-१

३. मनुस्मृति ८.१४-१५-१६

४. वहीं ८.१८

५. वहीं ८.१९

६. वहीं ८.२०

७. वहीं ८.२१

८. वहीं ८.२६

९. वहीं ८.३३८ ब्रह्मणस्य चतुःषष्टिः पूर्णं वाऽपि शतं भवेत्।

१०. वहीं ८.३३७ द्विगुणां वा चतुःषष्टिस्तद्दोषगुणविद्धि सः॥



*संस्कृतविभागाध्यक्षा:,*

*विद्याभवन रूरल इंस्टिट्यूट, उदयपुर*

# शाकटायनव्याकरणं तट्टीकाग्रन्थाश्च

**विद्या**

पाल्यकीर्ति-शाकटायनेन विरचितस्य शाकटायनव्याकरणस्य परीक्षणेन स्पष्टो भवति यदिदं पाणिनेः प्राक्तनं भवितुं नार्हतीति। व्याकरणेऽस्मिन्सर्वत्र पाणिनीयव्याकरणस्यानुकरणमस्ति। न केवलं सूत्रकारस्य अपितु वार्तिककारस्य भाष्यकारस्यापि च सिद्धान्ताननुवदन्ति तदीयानि सूत्राणि। पाणिनीयव्याकरणमिवात्र शाकटायनव्याकरणेऽपि अ, इ, उ, ण् सूत्राणि उपजीव्यत्वेनश्रुतानि। तदाधारेण प्रत्याहारप्रक्रिया च सूत्रेषु निबद्धाः, तत्र केवलं पाणिनीयोक्तानि चतुर्दशमाहेश्वरसूत्राणि त्रयोदशत्वं प्राप्नुवन्ति। उभयोः व्याकरणयोः भेदं प्रख्यापयितुं किञ्चिद् व्यत्यासश्च कृतः। तत्र व्याकरणानुपदं चित्रयिष्यामः।

शाकटायनव्याकरणस्य प्रमुखाधारः पाणिनेः अष्टाध्यायी वर्तते। यस्याः न्यूनतानां निराकरणाय तेन स्वपूर्ववर्तीनां चान्द्र-कातन्त्र-शाकटायनव्याकरणानां साहाय्येन प्रयासः विहितः। पाल्यकीर्तिशाकटायनोऽयं पूर्ववर्तीवैयाकरणानां दोषान् स्वकीयव्याकरणे स्थानं न प्राददत्। उदाहरणार्थं तेन देवनन्दीद्वारा प्रयुक्तानां एकाक्षरीसंज्ञानां स्थाने अधिकांशतः पाणिनेः अष्टाध्याय्याः संज्ञाः गृहीताः।

शाकटायनव्याकरणोऽयमत्यन्तमुपादेयः मूर्धाभिषिक्तश्च ग्रन्थोऽस्ति। अनेन पाणिनीयतन्त्रमपि प्रभावितम्। यतोहि व्याकरणमिदमनुसृत्य अनेकानां प्रक्रियाग्रन्थानां रचनाऽभवत्। शाकटायनस्य ग्रन्थोऽयं सम्पूर्णव्याकरण-वाङ्मये प्रक्रियानुसारीप्रविधेः बीजवपनकारकः ग्रन्थः वर्तते। यथोक्तमपि पण्डितयुधिष्ठिरमीमांसकेन यत् व्याकरणेऽस्मिन् पाल्यकीर्तिः प्रक्रियानुसारिरचनायाः बीजवपनम् अकरोत्। कालान्तरे इदं परिवृद्धिमवाप्य पाणिनीयव्याकरणस्योपरि तादृशं प्रबलाघातं कृतं यत् तेन समस्तपाणिनीयव्याकरणग्रन्थकर्तृक्रमस्य उपेक्षया तत् प्रक्रियानुसारी अभवत्, अपि च अनेन कारणेन पाणिनीयव्याकरणमत्यन्तं कठिनं जातम्। एतस्मात् पूर्वं व्याकरणग्रन्थेषु सूत्राणां प्रक्रियानुसारं व्यवस्थापनं न क्रियते स्म।

स्वकीयपूर्ववर्तिनाम् अनेकव्याकरणानाम् उपयोगिवचनानां सूत्रपाठे संग्रहणं शाकटायनस्य मुख्यं वैशिष्ट्यं वर्तते। पाणिनीयव्याकरणस्य वार्तिकानामतिरिक्तं शाकटायनेन महाभाष्यस्य समस्त-इष्टयः तथा तस्य अन्यानि, प्रायशः पञ्चत्रिंशत् (३५) वचनानि सूत्ररूपे समाहितानि। पाल्यकीर्तिशाकटायनः काशिकाकारस्य

वामनजयादित्यस्य उत्तरवर्ती अस्ति। काशिकायाः रचना पाणिनीयव्याकरणपरम्परायाम् अत्यन्तं महत्त्वपूर्णा घटना वर्तते। यतः काशिकाकारेण स्वकीयसमयस्य तादृशविचाराः अपि ग्रन्थे सङ्कलिताः, ये हि त्रिमुनिरचनासु नैवोपलभ्यन्ते। तादृशविचाराणां महत्त्वमवगम्य पाल्यकीर्तिना काशिकावृत्तेरपि प्रायशः चत्वारिंशत् (४०) वचनानि सूत्ररूपेण स्वकीयव्याकरणे उपन्यस्तानि कृतानि।

**शाकटायनव्याकरणस्य प्रतिपाद्यविषयस्य विवेचनम् -**

'शाकटायनव्याकरणम्' इत्याख्येन प्रसिद्धं 'शब्दानुशासनम्' इति पाल्यकीर्ति-शाकटायनेन विरचितः महत्त्वपूर्णः ग्रन्थः वर्तते। ग्रन्थोऽयं सर्वेष्वपि पाणिनीयेतरव्याकरणग्रन्थेषु महत्त्वपूर्णं स्थानं बिभर्ति। शब्दानुशासनाख्ये व्याकरणेऽस्मिन् (शाकटायनव्याकरणे) चत्वारः अध्यायाः सन्ति, तथा च प्रत्येकम् अध्यायः चतुर्षु पादेषु विभक्तोऽस्ति, तेन आहत्य षोडशपादाः भवन्ति। व्याकरणेऽस्मिन् प्रकरणविभागः न विद्यते। पाणिनीयव्याकरणमिवास्मिन्नपि विधानक्रमस्यानुसरणेन सूत्ररचना कृता वर्तते। ग्रन्थेऽस्मिन् यद्यपि शाकटायनेन प्रक्रियाक्रमस्य रचनायाः प्रयत्नः कृतः, परन्तु कारणेनानेनास्मिन् क्लिष्टता विप्रकीर्णता च समागता।

शाकटायनव्याकरणस्यास्य प्रत्याहाराः पाणिनेः प्रत्याहाराणां सदृशाः सन्नपि किञ्चिद् वैभिन्न्यं धारयन्ति। यथा - पाणिनेः 'ऋलृक्' इत्यस्य स्थाने शाकटायनव्याकरणे 'ऋक्' पाठः विद्यते। यतः 'ऋ' तथा 'लृ' अनयोर्मध्ये भेदः न स्वीकृतः। 'हयवरट्' तथा 'लण्' इत्यनयोः मेलनेन 'वेट्' इत्यमुं निष्काष्यात्र एकं सूत्रं निर्मितम्, तथा उपान्त्यसूत्रं 'शषसर्' इत्यस्मिन् विसर्ग-जिह्वामूलीय-उपध्मानीयानां समावेशोऽपि कृतम्। पाल्यकीर्तिशाकटायनाचार्येण सूत्राणां रचनाऽपि भिन्नरीत्या कृता। ग्रन्थेऽस्मिन् कातन्त्रव्याकरणस्य प्रचुरः प्रभावो दृश्यते। यक्षवर्मणा 'चिन्तामणि'टीकायां शाकटायन-व्याकरणस्यास्य वैशिष्ट्यं वर्णयन् उक्तम् -

**'इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक्।**
**संख्यानं नोपसंख्यानं यस्य शब्दानुशासने॥**
**इन्द्रचन्द्रादिभिः शाब्दैर्युक्तं शब्दलक्षणम्।**
**तदिहास्ति समस्तं च यन्नेहास्ति न तत् क्वचित्॥'**

अर्थात् शाकटायनव्याकरणे 'इष्टि'[१] पठनस्य आवश्यकता नास्ति, सूत्रेभ्यो भिन्नं वक्तव्यं किमपि नास्ति, उपसंख्यानामपि नापेक्ष्यते, इन्द्रचन्द्रादिवैयाकरणादिभिः यत् शब्दलक्षणमुक्तम्, तत्सर्वमपि व्याकरणेऽस्मिन् समाविशति, एतदतिरिच्य यत्किमप्यत्र नोपलभ्यते, तन्न कुत्रापि प्राप्येत।

वक्तव्येऽस्मिन् अतिशयोक्तिः वर्तते तथापि सत्यपि पाल्यकीर्तिना स्वकीये व्याकरणे पूर्ववर्ती-वैयाकरणानां न्यूनतानाम् अपाकरणस्य प्रयत्नः कृतः, अपि च लौकिकपदानाम् अन्वाख्यानं प्रदत्तम्। व्याकरणस्योदाहरणैः रचनाकालस्य ज्ञानं भवति। अस्मिन् व्याकरणग्रन्थे आर्यवज्र-इन्द्र-सिद्धनन्दिप्रभृतीनां पूर्ववर्ती-आचार्याणाम् उल्लेखः विद्यते। प्रथमनाम्ना प्रसिद्धः आर्यवज्रस्वामी अभिप्रेतः, अन्ये च यापनीयसंघस्य आचार्याः सन्ति।

**शाकटायनव्याकरणस्य टीकाः -**

शाकटायनव्याकरणम् अर्थात् पाल्यकीर्ति-शाकटायनाचार्यस्य 'शब्दानुशासनम्' इतिग्रन्थस्योपरि सप्त टीकाः उपलभ्यन्ते। अथात्र क्रमशः तासां संक्षिप्तं विवेचनं प्रस्तूयते -

**१. अमोघवृत्तिः (शाकटायनव्याकरणवृत्तिः)**

अमोघवृत्तेः लेखकः स्वयं शाकटायनः एवास्ति, अत इयं शब्दानुशासनस्य स्वोपज्ञटीका भवति। शाकटायनव्याकरणस्योपरि प्रायशः अष्टादशसहस्रश्लोकपरिमाणस्येयं रचना सर्वेष्वपि टीकाग्रन्थेषु प्राचीनतमा विस्तृता चास्ति। राष्ट्रकूटवंशस्य नृपम् अमोघवर्षमभिलक्ष्य टीकेयम् 'अमोघवृत्तिः' इत्याख्येन व्यवहृता, इत्येवं प्रतीयते। यतः शाकटायनः अमोघवर्षस्य समकालीन एव आसीत्। अस्याः रचनाकालः ख्रीष्टोः ८१४-८६७ मन्यते।

अमोघवृत्तिटीका शाकटायनेन एव लिखिता, इत्ययं विषयः डॉ. के.बी. पाठकेन सुष्ठुः प्रतिपादितः। पं. नाथूरामप्रेमी अपि स्वकीये 'जैन साहित्य और इतिहास' इत्यस्मिन् ग्रन्थे सम्बन्धेऽस्मिन् विस्तरेण वर्णनं करोति। शाकटायनव्याकरणस्यैव अपरस्यां 'चिन्तामणि'टीकायां यक्षवर्मा स्वकीयग्रन्थारम्भे एव अमोघवृत्तिटीकां शब्दानुशासनस्य कर्तुः शाकटायनस्यैव कृतिं मनुते। तद्यथा -

**स्वल्पग्रन्थं सुखोपायं सम्पूर्णं यदुपक्रमम्।**
**शब्दानुशासनं सार्वमहच्छासनवत्परम्॥**
**इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक्।**
**संख्यानं नोपसंख्यानं यस्य शब्दानुशासने॥**
**तस्यातिमहतीं वृत्तिं संहृत्येव लघीयसी।**
**सम्पूर्णलक्षणा वृत्तिर्वक्ष्यते यक्षवर्मणा॥**

(चिन्तामणिटीका, मङ्गलाचरणम्, ५-७)

'गणरत्नमहोदधि'ग्रन्थस्य कर्ता वर्धमानकविः[२] स्वकीयग्रन्थे यत्रकुत्रापि शाकटायनस्योद्धरणं प्रददाति,तत्सर्वमपि अमोघवृत्तेः उद्धरणमेव भवति, शब्दानुशासनस्य मूलसूत्रेषु तत्किमपि न प्राप्यते। अनेन प्रतीयते यत् वर्धमानकविरयम् 'अमोघवृत्तिटीका' शाकटायनस्यैव अस्तीति मन्यते स्म। अतएव तेन स्वकीयग्रन्थे प्रदत्तेषु अमोघवृत्तेः उद्धरणेषु शाकटायनस्य नामोल्लेखः कृतः। तद्यथा -

**शाकटायनस्तु कर्णे टिरिटिरिः कर्णे चुरुचुरुरित्याह।**[३]

तथैव अपरत्र -

**शाकटायनस्तु अद्य पंचमी अद्य द्वितीयेत्याह।**[४]

इत्थमुपर्युक्तविवेचनस्याधारेण स्पष्टो भवति यत् अमोघवृत्तिटीकेयं स्वयं शाकटायनेन एव लिखिता।

टीकायामस्यां ग्रन्थकारेण शब्दानुशासने प्रोक्तानां सूत्राणां विस्तारः अष्टादशसहस्रश्लोकेषु कृतोऽस्ति। यथोक्तं पं. नाथूरामप्रेमी द्वारा 'मि.राइस' इत्यस्य सन्दर्भवर्णनपुरस्सरम्-

''उस मुनि ने अपने बुद्धिरूप मन्दराचल से श्रुतरूप समुद्र का मन्थन कर यश के साथ व्याकरणरूप उत्तम अमृत निकाला। शाकटायन ने उत्कृष्ट शब्दानुशासन को बना लेने के बाद अमोघवृत्ति नाम की टीका(जिसे बडी शाकटायन कहते हैं) बनाई जिसका कि परिमाण १८००० श्लोक है। जगत्प्रसिद्ध शाकटायन मुनि ने व्याकरण के सूत्र और साथ ही पूरी वृत्ति भी बनाकर एक प्रकार का पुण्य सम्पादन किया। एक बार अविद्धकर्ण सिद्धान्तचक्रवर्ती पद्मनन्दि ने मुनियों के मध्य पूजित शाकटायन को मन्दिर के पर्वत के समान धीर विशेषण से विभूषित किया।''[५]

**२. शाकटायनन्यासः -**

शाकटायनाचार्यस्य अमोघवृत्तिटीकां स्वीकृत्य प्रभाचन्द्राचार्येण कृतः एषः न्यासः वर्तते। यथोक्तं तेनैव स्वकीयटीकाग्रन्थस्य मङ्गलक्रमे -

**शब्दानां शासनाख्यस्य शास्त्रस्यान्वर्थनामतः।**
**प्रसिद्धस्य महामोघवृत्तेरपि विशेषतः।**
**सूत्राणां च विवृत्तिर्विख्याते च यथामतिः।**
**ग्रन्थस्यास्य च न्यासेति क्रियते नामनामतः॥**

ग्रन्थस्यास्य अध्यायद्वयमात्रम् एव उपलभ्यते। यद्यपि ग्रन्थोऽयमधुना पूर्णरूपेणोपलब्धो नास्ति, तथापि एतत् सुस्पष्टमेव यत् अस्य कर्ता प्रभाचन्द्रः एवासीत्। प्रभाचन्द्राचार्योऽयं 'न्यायमुकुन्दचन्द्रः' इत्यादिग्रन्थानां कर्ता प्रभाचन्द्रात् भिन्नः एव कश्चिदपरः प्रभाचन्द्रः आसीदिति पं. महेन्द्रकुमारन्यायाचार्यः मनुते। शाकटायनन्यासकारोऽयं कदाचिद् 'यापनीय' संघस्यैव कश्चिद् आचार्यः स्यात्।

शाकटायनन्यासस्य लेखकोऽयं 'सोदत्ति' इत्यस्य ख्री. ९८० तमाब्दस्य अभिलेखे वर्णितः यापनीयसंघस्य कण्डूरगणस्य चैव प्रभाचन्द्रः आसीत्। अभिलेखेऽस्मिन् यापनीयकण्डूरगणस्य स्पष्टः उल्लेखः विद्यते[६]। शाकटायनन्यासकारस्य प्रभाचन्द्रस्यास्य एकः अपरः तत्त्वार्थसूत्रनामाख्यः ग्रन्थोऽपि वर्तते। यस्मिन् तस्य 'बृहत्प्रभाचन्द्रः'[७] इति नामोल्लेखनमस्ति, यतः एषः न्यायमुकुन्दचन्द्रस्य कर्ता प्रभाचन्द्रात्[८] पूर्ववर्ती ज्येष्ठश्च आसीत्।

**३. चिन्तामणिटीका -**

पाल्यकीर्ति-शाकटायनाचार्यस्य स्वोपज्ञटीकायाः अमोघवृत्तेः लघीयसीवृत्तिरियं तस्यैव संक्षिप्तप्रस्तुतिः वर्तते। चिन्तामणिवृत्तेः कर्ता यक्षवर्मा नामधेयं कश्चित् विद्वान् अस्ति। सः कदाचित् एकः गृहस्थविद्वान् स्यात्। तस्य विषये नास्त्यधिका सूचना।

**४. मणिप्रकाशिका –**

'मणि' अर्थात् चिन्तामणिटीकां प्रकाश्यमाणा टीका 'मणिप्रकाशिका' नामधेया। अस्याः टीकायाः कर्ता अजितसेनाचार्यः आसीत्।

**५. प्रक्रिया-सङ्ग्रहः –**

पाणिनीयव्याकरणस्य सिद्धान्तकौमुदीग्रन्थस्य सदृशोऽयं प्रक्रियात्मकः टीकाग्रन्थोऽस्ति। शाकटायनव्याकरणस्यास्य प्रक्रियासङ्ग्रहनामकस्य टीकाग्रन्थस्य लेखकः अभयचन्द्राचार्य आसीत्। सम्प्रति टीकाग्रन्थोऽयं प्रकाशितोऽस्ति। अभद्राचार्येण अस्य ग्रन्थस्य रचना शकसंवत्सरस्य १२८१ तमेऽब्दे (ख्री. १३५९वर्षे) कृता।

**६. शाकटायनटीका –**

शाकटायनव्याकरणं स्वीकृत्य लिखितस्यास्य शाकटायनटीकाग्रन्थस्य कर्ता भावसेन-त्रैविद्यदेवः अस्ति। कदाचिद् एष एव कातन्त्रव्याकरणस्य 'रूपमाला' कर्तुरपि आसीत्। एतस्य 'वादिपर्वतवज्रः' इति नामान्तरम् आसीत्। भावसेनत्रैविद्यदेवस्यास्य एकः 'विश्वतत्त्वप्रकाशः' इत्याख्यः ग्रन्थोऽपि समुपलभ्यते।

**७. रूपसिद्धिटीका –**

रूपसिद्धिमवलम्ब्य पाणिनीयव्याकरणस्य 'लघुसिद्धान्तकौमुदी'इव लिखितेयं लघीयसी टीका वर्तते। टीकाग्रन्थस्यास्य कर्ता दयापालमुनिः अस्ति। यथोल्लिखितम् –

**हितैषिणां यस्य नृणामुदात्तवाचा निबद्धा हित-रूपसिद्धिः।**
**वन्द्यो दयापालमुनिः स वाचा सिद्धस्सताम्मूर्द्धनि यः प्रभावैः॥**[१]

दयापालमुनिरयं द्रविडसंघस्य अनुयायी आसीत्। एतस्य गुरोर्नाम 'मतिसागरः' आसीत्। दयापालमुनिः 'पार्श्वनाथ-चरितः' तथा 'न्याय-विनिश्चयः' इत्यादिग्रन्थानां कर्तुः 'वादिराजसूरिः' इत्यस्य सधर्मा आसीत्, येन एतौ द्वावपि समकालिकौ भवतः। वादिराजसूरिणा शकसम्वत्सरस्य ९४७ तमे वर्षे (वि.सं. १०२५) पार्श्वनाथचरिताख्यस्य ग्रन्थस्य रचना कृता। अत एष कालः एव दयापालमुनेः कालः ज्ञातव्यः। रूपसिद्धिटीकेयं प्रकाशिता अस्ति।

इत्थं ससटीकासमन्वितं शाकटायनव्याकरणस्य शब्दानुशासनं न केवलमस्मान् शब्दसाधुत्वं बोधयति अपि तु व्याकरणशास्त्रेतिहासबोधदृशा अपि इदमनन्यसाधारणमुपकारकत्वं भजते। इति शम्।

**सन्दर्भाः –**


१. सूत्रवार्तिकाभ्यां भिन्नं यत् सिद्धं भवितुं न शक्नोति, तत् भाष्यकारस्य प्रयोगैः सिद्धः भवति चेत् सा इष्टिः कथ्यते।

२. वि.सं. ११९७

३. गणरत्नम्, पृ. ८२, अमोघवृत्तिः २.१.५७

४. गणरत्नम्, पृ. ९०, अमोघवृत्तिः २.१.७९

५. जैन साहित्य और इतिहास, पं. नाथूराम प्रेमी, हिन्दी ग्रन्थ रत्नाकर, गिरगांव,बम्बई – १९४२, पृ. १५९

६. जैन शिलालेख संग्रह, भाग – २, लेख क्रमांक – १६०

७. ख्री.९८० तमेऽब्दे।

८. ख्री.१०२० तमेऽब्दे।

९. चतुष्पञ्चाशत्तमः(५४) शिलालेखः, श्रवणबेलगोला

**अन्यसहायकग्रन्थाः –**


१. शाकटायनव्याकरणम्

२. शाकटायनव्याकरणम्, अमोघवृत्तिसहितम्

३. शाकटायनव्याकरणम्, प्रक्रियासंङ्ग्रहसहितम्

४. संस्कृत साहित्य का इतिहास, युधिष्ठिर मीमांसक

५. जैन शिलालेख संग्रह, भाग–२

६. जैन साहित्य और इतिहास, पं.नाथूराम प्रेमी, हिन्दी ग्रन्थ रत्नाकर, गिरगांव, बम्बई – १९४२



*शोधच्छात्रा*

*व्याकरणविभागस्य,*

*जयपुरस्थराष्ट्रियसंस्कृतसंस्थानस्य*

# अलंङ्कारशास्त्रसिद्धान्तस्य परिष्कारे शास्त्रान्तरस्यावदानम्

**अनमोल शर्मा**

सृष्टेः प्रारम्भत एव आत्मतत्त्वान्वेषणे रणरणकत्वरिताः सभ्याः स्थूलतायाः सूक्ष्मतां प्रतियान्तीति मानवीयशेमुष्याः स्वभाव एव एतादृशः तन्नात्र महदाश्चर्यं यदलङ्कारशास्त्रेऽपि परिपाटीयं परिपलिता।

तत्र किं काव्यमिति जिज्ञासां सत्यां भामह आह –शब्दार्थौ सहितौ काव्यम्[1]इति, तत्र भामहस्योद्घष्टह्द्घ्यद्ध्यड्ड निशम्य सहृदयचक्रवर्तिना ध्वनिसिद्धान्तप्रतिष्ठापकेन 'आनन्दवर्धनाचार्येण' चिन्तितं यत् यदि शब्दार्थशरीरं काव्यमिति यदुक्तं तर्हि 'तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव'। स च ध्वनिरेव तदुक्तं 'काव्यस्यात्मा ध्वनिरिति[2]'। यद्यत्र सूक्ष्मदृष्ट्या पश्यामस्तर्हि ज्ञायते यत् ध्वनिप्रस्थानात् प्राक्कालीनां वामनप्रभृतीनामाचार्याणां 'काव्यं ग्राह्यमलङ्कारात्[3]','रीतिरात्मा काव्यस्य[4]' इत्येवं रूपाः सिद्धान्ताश्च बभूवुः तेषां निरसने ध्वनिकारेण वैय्याकरणानां स्फोटसिद्धान्तपर्यालोचितस्तया व्यञ्जकत्वसादृश्यानुसारेण काव्येऽपि ध्वनिशब्दस्य प्रयोगः कृतः, किञ्च काव्यात्मतया तस्य (ध्वनेः) स्वीकार कृतः।

तत्र वैय्याकरणाः प्रधानभूतस्फोटस्य व्यञ्जकेषु वर्णेषु ध्वनिरिति व्यवहरन्ति तन्मतानुसारिणः साहित्यिकाश्च अपि प्रधानव्यङ्ग्यव्यञ्जकत्वरूपात् सादृश्यात् शब्दार्थयोः तयोर्व्यञ्जनव्यापारे, व्यङ्ग्यार्थे, काव्ये च ध्वनिरिति व्यवहरन्ति। तदुक्तं –

**'प्रथमे हि विद्वान्सो वैय्याकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्'।**

ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः 'काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः[5]'

तृतीयोद्योते पुनः व्यञ्जनायाः स्थापने वक्ति यत् –

परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्य प्रवृत्तोऽयं ध्वनिव्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते[6]। इति

इत्थमलङ्कारशास्त्रसिद्धान्तस्य परिष्कारे व्याकरणस्य नितरामुपयोगिता।

व्यञ्जनायाः स्थापने ध्वनिकृल्लोचनकाराभ्यां सांख्यदर्शनस्य 'सत्कार्यवादः' स्वीकृतः। तद्यथा 'प्रतीयमानार्थो लावण्यमिव भवति[7]' इति ध्वनिकृतोक्तां कारिकां विवेचयन् लोचनकृतोक्तं–

'यदेवंविधमस्ति तद्भाति, न ह्यत्यन्तासतो भानमुपपन्नम्, रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति भानात्सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति[८]'।

महाकवीनां वाणीषु प्रतीयमानाथोऽमस्ति तस्य भानं सहृदयेषु भवति तथा 'असतो भानं न' इति सांख्या अपि –'असदकरणात्.[९]' इत्यादि रूपेण वदन्ति।

शैवदर्शनस्यापि दर्शनं बहुत्र 'अलङ्कारशास्त्रे' भवति। यथा लोचनकारस्य मङ्गलाचरणे –

**अपूर्वं यद्वस्तु प्रथयति विना कारणकतां**
**जगद्भाव-प्रख्यं निजरसभरात्सारयति च।**
**क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्**
**सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते[१०]॥**

अत्र शैवदर्शनस्य प्रमेयानां दर्शनं भवति, तद्यथा शैवदर्शने परमशिवस्य रूपद्वयं, प्रथमं 'विश्वोत्तीर्णरूपम्' द्वितीयं 'विश्वमयरूपम्'। तत्र विश्वोत्तीर्णरूपे केवलं परमशिवस्य प्रकाशमयरूपं भवति, यद्यपि मयूराण्डरसन्यायेन विश्वमिदं तत्र लीनं परं न तस्य लेशतोऽपि भानम्। अस्मिन् रूपे केवलं 'अहम्' इत्यस्य भानम्।

द्वितीयं विश्वमयरूपमस्ति, तत्र विश्वोत्तीर्णरूपे परमशिवे पञ्चशक्तीनां सामरस्यं भवति, अत्र पुनः तासां परमशिवे समरसतां प्राप्तानां शक्तीनां भङ्गो जायते तथा सर्वाभ्यः शक्तिभ्यः पृथक्-पृथक् तत्त्वानामाविर्भावः। यथा चितिशक्तेः शिवः, ज्ञानशक्तेः शक्तिः, इच्छाशक्तेः सदाशिवः, क्रियाशक्तेः ईश्वरः, शुद्धविद्या च। तेभ्यः चराचरम्।

इत्थं परमशिवः कारणान्तरानपेक्षः सन् सर्वं रचयति तथैव सरस्वत्यास्तत्त्वं काव्यमपि। तदुक्तं –

**जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि।**
**स्वयमेव समालोक्य प्रीणाति परमेश्वरः[११]॥**

ध्वनिकृतस्य कारिकायामपि तदेव रहस्यमत्र –

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते[१२]॥**

तथैव मम्मटाचार्यस्य 'परामृशति [१३]' तथा 'नियति[१४]' पदाभ्यां शैवदर्शनमुन्मीलति, तद्यथा शैवदर्शने मायाया पञ्चकञ्चुकाः कला-विद्या-राग-काल-नियतिरूपाः। तेषु नियति जीवस्य यत् मौलिकं पारमार्थिकं वा स्वातन्त्र्यमस्ति तद् हरति, तद्वशात् नियतकारणेभ्यो नियतकार्योत्पत्त्यादयः। तथा प्रथमोद्योतसमाप्तौ लोचने-

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्[१५]॥**

अत्रापि प्रतिभाख्या शिवाख्या पराशक्तिः लोचनकृता वन्दिता। प्रत्यभिज्ञादर्शनस्य योगो ध्वन्यालोके दृश्यतेऽत्र –

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः[१६]॥**

अत्र लोचनकारो वक्ति यत् –

प्रत्यभिज्ञशब्देनेदमाह – काव्यं तु जातु जायेत कस्यचित्प्रतिभावतः।

इति नयेन यद्यपि स्वयमस्यैतत्परिस्फुरति, तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखी भवति। यथोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलपादैः –

**तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके,**
**कान्तो लोकसमान एवमपरिजातो न रन्तु यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो,**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥**

तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं, न तु तदेवेदमित्येतावन्मात्रम्[१७]। इति।

अद्वैतदर्शनस्य दर्शनं रसादीनां निरूपणे वर्तते, यथा –

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**
**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः[१८]॥**

इत्यादौ सर्वत्र प्रायशः सर्वैराचार्यैः वेदान्तदर्शनानुमतं रससस्वरूपं स्वीकृतम्। इत्थमलङ्कारशास्त्रसिद्धान्तस्य परिष्कारे शास्त्रान्तराणामवदानं नितरामस्ति।

**सन्दर्भाः –**

१. काव्यालङ्कारे
२. काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये। केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥
३. काव्यालङ्कारसूत्रे १.१.१
४. तत्रैव
५. 'सूरिभिः कथितः' इत्यस्य व्याख्याने ध्वन्यालोके प्रथमोद्योते का.१३
६. तृतीयोद्योते का.३३ व्याख्याने

७.	प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ प्रथमोद्योते का.४

८.	तत्रैव व्याख्याने लोचने

९.	सांख्यकारिका का.९

१०.	लोचने मङ्गलाचरणम्

११.	चिद्वल्ली (शैवदर्शन)

१२.	ध्वन्यालोके तृतीयोद्योते का. ३९ व्याख्याने संग्रहश्लोकः

१३.	ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् 'परामृशति' इत्यत्र

१४.	मङ्गलाचरणे नियतिकृतनियमरहिताम्....का.प्रकाशः।

१५.	प्रथमोद्योतसमाप्तौ लोचने

१६.	प्रथमोद्योतः का.८

१७.	तत्रैव व्याख्याने लोचने

१८.	साहित्यदर्पणः परिच्छेदः ३, का.२,३

*सहायकाचार्यः (सं.),*
*श्रीलालबहादुरराष्ट्रियसंस्कृतविद्यापीठम्,*
*नवदेहली*

**स एव रसिको लोके श्रुत्वा काव्यं परैः कृतम्।**
**उत्पद्यते च युगपद्वदनेऽक्ष्णोश्च यस्य वाः।।**

**श्रुते महाकवेः काव्ये नयने वदने च वाः।**
**युगपद्यस्य नोदेति स वृषो महिषोऽथवा।।**

# शृङ्गारप्रकाशनिरूपित-रसस्वरूपस्य समीक्षणम्

हार्दिकराज्यगुरुः

'रसो वै सः[१]' इत्युपनिषद् वाक्यं नृत्यति सदैव साहित्यविद्या-समुपासकानां सहृदयानां जिह्वाग्रे। अस्मदीयशास्त्रपरम्परायां प्रत्येकं शास्त्रस्य स्वीयैका नूतना तथा चेतरभिन्ना शास्त्रपद्धतिः विकसिता वर्तते। प्रत्येकस्मिन्नपि शास्त्रे स्वीयमेकं नूतनं तथा च मौलिकं तत्वं परमतत्त्वत्वेन स्वीकृतमस्ति। यथा व्याकरणे स्फोटः, वेदान्ते सच्चिदानन्दस्वरूपं ब्रह्म, न्याये ईश्वरः, सांख्ये पुरुषः। अनेन प्रकारेण काव्यशास्त्रे साहित्यशास्त्रे वा 'रसः' परमतत्त्वपदवीमलङ्करोति। धाराधिपतिभोजनिर्मितशृङ्गारप्रकाशे रसः कयाचिन्नूतनयैव दृष्ट्या विवेचितोऽस्ति।

शृङ्गारप्रकाशस्यैकादशप्रकाशस्यादावेव भोजेन स्वाभिमतं रसविवेचनं प्रत्यपादि। अनुभरतं परवर्तिभिः विभिन्नैः आलङ्कारिकैः लोल्लटप्रभृतिभिरारब्धं रससूत्रव्याख्यानमभिनवगुप्तेन सुसमृद्धं गतम्। कश्मीरेषु तदा ध्वनिसिद्धान्तोऽपि प्रसिद्धिं गतः आसीत्। पुनश्च भोजसमय अभिनवगुप्तस्य शास्त्रीयप्रतिष्ठा चरमोत्कर्षगतासीत्। उद्भट-लोल्लट-शङ्कुक-भट्टनायक प्रमुखैः रससूत्रं व्याख्यातमप्यासीत्। भोजस्य पूर्वपुरुषो धनञ्जयो रसविषये भट्टनायकस्य भावना-भोग-सिद्धान्तं सविस्तरं व्याख्याति। तथापि एतेषां विषये भोजो जोषमवलम्बते। सः केवलं प्राचीनाचार्यान् आदर्शरूपेण गृह्णाति। भरत-दण्डि-रुद्रटानां मतं निरूपयति, परन्तु आनन्दवर्धनस्य व्यञ्जनाव्यापारं न स्पृशति। भोजः आनन्दवर्धनस्य ध्वनिं, ध्वनिप्रभेदम्, उदाहरणश्लोकान्, अलङ्कारौचित्यकारिकां, गुणविषयकारिकां च पुनः स्थापयति, परन्तु तस्य रससिद्धान्तः आनन्दवर्धनेन न प्रभावितः। न वा कुत्रापि आनन्दवर्धनो भोजेन समालोचितः। भोजदेवः प्रायः प्राचीनाचार्याणां शैल्या स्वमतं प्रतिष्ठापयति, पुनः स्वयमेव दृढतया तं नानुसरति।

आलङ्कारिकेषु तत्र भवान् शृङ्गारप्रकाशाभिधानस्य महतो ग्रन्थस्य प्रणेता धारामहीमण्डलमण्डनो महाराजो भोजो रसस्वरूपविषये किमप्यपूर्वमेव प्रतिपादयामास। सरस्वतीकण्ठाभरणे प्रतिपादितचरं तस्य रससिद्धान्तं नानाविधोदाहरणैः शृङ्गारप्रकाशे पुष्कलीकरोति भोजदेवः। साहित्यस्य व्याकरणकोटिं निरूपयन् चतुःप्रस्थसाहित्यकोटिं रसविषयं विवेचयति यत्र रसो मुख्यस्थानमावहति। शृङ्गारप्रकाशस्य एकादशप्रकाशस्य प्रारम्भे एव प्रतिपादयति -

निर्दोषस्य गुणवतोऽलङ्कृतस्य च काव्यशरीरस्य कामिनीशरीरस्येव शोभातिशयनिष्पत्तौ रसावियोग एव प्रकृष्ट उपायो गीयते[2]।

भोजेन द्वादशविधं साहित्यं प्रतिपादितम्। तेष्वन्तिमं रसावियोगाख्यं साहित्यम्। रसस्यावियोग एव रसावियोगः। अत्र काव्यशरीरस्य शोभातिशयनिष्पत्तौ रसो मुख्यहेतुत्वेन प्रतिपादितः। वस्तुतः गुणालङ्कारेभ्योऽधिको मतो रसो भोजेन। तदुक्तमपि –

**कल्याः मूर्तिः कुलममलिनं यौवनं रूपसम्पत्,**
**सौभाग्यर्द्धिः प्रियवचनताशीलवैदग्ध्ययोगः।**
**शालीनत्वं विनयपरतेत्यङ्गनाभूषणं यत्,**
**तत्प्रेमार्द्रं प्रणयिनि मनो नास्ति चेन्नास्ति किञ्चित्॥**[3]

न गुणो न वालङ्कारः तस्याः आन्तरिकसौन्दर्यं वर्धयति अपि तु तस्याः प्रेम एव। तथैव गुणालङ्कारेभ्यः प्रमुखस्थानं रसस्य भोजमतेन।

सम्प्रत्यत्र प्रश्नो भवति यद् भोजमते रसस्य का परिभाषा वा भोजमते रसत्वं नाम किम्? वस्तुतो भोजः शृङ्गाराद्वैतस्य प्रतिपादकोऽस्ति। तन्मते शृङ्गारशब्दाभिधेयोऽहङ्कारगुणविशेष एक एव रसः। भोजस्य विलक्षणं रसं शृङ्गारप्रकाशस्थाः इमाः उक्तयः सम्यक् स्फोरयन्ति –

**आत्मस्थितं गुणविशेषमहंकृतस्य शृङ्गारमाहुरिह जीवितमात्मयोनेः।**
**तस्यात्मशक्तिरसनीयतया रसत्वं युक्तस्य येन रसिकोऽयमिति प्रवादः॥**
**सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभवनिर्मितवासनोत्थः।**
**सर्वात्मसंपदुदयातिशयैकहेतुर्जागर्ति कोऽपि हृदि मानमयो विकारः॥**
**तात्पर्यमेव वचसि ध्वनिरेव काव्ये सौभाग्यमेव गुणसंपदिवल्लभस्य।**
**लावण्यमेव वपुषि स्वदतेऽङ्गनायाः शृङ्गार एव हृदि मानवतो जनस्य॥**
**शृङ्गारवीरकरुणाद्भुतरौद्रहास्य-बीभत्सवत्सलभयानकशान्तनाम्नः।**
**आम्नासिषुर्दश रसान्सुधियो वयं तु शृङ्गारमेव रसनाद्रसमामनामः॥**
**वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति।**
**लोके गतानुगतिकत्ववशादुपेतामेतां निवर्तयितुमेष परिश्रमो नः॥**
**अप्रतिकूलिकतया मनसो मुदादेर्यः संविदोऽनुभवहेतुरिहाभिमानः।**
**ज्ञेयो रसः स रसनीयतयात्मशक्तेः रत्यादिभूम्नि पुनर्वितथा रसोक्तिः॥**[4]

अत्रैतेभ्यः षट्पद्येभ्यः भोजस्य रसविषयिणी विशिष्टा विलक्षणा च धारणा प्रायेण स्पष्टा भवति। एभ्यः पद्येभ्यः यन्नवनीतभूतसारो लभ्यते , तद्यथा –

– आत्मनि स्थितम् आत्मयोनेः प्राणभूतमहङ्काराख्यं गुणविशेषं वयं शृङ्गारं ब्रूमः। स च

शृङ्गारशब्दाभिधेयोऽहङ्कारगुणः आत्मशक्तिरूपः। सा च आत्मशक्तिरास्वाद्यते रस्यते वा। तस्याश्च पुनरास्वाद्यत्वादहङ्कारस्य रसत्वं सिद्ध्यति। एतादृशेणाहङ्कारेण यो युक्तो भवति सैव रसिको कथ्यते।

– कथं चोत्पद्यतेऽयमहङ्कारः? कीदृशो वा सः? इति जिज्ञासायामुच्यते। उद्भूतसत्त्ववतां हृदि जन्मजन्मान्तरानुभूतसंस्कारोत्थः मानस्वरूपोऽयमहङ्कारविकारो जागर्ति। अयञ्चाहङ्कारः आत्मनः सर्वसंपदुत्पत्तेः हेतुभूतः।

– अयञ्चात्मशक्तिभूतः शृङ्गारशब्दाभिधेयोऽहङ्कारः अहङ्कृतस्य जनस्य हृदि आस्वाद्यते यथा वचसि तात्पर्यम्, काव्ये ध्वनिः, वल्लभस्य गुणसंपदि सौभाग्यम्, अङ्गनायाश्च वपुषि लावण्यमास्वाद्यते।

– स्वीयशृङ्गाराद्वैतं स्थापयन्नाह पुनः भोजो यत्सुधियो विद्वांसः दश रसान् स्वीकुर्वन्ति किन्तु वयं तु अहङ्काराख्यं शृङ्गारमेव रसं स्वीकुर्मः। कथं शृङ्गारमेव? इति जिज्ञासायामुच्यते रसनादिति। अर्थादहङ्काराख्यः शृङ्गार एवास्वाद्यः। एतादृशस्य शृङ्गारस्यैवास्वाद्यत्वात्तस्मिन्नेव रसपदव्यवहारः शक्यः नान्येषु इति भावः।

– शङ्कया भवितव्यं यत्किमर्थं प्राक्तनैराचार्यैः वीरादिषु रसव्यवहारः कृतः? तदोच्यते यथा लोकप्रसिद्ध्या वटे यक्षाभावेऽपि यक्षस्य व्यवहारो जनैः क्रियते तथैव वीराद्भुतादिषु गतानुगतिकत्ववशान्मिथ्या रसव्यवहारः क्रियते। किञ्च पुनरेतादृशं मिथ्या व्यवहारं निराकर्तुमेवायं (शृङ्गारप्रकाशाख्यः) अस्माकं प्रयासः।

– पुनरपि स्वमतं द्रढीकर्तुमुच्यते भोजेन यन्मनसः मुदादेर्ज्ञानस्य योऽनुभवस्तस्मिन् च पुनर्योहेतुः सैवाभिमानः। स च पुनरात्मशक्तिरूपः। तस्याश्चात्मशक्तेरास्वाद्यत्वात् सोऽभिमानः शृङ्गाराख्य एव रसपदवाच्यः। वीराद्भुतादिषु रसोक्तिस्तु मिथ्यैव।

अनेन प्रकारेणैभिः पद्यैः भोजानुगुणः रसपदार्थः कः? कथञ्च तत्र रसपदव्यवहारः इति प्रायेण स्पष्टं भवति। भोजस्तु शृङ्गाराख्यमहङ्कारमेव रसं स्वीकरोति। कथमिति चेत्तस्याहङ्कारस्यास्वाद्यत्वात्। आस्वाद्यश्च पुनरयमहङ्कार एव। अतः शृङ्गार एवैको रसो नान्ये।

अनेन विधिनाऽत्र भोजस्य शृङ्गारवर्णनात् प्रागेतदावश्यकं यत्तस्याहङ्कारस्य विषये विवेचनं स्यादिति। प्रसङ्गेऽस्मिन्खलु भोजस्याहङ्कार एव रससिद्धान्तस्य मूलाधारो वर्तते। वस्तुतो दण्डिना स्वग्रन्थे 'प्रेयस्', 'रसवत्' तथा 'ऊर्जस्वि' इत्येतेषां त्रयाणां भावप्रधानालङ्काराणां निदर्शनं कृतमासीत्। तद्यथा –

**प्रेयः प्रियतराख्यानं रसवद् रसपेशलम्।**<br>
**ऊर्जस्वि रूढाऽहङ्कार युक्तोत्कर्षं च तत्त्रयम्॥**[5]

अत्र 'प्रियन्तरं' अर्थात्प्रीतेर्वा भक्तेरुक्तिः प्रेयसालङ्कारो मतः। शृङ्गारवीराद्यष्टरसानामुक्तिः रसवदलङ्कारत्वेन स्वीकृतः तथा च रूढाहङ्कारो वा गर्वोक्तयः 'ऊर्जस्वि' अलङ्कारत्वेन स्वीकृताः। एते त्रयोऽप्यलङ्काराः युक्तोत्कर्षाः स्वीकृतास्सन्ति।

वस्तुतो भोजेनेयं कारिका स्वानुसारं व्याख्याता तथा चास्मादेव स्व-रससिद्धान्तस्य श्रीगणेशः कृतो वर्तते। भोजानुसारं दण्डिनः एते त्रयोऽप्यलङ्काराः एकस्यैव रसस्य तिस्रः अवस्थास्सन्ति। यद्यपि भोजेनात्र क्रमपरिवर्तनं कृतं वर्तते। भोजानुसारमन्तिमोल्लिखितो 'रूढाहङ्कारः, ऊर्जस्विरसस्य प्रथमा वा पूर्वावस्था विद्यते। यथा -

**अहो अहो नमो मह्यं यदहं वीक्षितोऽनया।**
**मुग्धया त्रस्तसारङ्गतरलायतनेत्रया॥**[६]

इत्यत्राहङ्कारस्य प्ररोहः। अत्र भोजो वदति यदूर्जस्वी वा रूढाहङ्कारत्वेनोक्तः सस्तु रसस्य वाहङ्कारस्य प्रारम्भिकं रूपं वावस्था वर्तते। एषोऽयमहङ्कारः प्रत्येकस्मिन्नप्यात्मनि पूर्वजन्मानुभवरूपेण संस्काररूपेण वा तिष्ठति। अहङ्कारोऽयं न गर्वस्य पर्यायः अपितु अहन्तापरपर्यायोऽयमहङ्कारः। अहङ्कारोऽयमात्मरतिरूपः। अयमहङ्कारो भोजेन प्रतिपिपादयिष्यमाणस्य रसस्य पूर्वावस्था वा पूर्वा कोटिः एतदनन्तरं दण्डिनो यो रसवदलङ्कारः सः भोजोक्ताहङ्कारस्य मध्यमावस्था वर्तते। अस्यामवस्थायां मूलभूताहङ्कारः बाह्यविभावादिसंयोगात् अभिमानरूपेण स्वीयं स्वरूपं व्यनक्ति। यथा- अत्रान्तरे किमपि वाग्विभवातिवृत्तवैचित्र्यमुल्लसित विभ्रममायताक्ष्याः।

**तद् भूरि सात्त्विकविकारमपास्तधैर्य-**
**माचार्यकं किमपि मान्मथमाविरासीत्॥**[७]

इत्यत्राहङ्कारस्य रत्यादिरूपेण प्रादुर्भावः। भोजानुसारं मनोऽनुकूलेषु दुःखादिष्वपि सुखाभिमानः रसो वर्तते[८]। अनेन प्रकारेण तस्य मूलाहङ्कारस्यानेकेषु भावेषु स्फुरणं भवति। अस्यामवस्थायामेकस्माद् बीजभूतादहङ्कारादुत्पन्नाः नैके भावाः पूर्णविकासं प्राप्नुवन्ति। अस्याः मध्यमावस्थायाः पूर्णविकसिता भावाः, विकसिता अपि भावाः एव। अस्यामवस्थायामेते विकसिताः भावाः उपचाराद् रसव्यपदेशभाजो भवन्ति। अस्यामवस्थायां रतिहासोत्साहादिभावाः शृङ्गार-हास्यवीररूपेण परिणमन्ति। वस्तुत एष एव दण्डिना रसवदलङ्कारो भणितोऽस्ति। एवं भोजानुसारं पूर्वावस्थायाः पारमार्थिको रसो मध्यमावस्थायां व्यावहारिकी सत्तां धत्ते।

अहङ्काराख्यस्य रसस्य या तृतीयावस्था वर्तते सा दण्डिनः प्रेयसालङ्कारो वर्तते। अस्याञ्चावस्थायां रत्यादीनां परप्रकर्षाधिगमे भावनाविषयतातिक्रमे रसरूपेण परिणतिः भवति। तद्यथा -

**यदेव रोचते मह्यं तदेव कुरुते प्रिया।**
**इति वेत्ति न जानाति तत् प्रियं यत्करोति सा॥**[९]

अस्यामवस्थायां परप्रकर्षं प्राप्ताः रत्यादयः सर्वे भावाः पुनरेकस्मिन् रसे परिणमन्ति, यः खलु रसः 'प्रेमन्' इत्यभिधीयते। अर्थात् रत्यादीनां प्रकर्षः 'प्रेमन्' कथ्यते। अनेन विधिना मध्यमावस्थायाः अनेके रसाः पुनः 'प्रेमन्' इत्येतन्नामकेऽस्मिन् रसे समन्विताः भवन्ति। एतेषां रत्यादीनां भावानामानन्दप्राप्तिरेव

तेषामुत्कर्षः। तत्तद्भावविषयकः आनन्द एव तं तं भावं प्रति प्रेमरूपो वर्तते। अत एव सर्वेषां भावानामुत्कर्षः 'प्रेमन्' इत्येकेनाभिधानेनाभिधीयते। तदुक्तमपि –

'रसत्वं हि प्रेमण्येवामनन्ति, सर्वेषामेव हि रत्यादिप्रकर्षाणां रतिप्रियो रणप्रियोऽमर्षप्रियः परिहासप्रिय इति प्रेमण्येव पर्यवसानात्'।

सिद्धान्तोऽयमुपनिषदः 'आत्मनस्तु कामाय सर्वं प्रियं भवतीति सिद्धान्तमिमं अनुसरन्नस्तीति प्रतिभाति। अनेन प्रकारेण भोजस्य तृतीयामावस्थायां रसस्य केवलमेकं एव रूपं भवति। एषा च रसस्य पारमार्थिकी सत्तेत्यभिधातुं शक्यते। एषैव रसस्याद्वैतावस्था। मध्यमा चावस्था रसस्य व्यावहारिकी अवस्था यस्यां खलु अनेके रसाः प्रतीयन्ते। तृतीयावस्थायां मध्यमावस्थायाः विकृतयः प्रथमावस्थायाः प्रकृतिं प्राप्नुवन्ति।

भोजसिद्धान्तानुसारं मूलो रसः एक एव। तदनु सर्वे भावाः समुत्पद्यन्ते। एते सर्वेऽपि भावाः रसव्यवहारभाजो भवितुं शक्यन्ते, किन्त्वेतेषु रसव्यवहार उपचारादेव शक्यः। (यद्यपि शृङ्गार एव एको रसः, तथापि तत्प्रभवा ये रत्यादयस्तेप्युद्दीपनविभावैरुद्दीप्यमानः तदनुप्रवेशादेव, संचारिणाम् अनुभवानां च निमित्तभावमुपयन्तः रसव्यपदेशं लभन्ते) एवमन्ते च एको रसः 'प्रेमन्' रूप एव प्रतीयते।

भोजानुगुणस्य रसस्य तिस्रः अवस्थाः –

**प्रथमावस्था** – मूलाहङ्कारः(रूढाहङ्कारः)

**मध्यमावस्था** – शृङ्गार-हास्य-वीरादिरसरूपे परिणताः रत्यादयो भावाः(रसवद्)

**उत्तरावस्था** – 'प्रेमन्' इत्याख्यो रत्यादीनां परमोत्कर्षः(ऊर्जस्वी)

अनेन प्रकारेणात्रोक्तं सर्वं सवृत्तिपद्यत्रयेण स्पष्टं भविष्यति –

**सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभवनिर्मितवासनोत्थः।**
**सर्वात्मसम्पदुदयातिशयैकहेतुर्जागर्ति कोऽपि हृदि मानमयो विकारः॥**
**रत्यादयोऽर्धशतमेकविवर्जिता हि भावाः पृथग्विधविभावभुवो भवन्ति।**
**शृङ्गारतत्त्वमभितः परिवारयन्तः सप्तार्चिषं द्युतिचया इव वर्धयन्ति॥**
**अभावनोदयमनन्यधिया जनेन यो भाव्यते मनसि भावनया स भावः।**
**यो भावनापथमतीत्य विवर्तमानः साहङ्कृते हृदि परं स्वदते रसोऽसौ॥**[१०]

अहङ्कारस्य रसत्वे वृत्तावप्येवमभ्यधायि –

एतेन रूढाहङ्कारता रसस्य पूर्वा कोटिः। रत्यादीनामेकोनपञ्चाशतोऽपि विभावानुभाव-व्यभिचारिसंयोगात् परप्रकर्षाधिगमे रसव्यपदेशार्हता रसस्यैव मध्यमावस्था। 'प्रेयः प्रियतराख्यानम्' इत्युपलक्षणेन यथा रतेः प्रेमरूपेण परिणतिस्तथा भावान्तराणामपि परमपरिपाके प्रेमरूपेण परिणतौ रसैकायनमिति रसस्य परमा काष्ठेति प्रतिष्ठितं भवति।[११]

अनेन स्फुटं यदहङ्कारविशेष एव भोजमते रसः न तु भावनाविषयः स्थायी।

**सन्दर्भाः -**


१. तैत्तिरीय उपनिषद्-२.७

२. शृङ्गारप्रकाश-एकादशप्रकाशः

३. शृङ्गारप्रकाशः २२.२

४. शृङ्गारप्रकाशः३ - १.३, ४, ५, ६, ७, ८

५. काव्यादर्शः

६. शृङ्गारप्रकाशः- पृ.६२५

७. शृङ्गारप्रकाशः- पृ.६२५

८. मनोऽनुकूलेषु दुःखादिषु आत्मनः सुखाभिमानः रसः। शृ.प्र.

९. शृङ्गारप्रकाशः पृ.६२५

१०. शृङ्गारप्रकाशः पृ.६२४-६२५

११. शृङ्गारप्रकाशः पृ.६३६



*शोधच्छात्रः, साहित्यविभागः,*

*राष्ट्रियसंस्कृतसंस्थानम्,*

*जयपुरपरिसरः, जयपुरम्*


**विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य।**
**काञ्चनमणिसंयोगो नो जनयति कस्य लोचनान्दम्।।**

# न्यायमतेन प्रामाण्यविमर्शः

**हरिराममीना**

प्रमाणज्ञानात्प्राक् प्रमाज्ञानमावश्यकमतो प्रथमं प्रमास्वरूपं विविच्यते। न्यायनये ज्ञानं द्विविधं स्मृतिरनुभवश्चेति। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः, तद्भिन्नं ज्ञानमनुभवः।[१] सोऽपि द्विविधः– प्रमा अप्रमा च। यथार्थानुभवः प्रमा, अयथार्थानुभवश्चाप्रमा। प्रमा प्रमितिर्यथार्थानुभवो इति प्रमाशब्दस्य पर्यायाः। न्यायकुसुमाञ्जलिकारेण उदयनाचार्येण यथार्थानुभवत्वेन प्रमाया लक्षणं प्रपञ्चितम्। दोषाजन्यज्ञानत्वं यद्वा विशेष्यावृत्यप्रकारकज्ञानत्वमिति। प्रमालक्षणं क्रियते वैशेषिकै :।

नैयायिका बाह्यार्थसत्तामभ्युपगच्छन्ति। बौद्धमतनिरसनप्रकरणे भाष्यकारो वात्स्यायनः स्पष्टमुक्तवान् यद् बुद्ध्या विविच्यमानानां पदार्थानां नास्त्यनुपलब्धिर्नाम।[२] वस्तुस्वरूपस्य यथार्थानुभूतिः प्रमा तत्करणञ्च प्रमाणमित्युच्यते। वस्तुनो यथार्था स्वरूपविषये भाष्यकाराणामिदं वचनं–यद्वस्तु यथाभूतं तत्तथैव अविपरीतं गृह्यमाणं तत्त्वं विपरीतञ्च गृह्यमाणमतत्त्वं भवति।[३]। यस्य वस्तुनो येन रूपेणास्तित्वं तस्य तेन रूपेण ग्रहणं प्रमा, अन्यथा च ग्रहणमप्रमा भवति। अर्थाद् यद्वस्तु यद्धर्मवन्न भवति तस्य तद्धर्मवत्त्वज्ञानमप्रमेत्यर्थः। यथा रजतत्वविशिष्टे रजते रजतत्वप्रकारकं ज्ञानं प्रमा, तद्धीनायाञ्च शुक्तौ रजतत्वावगाहिज्ञानमप्रमेति फलितोऽर्थः। न्यायसिद्धान्तमुक्तावलीकर्त्रा आचार्यविश्वनाथेन प्रमायाः लक्षणद्वयमुक्तम्। प्रथमं तावत्– 'भ्रमभिन्नत्वे सति ज्ञानत्वं' प्रमायाः लक्षणम्। अपरञ्च– 'तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं' प्रमायाः लक्षणम्। अत्र शुक्तिरजतयोः 'इमे रजते' इति ज्ञानं रजते रजतविषयकत्वांशे प्रमा परञ्च तत्र भ्रमभिन्नत्वं नास्त्यतो न तस्य प्रमात्वमतो लक्षणान्तरमुक्तम्।

**प्रमाणलक्षणविचारः–**

प्रमीयतेऽनेनेति प्रमाणमिति करणव्युत्पत्त्या प्रमाकरणतया प्रमाणपदं सिद्ध्यति। अर्थात् प्रमाता विषयस्य यथार्थज्ञानं येनाधिगच्छति तत्प्रमाणमित्युच्यते। प्रमायाः साधनं करणं वा प्रमाणं भवति, तदुक्तं वात्स्यायनेन– उपलब्धिसाधनं प्रमाणमिति[४]। इमामेवोक्तव्युत्पत्तिमभिलक्ष्य प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणे कस्यापि दर्शनस्य नास्ति काऽपि विप्रतिपतिः। न्यायदर्शने ज्ञानस्य प्रामाण्यं नाभ्युपेयते, प्रमीयतेऽनेनेति करणव्युत्पत्तेर्बाधात्। वाचस्पतिमिश्र स्मृतिभिन्नामर्थाव्यभिचारिणीं प्रमां निरूप्य तत्साधनं प्रमाणमिति प्रमाणलक्षणं निबबन्ध[५]। समीचीनानुभवस्य साधनं प्रमाणमिति न्यायसारे भासर्वज्ञः[६] अपूर्वमर्थं

विषयीकुर्वद् अर्थज्ञानं प्रमाणमिति मोक्षाकारगुप्तेन उद्घोषितम्। मीमांसादर्शने भाट्टानां प्रमाणलक्षणं प्रमाकरणत्वमेव। वैशेषिकमते दोषरहितं ज्ञानं तत्करणं प्रमाणमित्यभिहितम्। एवमुभयोर्न्यायवैशेषिकदर्शनयोः प्रमाकरणमेव प्रमाणमित्युक्तम्। न्यायमते ज्ञानं तत्साधीनभूतः सामग्रीविशेषश्च प्रमायाः करणं मन्यतेऽतः कारणसाकल्यमिन्द्रियार्थमनः पदार्थप्रकाशादिकारणसामग्री प्रमाणमुक्तं भवति[७]। न्यायसूत्रकार आचार्यगौतमः प्रमाणसामान्यलक्षणप्रदर्शनार्थं न किमपि सूत्रं रचयामास, अपि तु प्रमाणशब्दनिर्वचनेनैव तत्सामान्य-लक्षणसिद्धिर्भवति। एवं प्रमाणशब्दमुत्पत्तिलब्धमेव प्रमाणं लक्षणं वात्स्यायनेनापि स्वीकृतम्। विशेषसारूप्यप्रमाणं विषयाकारमर्थनिश्चयं तत्फलमिति दिङ्नागो निगदति। सांख्यदर्शनानुसारेण विषयाकारान्तः-करणचित्तवृतिः प्रमाणम्। योगदर्शनेऽपि इदमेव लक्षणमभिमतम्। भट्टप्रभाकरमतमवलम्ब्य मीमांसा दर्शनं सम्प्रदायद्वयेन विभक्तम्। तत्र भाट्टमते अनधिगतस्य यथावस्थितस्य चार्थस्य निश्चायकज्ञानं प्रमाणम्। तदुक्तं वासुदेवदीक्षितेन–अनधिगतार्थगन्तृत्वमेव प्रमाणत्वम्। सामान्यतः सकलदार्शनिकमतविवेचनेनेदं सिद्ध्यति यत् ''प्रमाकरणं प्रमाणम्'' इत्येव प्रमाणलक्षणं समेषामभिप्रेतम्। तच्च प्रमाणं कुत्रचिदिन्द्रियम्, कुत्रचिदिन्द्रियसन्निकर्षः कुत्रचिच्च ज्ञानरूपं भवति[८]।

**समीक्षणम्–**

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[९] इति गौतमसूत्रानुरोधेन प्रमाणचतुष्टयसिद्धिः। अत्रेदं जिज्ञास्यं यन्नैयायिकै : किमर्थं चत्वार्येव प्रमाणान्यभ्युपगतानि। यथा हि वेदान्तिभिश्च षट्प्रमाणानि स्वीकृतानि, जैन बौद्धवैशेषिकाश्च द्वे प्रमाणे स्वीकुर्वन्ति, सांख्ययोगमते प्रमाणद्वयमभिमतम्, तथा च कथं नैयायिकानां प्रमाणचतुष्टयम्? न ततोऽधिकं न वा न्यूनमिति? एतज्जिज्ञासायाः समाधानार्थं उच्यते यत् प्रत्यक्षादिचतुःप्रमाणातिरिक्तानां प्रमाणानामेतेषु चतुर्षु अन्तर्भावात्। अथ चैतेषां प्रमाणानामन्यत्रान्तर्भावाभावाद् न्यूनाधिक्यापेक्षपरिहारः।

**सन्दर्भाः–**


१. तर्कसंग्रहे प्रत्यक्षखण्डेः।
२. न्यायभाष्ये–४/२/२७।
३. न्यायभाष्ये–१/३/१।
४. न्यायभाष्ये–१८२।
५. प्रमासाधनं हि प्रमाणम्, न च स्मृतिः प्रमा। लोकाधीनावधारणो हि शब्दार्थसम्बन्धः। (ता.दी. ३४)
६. सम्यग् अनुभवसाधनं प्रमाणम्। (न्या.सा.३२)
७. न्या.वा.ता. चतुस्सूत्री।
८. तर्कभाषा प्रत्यक्षनिरूपणप्रकरणम्।
९. न्यायसूत्रम् १/१/३



*शोधच्छात्रः, सर्वदर्शनविभागः,*
*राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्*

# निपातानां द्योतकत्वं वाचकत्वं वा

अवधेशगोयलः

निपातत्वं नाम किम्? अत्रोच्यते ''प्रागीश्वरा निपाता::' इति। अधीरीश्वरे इत्यतः प्राक् निपाता अधिक्रियन्ते इति तदर्थं अतः प्रादीनां चादीनां चोभयेषां निपातत्वं सङ्गच्छते। अव्ययसंज्ञके सूत्रे– ''स्वरादिनिपातमव्ययम् इत्यत्र स्वरादीनाम् स्वर्, प्रातर्, सनुतर् प्रभृतीनाम्, च वा ह प्रभृतीनां निपातानाञ्चाव्ययसंज्ञा विधीयते। स्वरादिनिपाताद्योः पार्थक्ये प्रयोजनं तु ''आद्युदात्ताः निपाताः'' इत्यनेन निपातानां उदात्तत्वं तदितरेषां स्वरादीनां तद्भिन्नत्वकल्पनमेव।

अत्र नैयायिकाः प्रेपरा अप सम् प्रभृतीनां प्रादीनां द्योतकत्वं, च वा ह प्रभृतीना चादीनां वाचकत्वं संगिरन्ते! तत्र द्योतकत्वं नाम स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वं प्रायेण। तेन अनुभवतीत्यादौ 'अनु' इत्येतत्समभिव्याहृतं समीपोच्चरितं पदं 'भू' प्रभृति तन्निष्ठाया शक्ति–अनुभवार्थबोधिका तस्य उद्बोधकत्वं अनाविति लक्षणसमन्वयः। क्वचिच्च विशेषाक्षेपकत्वं द्योतकत्वम्। तथाहि विलिखति इत्यत्र विमाय लिखतीत्यर्थावगमात्। एवं शक्तिग्राहककोशादिबलार्थबोधजनकत्वाच्चादीनां वाचकत्वं सिध्यति। साक्षात् प्रत्यक्षतुल्ययोरित्यमरः। किञ्च अन्वयव्यतिरेकाभ्यामपिचादीनं वाचकत्वमङ्गीक्रियेत। तथाहि 'इव' सत्वे सदृशार्थबोधः तदसत्वे तदर्थाप्रवृत्तिः इति नैयायिकाः। तदुक्तम् वैयाकरणभूषणसारे–

**द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।**

**उपास्येते हरिहरौ लकारो दृश्यते यथा।। इति**

अत्रेदं विचार्यते। अनुभवतीत्यादौ अनुभवः किम् उपसर्गार्थः विशिष्टस्य अथवा धात्वर्थः। नाद्यः यतो हि अनुभवो यहि तदा भवतेः अनुभवार्थधात्वर्थफलव्यधिकरणत्वाभावादकर्मकत्वात् 'सुखम्' इत्यत्र कर्मत्वानुपपत्तिः किञ्च उपास्येते हरिहरौ इत्यत्र कर्मणि लकारो न स्यात्। न विशिष्टार्थः गौरवात्। अतो अन्ततो धात्वर्थ एव। तेत्र उपसर्गस्य द्योतकत्वे अनुभवार्थकस्य भवतेः सकर्मकत्वे 'सुखम्' इत्यत्र न द्वितीयानुपपत्तिः उपास्येते हरिहरौ इत्यत्र कर्मणि न लकारानुपपत्तिः। इत्थं यथा प्रादीनां द्योतकत्वं तथा ''चन्द्रमिव पश्यामि'' इत्यादौ चन्द्रपदस्य तत्सदृशे लक्षणया चन्द्रस्य सादृश्यातिशिष्टे चन्द्रे स्वीकारार्थ इव पदस्य तात्पर्यग्राहकत्वमात्रात्तस्य द्योतकत्वं सिध्यति। अतः यस्मात् कारणात् प्रादीनां द्योतकत्वं तस्मात्

कारणात् चादीनामपि द्योतकत्वं सामान्यतया सिद्धम्। तदुक्तं भूषणसारे–

**तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।**
**विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः।। इति**

अत एव साक्षात्क्रियते अलङ्क्रियते उरीक्रियते इत्यादावपि धातो साक्षात्काररूपधात्वर्थ-फलव्यधिकरणव्यापारवाचकत्वात् सकर्मकत्वात् कर्मणि लकारः सिद्धः। साक्षात् प्रभृतीनि पदानि त्वत्र तात्पर्यग्राहकरूपाणि। अतः एषां चादीनां द्योतकत्वमेव सिध्यति अत एव 'अथ शब्दानुशासनम्' इत्यत्र 'अथ' शब्द प्रारब्धक्रिया द्योतको न तु वाचकः निपातत्वादुपसर्गवत् इत्युक्तं कैयटेन। निपातत्वं चाखण्डोपाधिरूपं जातिरूपं शब्दस्वरूपं वेति पक्षत्रयेऽपि प्रादिचादिसाधारणमेव। यदि उपसर्गाणां चादीनामिव वाचकत्वं स्वीक्रियते तदा ''उपास्यते गुरुः' इत्यादौ आस् धातोः धात्वर्थफलव्यधिकरणव्यापारवाचकत्वाभावात्तस्य कर्मणि न लकारः सिध्येत अतस्तेषु प्रादिषु वाचकत्वं नाङ्गीकर्तुं शक्यते। अपि चादीनामपि वाचकत्वाङ्गीकारे काव्यादौ तेषां नान्वयः। अन्वये च तदुत्तरं विभक्तीनां श्रवणापत्तिः स्यात्। तदुक्तम्–

**शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।**
**इत्यादावन्यो न स्यात् सुपां च श्रवणं ततः।। इति।।**

उस्रसदृशैः शरैः रससदृशान् उदीच्यान् उद्धरिष्यन् इत्यर्थः। अत्र 'इव' शब्दस्य सादृश्यद्योतकत्वे प्रकृत्यर्थाभावे प्रातिपदिकत्वं न करणत्वं च न तृतीयाविभक्त्युत्पत्तिः। उस्रशब्दस्य विशेषणत्वे शरशब्दस्य विशेष्यत्वे चोभ्यत्र समानविभक्तिकयोरभेदान्वयबोधः। 'इव' शब्दस्य वाचकत्वे तु समानविभक्तिकत्वाभावेऽपि अभेदान्वयबोधाय निपातातिसंकोचस्यावश्यकत्वम्। इति गौरवम्। तदुक्तम्–

निपातातिरिक्तसमानाधिकरणप्रातिपदिकयोरभेदान्वयव्युत्पत्तिरिति नियमः। तेन स्तोकं पचति मृदु पचति इत्यादौ असमानविभक्तिकयोरपि पदयोरभेदान्वयबोधे न क्षतिः। तदुक्तं वैयाकरणभूषणसारे–

**सदृशः सदृशान्वेति विभागेन कदाचन।**
**निपातेतरसंकोचे प्रमाणं किं विभावय।। इति**

अस्माकं मते निपातानां प्रातिपदिकाभावे न नान्वयः। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेत्यत्र निपातशब्दस्य नाम्ना पार्थक्येनोपदिष्टत्वात्। अस्माकं मते उपसर्गनिपातयोः समयोरपि द्योतकत्वस्वीकारे न हानिः। तदुक्तम् आकृत्याधिकरणे

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।**
**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।**
**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।**
**ह्यर्थद्योतकौ तौ तु वाचकः स विचार्यते।। इति**

अनेन सिध्यति यदर्थसंशये सति नामाख्यातयोरेव अर्थकथनव्यापारः ऋषिभिः कृतो नोपसर्गनिपातयोः। यतोहि सामान्यरूपेण उपसर्गनिपातौ द्योतकावेव। अनयोर्वाचकत्वे विशेषरूपेण विचारः कर्त्तव्यः। प्रातिशाख्येऽपि नामाख्यातमुपसर्गो निपातः, चत्वार्याहुः पदजातानि शब्दाः।

तत्र–

**तन्नाम येनाभिदधाति सत्त्वं, तदाख्यातं येन भावं सधातुः।**
**उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्यामितरे निपाताः।।**
**क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।**
**सत्वाभिधायकं नाम निपाताः पादपूरणाः।। इति**

शोधच्छात्रः
व्याकरणविभागस्य,
राष्ट्रियसंस्कृतसंस्थानस्य, जयपुरपरिसरे,
जयपुरे

**व्याख्यातुमेव केचित्कुशलाः शास्त्रं प्रयोक्तुमलमन्ये।**
**उपनामयति करोऽन्नं रसांस्तु जिह्वैव जानाति।।**

# अचः परस्मिन् पूर्वविधौ इति सूत्रविचारः

रतनलालजाटः

समग्रमपि अष्टाध्यायीस्थसूत्रं षोढा विभक्तं

**संज्ञा च परिभाषा च विधिर्नियम् एव च**

**अतिदेशोऽधिकारश्च षड्विधम् सूत्रलक्षणम्।।**

तत्र अचः परस्मिन्पूर्वविधौ इति अतिदेशसूत्रं वर्तते। पारनिमित्तोऽजादेशः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इति सूत्रार्थः। अल्विध्यर्थम् इदम्। सूत्रेऽस्मिन् 'स्थानिवत्' सूत्रेण आदेशपदम् अनुवर्तते स्थानिवत् पदञ्च अनुवर्तते। आदेशग्रहणानुरोधात् 'अचः' पदेऽस्मिन् स्थानषष्ठी अनुष्ठीयते। 'परस्मिन्' पदेऽस्मिन् सति सप्तमी स्वीक्रियते विशेषणञ्च आदेशस्य सूत्रानेन विधीयमानम् अजादेशस्य स्थानिवद्भावः कीदृशः स्यात् इत्याशंकायाम् कथयति नागेशः-अत्र यस्य अजादेशस्य स्थानिवद्भावो विधीयते सः अजादेशः किदृशः स्यात् इति प्रश्नस्य समाधाने नागेशः कथयति यत् सः आदेशः अच् मात्रस्य स्थाने एव भवेत् स चादेशः अजादेश उच्यते। अतः अस्य फलं भवति यत् 'मरुतम् आचष्टे' विग्रहेऽस्मिन् मरुत् शब्देन 'प्रातिपदिकार्थ धात्वर्थे बहुलमिष्ठवद्वा' वार्तिकेनानेन णिच्प्रत्ययः इष्टवद्भावश्च विधीयते टिभागश्च लोपः तदा मर+इ अस्यां स्थितौ 'अत उपधायाः' इत्यनेन वृद्धौ। अत्र लुप्त टिलोपस्य सूत्रानेन स्थानिवद्भावः न स्यात् यतोहि टिलोपः अचमात्रस्थाने न भूत्वा अज्झल् उभयोः स्थाने विधीयते इत्थं मारयतीति निष्पद्यते।

सूत्रेऽस्मिन् यो अच् वर्तते तत् स्थानिक आदेशः एव स्वीक्रियते। सूत्रे स्थानीरूपेण उपात्त यो अचः तत्स्थानिक आदेशो नोपपद्ये। तथैव उक्तम् शेखरे-सूत्रे प्रयोगे योऽच् तत्स्थानिक इत्यर्थः।

भावाभावयोः उभयोरपि अतिदेशः अनेन सूत्रेण क्रियते। स्थानिनि सति यद् भवति तद् आदेशे अपि भवति इति भावातिदेशः यथा निगाल्यते इत्यत्र स्थानिनि णिचि सति 'अचि विभाषा' इति सूत्रेण विधीयमानं लत्वं णिच् लोपेऽपि भवति। स्थानिनि सति यत् न भवति तद् आदेशे अपि न भवति इति अभावातिदेशः। तत् यथा गणयति इति रूपं अत्र गण+इ इत्यवस्थायां स्थानिनि अकारलोपे अपि अकारे

सति 'अत्र उपधाया:' इत्यनेन वृद्धि न भवति। सा च वृद्धि आदेशे अपि न भवति इति अभावातिदेशोऽयम्। अत्र 'काममतिदिश्यताम् सच्चासच्चापि नेह भारोऽस्ति' इति भाष्यप्रमाणं।

**अचः इत्यस्य प्रयोजनम् –**

ननु सूत्रे अचः इति पदं मास्तु इति चेत् न तथा सति परनिमित: आदेश: स्थानिवत् स्यात् स्थानिभूतात्, पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इत्येव अर्थः स्यात्। ततश्च आगत्य इत्यत्र तुक् न स्यात् तथाहि आ इत्यस्य गत्य इत्यनेन सह गति समासे सति क्त्वा प्रत्ययस्य ल्यबोदेशे आगम्य इति स्थिते: 'वाल्यपि' इति सूत्रेण विकल्पेन म् लोप: विधीयते। तत: 'ह्रस्वस्य पिति कृति तुक्' इति सूत्रेण तुगागमे आगत्य इति रूपं सिद्धयति। अच: इति पदाभावे परनिमित: आदेश: = म लोप: स्थानिवत् स्यात्, स्थानीभूतात् मकारात् पूर्वस्य- अकारस्य तुकि कर्तव्ये इत्यर्थलोभेन ल्यप: पूर्वं ह्रस्व: नास्ति इति कृत्वा तुक् न स्यात् अच: इति ग्रहणे कृते मलोप न अजादेश:।

**परस्मिन् पदस्य प्रयोजनम् –**

सूत्रे परस्मिन् पदाभावे युवजानि: इति रूपं न सिध्यति। युवजाया इत्यत्र आकारस्य जायाया निङ् इति सूत्रेण 'नि आदेश: तत: लोपो व्योर्वलि' इति सूत्रेण य लोपे इति रूपसिद्धि:। इदानीम् अजादेश: आकारस्य निङ्-आदेश: स्थानिवत् स्यात्, स्थानिभूतात् आकारात् पूर्वस्य यकारस्य लोपे कर्तव्ये इति स्थानिवद् भावे सति यकारलोप न स्यात् वल्परकत्वावभावात् परस्मिन् ग्रहणे कृते निङादेशो न परनिमित्तिक इति स्थानिवद्भावो न भवति।

पूर्वविधौ इत्यस्य ग्रहणाभावे नैधेय: इत्यत्र नि+ध्+इ इति स्थिते धकारोत्तर-अकारलोपस्य स्थानिवद् भावे सति त्र्यचत्वात् ' 'द्र्यच: इति सूत्रेण ढक् न स्यात्। पूर्वविधौ इति पदे सति प्रकृते स्थानिभूतात् अकारात् पूर्वस्य किमपि कार्यं न क्रियते इति स्थानिवद्भाव न भवति इति।

*शोधच्छात्र: व्याकरणविभाग:*

*जयपुरपरिसरे, जयपुरम्*

# मानसिकस्वास्थ्यसंरक्षण हेतु 'गीता' की उपादेयता

आराधना व्यास

आज का मनुष्य दिन-प्रतिदिन भौतिकवादी होता जा रहा है। फलस्वरूप व्यक्ति का पर्यावरण भी अभौतिक से भौतिक होता जा रहा है। पर्यावरण में इस प्रकार के परिवर्तन के फलस्वरूप समाज में नई समस्याएँ प्रारम्भ हो गई हैं। ये समस्याएँ व्यक्ति के व्यवहार को सरलता से जटिलता की ओर ले जा रही हैं। आज के व्यक्ति के सामने समस्याएँ और बाधाएँ अपेक्षाकृत अधिक हैं क्योंकि प्रतिस्पर्धा के कारण उसका जीवन अधिक गतिशील और जटिल है। यही कारण है कि आज के व्यक्ति शारीरिक रोगों के साथ-साथ मानसिक विकारों से अधिक पीड़ित होने लगे हैं। किसी व्यक्ति की व्यक्तिगत प्रभावशीलता इस बात पर निर्भर नहीं करती है कि वह कितनी समस्याओं और परेशानियों का सामना करता है। बल्कि इस बात पर निर्भर करती है कि वह इन समस्याओं और परेशानियों के प्रति किस प्रकार से प्रतिक्रिया करता है या इनमें वह किस प्रकार से समायोजन करता है। व्यक्ति का जीवन विभिन्न परिस्थितियों में प्रभावपूर्ण समायोजन मुख्यत: उसके मानसिक स्वास्थ्य पर निर्भर करता है। व्यक्ति अपना प्रभावपूर्ण समायोजन तभी कर सकता है जब वह शारीरिक और मानसिक रूप से पूर्णत: स्वस्थ और निरोग रहे।

सामान्य मनुष्य में प्रेम, क्षमा, दया, करुणा तथा सहानुभूति जैसे सकारात्मक भाव कम आते है, ईर्ष्या, लोभ, मोह और क्रोध जैसे नकारात्मक भाव अधिक होते हैं। विचारों की अपनी तरंगें होती हैं। इन तरंगों के माध्यम से विचार एक स्थान से दूसरे स्थान तक और एक व्यक्ति से दूसरे व्यक्ति तक पहुँचते रहते हैं। यदि किसी व्यक्ति के प्रति आप प्रेम और मित्रता का भाव रखते हैं तो वह व्यक्ति धीरे-धीरे आपका मित्र बन जाएगा। इसी प्रकार किसी के प्रति शत्रुता का भाव रखने पर कालान्तर में वह व्यक्ति शत्रु बन जाता है। मनुष्य अपने भावों और विचारों का विकिरण भी करता रहता है। किसी समुदाय में एक व्यक्ति प्रसन्न रहकर अन्यों को भी प्रसन्नाचित्त बना देता है। तथा दु:खी व्यक्ति अपने दु:ख से अन्यों को भी दु:ख ही देता है। नकारात्मक भाव और विचार चारों ओर नकारात्मक ऊर्जा का ही प्रसार करेंगे, जिससे पूरा वातावरण प्रतिकूल रूप से प्रभावित होगा। नकारात्मक विचार हमारे मूल्यों के द्वारा समझौता करवाते हैं। मन इनसे अशान्त ही रहता है। मात्र इतना ही नहीं, नकारात्मक विचारों की

कीमत व्यक्ति को कई अन्य स्तरों पर भी चुकानी पड़ती है। नकारात्मक भावों और विचारों के कारण मनुष्य सामाजिक रूप से अलोकप्रिय और असम्मानित बनता है, जिसका स्वास्थ्य पर भी प्रतिकू ल प्रभाव पड़ता है। नकारात्मक भावों और विचारों का परिमार्जन प्रत्येक बुद्धिमान व्यक्ति की मनोवैज्ञानिक आवश्यकता है। नकारात्मक मनोभावों का नियन्त्रण एक कठिन कार्य अवश्य है किन्तु असम्भव नहीं।

ईर्ष्या, लोभ, मोह, क्रोध जैसे नकारात्मक विचार व्यक्ति को अपने आस-पास के वातावरण और स्वयं को समाज में श्रेष्ठ सिद्ध करने के हेतु के रूप में प्राप्त होते हैं, जो व्यक्ति की मानसिक अस्वस्थता को प्रदर्शित करते हैं। जिनके द्वारा लगभग संसार का प्रत्येक व्यक्ति आज जूझ रहा है। इनके अतिरिक्त मानसिक विकारों के कुछ अन्य कारक भी हैं जैसे–

१. शिक्षा का दोषपूर्ण होना

२. संवेगों की उचित अभिव्यक्ति न होना

३. शारीरिक अस्वस्थता

४. धार्मिक और सांस्कृतिक तत्त्वों का दूषित होना

५. किशोरावस्था

६. निर्धनता

७. सामाजिक परिवर्तन

८. राजनैतिक अस्थिरता

९. बेरोजगारी

१०. बदलते हुए मूल्य आदि।[१]

आधुनिक मनोविज्ञान तथा श्रीमद्भगवद्गीता में इन मनोविकारों के परिमार्जन के लिए पर्याप्त सामग्री उपलब्ध होती है। सामान्य व्यक्ति प्रत्येक विकट परिस्थिति में समायोजन कर मनोविकारों के परिमार्जन का प्रयास करता है जिसमें वह कभी सफल होता है तो कभी असफल। अत: अपने मानसिक स्वस्थ्य के संरक्षण के लिए वह प्रतिदिन कुछ मनोरचनाओं का निर्माण करता है, जिसके आधार पर वह स्वयं को समायोजित प्रकट करता है। यद्यपि मनोविज्ञान अनेक विधियों के माध्यम व्यक्ति का मार्गनिर्देशन करता है किन्तु इसकी विधियाँ आज भी अपरिपक्व ही प्रतीत होती है। अत: गीता ही एक ऐसा श्रेष्ठ मार्गदर्शन है जो चिरकाल से लोगों का मार्गदर्शन करता चला आ रहा है। यह आधुनिक मनोविज्ञान की तुलना में अधिक भरोसेमन्द है। यथा–

क्रोध एक प्रचण्ड मनोवेग हे, प्रत्येक व्यक्ति कभी न कभी इसका शिकार होता ही है। अध्यात्म और मनोविज्ञान दोनों ने इसके नियन्त्रण के लिए उपाय बताये हैं। मनोवैज्ञानिकों के अनुसार १. क्रोध को दबा दीजिए अथवा २. क्रोध को व्यक्त कर दीजिए। चिकित्सकों के मतानुसार क्रोध को दबाने से

अनेक शारीरिक व मानसिक व्याधियाँ उत्पन्न होती हैं तथा क्रोध को व्यक्त कर देने से कुछ राहत अवश्य प्रतीत होती हे। किन्तु बार-बार क्रोधाभिव्यक्ति के कारण यह एक आदत के रूप में परिणत हो जाती है जिससे क्रोध से मुक्त होना असंभव सा हो जाता है। अतः क्रोध को नियन्त्रित करने के लिए उसे दबाना या व्यक्त करना, दोनों ही उचित प्रतीत नहीं होता।

क्रोध हमारा एक प्रमुख शत्रु है तािा गीता में अनेक स्थानों पर इसका उल्लेख हुआ है–

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते।।**
**क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।**[२] इति।

इन श्लोकों में भगवान् श्रीकृष्ण क्रोध के उत्पन्न होने के कारण, उससे होने वाली हानि और उसे नियन्त्रित करने के उपाय पर प्रकाश डालते हैं।

तात्पर्य यह हे कि क्रोध से मुक्ति के लिए विषयों के प्रति मन में रस उत्पन्न ही न हो। यदि विषयों के प्रति कुछ अनुराग उत्पन्न हो ही गया हो तो इच्छा की उत्पत्ति न हो। क्योंकि इच्छापूर्ति में बाधा से ही क्रोध उत्पन्न होता है। इच्छाओं का गणित विचित्र है। एक इच्छा पूर्ण होते ही अनेक अन्य इच्छाएँ उत्पन्न हो जाती हैं जिनमें से अधिकांश की पूर्ति ही नहीं हो पाती फलस्वरूप क्रोध की उत्पत्ति होती है। अतः क्रोध को समाप्त करने के लिए आकांक्षाओं को समाप्त करना आवश्यक है। वस्तुतः हमारे कार्य हमारे शुभसंकल्पों की शक्ति से संचालित होने चाहिए न कि इच्छाओं के अनियन्त्रित प्रवाह से।

वर्तमान समय में जीवन को सर्वाधिक प्रभावित करने वाला एक अन्य मनोविकार अवसाद है जिससे संसार का लगभग प्रत्येक तीसरा व्यक्ति इससे पीड़ित है। जो मनुष्य को आत्महत्या तक करने के लिए प्रेरित कर देता है। वस्तुतः निरन्तर विपरीत परिस्थितियों में जीवन जीते हुए व्यक्ति अवसादग्रस्त हो ही जाता है।

अपवाद का स्पष्ट उदाहरण कुरुक्षेत्र में दोनों सेनाओं के मध्य में खड़ा अर्जुन है जिसके अवसाद के उपशमन के लिए भगवान् श्रीकृष्ण ने गीता का उपदेश दिया। श्रीमद्भगवद्गीता में अवसाद के सोलह लक्षणों का प्रतिपादन हुआ है–

१. सीदन्ति मम गात्राणि, (शरीर की शिथिलता)
२. मुखं च परिशुष्यति। (मुख की शुष्कता)
३. वेपथुश्च शरीरे मे (शरीर का पसीना-पसीना होना)
४. रोमहर्षश्च जायते।। (रोमहर्ष)

५. गान्डीवं संस्रते हस्तात्, (हाथ से वस्तुओं का छूट जाना)

६. त्वक् चैव परिदह्यते। (त्वचा का जलना)

७. न च शक्नोम्यवस्थातुं (शिरोभ्रम)

८. भ्रमतीव च मे मनः।।[४] (उन्मनस्कता)

९. निमित्तानि च पश्यामि, विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि, हत्वा स्वजनमाहवे।।[५] (विपरीतनिमित्तदर्शनम्)

१०. न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।[६] (कर्म में अप्रवृत्ति)

११. न काङ्क्षे विजयं कृष्णं, न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द, किं भोगैर्जीवितेन वा।।[७]
एतान्न हन्तुमिच्छामि, घ्नतोऽपि मधुसूदन।।[८]
एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।।[९] (अकर्म में प्रवृत्ति)

१२. विसृज्य सशरं चापं, शोकसंविग्नमानसः।।[१०] (विषाद)

१३. तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।।[११] (ईक्षण की अश्रुपूर्णता)

१४. न चैतद्विद्मः कतरन्नो गरीयो।।[१२]
पृच्छामि त्वां धर्मसम्मूढचेताः।।[१३] (किंकर्तव्यमूढ़ता)

१५. श्रेयो भोक्तुं भैक्ष्यमपीह लोके।।[१४]
ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दनः
तत्किं कर्मणि घोरे मां नियोजयसि केशव।।[१५] (विपरीतचिन्तनम्)

१६. एतन्मे संशयं कृष्ण, च्छेत्तुमर्हस्यशेषतः।।[१६] (मोह, संशय)

जब कभी भी कोई व्यक्ति अवसादग्रस्त होता है तो कम से कम या ज्यादा से ज्यादा ये सोलह लक्षण तो प्रकट होते ही हैं। शरीर की शिथिलता से लेकर शिरोभ्रम तक सात लक्षण और कर्म में अप्रवृत्ति, अकर्म में प्रवृत्ति, दृष्टि का अश्रुपूर्ण होना ये तीन लक्षण अवसाद के शारीरिक लक्षण हैं। मानसिक स्तर पर उन्मनस्कता, विपरीत निमित्त-दर्शन, विषाद तथा बौद्धिक स्तर पर किंकर्तव्यमूढ़ता, विपरीत चिन्तन मोह अथवा संशय प्रकट होते हैं। शरीर पर मन का और मन पर बुद्धि का नियन्त्रण होता है। मन शरीर और बुद्धि के बीच सेतु का कार्य करता है। अतएव मन का संतुलित होना आवश्यक है। अर्जुन ने श्रीकृष्ण जैसे मार्गदर्शक पाकर अपने अवसाद को नष्ट कर दिया, हम सभी श्रीकृष्ण जैसे मार्गदर्शक प्राप्त कर सकें।

निश्चित ही भविष्य को दृष्टि में रखकर ही भगवान् श्रीकृष्ण ने लोगों के मानसिक स्वास्थ्य के

संरक्षण के लिए ही इस ''श्रीमद्भगवद्गीता'' नामक ग्रन्थ का निदर्शन किया है। गीता में ध्यान, सात्विक और शुद्ध आहार, सद्विचार, परमात्मा का चिन्तन तथा समर्पण भाव आदि के माध्यम से मनोभावों को नियन्त्रित करने के अनेक उपाय बताये गये हैं जिनका व्यक्ति को अपनी रुचि और शक्ति के अनुसार चयन कर उनका सतत अभ्यास करना चाहिए।

**सन्दर्भाः–**


१. आधुनिक सामान्य मनोविज्ञान
२. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक ६२,६३
३. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक २९
४. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ३०
५. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ३१
६. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक ९
७. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ३२
८. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ३५
९. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ४७
१०. श्रीमद्भगवद्गीता, अध्याय-१, श्लोक ४७
११. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक १
१२. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक ६
१३. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक ७
१४. श्रीमद्भगवद्गीता, अध्याय-२, श्लोक ५
१५. श्रीमद्भगवद्गीता, अध्याय-३, श्लोक १
१६. श्रीमद्भगवद्गीता, अध्याय-६, श्लोक ८९



*शोधच्छात्रा*
*व्याकरण विभाग,*
*राष्ट्रियसंस्कृत संस्थान, जयपुर परिसर*
*जयपुर*

# वैदिकवाङ्मयेऽलङ्कारशास्त्रीयतत्त्वानि

**दुर्गा सैन**

संस्कृतशास्त्रेषु अलङ्कारशास्त्रस्य महत्त्वपूर्णं स्थानमस्ति। अलङ्कारशास्त्रं नितरां प्राचीनं शास्त्रमस्ति। वैदिकसाहित्यं जगतः प्राचीनतमसाहित्यमस्ति अतः वैदिकसाहित्ये अलङ्कारशास्त्रीयतत्त्वानां स्थितिः तस्य प्राचीनतां प्रमाणयति।

अलङ्कारशास्त्रं काव्यस्य शास्त्रमस्ति। वैदिकाः ऋषयः कविहृदयाः आसन्। ऋषि-कविः लोकद्रष्टा तु भवत्येव तेनैव सह तत्त्वद्रष्टाऽपि भवति। वस्तुतो यः ऋषिः नास्ति स कविरपि भवितुं नार्हति। एवमेव दर्शनशक्तिसम्पन्नोऽपि कश्चित् कविश्चेत् स्वानुभूतिं प्रकटीकर्तुं समर्थो न भवेत् तर्हि तद् दर्शनम् अनुर्वरभूमौ निपतितं बीजमिव अस्फुटितमेव स्थास्यति।

वैदिकवाङ्मये ऋषिकवयोरभेदप्रतिपादकानि नैकानि श्रुतिवचनानि मिलन्ति। ऋग्वेदे उशना काव्यपदेनापि व्यपदिष्टः -उशना काव्य[1]इति। अत्र ध्यातव्यमस्ति यद् उशनसे सर्वत्र पुल्लिङ्गे काव्यशब्दः प्राप्यते कविकर्मणि स्तोत्राद्यर्थे च नपुंसकलिङ्गे प्राप्यत इति विशेषः। उशना वेदे ऋषिकवित्वेनापि वर्णिता दृश्यते। उक्तं च -एते वै कवयो यदृषयः[2]। इति। यजुर्वेदे साक्षात् परमात्माऽपि कविरूपे वर्णितो वर्तते - कविर्मनीषी परिभूः स्वयम्भूः[3]। अनेन ऋषित्वं कवित्वं च परस्परमविरुद्धमित्यपि सिद्ध्यति।

वेदो हि सृष्टेरपूर्वमकाव्यम्, यतो हि विविधज्ञान-विज्ञानसङ्गीतायुर्वेदादीनां किं वा निखिलानां विद्यानामपि मूलभूताः वेदाः सन्ति। अतः काव्यशास्त्रस्यापि मूलं वेद एवास्तीति नात्र सन्देहः। वैदिकसंहितानामुपनिषदां च मन्त्रेषु प्रायः उत्कृष्टकाव्योदाहरणानि लोचनगोचरतां यान्ति। तेषु साहित्यशास्त्रे प्रतिपादितानां गुणालङ्काररीतिध्वन्यादीनां काव्यतत्त्वानामपि रम्योदाहरणानि समुपलभ्यन्ते। वैदिक-वाङ्मयमहोदधेः मन्थनेन ज्ञायते यत् रामायणात् महाभारताच्च आरब्धा या काव्यतरङ्गिणी निरन्तरं भास-कालिदास-भारवि-भवभूतिप्रभृतीनां युगेऽपि प्रवहमाना अवर्तत तस्या मूलं वेदेषु विद्यमानं वरीवर्ति। रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति इत्याद्युक्तिभिः काव्यात्मभूतस्य रसस्यापि साक्षादुल्लेखः सम्प्राप्यते।

उपनिषत्साहित्यं तु काव्यानुभूतिदृष्ट्या कलाभिव्यक्तिदिशा च अत्यधिकं महत्त्वपूर्णमस्ति। उपनिषदां हि मुख्य प्रयोजनं प्रकृतिब्रह्म जीवानां रहस्योद्घाटनमस्ति। उपनिषत्सु गूढगूढतरदार्शनिकतत्त्वानां चित्ताकर्षकपद्धत्या प्रकाशनार्थम् ज्ञाततया अज्ञाततया वा ऋषिभिरलङ्कृतभाषाया विरोधाभासस्य,

व्यङ्ग्यपूर्णसंवादादीनां च सहजतया प्रयोगो विहितः। अस्मादेव कारणाद् उपनिषत्सु अपि सहज काव्यानि दृष्टिपथमवतरन्ति।

अस्माभिरवलोक्यते यदुपनिषत्कविः कमप्येकं विषयं नानाप्रकारैरभिव्यनक्ति। तस्याभिव्यक्तिप्रकारः साहित्यमर्मज्ञदृष्ट्या कदाचित् अलङ्कारस्य स्वरूपं धारयति तु कदाचिद् गुणरीतिवक्रोक्तिध्वन्यौचित्यानाम्। कविः स्ववाग्वैदग्ध्येन वर्ण्यविषये नवीनतामुत्पादयितुं विविधतामाश्रयति। उक्तं च ऋग्वेदे –

**प्रपर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।**
**गावेव शुभ्रे मातरा रिहाणे विपाट् शुतुद्री पयसा जवेते॥**[४]

अस्मिन् मन्त्रे वर्णितम् अस्ति यत् अनेकसहस्रवर्षेभ्यः प्राक् यदा ऋषिविश्वामित्रः शिष्यैः सह शुतुद्रिविपाशयोः सङ्गमस्थलं गतस्तदा तेनानुभूतं यत् पर्वतोत्सङ्गादुत्पन्ने शुतुद्रीविपाशे नद्यौ सोत्कण्ठं सागरं प्रति विहसन्त्यौ गच्छन्त्यौ बन्धनमुक्ते वऽवे यथा वत्सावलेहनेच्छया धावन्त्यौ शुभ्रगावाविव च शुशुभाते।

अस्मिन् ऋग्वेदीयमन्त्रे उत्तमकाव्यस्य सर्वाणि वैशिष्ट्यानि विराजन्ते। अत्र शृङ्गारेण सह वात्सल्यभावोऽपि व्यज्यते। माधुर्यगुणेन सहोपमालङ्कारोऽपि चमत्करोति। वैदिकसाहित्यस्य भाषा श्रवणसुखदा विवक्षितार्थप्रकाशनसमर्था प्रवाहपूर्णा च अस्ति। ऋग्वेदे प्राकृतिकदृश्येषु उषा सुन्दरी सर्वोत्कृष्टतया वर्णिता वर्तते। तस्या रसात्मकं कलात्मकं च वर्णनं संस्कृतसाहित्ये नूनमनितरसाधारणं विश्वसाहित्ये च नितरां महत्त्वपूर्णमस्तीति नात्र सन्देहावसरः। ऋषिभिरुषसः सर्वाधिकं रमणीयस्वरूपं वर्णितं विद्यते। एकत्र सा दिवः दुहिता वर्तते त्वन्यत्र ज्योतिर्मयी काप्यपूर्वा सुन्दरी। क्वचित् तु सा रागात्मकवृत्त्या सूर्यपत्नीरूपे वर्णिता दृश्यते। तथाहि –सूर्यस्य योषा[५]।

सूर्य उषसं तथैव सोत्कण्ठमनुधावति यथा मानवः काञ्चिदद्वितीयसुन्दरीम् –सूर्यो देवीमुषसे रोचमानां मर्यो न योषामभ्येति पश्चात्[६]। उदयकालिकस्य भानोरपूर्वकमनीयतामालोक्य ऋषिणा प्रकटितः ललितोद्गारो नूनमत्र स्मरणीयः –

**अभ्रातेव पुंस एति प्रतीची गर्वारुगिव सनये धनानाम्।**
**जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते उप्सः॥**[७]

अस्मिन् ऋग्वेदीयमन्त्रे उपमालङ्कारेणालङ्कृतः शृङ्गाररसोऽभिव्यज्यते।

ऋग्वेदस्य २५० सूक्तेषु अपरिमितबलशालिन इन्द्रस्य अद्वितीयशौर्यस्य वर्णनमुपलभ्यते। तत्र वीररसस्थायिभावस्य उत्साहस्य रौद्रस्थायिनः क्रोधस्य च हृदयावर्जकं वर्णनं दर्शनीयमस्ति। तत्रोत्साहोत्कर्षो यथा –

**यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषयत्।**
**यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥**[८]

वैदिकमन्त्रेषु क्वचित् उत्साहेन सह क्रोधस्यापि प्रबलता दृश्यते। यथा –

**अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हुत एधि।**
**हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो वि मृधो नुदस्व॥**[९]

अनेनैव प्रकारेण क्वचित्– प्राधान्येन भयस्यापि वर्णनं वेदेषु प्राप्यते।

**वैदिकसाहित्ये वर्णिताः अलङ्काराः –**

अलङ्कारशास्त्रं वेदेभ्यः आविर्भूतम्। तत्र अलङ्कारशास्त्रस्य व्यवस्थितरूपं तु न प्राप्यते तथापि अलङ्कारशास्त्रीयतत्त्वानां मूलस्रोतः वैदिकसाहित्यमेव अस्ति। वेदेषु अलङ्काराणां रमणीयप्रयोगाः दृश्यन्ते। यथा –

१. **उपमा–** उपमा वेदेषु प्रायः पदे–पदे प्रसिद्धानां सर्वेषामप्यलङ्काराणां झङ्कारः श्रूयते। अर्थालङ्कारेषु उपमालङ्कारस्य बहूनि रम्योदाहरणानि मिलन्ति। तत्रोपमालङ्कारस्योदाहरणं यथा ऋग्वेदे –

**कन्येव तन्वा शाशदानां एषि देवि देवमियक्षमाणाम्।**
**संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाति॥**[१०]

कठोपनिषद्यपि पूर्णोपमायाः कमनीयमुदाहरणमिदमवलोकनीयम् –

**यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।**
**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥**[११]

उपनिषत्सु तु मालोपमाया अप्यतीव रम्यमुदाहरणं प्राप्यते। यथा –

**तिलेषु तैलं दधिनीव सर्पिरापः स्रोतः स्वरणीषु चाग्निः।**
**एवमात्माऽऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति॥**[१२]

अस्मिन् मन्त्रे परमात्मनि आत्मनः स्वरूपं विज्ञापयितुम् उपमानां माला कविहृदयेन ऋषिणा निर्मिता। उपमालङ्कारस्य बहूनां भेदानां ललितोदाहरणानि वेदेषु प्राप्यन्ते।

२. **रूपकम्–** वेदेषु रूपकालङ्कारस्य अनेकस्थलेषु कमनीयप्रयोगो दृश्यते। ऋग्वेदस्य निम्नाङ्किते सुप्रसिद्धमन्त्रे चत्वारः ऋत्विज एवं यज्ञकर्मणः शृङ्गाररूपाः प्रातः सवनादयस्त्रयः पादाः यजमानस्तत्पत्नी च द्वे शिरसी, गायत्र्यादिसप्तछन्दांसि चास्य सप्त हस्ताः सन्ति। ऋगादिभिस्त्रिभिर्वेदैरयं निबद्धो वर्तते। विविधकामनावृष्ट्या वृषभ उच्यते। एतादृशः प्रौढो यज्ञदेवः मनुष्येषु प्राविशत्, मनुष्या एव यज्ञाधिकारिण इति भावः। तथाहि मन्त्रः –

**चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥**[१३]

अत्र हि रूपकालङ्कारगिरा यज्ञवर्णने ऋषिकविना कमनीया कल्पना विहिता। अस्यार्थो निरुक्ते महाभाष्ये नाट्यशास्त्रे च भिन्न-भिन्नरूपेण उपलभ्यते।

एवं च -

**स्तनयित्नुस्ते वाक् प्रजापते वृषा शुष्मं क्षिपसि भूम्यां दिवि।**
**पृथिवी दण्डोऽन्तरिक्षं गर्भो द्यौः कशा विद्युत् प्रकाशो हिरण्ययो बिन्दुः॥**[१४]

अस्मिन् मन्त्रे भगवतो विराड्रूपस्य रूपकगिरा वर्णनं कुर्वन् अथर्वाऋषिः कथयति - हे प्रजापते! गर्जनं तव वाक्, वर्षणं बलम्, पृथिवी दण्डः, अन्तरिक्षं गर्भः, द्यौः कशा, विद्युत् प्रकाशः, हिरण्ययश्च बिन्दुः।

कठोपनिषदि साङ्गरूपकस्य रमणीयमुदाहरणमवश्यं दर्शनीयम् -

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥**[१५]

श्वेताश्वतरोपनिषदि एकदेशविवर्तिरूपकस्याप्युदाहरणं प्राप्यते। तथाहि -

**नवद्वारे पुरे देही हंसो लेलायते बहिः।**
**वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च॥**[१६]

अस्मिन् मन्त्रे शरीरे पुरस्यारोपं विधाय इन्द्रियेषु नवद्वाराणामारोपस्तु ऋषिकविना कृतः किन्तु पुरसंबद्धस्य कस्यचिदन्यस्याङ्गस्यारोपो नास्ति। अस्मादत्र एकदेशविवर्तिरूपकालङ्कारः।

३. **उत्प्रेक्षा-** उपमालङ्कार इव उत्प्रेक्षालङ्कारोऽपि सर्वेभ्योऽत्यधिकं रोचते। उत्प्रेक्षाविषयेऽपि सूक्तिरियं सुप्रसिद्धा वर्तते यत् -

**सर्वालङ्कारसर्वस्वं कविकीर्तिविवर्धिनी।**
**उत्प्रेक्षा हरति स्वान्तमचिरोढा स्मितादिव॥**[१७]

सम्पूर्णमपि संस्कृतसाहित्यमुत्प्रेक्षायाः सौन्दर्येण मण्डितमस्ति। वेदेषु उत्प्रेक्षालङ्कारस्य मनोरमः प्रयोगो दृश्यते।

ऋग्वेदस्य अथर्ववेदस्य च अधोलिखितमन्त्रे उत्प्रेक्षाया उत्कृष्टतावलोकनीयता -

**पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातोऽर्णवम्।**
**विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः॥**[१८]

सूर्यो हि पूर्वं पूर्वस्यां दिशि समुदेति तदनन्तरं प्रतीच्यां गच्छति। अथ चन्द्र उदितो भूत्वा सूर्यमनुसरन्निव

प्रतीयते। प्राकृतिकमिदं सौन्दर्यमवलोक्य ऋषिणा कल्पितं यत् लोके यथा क्रीडन् कश्चित् बालकोऽपरमनुधावति तथैव मन्येऽन्तरिक्षे शिशू सूर्यचन्द्रमसावपि क्रीडत इवेति। एतादृशी चमत्कारपूर्णा नवकल्पना किं महाकाव्यपद्यात् न्यूना विद्यते?

पर्जन्यसूक्तस्य एकस्मिन् मन्त्रे वैचित्र्यपूर्णा कल्पना अपि विलोक्यते यत्र वर्षाजलधारा अजगरतया कल्पिताः सन्ति –

**आपो विद्युदभ्रंवर्षंसे वोऽवनतु सुदानव उत्सा अजगरा उत।**
**मरुद्भिः प्रच्युता मेघाः ग्रावन्तु पृथिवीमनु॥**[१९]

अस्मिन् मन्त्रे उतशब्दप्रयोगाद् उत्प्रेक्षायाः स्वरूपं स्वयमेव भासते।

४. **अतिशयोक्ति** – अतिशयोक्तिर्हि अध्यवसायमूलोऽभेदप्राधानोऽलङ्कारः। वेदेषु अतिशयोक्त्य अलङ्कारस्य यथास्थानं वर्णनम् उपलभ्यते यथा –

**सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्।**
**तेना सहस्येऽना वयं नि जनान्त्स्वापयामसि॥**[२०]

अस्मिन् मन्त्रे सहस्रशृङ्गस्य वृषभस्याश्चर्यकरं वर्णनमवलोक्यते। अत्र अन्तरिक्षादाविर्भवतः सहस्रभानोः वर्णनमस्ति किन्तु उपमानेन वृषभेण अन्तः निगीर्णत्वात् तस्य पृथक् प्रतीतिर्न जायते। अत्र हि सूर्यवर्णने ऋषेः कल्पना लोकातिक्रान्ता नितरां चमत्कारमुत्पादयति। अस्मादतिशयोक्त्यलङ्कारः। ऋग्वेदस्याधोलिखितमन्त्रो हि गभीरभावाभिव्यञ्जनार्थम् अतिशयोक्तिचमत्कारप्रकाशनार्थं च सुप्रसिद्धोऽस्ति –

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षमभिषष्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति॥**[२१]

द्वौ सखायौ पक्षिणौ (जीवात्मपरमात्मानौ) एकमेव वक्षम् (शरीरम्) परिषस्वजाते (आलिङ्गतः)। तयोरन्यः (जीवात्मा) स्वादु पिप्पलम् (शब्दादिविषयान् तज्जन्यसुखानुभवरूपं कर्मफलम्) भुङ्क्ते। परमन्यः (परमात्मा) तादृश भोगपराङ्मुख एव साक्षिरूपेण सर्वत्र प्रतिभासते। अत्र जीवाद्युपमेयानां विहगाद्युपमानैः निर्गीयाध्यवसानाद् अतिशयोक्तिः। रसगङ्गाधरे पण्डितराजजगन्नाथेनाप्यत्र अतिशयोक्त्यलङ्कारः स्वीकृतः। अत्र माधुर्यगुणः पदद्योत्यो ध्वनिश्च येन जीवात्मपरमात्मनोः नित्यता चेतनता चाभिव्यज्येते।

५. **विरोधाभास** – विरोधमूलालङ्कारेषु विरोधाभासः प्रमुखतमः अस्ति। आ ईषद् भासत इत्याभासः विरोधश्चासावाभास इति विरोधाभासः।

अलङ्कारोऽयं प्राचीनकालात् विरोधोऽथवा विरोधाभासनाम्ना कथ्यते। उपनिषत्सु विरोधाभासस्य बहून्युदाहरणानि विलोक्यन्ते। यथा –

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति॥**[२२]

अस्मिन् मन्त्रे अनेजत् जवीयः धावतः तिष्ठत् इति परमेश्वरस्य परस्परं विरुद्धक्रिययोः प्रतिपादनाद् आपाततो विरोधः प्रतीयते किन्तु तस्य सर्वत्र विद्यमानत्वात् नित्यत्वाच्च विरोधपरिहारो जायते। तेनात्र चमत्कारविशेषाद्विरोधाभासालङ्कारः।

ईशोपनिषदि विरोधाभासस्य चमत्कारो विलोकनीयः –

**तदेजति तन्नैजति तद्दूरे तदन्तिके।**
**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥**[२३]

अस्मिन् मन्त्रे एजति–नैजति, दूरे अन्तिके, सर्वस्य अन्तरस्य – सर्वस्य बाह्यतः, इत्यापाततः परस्परं विरुद्धा इव भासमाना धर्माः सूक्ष्म–दृष्ट्या निवारिते सत्यविरुद्धा जायन्ते।

तथाहि अत्र वर्ण्यमानं परब्रह्म मायया रहितं तथा मायया सहितमपि लोके स्वीक्रियते। तदेव ब्रह्म संसारस्यास्य कारणमपि वर्तते। अस्मात् इमे पूर्वोक्ता धर्मविरोधाः स्वयं परिहृता भवन्ति। अस्मादत्र विरोधाभासलङ्कारः भवति।

६. **विभावना-** अयमलङ्कारोऽपि विरोधमूल एवास्ति। हेतुं विनैव यत्र कार्योत्पत्तिर्वर्ण्यते तत्र विभावना।

श्वेताश्वतरोपनिषदः मन्त्रेऽस्मिन् विभावनायाश्चमत्कारो झटिति सामाजिकान् समाकर्षति –

**अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।**
**स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥**[२४]

अत्र अपाणिपादेन ग्रहणचलनयोः अनेत्रेणापि दर्शनस्य अकर्णेनापि च श्रवणसामर्थ्यस्य वर्णनात् हेतुं विनाऽपि कार्योत्पत्तेः विभावनालङ्कारः।

एवमेव दृष्टान्त–प्रतिवस्तूपमा–समासोक्तिप्रभृतीनां प्रायः सर्वेषामपि प्रमुखालङ्काराणां रम्यतराण्युदाहरणानि वेदेषूपलभ्यन्ते। न केवलमलङ्काराणामेव प्रत्युत गुणरीत्यादीनामपि नैकोदाहरणानि विलोक्य इदं सुस्पष्टं ज्ञायते यत् अस्माकं ऋषयस्तैस्तैः प्रायः सर्वैरपि काव्यशास्त्रीयतत्त्वैः सुपरिचिता आसन्। अस्मादेव तैः यथावसरं तेषां तत्त्वानां समुचितो ललितश्च प्रयोगो विहितः।

अनेन प्रकारेण स्पष्टमस्ति यत् वैदिकवाङ्मयेऽलङ्कारशास्त्रीयतत्त्वानि विपुलमात्रेण समुपलब्धमस्ति।

**सन्दर्भाः** –


१. ऋग्वेद १.८.३.५
२. शतपथब्राह्मण १.४.२.८
३. यजुर्वेदः ४०.८
४. ऋग्वेदः ३.३.९
५. ऋग्वेदः ७.७५.५
६. अलङ्कारशास्त्रेतिहासः, डॉ. जगन्नारायण पाण्डेयः, पृ.सं. २०

७. अलङ्कारशास्त्रेतिहासः, पृ.२१
८. ऋग्वेदः २.१२.१
९. ऋग्वेदः १०.८४.२ अथर्ववेद ४.३१.२
१०. पूर्ववत् १.१२३.१०
११. कठोपनिषद् ३.६
१२. श्वेताश्वतरोपनिषद् १.१५
१३. ऋग्वेदः ३.१०.३
१४. अथर्ववेद ९.१.२०-२१
१५. कठोपनिषद् ३.३
१६. श्वेताश्वतरोपनिषद् ३.१८
१७. अलङ्कारशास्त्रेतिहासः, डॉ. जगन्नारायण पाण्डेयः, पृ.सं. २३
१८. ऋग्वेदः १०.८५.१८ वा अथर्ववेदः ७.८.१.१
१९. अथर्ववेदः ४.१५.९
२०. पूर्ववत् ४.५.१ तथा ऋग्वेदः ७.५५.७
२१. ऋग्वेदः १.१६४.२०
२२. ईशावास्योपनिषद् ४
२३. ईशावास्योपनिषद् ५
२४. अलङ्कारशास्त्रेतिहासः, डॉ. जगन्नारायण पाण्डेयः, पृ.सं. २८

# साहित्यपदार्थः

डॉ. राधावल्लभशर्मा

कोऽयं साहित्यपदार्थ इति विचारवर्त्मनि नैके विमर्शा दृष्टिपथमायान्ति। तत्र तावत् वाङ्मय-काव्य-तदलङ्कारवाचकत्वेन सुप्रथितोऽयं साहित्यपदार्थः। असौ साहित्यपदार्थो व्यापकार्थे प्रायोजि शास्त्रिभिः। शब्दार्थसम्बन्धविशेषस्य वाचकोऽयं साहित्यपदार्थः तत्तच्छास्त्रे तत्तदर्थे प्रयोगबाहुल्यात् प्रसिद्ध एव। साहित्यमेकक्रियान्वयित्वम् यथा - धवखदिरपलाशांश्छिन्धीत्यत्र धवखदिरपलाशप्रतियोगिकं यत् साहित्यं तन्निरूपितं यदवयवविभागरूपं फलं तज्जनिका या छिदिक्रिया तदनुकूलकृतिमाँस्त्वमिति सारमञ्जर्यां स्पष्टीकृतम्। शब्दार्थयोः सहभावस्य अनतिरसाधारणस्य प्रतिपादनादयं साहित्यपदार्थः। 'सिद्धे शब्दार्थसम्बन्धे' इति वदता महाभाष्यकारेण भगवता पतञ्जलिना शब्दार्थयोर्नित्यसम्बन्धः प्रोक्तः। इत्थं शब्दार्थयोः सर्वत्र शास्त्रे लोके च सहभावः सिद्धः। शब्देन सहार्थः सहितः, अर्थेन सह शब्दः सहितः। सहितं च सहितं च सहिते सहितयोर्भावः साहित्यम्। इत्थं शब्दार्थयोः व्यङ्ग्यार्थाभिव्यक्तौ यः सहभावः स एव साहित्यम्।

साहित्यवृक्षकारिकायां भण्यते आचार्यराधावल्लभत्रिपाठिना -

**साहित्यं वटवृक्षः वाङ्मयविश्वेऽद्भुतोऽनुपम एव।**
**व्याप्ता यस्यानन्ताः शाखा अभितोऽभ्रचुम्बिन्यः॥**[1]

वाङ्मयविश्वस्य यत्ललितं रूपं तदेव साहित्यमिति फलितार्थः। साहित्यपदार्थं विशदयता गदति आचार्यरामकुमारशर्मा स्वनिर्मितकारिकायाम् -

**हितं हितेन सम्बद्धं धृति-पोषणकर्मता।**
**धारणं पोषणं चैव सहभावोऽतिसन्निधिः॥**
**षडर्था अस्य विद्यन्ते योगशक्त्याश्रया इमे।**
**भावे स्वार्थ इहोक्तः ष्यञः क्तो भावे च कर्मणि॥**[2]

शब्दार्थयोः वक्रताविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहाख्यः सहभावः साहित्यमिति कुन्तकेन अभाणि। तस्मादुच्यते तत्रैव वक्रोक्तिजीविते ग्रन्थे -

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्वनोहारिण्यवस्थितिः॥**[3]

शब्दार्थयोः अन्यूनानतिरिक्तत्वमनोहारिणि परस्परस्पर्धित्वरमणीया अपूर्वा काऽपि विन्यासभङ्गीह अभीष्टा वर्तते।

तद्यथा –

**मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।**
**अलङ्करणविन्यासो वक्रतातिशयान्वितः॥**
**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।**
**स्पर्धया विद्यते यत्र यथास्वमुभयोरपि॥**
**स काऽप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा।**
**पदादिवाक्यपरिस्पन्दसारः साहित्यमुच्यते॥**[४]


प्रवर्त्तमानायामस्यां साहित्यपदार्थचर्चायामभिनवकाव्यालङ्कारसूत्रे साहित्यपदव्यपदेशप्रसङ्गे विद्यानिवासमिश्रस्याऽभिमतमुररीकुर्वन् व्याख्यातीत्थं साहित्यपदार्थमाचार्यराधावल्लभत्रिपाठी –

साहित्यं नाम विहितत्वं, प्रहितत्वं, पिहितत्वं, सन्निहितत्वं, निहितत्ववहितत्वं वा। विधातुः सृष्टे रूपान्तरणाद् नवीनविधानकरणाद् वा विहितत्वम्, आच्छादनात् पिहितत्वम्, आत्मीयतया सन्निहितत्वं सम्यगविन्यासान्निहितत्वं, सम्प्रेषणात् प्रहितत्वं, समाधिनिष्ठतया रचयितुमर्हत्वादववहितत्वं चेति।

कोशकारैः साकल्यम्, सादृश्यम्, यौगपद्यम्, समृद्धिः, सम्बन्धः, सामर्थ्यमिति नैकेऽर्थाः शब्दस्यास्य प्रपञ्चिताः। साहित्ये समाजस्य जनस्य च सर्वविधा गतिविधयः प्रतिबिम्बिता भवन्ति। साहित्यरचनया कविः स्वनवनवोन्मेषशालिन्या प्रज्ञया जगतः प्रपञ्चं सहृदयहृदयसंवेद्यं लोकोत्तरस्य निर्माय स्वान्तःसुखाय सर्वजनहितायानन्दाय सदुपदेशाय च प्रस्तौति। सर्वमपीत्थं क्रोडीकृत्य जगाद राजशेखरकविः – अलङ्कारशास्त्रं सप्तमं वेदाङ्गम्, पञ्चदशं कालविद्यास्थानम् पञ्चमी साहित्यविद्येति। साहित्यशब्दस्यास्य प्रयोगः काव्यशास्त्रे विदधाति श्रीमान् मुकुलभट्टाचार्यः –

**पदवाक्यप्रमाणेषु तदेतत् प्रतिबिम्बितम्।**
**यो योजयति साहित्ये तस्य वाणी प्रसीदति॥**[५]

किं साहित्यम्? यः शब्दार्थयोः सम्बन्धः। अयं सम्बन्धः द्वादशधेति साहित्यस्वरूपजिज्ञासाप्रसङ्गे आचार्यभोजः शृङ्गारप्रकाशेऽवादीत् –



महाकवेरभिराजराजेन्द्रमिश्रस्यायमाशयः यत् शब्दार्थसमष्टिसंवलितं साहित्यमेव तद् विज्ञानमूलम्। वाङ्मयं साहित्यमित्युभयेऽपि पर्यायभूते। यथा शब्दार्थयोः सहितयोर्भावः साहित्यं तथैव शब्दार्थसंवलनाया वाचः प्राचुर्यं वाङ्मयमिति सुखं वक्तुं शक्यते। अमुमेव भावमितोऽपि परिष्कृत्याचार्यशिवज्युपाध्यायो वक्ति–

**वस्तुनि क्वचिदप्येतत्सौन्दर्यं सत्तिरोभवत्।**
**येनाविष्क्रियते तच्च साहित्यं कविकर्मजम्॥**[6]

वस्तुतः ज्ञानसाहचर्योभयार्थे साहित्यशब्दप्रयोगोऽभियुक्तैर्बहुत्र कृतः। तथा हि – परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यम् इति श्राद्धविवेकमतम्। तुल्यवदेकक्रियान्वयित्वम् बुद्धिविशेषविशेष्यत्वं वा साहित्यमिति स्पष्टमुक्तं शब्दशक्तिप्रकाशिकायाम्। शब्दार्थयोः साहित्यतया द्विविधः सम्बन्धो वस्तुतः चर्चितः –

१. शब्दार्थान्तरप्रतियोगिकः तदुभयान्तरानुयोगिकः शब्दप्रतियोगिकोऽर्थानुयोगिकः, अर्थप्रतियोगिकः शब्दानुयोगिकश्चेत्येकः सम्बन्धः।

२. शब्दार्थद्वयानुयोगिको गुणालङ्कारादिप्रतियोगिकश्चेति परः सम्बन्धः। तथा चोक्तं व्यक्तिविवेकटीकायाम्–

न च काव्ये शास्त्रादिवदर्थप्रतीत्यर्थं शब्दमात्रं प्रयुज्यते सहितयोः शास्त्रयोस्तत्र प्रयोगात्। साहित्यं तुल्यकक्षत्वेनान्यूनातिरिक्तवृत्तित्वम्। आचार्य क्षेमेन्द्रः कविकण्ठाभरणे साहित्यपदं स्फुटं व्यवहरति–

तद्यथा –

**कुर्वीत साहित्यविदः सकाशे श्रुतार्जनं काव्यसमुद्भवाय।**
**न तार्किकं केवलशाब्दिकं वा कुर्याद् गुरुं सूक्तिविकासविघ्नम्॥**
**श्रुत्वाभिनवगुप्ताख्यात् साहित्यं बोधवारिधेः।**
**आचार्यशेखरमणेर्विद्याविवृतिकारिणः॥**

अत्र साहित्यपदमिदं काव्यसामान्यार्थकमेव व्यनक्ति नितराम्।

**सन्दर्भाः–**


१. साहित्यवृक्षकारिका, ०१
२. आचार्यरामकुमारशर्मप्रणीतेकारिके
३. वक्रोक्तिजीवितम्–१/७
४. वक्रोक्तिजीवितम्, ३४–३६
५. अभिधावृत्तिकातृका कारिकासङ्ख्या–१४
६. साहित्यसन्दर्भे–साहित्यस्वरूपविमर्शः, पृ.सं. ४७



*सहायकाचार्यः, आदर्शसंस्कृतमहाविद्यालयः,*
*भगोला, हरियाणा*

# आचार्य वैद्यनाथ झा की गरिमापूर्ण विदाई

दिनांक ३१ जनवरी, २०१९ को राष्ट्रिय संस्कृत संस्थान (मानित विश्वविद्यालय) जयपुर परिसर में सर्वदर्शन विभाग के अध्यक्ष एवं आचार्य वैद्यनाथ झा का विदाई समारोह मनाया गया। समारोह की तैयारियाँ तो पहले से ही चल रही थी किन्तु उस दिन सुबह आठ बजे से ही झा जी के छात्र-छात्राएँ और विभाग के अध्यापक हिंद केसरी सभागार तथा उनके कक्ष को रंगों एवं गुब्बारों से सजाने में बड़े उत्साह से लगे हुए थे। बीच-बीच में वे भावुक भी हो रहे थे, हर किसी की आँखें नम हो रही थी किन्तु परिसर के सभी सदस्य बड़ी आत्मीयता एवं सम्मानपूर्वक इस कार्यक्रम को अन्तिम रूप देने में लगे हुए थे।

दोपहर करीब डेढ़ बजे झा जी अपने घर से परिसर के दरवाजे पर आये तो पहले से ही उपस्थित अध्यापक एवं छात्र-छात्राओं ने ढ़ोल-नगाड़ों से उनका स्वागत किया। प्राचार्य अर्कनाथ चौधरी जी की अगुवाई में झा जी को बड़े आदर एवं सम्मान के साथ हिंद केसरी सभागार में लाया गया। डॉ. पवन व्यास संचालन के लिए अपनी आँखों में विदाई की ललाई लिए हुए बड़े भावुक नजर आ रहे थे। डॉ. धर्मेन्द्र पाठक ने वैदिक तथा साहित्य विभाग के छात्र देवांगभट्ट ने लौकिक मंगलाचरण का मधुर ध्वनि से पाठ किया। परिसर प्राचार्य अर्कनाथ चौधरी ने आचार्य वैद्यनाथ झा को स्मृतिचिह्न, सफल कलश एवं अभिनन्दन पत्र देकर स्वागत किया। अध्यक्षीय भाषण में उन्होंने बताया कि वैद्यनाथ झा जी हमेशा ही संतोषी प्रवृत्ति के रहे हैं। इनकी यही प्रवृत्ति इनके सुखी होने का कारण भी रही है।

शिक्षा विभाग के आचार्य सोहनलाल पाण्डेय ने कहा कि वैद्यनाथ झा जी का 'कक्षा शिक्षण' पर हमेशा ही जोर रहा है, उन्होंने 'कक्षा शिक्षण' को नियमित बनाते हुए विद्यार्थियों में पढ़ने की रुचि पैदा की। व्याकरण विभागाध्यक्ष आचार्य शिवकान्त झा ने अपने पुराने संस्मरण सुनाये। उन्होंने वैद्यनाथ झा जी के छात्र जीवन से लेकर जयपुर परिसर तक के संस्मरण सुनाते हुए बताया कि झाजी घर पर भी शास्त्र चर्चा ही करते रहते थे इसलिए अनेक अध्यापक एवं छात्र उनके आवास पर आते-जाते रहते थे। आधुनिक विभाग के अध्यक्ष आचार्य गजेन्द्रप्रकाश शर्मा ने जम्मू परिसर से जुड़े संस्मरण सुनाते हुए कहा कि उन्होंने मेरे भीतर भक्ति भाव का राग पैदा किया जो आज तक बना हुआ है। उनकी प्रेरणा से ही मैं वेद, पुराणादि का अध्ययन कर पाया। व्याकरण विभाग के आचार्य कमलचंद योगी ने उन्हें

देशभर के सौ संस्कृत विद्वानों की सूची में शामिल करते हुए कहा कि उनके जैसा बहुमुखी प्रतिभा का आचार्य कोई दूसरा नहीं है। प्रो. वाय.एस. रमेश ने आचार्यश्री के शिक्षकीय व्यक्तित्व पर विमर्श करते हुए शास्त्रशिक्षण के प्रति उनकी अभिरुचि एवं सङ्क्रमण कौशल को सराहनीय बताया। इस अवसर पर डॉ. राकेश कुमार जैन ने प्रो. रामकुमार शर्मा द्वारा विरचित अभिनन्दन पद्यों का सस्वर वाचन भी किया।

हिंदी विभाग की सहायक आचार्या डॉ. रेखा कुमारी ने कहा कि एक अध्यापक सौ प्रशासनिक अधिकारियों को बना सकता है किन्तु सौ अधिकारी मिलकर एक अध्यापक का निर्माण नहीं कर सकते। डॉ. सुभाष चन्द्र ने कहा कि आचार्य वैद्यनाथ झा जी ने जयपुर परिसर के अंधेरे कोनों को अपने ज्ञान के प्रकाश से रोशन किया है।

इसके अतिरिक्त परिसर के आचार्य श्रीयांशकुमार सिंघई, आचार्य फतेहसिंह, आचार्या संतोष मित्तल, आचार्य श्रीधर मिश्र, आचार्य विष्णुकान्त पाण्डेय, सह-आचार्या डॉ. शुभस्मिता मिश्र और डॉ. किशोर कुमार दलाई तथा सहायक आचार्य डॉ. धर्मेन्द्र कुमार पाठक, डॉ. सुभाष चन्द्र मिश्र ने भी अपने विचार व्यक्त किये।

अन्त में सर्वदर्शन विभाग की आचार्या सत्यम कुमारी ने धन्यवाद ज्ञापन किया। कार्यक्रम का संचालन डॉ. पवन व्यास ने किया।

**प्रस्तुति – डॉ. सुभाष चन्द्र**

# ❋ चित्रवीथी ❋

आचार्यवैद्यनाथझामहोदयानां
सौप्रस्थानिकसमारोहः





आचार्यवैद्यनाथझामहोदयान्
सफलकलशप्रदानेन सभाजयन्तः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः
विभागाध्यक्षाः अतिथयश्च

परिसरपक्षतः आचार्यवैद्यनाथझामहोदयेभ्यः
राङ्कवं प्रयच्छन्तः
प्राचार्याः विभागाध्यक्षवृन्दश्च






अभिनन्दनपत्रप्रदानेन
आचार्यवैद्यनाथझामहोदयानां
सम्माननं कुर्वन्तः प्राचार्याः अतिथयश्च



अतिथीनां स्वागतं कुर्वन्तः
आचार्यवैद्यनाथझा महोदयाः

शिक्षकदिवससमारोहे मञ्चमलङ्कुर्वाणा
विद्वांसः वामतः क्रमशः प्रो.रमाकान्तपाण्डेयः,
प्रो.वी.पी.रूपम्, प्रो. चन्द्रकान्तशुक्लः,
प्रो.अर्कनाथचौधरी, श्रीश्यामसुन्दरः,
प्रो. मञ्जूषा शर्मा च






शिक्षकदिवससमारोहे
डॉ.राधाकृष्णन्महोदयस्य
समर्चनं कुर्वन्तः
प्राचार्यः प्रो.अर्कनाथचौधरीमहोदयाः

ज्योतिषविभागेन समायोजितायां
राष्ट्रीयसंगोष्ठ्यां राष्ट्रियसंस्कृतसंस्थानस्य
परीक्षानियन्त्रकाणां प्रो.ईश्वरभट्टमहोदयानां
सम्माननं कुर्वन्तः परिसरसदस्याः



शिक्षाशास्त्रविभागेन समायोजिते
स्वच्छताभियाने प्राचार्याणां
प्रो.अर्कनाथचौधरीमहोदयानां
स्मृतिचिह्नप्रदानेन सभाजनं कुर्वन्तः
प्रो. फतेहसिंहमहोदयाः





संस्कृतसप्ताहमहोत्सवे विविधस्पर्धासु
पुरस्कृतैः छात्रैः सह समूहचित्रम्

स्वातन्त्र्यदिवसमहोत्सवे भाषमाणाः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः





जयपुरपरिसरपक्षतः जम्मूकश्मीरे
पुलवामास्थाने हुतात्मभ्यः सैनिकेभ्यः
श्रद्धाञ्जलिः दीपमालिकार्पणञ्च



जयपुरपरिसरे बहूद्देशीयभवनस्य शिलान्यासं कुर्वन्तः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो.परमेश्वरनारायणशास्त्रिमहोदयाः तत्कालीनप्राचार्याः श्रीप्रकाशपाण्डेयमहोदयाश्च

जयपुरपरिसरे बहूद्देशीयभवनस्य शिलान्याससमारोहे पूजनं कुर्वन्तः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो.परमेश्वरनारायणशास्त्रिमहोदयाः तत्कालीनप्राचार्याः श्रीप्रकाशपाण्डेयमहोदयाश्च





प्राचार्यमहोदयानां प्रो.अर्कनाथचौधरीमहोदयानाम् आचार्यवैद्यनाथझामहोदयानां च मार्गदर्शने परिसरे स्वच्छतां कुर्वन्तः प्राध्यापकाः, कर्मचारिणः छात्राश्च

स्वच्छताभियाने स्वपरिसरे स्वच्छतां कुर्वन्तं प्राचार्याः प्रो.अर्कनाथचौधरीमहोदयाः परिसरसदस्याश्च



क्रीडादिवसे परिसरप्राङ्गणे कबड्डीक्रीडां
क्रीडन्तः क्रीडालवः





क्रीडादिवसे परिसरप्राङ्गणे क्रीडालुभिः
सह परिचयं सम्पादयन्तः
प्राचार्यः प्रो. अर्कनाथचौधरी
प्रो. ओमप्रकाशभडाना
प्रो. गजेन्द्रप्रकाशशर्मा च

क्रीडादिवसे परिसरप्राङ्गणे कबड्डीक्रीडां
पश्यन्तः
प्राध्यापकाः छात्राश्च





क्रीडादिवसे परिसरप्राङ्गणे
उपस्थिताः विद्वांसः प्रो. गजेन्द्रप्रकाशशर्मा,
प्रो. सोहनलालपाण्डेयः, प्रो. ओमप्रकाशभडाना,
प्रो. अर्कनाथचौधरी,
प्रो. शिवकान्तझाः श्रीराजेन्द्रशर्मा च

संस्कृतसप्ताहमहोत्सवस्य उद्घाटनसमारोहे
मञ्चस्थाः राष्ट्रपतिसम्मानिताः
प्रो.दयानन्दभार्गवाः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः
प्रो.जगत्नारायणपाण्डेयमहोदयाश्च







संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसमारोहे
भाषमाणाः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः
मञ्चस्थाः श्रीरमेशखत्री
प्रो.देवर्षि–कलानाथशास्त्रिणः
राजस्थानसंस्कृताकादम्या
निदेशिका डॉ. जयादवे अन्ये च

संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसमारोहे
मङ्गलगानं कुर्वन् भट्टदेवाङ्गः
मञ्चस्थाः– डॉ. पवनव्यासः
प्रो.देवर्षि कलानाथशास्त्रिणः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः
राजस्थानसंस्कृताकादम्या
निदेशिका डॉ. जयादवे अन्ये च





संस्कृतसप्ताहमहोत्सवे विजेतृभ्यः छात्रेभ्यः
पुरस्कारान् प्रयच्छन्तः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः
राष्ट्रपतिसम्मानितविद्वांसः
देवर्षिकलानाथशास्त्रिणः
अतिथयश्च




आकाशवाणी जयपुरम्
राष्ट्रियसंस्कृतसंस्थानं च एतयोः
संयुक्ततत्त्वावधाने समायोजिते
संस्कृतकविसमवाये समवेताः
प्रो. स्व. हरिरामआचार्याः
देवर्षिकलानाथशास्त्रिणः अन्ये च कवयः

संस्कृतकविसमवाये स्वर्यातान्
प्रो. हरिराम–आचार्यमहोदयान्
सभाजयन्तौ
आकाशवाणी–जयपुरस्य
अधिकारिणौ





व्याकरणविभागेन समायोजितायां
राष्ट्रियसङ्गोष्ठ्यां मुख्यातिथीनां
भगवत्शरणशुक्लमहोदयानां सभाजनं
कुर्वन्तः व्याकरणविभागाध्यक्षाः
प्रो. शिवकान्तझाः प्राचार्यवर्याश्च

साहित्यविभागेन समायोजितायां
राष्ट्रियसङ्गोष्ठ्याः उद्घाटनसत्रे समुपस्थिताः
विद्वांसः वामतः प्रो.रामकुमारशर्मा,
डॉ.सनन्दनत्रिपाठी प्रो. जगत्नारायणपाण्डेयः
प्रो.अर्कनाथचौधरी, प्रो. सुरेन्द्रकुमारशर्मा,
डॉ.राकेशकुमारजैनः





क्रीडालुभिः समम् आचार्यवैद्यनाथझामहोदयाः



जयपुरपरिसरे आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठसमितेः (IQAC) गोष्ठ्यां मार्गदर्शनं कुर्वन्तः
प्राचार्याः प्रो. अर्कनाथचौधरीमहोदयाः विभागाध्यक्षाः कर्मचारिणश्च

# राष्ट्रियसंस्कृतसंस्थानम्
# उद्देश्यानि

- ❋ दुर्लभ–प्राच्य–संस्कृतज्ञानसंरक्षणाय विविधशाखासंवलितस्य संस्कृत–वाङ्मयस्य अध्ययनाध्यापनयोः व्यवस्थापनम्।
- ❋ संस्कृतशिक्षणे वैज्ञानिकपद्धतिसमन्वयमाधाय सुयोग्यानामनुभववतां प्रशिक्षिताध्यापकानां निर्माणम्।
- ❋ प्राच्यपाश्चात्त्योभयविधविद्याविद्योतितस्य संस्कृते सुनिहितस्य साहित्यस्य सानुवादप्रकाशनम्।
- ❋ शोधग्रन्थानामनुसन्धानसहायकसामग्रीणाञ्च प्रकाशनम्।
- ❋ संस्कृत–हस्तलेखानां सम्प्राप्तिसर्वेक्षणसम्पादनप्रकाशनादिषु प्रयतनम्।
- ❋ संस्कृते समुपलब्धानामभिलेखानां सर्वेक्षणपूर्वकं सम्पादनं प्रकाशनं च।
- ❋ प्राचीनार्वाचीनकालदृष्ट्या संस्कृतसाहित्येऽनुसन्धानस्य प्रवर्तनम्।
- ❋ संस्कृतज्ञानप्रसारपरे सर्वविधकार्यक्रमे सहयोगः।

Printed by : M.V. Printer & General Supplier, Jaipur